# Shri Shiva Mahapuranam 7 Vayaviya Samhita

# શ્રીશિવમહાપુરાણમ્ ૭ વાયવીયસસંહિતા

## Document Information

Text title : shivapurANam 7 vAyavIyasaMhitA

File name : shivapurANam7vAyavIyasaMhitA.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members Uma Mahesh, Jayalakshmi Jayaraman, Malati Shekar, Meenakshi Premanand, Lata Murali, Sornavalli K, K C Swaminathan, Gayathri Veda

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૭ વાયવીયસસંહિતા

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥ સપ્તમી વાયવીયસંહિતા

અથ સપ્તમી વાયવીયસંહિતા પૂર્વખણ્ડઃ ।

## ૭.૧.૧. પ્રથમોઽધ્યાયઃ । વિદ્યાવતારકથનમ્ ।

વ્યાસ ઉવાચ ।

નમઃ શિવાય સોમાય સગણાય સસૂનવે ।
પ્રધાનપુરુષેશાય સર્ગસ્થિત્યન્તહેતવે ॥ ૧॥

શક્તિરપ્રતિમા યસ્ય હ્યૈશ્વર્યં ચાપિ સર્વગમ્ ।
સ્વામિત્વં ચ વિભુત્વં ચ સ્વભાવં સમ્પ્રચક્ષતે ॥ ૨॥

તમજં વિશ્વકર્માણં શાશ્વતં શિવમવ્યયમ્ ।
મહાદેવં મહાત્માનં વ્રજામિ શરણં શિવમ્ ॥ ૩॥

ધર્મક્ષેત્રે મહાતીર્થે ગઙ્ગાકાલિન્દિસઙ્ગમે ।
પ્રયાગે નૈમિષારણ્યે બ્રહ્મલોકસ્ય વર્ત્મનિ ॥ ૪॥

મુનયઃ શંસિતાત્માનઃ સત્યવ્રતપરાયણાઃ ।
મહૌજસો મહાભાગા મહાસત્રં વિતેનિરે ॥ ૫॥

તત્ર સત્રં સમાકર્ણ્ય તેષામક્લિષ્ટકર્મણામ્ ।
સાક્ષાત્સત્યવતીસૂનોર્વેદવ્યાસસ્ય ધીમતઃ ॥ ૬॥

શિષ્યો મહાત્મા મેધાવી ત્રિષુ લોકેષુ વિશ્રુતઃ ।
પઞ્ચાવયવયુક્તસ્ય વાક્યસ્ય ગુણદોષવિત્ ॥ ૭॥

ઉત્તરોત્તરવક્તા ચ બ્રુવતોઽપિ બૃહસ્પતેઃ ।
મધુરશ્રવણાનાં ચ મનોજ્ઞપદપર્વણામ્ ॥ ૮॥

કથાનાં નિપુણો વક્તા કાલવિન્નયવિત્કવિઃ ।
આજગામ સ તં દેશં સૂતઃ પૌરાણિકોત્તમઃ ॥ ૯॥

તં દૃષ્ટ્વા સૂતમાયાન્તં મુનયો હૃષ્ટમાનસાઃ ।
તસ્મૈ સામ ચ પૂજાં ચ યથાવત્પ્રત્યપાદયન્ ॥ ૧૦॥

પ્રતિગૃહ્ય સ તાં પૂજાં મુનિભિઃ પ્રતિપાદિતામ્ ।
ઉદ્દિષ્ટમાસનં ભેજે નિયુક્તો યુક્તમાત્મનઃ ॥ ૧૧॥

તતસ્તત્સઙ્ગમાદેવ મુનીનાં ભાવિતાત્મનામ્ ।
સોત્કણ્ઠમભવચ્ચિત્તં શ્રોતું પૌરાણિકીં કથામ્ ॥ ૧૨॥

તદા તમનુકૂલાભિર્વાગ્ભિઃ પૂજ્ય મહર્ષયઃ ।
અતીવાભિમુખં કૃત્વા વચનં ચેદમબ્રુવન્ ॥ ૧૩॥

ઋષય ઊચુઃ ।
રોમહર્ષણ સર્વજ્ઞ ભવાન્નો ભાગ્યગૌરવાત્ ।
સમ્પ્રાપ્તોઽદ્ય મહાભાગ શૈવરાજ મહામતે ॥ ૧૪॥

પુરાણવિદ્યામખિલાં વ્યાસાત્પ્રત્યક્ષમીયિવાન્ ।
તસ્માદાશ્ચર્યભૂતાનાં કથાનાં ત્વં હિ ભાજનમ્ ॥ ૧૫॥

રત્નાનામુરુસારાણાં રત્નાકર ઇવાર્ણવઃ ।
યચ્ચ ભૂતં યચ્ચ ભવ્યં યચ્ચાન્યદ્વસ્તુ વર્તતે ॥ ૧૬॥

ન તવાવિદિતં કિઞ્ચિત્ ત્રિષુ લોકેષુ વિદ્યતે ।
ત્વમદૃષ્ટવશાદસ્મદ્દર્શનાર્થમિહાગતઃ ।
અકુર્વન્કિમપિ શ્રેયો ન વૃથા ગન્તુમર્હસિ ॥ ૧૭॥

તસ્માચ્છ્રાવ્યતરં પુણ્યં સત્કથાજ્ઞાનસંહિતમ્ ।
વેદાન્તસારસર્વસ્વં પુરાણં શ્રાવયાશુ નઃ ॥ ૧૮॥

એવમભ્યર્થિતઃ સૂતો મુનિભિર્વેદવાદિભિઃ ।
શ્લક્ષ્ણાં ચ ન્યાયસંયુક્તાં પ્રત્યુવાચ શુભાં ગિરમ્ ॥ ૧૯॥

સૂત ઉવાચ ।
પૂજિતોઽનુગૃહીતશ્ચ ભવદ્ભિરિતિ ચોદિતઃ ।
કસ્માત્સમ્યઙ્ ન વિબ્રૂયાં પુરાણમૃષિપૂજિતમ્ ॥ ૨૦॥

અભિવન્દ્ય મહાદેવં દેવીં સ્કન્દં વિનાયકમ્ ।
નન્દિનં ચ તથા વ્યાસં સાક્ષાત્સત્યવતીસુતમ્ ॥ ૨૧॥

વક્ષ્યામિ પરમં પુણ્યં પુરાણં વેદસમ્મિતમ્ ।
શિવજ્ઞાનાર્ણવં સાક્ષાદ્ ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૨૨॥

શબ્દાર્થન્યાયસંયુક્તૈરાગમાર્થૈર્વિભૂષિતમ્ ।
શ્વેતકલ્પપ્રસઙ્ગેન વાયુના કથિતં પુરા ॥ ૨૩॥

વિદ્યાસ્થાનાનિ સર્વાણિ પુરાણાનુક્રમં તથા ।
તત્પુરાણસ્ય ચોત્પત્તિં બ્રુવતો મે નિબોધત ॥ ૨૪॥

અઙ્ગાનિ વેદાશ્ચત્વારો મીમાંસા ન્યાયવિસ્તરઃ ।
પુરાણં ધર્મશાસ્ત્રં ચ વિદ્યાશ્ચૈતાશ્ચતુર્દશ ॥ ૨૫॥

આયુર્વેદો ધનુર્વેદો ગાન્ધર્વશ્ચેત્યનુક્રમાત્ ।
અર્થશાસ્ત્રં પરં તસ્માદ્વિદ્યા હ્યષ્ટાદશ સ્મૃતાઃ ॥ ૨૬॥

અષ્ટાદશાનાં વિદ્યાનામેતાસાં ભિન્નવર્ત્મનામ્ ।
આદિકર્ત્તા કવિઃ સાક્ષાચ્છૂલપાણિરિતિ શ્રુતિઃ ॥ ૨૭॥

સ હિ સર્વજગન્નાથઃ સિસૃક્ષુરખિલં જગત્ ।
બ્રહ્માણં વિદધે સાક્ષાત્પુત્રમગ્રે સનાતનમ્ ॥ ૨૮॥

તસ્મૈ પ્રથમપુત્રાય બ્રહ્મણે વિશ્વયોનયે ।
વિદ્યાશ્ચેમા દદૌ પૂર્વં વિશ્વસૃષ્ટ્યર્થમીશ્વરઃ ॥ ૨૯॥

પાલનાય હરિં દેવં રક્ષાશક્તિં દદૌ તતઃ ।
મધ્યમં તનયં વિષ્ણું પાતારં બ્રહ્મણોઽપિ હિ ॥ ૩૦॥

લબ્ધવિદ્યેન વિધિના પ્રજાસૃષ્ટિં વિતન્વતા ।
પ્રથમં સર્વશાસ્ત્રાણાં પુરાણં બ્રહ્મણા સ્મૃતમ્ ॥ ૩૧॥

અનન્તરં તુ વક્ત્રેભ્યો વેદાસ્તસ્ય વિનિર્ગતાઃ ।
પ્રવૃત્તિઃ સર્વશાસ્ત્રાણાં તન્મુખાદભવત્તતઃ ॥ ૩૨॥

યદાસ્ય વિસ્તરં શક્તા નાધિગન્તું પ્રજા ભુવિ ।
તદા વિદ્યાસમાસાર્થં વિશ્વેશ્વરનિયોગતઃ ॥ ૩૩॥

દ્વાપરાન્તેષુ વિશ્વાત્મા વિષ્ણુર્વિશ્વમ્ભરઃ પ્રભુઃ ।
વ્યાસનામ્ના ચરત્યસ્મિન્નવતીર્ય મહીતલે ॥ ૩૪॥

એવં વ્યસ્તાશ્ચ વેદાશ્ચ દ્વાપરે દ્વાપરે દ્વિજાઃ ।
નિર્મિતાનિ પુરાણાનિ અન્યાનિ ચ તતઃ પરમ્ ॥ ૩૫॥

સ પુનર્દ્વાપરે ચાસ્મિન્કૃષ્ણદ્વૈપાયનાખ્યયા ।
અરણ્યામિવ હવ્યાશી સત્યવત્યામજાયત ॥ ૩૬॥

સઙ્ક્ષિપ્ય સ પુનર્વેદાંશ્ચતુર્દ્ધા કૃતવાન્મુનિઃ ।
સઙ્ક્ષિપ્તાન્ સ પુનર્દેદાન્ ચક્રેઽષ્ટાદશધા મુનિઃ ।
વ્યસ્તવેદતયા લોકે વેદવ્યાસ ઇતિ શ્રુતઃ ॥ ૩૭॥

પુરાણાનાં ચ સઙ્ક્ષિપ્તં ચતુર્લક્ષપ્રમાણતઃ ।
અદ્યાપિ દેવલોકે તચ્છતકોટિપ્રવિસ્તરમ્ ॥ ૩૮॥

યો વિદ્યાચ્ચતુરો વેદાન્ સાઙ્ગોપનિષદો દ્વિજઃ ।
ન ચેત્પુરાણં સંવિદ્યાન્નૈવ સ સ્યાદ્વિચક્ષણઃ ॥ ૩૯॥

ઇતિહાસપુરાણાભ્યાં વેદં સમુપબૃંહયેત્ ।
બિભેત્યલ્પશ્રુતાદ્વેદો મામયં પ્રહરિષ્યતિ ॥ ૪૦॥

સર્ગશ્ચ પ્રતિસર્ગશ્ચ વંશો મન્વન્તરાણિ ચ ।
વંશાનુચરિતં ચૈવ પુરાણં પઞ્ચલક્ષણમ્ ॥ ૪૧॥

દશધા ચાષ્ટધા ચૈતત્પુરાણમુપદિશ્યતે ।
બૃહત્સૂક્ષ્મપ્રભેદેન મુનિભિસ્તત્ત્વવિત્તમૈઃ ॥ ૪૨॥

બ્રાહ્મં પાદ્મં વૈષ્ણવં ચ શૈવં ભાગવતં તથા ।
ભવિષ્યં નારદીયં ચ માર્કણ્ડેયમતઃ પરમ્ ॥ ૪૩॥

આગ્નેયં બ્રહ્મવૈવર્તં લૈઙ્ગં વારાહમેવ ચ ।
સ્કાન્દં ચ વામનં ચૈવ કૌર્મં માત્સ્યં ચ ગારુડમ્ ॥ ૪૪॥

બ્રહ્માણ્ડં ચેતિ પુણ્યોઽયં પુરાણાનામનુક્રમઃ ।
તત્ર શૈવં તુરીયં યચ્છાર્વં સર્વાર્થસાધકમ્ ॥ ૪૫॥

ગ્રન્થો લક્ષપ્રમાણં તદ્વ્યસ્તં દ્વાદશસંહિતમ્ ।
નિર્મિતં તચ્છિવેનૈવ તત્ર ધર્મઃ પ્રતિષ્ઠિતઃ ॥ ૪૬॥

તદુક્તેનૈવ ધર્મેણ શૈવાસ્ત્રૈવર્ણિકા નરાઃ ।
તસ્માદ્વિમુક્તિમન્વિચ્છન્ શિવમેવ સમાશ્રયેત્ ॥ ૪૭॥

તમાશ્રિત્યૈવ દેવાનામપિ મુક્તિર્ન ચાન્યથા ॥ ૪૮॥

યદિદં શૈવમાખ્યાતં પુરાણં વેદસમ્મિતમ્ ।
તસ્ય ભેદાન્સમાસેન બ્રુવતો મે નિબોધત ॥ ૪૯॥

વિદ્યેશ્વરં તથા રૌદ્રં વૈનાયકમનુત્તમમ્ ।
ઔમં માતૃપુરાણં ચ રુદ્રૈકાદશકં તથા ॥ ૫૦॥

કૈલાસં શતરુદ્રં ચ કોટિરુદ્રાખ્યમેવ ચ ।
સહસ્રકોટિરુદ્રાખ્યં વાયવીયં તતઃ પરમ્ ॥ ૫૧॥

ધર્મસંજ્ઞં પુરાણં ચેત્યેવં દ્વાદશ સંહિતાઃ ।
વિદ્યેશં દશસાહસ્રમુદિતં ગ્રન્થસઙ્ખ્યયા ॥ ૫૨॥

રૌદ્રં વૈનાયકં ચૌમં માતૃકાખ્યં તતઃ પરમ્ ।
પ્રત્યેકમષ્ટસાહસ્રં ત્રયોદશસહસ્રકમ્ ॥ ૫૩॥

રૌદ્રકાદશકાખ્યં યત્ કૈલાસં ષટ્સહસ્રકમ્ ।
શતરુદ્રં ત્રિસાહસ્રં કોટિરુદ્રં તતઃ પરમ્ ॥ ૫૪॥

સહસ્રૈર્નવભિર્યુક્તં સર્વાર્થજ્ઞાનસંયુતમ્ ।
સહસ્રકોટિરુદ્રાખ્યમેકાદશસહસ્રકમ્ ॥ ૫૫॥

ચતુસ્સહસ્રસઙ્ખ્યેયં વાયવીયમનુત્તમમ્ ।
ધર્મસંજ્ઞં પુરાણં યત્તદ્ દ્વાદશસહસ્રકમ્ ॥ ૫૬॥

તદેવં લક્ષમુદ્દિષ્ટં શૈવં શાખાવિભેદતઃ ।
પુરાણં વેદસારં તદ્ ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૫૭॥

વ્યાસેન તત્તુ સઙ્ક્ષિપ્તં ચતુર્વિંશત્સહસ્રકમ્ ।
શૈવં તત્ર પુરાણં વૈ ચતુર્થં સપ્તસંહિતમ્ ॥ ૫૮॥

વિદ્યેશ્વરાખ્યા તત્રાદ્યા દ્વિતીયા રુદ્રસંહિતા ।
તૃતીયા શતરુદ્રાખ્યા કોટિરુદ્રા ચતુર્થિકા ॥ ૫૯॥

પઞ્ચમી કથિતા ચોમા ષષ્ઠી કૈલાસસંહિતા ।
સપ્તમી વાયવીયાખ્યા સપ્તૈવં સંહિતા ઇહ ॥ ૬૦॥

વિદ્યેશ્વરં દ્વિસાહસ્રં રૌદ્રં પઞ્ચશતાયુતમ્ ।
ત્રિંશત્તથા દ્વિસાહસ્રં સાર્દ્ધૈકશતમીરિતમ્ ॥ ૬૧॥

શતરુદ્રં તથા કોટિરુદ્રં વ્યોમયુગાધિકમ્ ।
દ્વિસાહસ્રં ચ દ્વિશતં તથૌમં ભૂસહસ્રકમ્ ॥ ૬૨॥

ચત્વારિંશત્સાષ્ટશતં કૈલાસં ભૂસહસ્રકમ્ ।
ચત્વારિંશચ્ચ દ્વિશતં વાયવીયમતઃ પરમ્ ॥ ૬૩॥

ચતુસ્સાહસ્રસઙ્ખ્યાકમેવં સઙ્ખ્યાવિભેદતઃ ।
શ્રુતં પરમપુણ્યં તુ પુરાણં શિવસંજ્ઞકમ્ ॥ ૬૪॥

ચતુઃસહસ્રકં યત્તુ વાયવીયમુદીરિતમ્ ।
તદિદં વર્ત્તયિષ્યામિ ભાગદ્વયસમન્વિતમ્ ॥ ૬૫॥

નાવેદવિદુષે વાચ્યમિદં શાસ્ત્રમનુત્તમમ્ ।
ન ચૈવાશ્રદ્દધાનાય નાપુરાણવિદે તથા ॥ ૬૬॥

પરીક્ષિતાય શિષ્યાય ધાર્મિકાયાનસૂયવે ।
પ્રદેયં શિવભક્તાય શિવધર્માનુસારિણે ॥ ૬૭॥

પુરાણસંહિતા યસ્ય પ્રસાદાન્મયિ વર્તતે ।
નમો ભગવતે તસ્મૈ વ્યાસાયામિતતેજસે ॥ ૬૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે વિદ્યાવતારકથનં નામ પ્રથમોઽધ્યાયઃ ॥ ૭.૧.૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨. દ્વિતીયોઽધ્યાયઃ । મુનિપ્રસ્તાવવર્ણનમ્ ।

સૂત ઉવાચ ।
પુરા કાલેન મહતા કલ્પેઽતીતે પુનઃ પુનઃ ।
અસ્મિન્નુપસ્થિતે કલ્પે પ્રવૃત્તે સૃષ્ટિકર્મણિ ॥ ૧॥

પ્રતિષ્ઠિતાયાં વાર્તાયાં પ્રબુદ્ધાસુ પ્રજાસુ ચ ।
મુનીનાં ષટ્કુલીયાનાં બ્રુવતામિતરેતરમ્ ॥ ૨॥

ઇદં પરમિદં નેતિ વિવાદઃ સુમહાનભૂત્ ।
પરસ્ય દુર્નિરૂપત્વાન્ન જાતસ્તત્ર નિશ્ચયઃ ॥ ૩॥

તેઽભિજગ્મુર્વિધાતારં દ્રષ્ટું બ્રહ્માણમવ્યયમ્ ।

યત્રાસ્તે ભગવાન્ બ્રહ્મા સ્તૂયમાનઃ સુરાસુરૈઃ ॥ ૪॥

મેરુશ‍ૃઙ્ગે શુભે રમ્યે દેવદાનવસઙ્કુલે ।
સિદ્ધચારણસમ્બાદે યક્ષગન્ધર્વસેવિતે ॥ ૫॥

વિહઙ્ગસઙ્ઘસઙ્ઘુષ્ટેમણિવિદ્રુમભૂષિતે ।
નિકુઞ્જકન્દરદરીગૃહાનિર્ઝરશોભિતે ॥ ૬॥

તત્ર બ્રહ્મવનં નામ નાનામૃગસમાકુલમ્ ।
દશયોજનવિસ્તીર્ણં શતયોજનમાયતમ્ ॥ ૭॥

સુરસામલપાનીયપૂર્ણરમ્યસરોવરમ્ ।
મત્તભ્રમરસઞ્છન્નરમ્યપુષ્પિતપાદપમ્ ॥ ૮॥

તરુણાદિત્યસઙ્કાશં તત્ર ચારુ મહત્પુરમ્ ।
દુર્દ્ધર્ષબલદૃપ્તાનાં દૈત્યદાનવરક્ષસામ્ ॥ ૯॥

તપ્તજામ્બૂનદમયં પ્રાંશુપ્રાકારતોરણમ્ ।
નિર્યૂહવલભીકૂટપ્રતોલીશતમણ્ડિતમ્ ॥ ૧૦॥

મહાર્હમણિચિત્રાભિર્લેલિહાનમિવામ્બરમ્ ।
મહાભવનકોટીભિરનેકાભિરલઙ્કૃતમ્ ॥ ૧૧॥

તસ્મિન્નિવસતિ બ્રહ્મા સભ્યૈઃ સાર્દ્ધં પ્રજાપતિઃ ।
તત્ર ગત્વા મહાત્માનં સાક્ષાલ્લોકપિતામહમ્ ॥ ૧૨॥

દદૃશુર્મુનયો દેવા દેવર્ષિગણસેવિતમ્ ।
શુદ્ધચામીકરપ્રખ્યં સર્વાભરણભૂષિતમ્ ॥ ૧૩॥

પ્રસન્નવદનં સૌમ્યં પદ્મપત્રાયતેક્ષણમ્ ।
દિવ્યકાન્તિસમાયુક્તં દિવ્યગન્ધાનુલેપનમ્ ॥ ૧૪॥

દિવ્યશુક્લામ્બરધરં દિવ્યમાલાવિભૂષિતમ્ ।
સુરાસુરેન્દ્રયોગીન્દ્રવન્દ્યમાનપદામ્બુજમ્ ॥ ૧૫॥

સર્વલક્ષણયુક્તાઙ્ગ્યા લબ્ધચામરહસ્તયા ।
ભ્રાજમાનં સરસ્વત્યા પ્રભયેવ દિવાકરમ્ ॥ ૧૬॥

તં દૃષ્ટ્વા મુનયઃ સર્વે પ્રસન્નવદનેક્ષણાઃ ।
શિરસ્યઞ્જલિમાધાય તુષ્ટુવુઃ સુરપુઙ્ગવમ્ ॥ ૧૭॥

મુનય ઊચુઃ ।
નમસ્ત્રિમૂર્તયે તુભ્યં સર્ગસ્થિત્યન્તહેતવે ।
પુરુષાય પુરાણાય બ્રહ્મણે પરમાત્મને ॥ ૧૮॥

નમઃ પ્રધાનદેહાય પ્રધાનક્ષોભકારિણે ।
ત્રયોવિંશતિભેદેન વિકૃતાયાવિકારિણે ॥ ૧૯॥

નમો બ્રહ્માણ્ડદેહાય બ્રહ્માણ્ડોદરવર્તિને ।
તત્ર સંસિદ્ધકાર્યાય સંસિદ્ધકરણાય ચ ॥ ૨૦॥

નમોઽસ્તુ સર્વલોકાય સર્વલોકવિધાયિને ।
સર્વાત્મદેહસંયોગવિયોગવિધિહેતવે ॥ ૨૧॥

ત્વયૈવ નિખિલં સૃષ્ટં સંહૃતં પાલિતં જગત્ ।
તથાપિ માયયા નાથ ન વિદ્મસ્ત્વાં પિતામહ ॥ ૨૨॥

સૂત ઉવાચ ।
એવં બ્રહ્મા મહાભાગૈર્મહર્ષિભિરભિષ્ટુતઃ ।
પ્રાહ ગમ્ભીરયા વાચા મુનીન્ પ્રહ્લાદયન્નિવ ॥ ૨૩॥

બ્રહ્મોવાચ ।
ઋષયો હે મહાભાગા મહાસત્ત્વા મહૌજસઃ ।
કિમર્થં સહિતાઃ સર્વે યૂયમત્ર સમાગતાઃ ॥ ૨૪॥

તમેવંવાદિનં દેવં બ્રહ્માણં બ્રહ્મવિત્તમાઃ ।
વાગ્ભિર્વિનયગર્ભાભિઃ સર્વે પ્રાઞ્જલયોઽબ્રુવન્ ॥ ૨૫॥

મુનય ઊચુઃ ।
ભગવન્નન્ધકારેણ મહતા વયમાવૃતાઃ ।
ખિન્ના વિવદમાનાશ્ચ ન પશ્યામોઽત્ર યત્પરમ્ ॥ ૨૬॥

ત્વં હિ સર્વજગદ્ધાતા સર્વકારણકારણમ્ ।
ત્વયા હ્યવિદિતં નાથ નેહ કિઞ્ચન વિદ્યતે ॥ ૨૭॥

કઃ પુમાન્ સર્વસત્ત્વેભ્યઃ પુરાણઃ પુરુષઃ પરઃ ।
વિશુદ્ધઃ પરિપૂર્ણશ્ચ શાશ્વતઃ પરમેશ્વરઃ ॥ ૨૮॥

કેનૈવ ચિત્રકૃત્યેન પ્રથમં સૃજ્યતે જગત્ ।
તત્ત્વં વદ મહાપ્રાજ્ઞ સ્વસન્દેહાપનુત્તયે ॥ ૨૯॥

એવં પૃષ્ટસ્તદા બ્રહ્મા વિસ્મયસ્મેરવીક્ષણઃ ।
દેવાનાં દાનવાનાં ચ મુનીનામપિ સન્નિધૌ ॥ ૩૦॥

ઉત્થાય સુચિરં ધ્યાત્વા રુદ્ર ઇત્યુચ્ચરન્ ગિરિમ્ ।
આનન્દક્લિન્નસર્વાઙ્ગઃ કૃતાઞ્જલિરભાષત ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે મુનિપ્રસ્તાવવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૭.૧.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૩. તૃતીયોઽધ્યાયઃ । નૈમિષોપાખ્યાનમ્ ।

બ્રહ્મોવાચ ।
યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
આનન્દં યસ્ય વૈ વિદ્વાન્ન બિભેતિ કુતશ્ચન ॥ ૧॥

યસ્માત્સર્વમિદં બ્રહ્મવિષ્ણુરુદ્રેન્દ્રપૂર્વકમ્ ।
સહ ભૂતેન્દ્રિયૈઃ સર્વૈઃ પ્રથમં સમ્પ્રસૂયતે ॥ ૨॥

કારણાનાં ચ યો ધાતા ધ્યાતા પરમકારણમ્ ।
ન સમ્પ્રસૂયતેઽન્યસ્માત્કુતશ્ચન કદાચન ॥ ૩॥

સર્વૈશ્વર્યેણ સમ્પન્નો નામ્ના સર્વેશ્વરઃ સ્વયમ્ ।
સર્વૈર્મુમુક્ષુભિર્ધ્યેયઃ શમ્ભુરાકાશમધ્યગઃ ॥ ૪॥

યોઽગ્રે માં વિદધે પુત્રં જ્ઞાનં ચ પ્રહિણોતિ મે ।
તત્પ્રસાદાન્મયા લબ્ધં પ્રાજાપત્યમિદં પદમ્ ॥ ૫॥

ઈશો વૃક્ષ ઇવ સ્તબ્ધો ય એકો દિવિ તિષ્ઠતિ ।
યેનેદમખિલં પૂર્ણં પુરુષેણ મહાત્મના ॥ ૬॥

એકો બહૂનાં જન્તૂનાં નિષ્ક્રિયાણાં ચ સક્રિયઃ ।
ય એકો બહુધા બીજં કરોતિ સ મહેશ્વરઃ ॥ ૭॥

જીવૈરેભિરિમાંલ્લોકાન્સર્વાનીશો ય ઈશતે ।
ય એકો ભાગવાન્ રુદ્રો ન દ્વિતીયોઽસ્તિ કશ્ચન ॥ ૮॥

સદા જનાનાં હૃદયે સન્નિવિષ્ટોઽપિ યઃ પરૈઃ ।

અલક્ષ્યો લક્ષયન્વિશ્વમધિતિષ્ઠતિ સર્વદા ॥ ૯॥

યસ્તુ કાલાત્પ્રમુક્તાનિ કારણાન્યખિલાન્યપિ ।
અનન્તશક્તિરેવૈકો ભગવાનધિતિષ્ઠતિ ॥ ૧૦॥

ન યસ્ય દિવસો રાત્રિર્ન સમાનો ન ચાધિકઃ ।
સ્વાભાવિકી પરાશક્તિર્નિત્યા જ્ઞાનક્રિયે અપિ ॥ ૧૧॥

યદિદં ક્ષરમવ્યક્તં યદપ્યમૃતમક્ષરમ્ ।
તાવુભાવક્ષરાત્માનાવેકો દેવઃ સ્વયં હરઃ ॥ ૧૨॥

ઈશતે તદભિધ્યાનાદ્ યોજનાત્તત્ત્વભાવનઃ ।
ભૂયો હ્યસ્ય પશોરન્તે વિશ્વમાયા નિવર્તતે ॥ ૧૩॥

યસ્મિન્ન ભાસતે વિદ્યુન્ન સૂર્યો ન ચ ચન્દ્રમાઃ ।
યસ્ય ભાસા વિભાતીદમિત્યેષા શાશ્વતી શ્રુતિઃ ॥ ૧૪॥

એકો દેવો મહાદેવો વિજ્ઞેયસ્તુ મહેશ્વરઃ ।
ન તસ્ય પરમં કિઞ્ચિત્પદં સમધિગમ્યતે ॥ ૧૫॥

અયમાદિરનાદ્યન્તઃ સ્વભાવાદેવ નિર્મલઃ ।
સ્વતન્ત્રઃ પરિપૂર્ણશ્ચ સ્વેચ્છાધીનશ્ચરાચરઃ ॥ ૧૬॥

અપ્રાકૃતવપુઃ શ્રીમાંલ્લક્ષ્યલક્ષણવર્જિતઃ ।
અયં મુક્તો મોચકશ્ચ હ્યકાલઃ કાલચોદકઃ ॥ ૧૭॥

સર્વોપરિકૃતાવાસઃ સર્વાવાસશ્ચ સર્વવિત્ ।
ષડ્વિધાધ્વમયસ્યાસ્ય સર્વસ્ય જગતઃ પતિઃ ॥ ૧૮॥

ઉત્તરોત્તરભૂતાનામુત્તરશ્ચ નિરુત્તરઃ ।
અનન્તાનન્તસન્દોહમકરન્દમધુવ્રતઃ ॥ ૧૯॥

અખણ્ડજગદણ્ડાનાં પિણ્ડીકરણપણ્ડિતઃ ।
ઔદાર્યવીર્યગામ્ભીર્યમાધુર્યમકરાલયઃ ॥ ૨૦॥

નૈવાસ્ય સદૃશં વસ્તુ નાધિકં ચાપિ કિઞ્ચન ।
અતુલઃ સર્વભૂતાનાં રાજરાજશ્ચ તિષ્ઠતિ ॥ ૨૧॥

અનેન ચિત્રકૃત્યેન પ્રથમં સૃજ્યતે જગત્ ।
અન્તકાલે પુનશ્ચેદં તસ્મિન્પ્રલયમેષ્યતિ ॥ ૨૨॥

અસ્ય ભૂતાનિ વશ્યાનિ અયં સર્વનિયોજકઃ ।
અયં તુ પરયા ભક્ત્યા દૃશ્યતે નાન્યથા ક્વચિત્ ॥ ૨૩॥

વ્રતાનિ સર્વદાનાનિ તપાંસિ નિયમાસ્તથા ।
કથિતાનિ પુરા સદ્ભિર્ભાવાર્થં નાત્ર સંશયઃ ॥ ૨૪॥

હરિશ્ચાહં ચ રુદ્રશ્ચ તથાન્યે ચ સુરાસુરાઃ ।
તપોભિરુગ્રૈરદ્યાપિ તસ્ય દર્શનકાઙ્ક્ષિણઃ ॥ ૨૫॥

અદૃશ્યઃ પતિતૈર્મૂઢૈર્દુર્જનૈરપિ કુત્સિતૈઃ ।
ભક્તૈરન્તર્બહિશ્ચાપિ પૂજ્યઃ સમ્ભાષ્ય એવ ચ ॥ ૨૬॥

તદિદં ત્રિવિધં રૂપં સ્થૂલં સૂક્ષ્મં તતઃ પરમ્ ।
અસ્મદાદ્યમરૈર્દૃશ્યં સ્થૂલં સૂક્ષ્મં તુ યોગિભિઃ ॥ ૨૭॥

તતઃ પરં તુ યન્નિત્યં જ્ઞાનમાનન્દમવ્યયમ્ ।
તન્નિષ્ઠૈસ્તત્પરૈર્ભક્તૈર્દૃશ્યં તદ્ વ્રતમાશ્રિતૈઃ ॥ ૨૮॥

બહુનાઽત્ર કિમુક્તેન ગુહ્યાદ્ગુહ્યતરં પરમ્ ।
શિવે ભક્તિર્ન સન્દેહસ્તયા યુક્તો વિમુચ્યતે ॥ ૨૯॥

પ્રસાદાદેવ સા ભક્તિઃ પ્રસાદો ભક્તિસમ્ભવઃ ।
યથા ચાઙ્કુરતો બીજં બીજતો વા યથાઙ્કુરઃ ॥ ૩૦॥

પ્રસાદપૂર્વિકા એવ પશોઃ સર્વત્ર સિદ્ધયઃ ।
સ એવ સાધનૈરન્તે સર્વૈરપિ ચ સાધ્યતે ॥ ૩૧॥

પ્રસાદસાધનં ધર્મઃ સ ચ વેદેન દર્શિતઃ ।
તદભ્યાસવશાત્સામ્યં પૂર્વયોઃ પુણ્યપાપયોઃ ॥ ૩૨॥

સામ્યાત્પ્રસાદસમ્પર્કો ધર્મસ્યાતિશયસ્તતઃ ।
ધર્માતિશયમાસાદ્ય પશોઃ પાપપરિક્ષયઃ ॥ ૩૩॥

એવં પ્રક્ષીણપાપસ્ય બહુભિર્જન્મભિઃ ક્રમાત્ ।
સામ્બે સર્વેશ્વરે ભક્તિર્જ્ઞાનપૂર્વા પ્રજાયતે ॥ ૩૪॥

ભાવાનુગુણમીશસ્ય પ્રસાદો વ્યતિરિચ્યતે ।
પ્રસાદાત્કર્મસન્ત્યાગઃ ફલતો ન સ્વરૂપતઃ ॥ ૩૫॥

તસ્માત્કર્મફલત્યાગાચ્છિવધર્માન્વયઃ શુભઃ ।
સ ચ ગુર્વનપેક્ષશ્ચ તદપેક્ષ ઇતિ દ્વિધા ॥ ૩૬॥

તત્રાનપેક્ષાત્સાપેક્ષો મુખ્યઃ શતગુણાધિકઃ ।
શિવધર્માન્વયસ્યાસ્ય શિવજ્ઞાનસમન્વયઃ ॥ ૩૭॥

જ્ઞાનાન્વયવશાત્પુંસઃ સંસારે દોષદર્શનમ્ ।
તતો વિષયવૈરાગ્યં વૈરાગ્યાદ્ભાવસાધનમ્ ॥ ૩૮॥

ભાવસિદ્ધ્યુપપન્નસ્ય ધ્યાને નિષ્ઠા ન કર્મણિ ।
જ્ઞાનધ્યાનાભિયુક્તસ્ય પુંસો યોગઃ પ્રવર્તતે ॥ ૩૯॥

યોગેન તુ પરા ભક્તિઃ પ્રસાદસ્તદનન્તરમ્ ।
પ્રસાદાન્મુચ્યતે જન્તુર્મુક્તઃ શિવસમો ભવેત્ ॥ ૪૦॥

અનુગ્રહપ્રકારસ્ય ક્રમોઽયમવિવક્ષિતઃ ।
યાદૃશી યોગ્યતા પુંસસ્તસ્ય તાદૃગનુગ્રહઃ ॥ ૪૧॥

ગર્ભસ્થો મુચ્યતે કશ્ચિજ્જાયમાનસ્તથાપરઃ ।
બાલો વા તરુણો વાથ વૃદ્ધો વા મુચ્યતે પરઃ ॥ ૪૨॥

તિર્યગ્યોનિગતઃ કશ્ચિન્મુચ્યતે નારકોઽપરઃ ।
અપરસ્તુ પદં પ્રાપ્તો મુચ્યતે સ્વપદક્ષયે ॥ ૪૩॥

કશ્ચિત્ક્ષીણપદો ભૂત્વા પુનરાવર્ત્ય મુચ્યતે ।
કશ્ચિદધ્વગતસ્તસ્મિન્ સ્થિત્વા સ્થિત્વા વિમુચ્યતે ॥ ૪૪॥

તસ્માન્નૈકપ્રકારેણ નરાણાં મુક્તિરિષ્યતે ।
જ્ઞાનભાવાનુરૂપેણ પ્રસાદેનૈવ નિર્વૃતિઃ ॥ ૪૫॥

તસ્માદસ્ય પ્રસાદાર્થં વાઙ્મનોદોષવર્જિતાઃ ।
ધ્યાયન્તશ્શિવમેવૈકં સદારતનયાગ્નયઃ ॥ ૪૬॥

તન્નિષ્ઠાસ્તત્પરાઃ સર્વે તદ્યુક્તાસ્તદુપાશ્રયાઃ ।
સર્વક્રિયાઃ પ્રકુર્વાણાસ્તમેવ મનસા ગતાઃ ॥ ૪૭॥

દીર્ઘસૂત્રસમારબ્ધં દિવ્યવર્ષસહસ્રકમ્ ।
સત્રાન્તે મન્ત્રયોગેન વાયુસ્તત્ર ગમિષ્યતિ ॥ ૪૮॥

સ એવ ભવતાં શ્રેયઃ સોપાયં કથયિષ્યતિ ।
તતો વારાણસી પુણ્યા પુરી પરમશોભના ॥ ૪૯॥

ગન્તવ્યા યત્ર વિશ્વેશો દેવ્યા સહ પિનાકધૃક્ ।

સદા વિહરતિ શ્રીમાન્ ભક્તાનુગ્રહકારણાત્ ॥ ૫૦॥

તત્રાશ્ચર્યં મહદ્ દૃષ્ટ્વા મત્સમીપં ગમિષ્યથ ।
તતો વઃ કથયિષ્યામિ મોક્ષોપાયં દ્વિજોત્તમાઃ ॥ ૫૧॥

યેનૈકજન્મના મુક્તિર્યુષ્મત્કરતલે સ્થિતા ।
અનેકજન્મસંસારબન્ધનિર્મોક્ષકારિણી ॥ ૫૨॥

એતન્મનોમયં ચક્રં મયા સૃષ્ટં વિસૃજ્યતે ।
યત્રાસ્ય શીર્યતે નેમિઃ સ દેશસ્તપસઃ શુભઃ ॥ ૫૩॥

ઇત્યુક્ત્વા સૂર્યસઙ્કાશં ચક્રં દૃષ્ટ્વા મનોમયમ્ ।
પ્રણિપત્ય મહાદેવં વિસસર્જ પિતામહઃ ॥ ૫૪॥

તેઽપિ હૃષ્ટતરા વિપ્રાઃ પ્રણમ્ય જગતાં પ્રભુમ્ ।
પ્રયયુસ્તસ્ય ચક્રસ્ય યત્ર નેમિરશીર્યત ॥ ૫૫॥

ચક્રં તદપિ સઙ્ક્ષિપ્તં શ્લક્ષ્ણં ચારુશિલાતલે ।
વિમલસ્વાદુપાનીયે નિપપાત વને ક્વચિત્ ॥ ૫૬॥

તદ્વનં તેન વિખ્યાતં નૈમિષં મુનિપૂજિતમ્ ।
અનેકયક્ષગન્ધર્વવિદ્યાધરસમાકુલમ્ ॥ ૫૭॥

અષ્ટાદશ સમુદ્રસ્ય દ્વીપાનશ્નન્પુરૂરવાઃ ।
વિલાસવશમુર્વશ્યા યાતો દૈવેન ચોદિતઃ ॥ ૫૮॥

અક્રમેણાહરન્મોહાદ્યજ્ઞવાટં હિરણ્મયમ્ ।
મુનિભિર્યત્ર સઙ્ક્રુદ્ધૈઃ કુશવજ્રૈર્નિપાતિતઃ ॥ ૫૯॥

વિશ્વં સિસૃક્ષમાણા વૈ યત્ર વિશ્વસૃજઃ પુરા ।
સત્રમારેભિરે દિવ્યં બ્રહ્મજ્ઞા ગાર્હપત્યગાઃ ॥ ૬૦॥

ઋષિભિર્યત્ર વિદ્વદ્ભિઃ શબ્દાર્થન્યાયકોવિદૈઃ ।
શક્તિપ્રજ્ઞાક્રિયાયોગૈર્વિધિરાસીદનુષ્ઠિતઃ ॥ ૬૧॥

યત્ર વેદવિદો નિત્યં વેદવાદબહિષ્કૃતાન્ ।
વાદજલ્પબલૈર્ઘ્નન્તિ વચોભિરતિવાદિનઃ ॥ ૬૨॥

સ્ફટિકમયમહીભૃત્પાદજાભ્યશ્શિલાભ્યઃ
પ્રસરદમૃતકલ્પસ્વચ્છપાનીયરમ્યમ્ ।
અતિરસફલવૃક્ષપ્રાયમવ્યાલસત્ત્વં

તપસ ઉચિતમાસીન્નૈમિષં તન્મુનીનામ્ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે નૈમિષોપાખ્યાનં નામ તૃતીયોઽધ્યાયઃ ॥ ૭.૧.૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૪. ચતુર્થોઽધ્યાયઃ । વાયુસમાગમઃ ।

સૂત ઉવાચ ।
તસ્મિન્દેશે મહાભાગા મુનયઃ શંસિતવ્રતાઃ ।
અર્ચયન્તો મહાદેવં સત્રમારેભિરે તદા ॥ ૧॥

તચ્ચ સત્રં પ્રવવૃતે સર્વાશ્ચર્યં મહર્ષિણામ્ ।
વિશ્વં સિસૃક્ષમાણાનાં પુરા વિશ્વસૃજામિવ ॥ ૨॥

અથ કાલે ગતે સત્રે સમાપ્તે ભૂરિદક્ષિણે ।
પિતામહનિયોગેન વાયુસ્તત્રાગમત્સ્વયમ્ ॥ ૩॥

શિષ્યઃ સ્વયમ્ભુવો દેવઃ સર્વપ્રત્યક્ષદૃગ્વશી ।
આજ્ઞાયાં મરુતો યસ્ય સંસ્થિતાઃ સપ્તસપ્તકાઃ ॥ ૪॥

પ્રેરયઞ્છશ્વદઙ્ગાનિ પ્રાણાદ્યાભિઃ સ્વવૃત્તિભિઃ ।
સર્વભૂતશરીરાણાં કુરુતે યશ્ચ ધારણમ્ ॥ ૫॥

અણિમાદિભિરષ્ટાભિરૈશ્વર્યૈશ્ચ સમન્વિતઃ ।
તિર્યક્ કરાદિભિર્મેધ્યૈર્ભુવનાનિ બિભર્તિ યઃ ॥ ૬॥

આકાશયોનિર્દ્વિગુણઃ સ્પર્શશબ્દસમન્વયાત્ ।
તેજસાં પ્રકૃતિશ્ચેતિ યમાહુસ્તત્ત્વચિન્તકાઃ ॥ ૭॥

તમાશ્રમગતં દૃષ્ટ્વા મુનયો દીર્ઘસત્રિણઃ ।
પિતામહવચઃ સ્મૃત્વા પ્રહર્ષમતુલં યયુઃ ॥ ૮॥

અભ્યુત્થાય તતઃ સર્વે પ્રણમ્યામ્બરસમ્ભવમ્ ।
ચામીકરમયં તસ્મૈ વિષ્ટરં સમકલ્પયન્ ॥ ૯॥

સોઽપિ તત્ર સમાસીનો મુનિભિઃ સમ્યગર્ચિતઃ ।
પ્રતિનન્દ્ય ચ તાન્ સર્વાન્ પપ્રચ્છ કુશલં તતઃ ॥ ૧૦॥

વાયુરુવાચ ।
અત્ર વઃ કુશલં વિપ્રાઃ કચ્ચિદ્વૃત્તે મહાક્રતૌ ।
કચ્ચિદ્યજ્ઞહનો દૈત્યા ન બાધેરન્સુરદ્વિષઃ ॥ ૧૧॥

પ્રાયશ્ચિત્તં દુરિષ્ટં વા ન કશ્ચિત્સમજાયત ।
સ્તોત્રમન્ત્રજપૈર્દેવાન્ પિતૄન્ પિત્ર્યૈશ્ચ કર્મભિઃ ॥ ૧૨॥

કચ્ચિદભ્યર્ચ્ય યુષ્માભિર્વિધિરાસીત્સ્વનુષ્ઠિતઃ ।
નિવૃત્તે ચ મહાસત્રે પશ્ચાત્કિં વશ્ચિકીર્ષિતમ્ ॥ ૧૩॥

ઇત્યુક્તા મુનયઃ સર્વે વાયુના શિવભાવિના ।
પ્રહૃષ્ટમનસઃ પૂતાઃ પ્રત્યૂચુર્વિનયાન્વિતાઃ ॥ ૧૪॥

મુનય ઊચુઃ ।
અદ્ય નઃ કુશલં સર્વમદ્ય સાધુ ભવેત્તપઃ ।
અસ્મચ્છ્રેયોઽભિવૃદ્ધ્યર્થં ભવાનત્રાગતો યતઃ ॥ ૧૫॥

શ઼ૃણુ ચેદં પુરાવૃત્તં તમસાક્રાન્તમાનસૈઃ ।
ઉપાસિતઃ પુરાસ્માભિર્વિજ્ઞાનાર્થં પ્રજાપતિઃ ॥ ૧૬॥

સોઽપ્યસ્માનનુગૃહ્યાહ શરણ્યઃ શરણાગતાન્ ।
સર્વસ્માદધિકો રુદ્રો વિપ્રાઃ પરમકારણમ્ ॥ ૧૭॥

તમપ્રતર્ક્યં યાથાત્મ્યં ભક્તિમાનેવ પશ્યતિ ।
ભક્તિશ્ચાસ્ય પ્રસાદેન પ્રસાદાદેવ નિર્વૃતિઃ ॥ ૧૮॥

તસ્માદસ્ય પ્રસાદાર્થં નૈમિષે સત્રયોગતઃ ।
યજધ્વં દીર્ઘસત્રેણ રુદ્રં પરમકારણમ્ ॥ ૧૯॥

તત્પ્રસાદેન સત્રાન્તે વાયુસ્તત્રાગમિષ્યતિ ।
તન્મુખાજ્જ્ઞાનલાભો વસ્તત્ર શ્રેયો ભવિષ્યતિ ॥ ૨૦॥

ઇત્યાદિશ્ય વયં સર્વે પ્રેષિતાઃ પરમેષ્ઠિના ।
અસ્મિન્દેશે મહાભાગ તવાગમનકાઙ્ક્ષિણઃ ॥ ૨૧॥

દીર્ઘસત્રં સમાસીના દિવ્યવર્ષસહસ્રકમ્ ।
અતસ્તવાગમાદન્યત્પ્રાર્થ્યં નો નાસ્તિ કિઞ્ચન ॥ ૨૨॥

ઇત્યાકર્ણ્ય પુરાવૃત્તમૃષીણાં દીર્ઘસત્રિણામ્ ।
વાયુઃ પ્રીતમના ભૂત્વા તત્રાસીન્મુનિસંવૃતઃ ॥ ૨૩॥

તતસ્તૈર્મુનિભિઃ પૃષ્ટસ્તેષાં ભાવવિવૃદ્ધયે ।
સર્ગાદિ શાર્વમૈશ્વર્યં સમાસાદવદદ્ વિભુઃ ॥ ૨૪॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે વાયુસમાગમો નામ ચતુર્થોઽધ્યાયઃ ॥ ૭.૧.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૫. પઞ્ચમોઽધ્યાયઃ । શિવતત્ત્વજ્ઞાનવર્ણનમ્ ।

સૂત ઉવાચ ।
તત્ર પૂર્વં મહાભાગા નૈમિષારણ્યવાસિનઃ ।
પ્રણિપત્ય યથાન્યાયં પપ્રચ્છુઃ પવનં પ્રભુમ્ ॥ ૧॥

નૈમિષીયા ઊચુઃ ।
ભવાન્ કથમનુપ્રાપ્તો જ્ઞાનમીશ્વરગોચરમ્ ।
કથં ચ શિષ્યભાવસ્તે બ્રહ્મણોઽવ્યક્તજન્મનઃ ॥ ૨॥

વાયુરુવાચ ।
એકોનવિંશતિઃ કલ્પો વિજ્ઞેયઃ શ્વેતલોહિતઃ ।
તસ્મિન્કલ્પે ચતુર્વક્ત્રઃ સ્રષ્ટુકામોઽતપત્તપઃ ॥ ૩॥

તપસા તેન તીવ્રેણ તુષ્ટસ્તસ્ય પિતા સ્વયમ્ ।
દિવ્યં કૌમારમાસ્થાય રૂપં રૂપવતાં વરઃ ॥ ૪॥

શ્વેતો નામ મુનિર્ભૂત્વા દિવ્યાં વાચમુદીરયન્ ।
દર્શનં પ્રદદૌ તસ્મૈ દેવદેવો મહેશ્વરઃ ॥ ૫॥

તં દૃષ્ટ્વા પિતરં બ્રહ્મા બ્રહ્મણોઽધિપતિં પતિમ્ ।
પ્રણમ્ય પરમજ્ઞાનં ગાયત્ર્યા સહ લબ્ધવાન્ ॥ ૬॥

તતઃ સ લબ્ધવિજ્ઞાનો વિશ્વકર્મા ચતુર્મુખઃ ।
અસૃજત્સર્વભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૭॥

યતઃ શ્રુત્વાઽમૃતં લબ્ધં બ્રહ્મણા પરમેશ્વરાત્ ।
તતસ્તદ્વદનાદેવ મયા લબ્ધં તપોબલાત્ ॥ ૮॥

મુનય ઊચુઃ ।

કિં તજ્જ્ઞાનં ત્વયા લબ્ધં તથ્યાત્તથ્યતરં શુભમ્ ।
યત્ર કૃત્વા પરાં નિષ્ઠાં પુરુષઃ સુખમૃચ્છતિ ॥ ૯॥

વાયુરુવાચ ।
પશુપાશપતિજ્ઞાનં યલ્લબ્ધં તુ મયા પુરા ।
તત્ર નિષ્ઠા પરા કાર્યા પુરુષેણ સુખાર્થિના ॥ ૧૦॥

અજ્ઞાનપ્રભવં દુઃખં જ્ઞાનેનૈવ નિવર્ત્તતે ।
જ્ઞાનં વસ્તુપરિચ્છેદો વસ્તુ ચ ત્રિવિધં સ્મૃતમ્ ॥ ૧૧॥

અજડં ચ જડં ચૈવ નિયન્તૃ ચ તયોરપિ ।
પશુઃ પાશઃ પતિશ્ચેતિ કથ્યતે તત્ત્રયં ક્રમાત્ ॥ ૧૨॥

અક્ષરં ચ ક્ષરં ચૈવ ક્ષરાક્ષરપરં તથા ।
તદેતત્ત્રિતયં ભૂમ્ના કથ્યતે તત્ત્વવેદિભિઃ ॥ ૧૩॥

અક્ષરં પશુરિત્યુક્તઃ ક્ષરં પાશ ઉદાહૃતઃ ।
ક્ષરાક્ષરપરં યત્તત્ પતિરિત્યભિધીયતે ॥ ૧૪॥

મુનય ઊચુઃ ।
કિં તચ્ચ ક્ષરમિત્યુક્તં કિં ચાક્ષરમુદાહૃતમ્ ।
તયોશ્ચ પરમં કિં વા તદેતદ્ બ્રૂહિ મારુત ॥ ૧૫॥

વાયુરુવાચ ।
પ્રકૃતિઃ ક્ષરમિત્યુક્તં પુરુષોઽક્ષર ઉચ્યતે ।
તાવિમૌ પ્રેરયત્યન્યઃ સ પરઃ પરમેશ્વરઃ ॥ ૧૬॥

મુનય ઊચુઃ ।
કૈષા પ્રકૃતિરિત્યુક્તા ક એષ પુરુષો મતઃ ।
અનયોઃ કેન સમ્બન્ધઃ કોઽયં પ્રેરક ઈશ્વરઃ ॥ ૧૭॥

વાયુરુવાચ ।
માયાપ્રકૃતિરુદ્દિષ્ટા પુરુષો માયયાઽઽવૃતઃ ।
સમ્બન્ધો મલકર્મભ્યાં શિવઃ પ્રેરક ઈશ્વરઃ ॥ ૧૮॥

મુનય ઊચુઃ ।
કેયં માયા સમાખ્યાતા કિંરૂપો માયયા વૃતઃ ।
મલં કીદૃક્ કુતો વાસ્ય કિં શિવત્વં કુતશ્શિવઃ ॥ ૧૯॥

વાયુરુવાચ ।
માયા માહેશ્વરી શક્તિશ્ચિદ્રૂપો માયયા વૃતઃ ।
મલશ્ચિચ્છાદકો નૈજો વિશુદ્ધિઃ શિવતા સ્વતઃ ॥ ૨૦॥

મુનય ઊચુઃ ।
આવૃણોતિ કથં માયા વ્યાપિનં કેન હેતુના ।
કિમર્થં ચાવૃતિઃ પુંસઃ કેન વા વિનિવર્તતે ॥ ૨૧॥

વાયુરુવાચ ।
આવૃતિર્વ્યાપિનોઽપિ સ્યાદ્વ્યાપિ યસ્માત્કલાદ્યપિ ।
હેતુઃ કર્મૈવ ભોગાર્થં નિવર્તેત મલક્ષયાત્ ॥ ૨૨॥

મુનય ઊચુઃ ।
કલાદિ કથ્યતે કિં તત્કર્મ વા કિમુદાહૃતમ્ ।
તત્કિમાદિ કિમન્તં વા કિમ્ફલં વા કિમાશ્રયમ્ ॥ ૨૩॥

કસ્મૈ ભોગેશ્ચ કિં ભોગ્યં કિં વા તદ્ભોગસાધનમ્ ।
મલક્ષયસ્ય કો હેતુઃ કીદૃક્ ક્ષીણમલઃ પુમાન્ ॥ ૨૪॥

વાયુરુવાચ ।
કલા વિદ્યા ચ રાગશ્ચ કાલો નિયતિરેવ ચ ।
કલાદયઃ સમાખ્યાતા યો ભોક્તા પુરુષો ભવેત્ ॥ ૨૫॥

પુણ્યપાપાત્મકં કર્મ સુખદુઃખફલં તુ યત્ ।
અનાદિમલભોગાન્તમજ્ઞાનાત્મસમાશ્રયમ્ ॥ ૨૬॥

ભોગઃ કર્મવિનાશાય ભોગ્યમવ્યક્તમુચ્યતે ।
બાહ્યાન્તઃકરણદ્વારં શરીરં ભોગસાધનમ્ ॥ ૨૭॥

ભાવાતિશયલબ્ધેન પ્રસાદેન મલક્ષયઃ ।
ક્ષીણે ચાત્મમલે તસ્મિન્ શિવસમો ભવેત્ ॥ ૨૮॥

મુનય ઊચુઃ ।
કલાદિપઞ્ચતત્ત્વાનાં કિં કર્મ પૃથગુચ્યતે ।
ભોક્તેતિ પુરુષશ્ચેતિ યેનાત્મા વ્યપદિશ્યતે ॥ ૨૯॥

કિમાત્મકં તદવ્યક્તં કેનાકારેણ ભુજ્યતે ।
કિં તસ્ય શરણં ભુક્તૌ શરીરં ચ કિમુચ્યતે ॥ ૩૦॥

વાયુરુવાચ ।
દિક્ક્રિયાવ્યઞ્જિકા વિદ્યાકલો રાગઃ પ્રવર્તકઃ ।
કાલોઽવચ્છેદકસ્તત્ર નિયતિસ્તુ નિયામિકા ॥ ૩૧॥

અવ્યક્તં કારણં યત્તત્રિગુણપ્રભવાપ્યયમ્ ।
પ્રધાનં પ્રકૃતિશ્ચેતિ યદાહુસ્તત્ત્વચિન્તકાઃ ॥ ૩૨॥

કલાતસ્તદભિવ્યક્તમનભિવ્યક્તલક્ષણમ્ ।
સુખદુઃખવિમોહાત્મા ભુજ્યતે ગુણવાંસ્ત્રિધા ॥ ૩૩॥

સત્ત્વં રજસ્તમ ઇતિ ગુણાઃ પ્રકૃતિસમ્ભવાઃ ।
પ્રકૃતૌ સૂક્ષ્મરૂપેણ તિલે તૈલમિવ સ્થિતાઃ ॥ ૩૪॥

સુખં ચ સુખહેતુશ્ચ સમાસાત્સાત્ત્વિકં સ્મૃતમ્ ।
રાજસં તદ્વિપર્યાસાત્ સ્તમ્ભમોહૌ તુ તામસૌ ॥ ૩૫॥

સાત્ત્વિક્યૂર્ધ્વગતિઃ પ્રોક્તા તામસી સ્યાદધોગતિઃ ।
મધ્યમા તુ ગતિર્યા સા રાજસી પરિપઠ્યતે ॥ ૩૬॥

તન્માત્રાપઞ્ચકં ચૈવ ભૂતપઞ્ચકમેવ ચ ।
જ્ઞાનેન્દ્રિયાણિ પઞ્ચૈવ પઞ્ચકર્મેન્દ્રિયાણિ ચ ॥ ૩૭॥

પ્રધાનબુદ્ધ્યહઙ્કારમનાંસિ ચ ચતુષ્ટયમ્ ।
સમાસાદેવમવ્યક્તં સવિકારમુદાહૃતમ્ ॥ ૩૮॥

તત્કારણદશાપન્નમવ્યક્તમિતિ કથ્યતે ।
વ્યક્તં કાર્યદશાપન્નં શરીરાદિઘટાદિવત્ ॥ ૩૯॥

યથા ઘટાદિકં કાર્યં મૃદાદેર્નાતિભિદ્યતે ।
શરીરાદિ તથા વ્યક્તમવ્યક્તાન્નાતિભિદ્યતે ॥ ૪૦॥

તસ્માદવ્યક્તમેવૈકં કારણં કરણાનિ ચ ।
શરીરં ચ તદાધારં તદ્ભોગ્યં ચાપિ નેતરત્ ॥ ૪૧॥

મુનય ઊચુઃ ।
બુદ્ધીન્દ્રિયશરીરેભ્યો વ્યતિરેકસ્ય કસ્યચિત્ ।
આત્મશબ્દાભિધેયસ્ય વસ્તુતોઽપિ કુતઃ સ્થિતિઃ ॥ ૪૨॥

વાયુરુવાચ ।
બુદ્ધીન્દ્રિયશરીરેભ્યો વ્યતિરેકો વિભોર્ધ્રુવમ્ ।

અસ્ત્યેવ કશ્ચિદાત્મેતિ હેતુસ્તત્ર સુદુર્ગમઃ ॥ ૪૩॥

બુધ્દીન્દ્રિયશરીરાણાં નાત્મતા સદ્ભિરિષ્યતે ।
સ્મૃતેરનિયતજ્ઞાનાદયાવદ્દેહવેદનાત્ ॥ ૪૪॥

અતઃ સ્મર્તાનુભૂતાનામશેષજ્ઞેયગોચરઃ ।
અન્તર્યામીતિ વેદેષુ વેદાન્તેષુ ચ ગીયતે ॥ ૪૫॥

સર્વં તત્ર સ સર્વત્ર વ્યાપ્ય તિષ્ઠતિ શાશ્વતઃ ।
તથાપિ ક્વાપિ કેનાપિ વ્યક્તમેષ ન દૃશ્યતે ॥ ૪૬॥

નૈવાયં ચક્ષુષા ગ્રાહ્યો નાપરૈરિન્દ્રિયૈરપિ ।
મનસૈવ પ્રદીપ્તેન મહાનાત્માવસીયતે ॥ ૪૭॥

ન ચ સ્ત્રી ન પુમાનેષ નૈવ ચાપિ નપુંસકઃ ।
નૈવોર્ધ્વં નાપિ તિર્યક્ ચ નાધસ્તાન્ન કુતશ્ચન ॥ ૪૮॥

અશરીરં શરીરેષુ ચલેષુ સ્થાણુમવ્યયમ્ ।
સદા પશ્યતિ તં ધીરો નરઃ પ્રત્યવમર્શનાત્ ॥ ૪૯॥

કિમત્ર બહુનોક્તેન પુરુષો દેહતઃ પૃથક્ ।
અપૃથગ્યે તુ પશ્યન્તિ હ્યસમ્યક્ તેષુ દર્શનમ્ ॥ ૫૦॥

યચ્છરીરમિદં પ્રોક્તં પુરુષસ્ય તતઃ પરમ્ ।
અશુધ્દમવશં દુઃખમધ્રુવં ન ચ વિદ્યતે ॥ ૫૧॥

વિપદાં બીજભૂતેન પુરુષસ્તેન સંયુતઃ ।
સુખી દુઃખી ચ મૂઢશ્ચ ભવતિ સ્વેન કર્મણા ॥ ૫૨॥

અદ્ભિરાપ્લાવિતં ક્ષેત્રં જનયત્યઙ્કુરં યથા ।
અજ્ઞાનાત્પ્લાવિતં કર્મ દેહં જનયતે તથા ॥ ૫૩॥

અત્યન્તમસુખાવાસાઃ સ્મૃતાશ્ચૈકાન્તમૃત્યવઃ ।
અનાગતા અતીતાશ્ચ તનવોઽસ્ય સહસ્રશઃ ॥ ૫૪॥

આગત્યાગત્ય શીર્ણેષુ શરીરેષુ શરીરિણઃ ।
અત્યન્તવસતિઃ ક્વાપિ ન કેનાપિ ચ લભ્યતે ॥ ૫૫॥

છાદિતશ્ચ વિયુક્તશ્ચ શરીરૈરેષુ લક્ષ્યતે ।
ચન્દ્રબિમ્બવદાકાશે તરલૈરભ્રસઞ્ચયૈઃ ॥ ૫૬॥

અનેકદેહભેદેન ભિન્ના વૃત્તિરિહાત્મનઃ ।
અષ્ટાપદપરિક્ષેપે હ્યક્ષમુદ્રેવ લક્ષ્યતે ॥ ૫૭॥

નૈવાસ્ય ભવિતા કશ્ચિન્નાસૌ ભવતિ કસ્યચિત્ ।
પથિ સઙ્ગમ એવાયં દારૈઃ પુત્રૈશ્ચ બન્ધુભિઃ ॥ ૫૮॥

યથા કાષ્ઠં ચ કાષ્ઠં ચ સમેયાતાં મહોદધૌ ।
સમેત્ય ચ વ્યપેયાતાં તદ્વદ્ ભૂતસમાગમઃ ॥ ૫૯॥

સ પશ્યતિ શરીરં તચ્છરીરં તન્ન પશ્યતિ ।
તૌ પશ્યતિ પરઃ કશ્ચિત્તાવુભૌ તં ન પશ્યતઃ ॥ ૬૦॥

બ્રહ્માદ્યાઃ સ્થાવરાન્તાશ્ચ પશવઃ પરિકીર્તિતાઃ ।
પશૂનામેવ સર્વેષાં પ્રોક્તમેતન્નિદર્શનમ્ ॥ ૬૧॥

સ એષ બધ્યતે પાશૈઃ સુખદુઃખાશનઃ પશુઃ ।
લીલાસાધનભૂતો ય ઈશ્વરસ્યેતિ સૂરયઃ ॥ ૬૨॥

અજ્ઞો જન્તુરનીશોઽયમાત્મનઃ સુખદુઃખયોઃ ।
ઈશ્વરપ્રેરિતો ગચ્છેત્સ્વર્ગં વા શ્વભ્રમેવ વા ॥ ૬૩॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્યાનિલવચો મુનયઃ પ્રીતમાનસાઃ ।
પ્રોચુઃ પ્રણમ્ય તં વાયું શૈવાગમવિચક્ષણમ્ ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે શિવતત્ત્વજ્ઞાનવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૭.૧.૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૬. ષષ્ઠોઽધ્યાયઃ । શિવતત્ત્વજ્ઞાનવર્ણનમ્ ।

મુનય ઊચુઃ ।
યોઽયં પશુરિતિ પ્રોક્તો યશ્ચ પાશ ઉદાહૃતઃ ।
આભ્યાં વિલક્ષણઃ કશ્ચિત્કોઽયમસ્તિ તયોઃ પતિઃ ॥ ૧॥

વાયુરુવાચ ।

અસ્તિ કશ્ચિદપર્યન્તરમણીયગુણાશ્રયઃ ।
પતિર્વિશ્વસ્ય નિર્માતા પશુપાશવિમોચનઃ ॥ ૨॥

અભાવે તસ્ય વિશ્વસ્ય સૃષ્ટિરેષા કથં ભવેત્ ।
અચેતનત્વાદજ્ઞાનાદનયોઃ પશુપાશયોઃ ॥ ૩॥

પ્રધાનપરમાણ્વાદિ યાવત્કિઞ્ચિદચેતનમ્ ।
તત્કર્તૃકં સ્વયં દૃષ્ટં બુદ્ધિમત્કારણં વિના ॥ ૪॥

જગચ્ચ કર્તૃસાપેક્ષં કાર્યં સાવયવં યતઃ ।
તસ્માત્કાર્યસ્ય કર્તૃત્વં પત્યુર્ન પશુપાશયોઃ ॥ ૫॥

પશોરપિ ચ કર્તૃત્વં પત્યુઃ પ્રેરણપૂર્વકમ્ ।
અયથાકરણજ્ઞાનમન્ધસ્ય ગમનં યથા ॥ ૬॥

આત્માનં ચ પૃથઙ્મત્વા પ્રેરિતારં તતઃ પૃથક્ ।
અસૌ જુષ્ટસ્તતસ્તેન હ્યમૃતત્વાય કલ્પતે ॥ ૭॥

પશોઃ પાશસ્ય પત્યુશ્ચ તત્ત્વતોઽસ્તિ પદં પરમ્ ।
બ્રહ્મવિત્ તદ્વિદિત્વૈવ યોનિમુક્તો ભવિષ્યતિ ॥ ૮॥

સંયુક્તમેતદ્ દ્વિતયં ક્ષરમક્ષરમેવ ચ ।
વ્યક્તાવ્યક્તં બિભર્તીશો વિશ્વં વિશ્વવિમોચકઃ ॥ ૯॥

ભોક્તા ભોગ્યં પ્રેરયિતા મન્તવ્યં ત્રિવિધં સ્મૃતમ્ ।
નાતઃ પરં વિજાનદ્ભિર્વેદિતવ્યં હિ કિઞ્ચન ॥ ૧૦॥

તિલેષુ વા યથા તૈલં દધ્નિ વા સર્પિરર્પિતમ્ ।
યથાપઃ સ્રોતસિ વ્યાપ્તા યથારણ્યાં હુતાશનઃ ॥ ૧૧॥

એવમેવ મહાત્માનમાત્મન્યાત્મવિલક્ષણમ્ ।
સત્યેન તપસા ચૈવ નિત્યયુક્તોઽનુપશ્યતિ ॥ ૧૨॥

ય એકો જાલવાનીશ ઈશાનીભિઃ સ્વશક્તિભિઃ ।
સર્વાંલ્લોકાનિમાન્ કૃત્વા એક એવ સ ઈશતે ॥ ૧૩॥

એક એવ સદા રુદ્રો ન દ્વિતીયોઽસ્તિ કશ્ચન ।
સંસૃજ્ય વિશ્વભુવનં ગોપ્તા તે સઞ્ચુકોચ યઃ ॥ ૧૪॥

વિશ્વતશ્ચક્ષુરેવાયમુતાયં વિશ્વતોમુખઃ ।
તથૈવ વિશ્વતોબાહુર્વિશ્વતઃ પાદસંયુતઃ ॥ ૧૫॥

દ્યાવાભૂમી ચ જનયન્ દેવ એકો મહેશ્વરઃ ।
સ એવ સર્વદેવાનાં પ્રભવશ્ચોદ્ભવસ્તથા ॥ ૧૬॥

હિરણ્યગર્ભં દેવાનાં પ્રથમં જનયેદયમ્ ।
વિશ્વસ્માદધિકો રુદ્રો મહર્ષિરિતિ હિ શ્રુતિઃ ॥ ૧૭॥

વેદાહમેતં પુરુષં મહાન્તમમૃતં ધ્રુવમ્ ।
આદિત્યવર્ણં તમસઃ પરસ્તાત્સંસ્થિતં પ્રભુમ્ ॥ ૧૮॥

અસ્માન્નાસ્તિ પરં કિઞ્ચિદપરં પરમાત્મનઃ ।
નાણીયોઽસ્તિ ન ચ જ્યાયસ્તેન પૂર્ણમિદં જગત્ ॥ ૧૯॥

સર્વાનનશિરોગ્રીવઃ સર્વભૂતગુહાશયઃ ।
સર્વવ્યાપી ચ ભગવાંસ્તસ્માત્સર્વગતશ્શિવઃ ॥ ૨૦॥

સર્વતઃ પાણિપાદોઽયં સર્વતોઽક્ષિશિરોમુખઃ ।
સર્વતઃ શ્રુતિમાંલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૨૧॥

સર્વેન્દ્રિયગુણાભાસઃ સર્વેન્દ્રિયવિવર્જિતઃ ।
સર્વસ્ય પ્રભુરીશાનઃ સર્વસ્ય શરણં સુહૃત્ ॥ ૨૨॥

અચક્ષુરપિ યઃ પશ્યત્યકર્ણોઽપિ શ‍ૃણોતિ યઃ ।
સર્વં વેત્તિ ન વેત્તાસ્ય તમાહુઃ પુરુષં પરમ્ ॥ ૨૩॥

અણોરણીયાન્મહતો મહીયાનયમવ્યયઃ ।
ગુહાયાં નિહિતશ્ચાપિ જન્તોરસ્ય મહેશ્વરઃ ॥ ૨૪॥

તમક્રતું ક્રતુપ્રાયં મહિમાતિશયાન્વિતમ્ ।
ધાતુઃ પ્રસાદાદીશાનં વીતશોકઃ પ્રપશ્યતિ ॥ ૨૫॥

વેદાહમેનમજરં પુરાણં સર્વગં વિભુમ્ ।
નિરોધં જન્મનો યસ્ય વદન્તિ બ્રહ્મવાદિનઃ ॥ ૨૬॥

એકોઽપિ ત્રીનિમાંલ્લોકાન્ બહુધા શક્તિયોગતઃ ।
વિદધાતિ વિચેત્યન્તે વિશ્વમાદૌ મહેશ્વરઃ ॥ ૨૭॥

વિશ્વધાત્રીત્યજાખ્યા ચ શૈવી ચિત્રાકૃતિઃ પરા ।
તામજાં લોહિતાં શુક્લાં કૃષ્ણામેકાં ત્વજઃ પ્રજામ્ ॥ ૨૮॥

જનિત્રીમનુશેતેઽન્યોજુષમાણઃ સ્વરૂપિણીમ્ ।

તામેવાજામજોઽન્યસ્તુ ભક્તભોગાં જહાતિ ચ ॥ ૨૯॥

દ્વૌ સુપર્ણૌ ચ સયુજૌ સમાનં વૃક્ષમાસ્થિતૌ ।
એકોઽત્તિ પિપ્પલં સ્વાદુ પરોઽનશ્નન્ પ્રપશ્યતિ ॥ ૩૦॥

વૃક્ષેઽસ્મિન્ પુરુષો મગ્નો ગુહ્યમાનશ્ચ શોચતિ ।
જુષ્ટમન્યં યદા પશ્યેદીશં પરમકારણમ્ ॥ ૩૧॥

તદાસ્ય મહિમાનં ચ વીતશોકઃ સુખી ભવેત્ ।
છન્દાંસિ યજ્ઞાઃ ક્રતવો યદ્ભૂતં ભવ્યમેવ ચ ॥ ૩૨॥

માયી વિશ્વં સૃજત્યસ્મિન્નિવિષ્ટો માયયા પરઃ ।
માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ॥ ૩૩॥

તસ્યાસ્ત્વવયવૈરેવ વ્યાપ્તં સર્વમિદં જગત્ ।
સૂક્ષ્માતિસૂક્ષ્મમીશાનં કલલસ્યાપિ મધ્યતઃ ॥ ૩૪॥

સ્રષ્ટારમપિ વિશ્વસ્ય ચેષ્ટિતારં ચ તસ્ય તુ ।
શિવમેવેશ્વરં જ્ઞાત્વા શાન્તિમત્યન્તમૃચ્છતિ ॥ ૩૫॥

સ એવ કાલો ગોપ્તા ચ વિશ્વસ્યાધિપતિઃ પ્રભુઃ ।
તં વિશ્વાધિપતિં જ્ઞાત્વા મૃત્યુપાશાત્પ્રમુચ્યતે ॥ ૩૬॥

ઘૃતાત્પરં મણ્ડમિવ સૂક્ષ્મં જ્ઞાત્વા સ્થિતં પ્રભુમ્ ।
સર્વભૂતેષુ ગૂઢં ચ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૩૭॥

એષ એવ પરો દેવો વિશ્વકર્મા મહેશ્વરઃ ।
હૃદયે સન્નિવિષ્ટં તં જ્ઞાત્વૈવામૃતમશ્નુતે ॥ ૩૮॥

યદા સમસ્તં ન દિવા ન રાત્રિર્ન સદપ્યસત્ ।
કેવલશ્શિવ એવૈકો યતઃ પ્રજ્ઞા પુરાતની ॥ ૩૯॥

નૈનમૂર્ધ્વં ન તિર્યક્ચ ન મધ્યં પર્યજિગ્રહત્ ।
ન તસ્ય પ્રતિમા ચાસ્તિ યસ્ય નામ મહદ્યશઃ ॥ ૪૦॥

અજાતમિમમેવૈકં બુદ્ધ્વા જન્મનિ ભીરવઃ ।
રુદ્રસ્યાસ્ય પ્રપદ્યન્તે રક્ષાર્થં દક્ષિણં સુખમ્ ॥ ૪૧॥

દ્વે અક્ષરે બ્રહ્મપરે ત્વનન્તે સમુદાહૃતે ।
વિદ્યાવિદ્યે સમાખ્યાતે નિહિતે યત્ર ગૂઢવત્ ॥ ૪૨॥

ક્ષરં ત્વવિદ્યા હ્યમૃતં વિદ્યેતિ પરિગીયતે ।
તે ઉભે ઈશતે યસ્તુ સોઽન્યઃ ખલુ મહેશ્વરઃ ॥ ૪૩॥

એકૈકં બહુધા જાલં વિકુર્વન્નેકવચ્ચ યઃ ।
સર્વાધિપત્યં કુરુતે સૃષ્ટ્વા સર્વાન્ પ્રતાપવાન્ ॥ ૪૪॥

દિશ ઊર્ધ્વમધસ્તિર્યક્ ભાસયન્ ભ્રાજતે સ્વયમ્ ।
યો નિઃસ્વભાવાદપ્યેકો વરેણ્યસ્ત્વધિતિષ્ઠતિ ॥ ૪૫॥

સ્વભાવં વાચકાન્ સર્વાન્ વાચ્યાંશ્ચ પરિણામયન્ ।
ગુણાંશ્ચ ભોગ્યભોક્તૃત્વે તદ્વિશ્વમધિતિષ્ઠતિ ॥ ૪૬॥

તં વૈ ગુહ્યોપનિષદિ ગૂઢં બ્રહ્મ પરાત્પરમ્ ।
બ્રહ્મયોનિં જગત્પૂર્વં વિદુર્દેવા મહર્ષયઃ ॥ ૪૭॥

ભાવગ્રાહ્યમનીહાખ્યં ભાવાભાવકરં શિવમ્ ।
કલાસર્ગકરં દેવં યે વિદુસ્તે જહુસ્તનુમ્ ॥ ૪૮॥

સ્વભાવમેકે મન્યન્તે કાલમેકે વિમોહિતાઃ ।
દેવસ્ય મહિમા હ્યેષ યેનેદં ભ્રામ્યતે જગત્ ॥ ૪૯॥

યેનેદમાવૃતં નિત્યં કાલકાલાત્મના યતઃ ।
તેનેરિતમિદં કર્મ ભૂતૈઃ સહ વિવર્તતે ॥ ૫૦॥

તત્કર્મ ભૂયશઃ કૃત્વા વિનિવર્ત્ય ચ ભૂયશઃ ।
તત્ત્વસ્ય સહ સત્ત્વેન યોગં ચાપિ સમેત્ય વૈ ॥ ૫૧॥

અષ્ટાભિશ્ચ ત્રિભિશ્ચૈવ દ્વાભ્યાં ચૈકેન વા પુનઃ ।
કાલેનાત્મગુણૈશ્ચાપિ કૃત્સ્નમેવ જગત્ સ્વયમ્ ॥ ૫૨॥

ગુણૈરારભ્ય કર્માણિ સ્વભાવાદીનિ યોજયેત્ ।
તેષામભાવે નાશઃ સ્યાત્કૃતસ્યાપિ ચ કર્મણઃ ॥ ૫૩॥

કર્મક્ષયે પુનશ્ચાન્યત્તતો યાતિ સ તત્ત્વતઃ ।
સ એવાદિઃ સ્વયં યોગનિમિત્તં ભોક્તૃભોગયોઃ ॥ ૫૪॥

પરસ્ત્રિકાલાદકલઃ સ એવ પરમેશ્વરઃ ।
સર્વવિત્ ત્રિગુણાધીશો બ્રહ્મ સાક્ષાત્ પરાત્પરઃ ॥ ૫૫॥

તં વિશ્વરૂપમભવં ભવમીડ્યં પ્રજાપતિમ્ ।
દેવદેવં જગત્પૂજ્યં સ્વચિત્તસ્થમુપાસ્મહે ॥ ૫૬॥

કાલાદિભિઃ પરો યસ્માત્ પ્રપઞ્ચઃ પરિવર્તતે ।
ધર્માવહં પાપનુદં ભોગેશં વિશ્વધામ ચ ॥ ૫૭॥

તમીશ્વરાણાં પરમં મહેશ્વરં
તં દેવતાનાં પરમં ચ દૈવતમ્ ।
પતિં પતીનાં પરમં પરસ્તાદ્
વિદામ દેવં ભુવનેશ્વરેશ્વરમ્ ॥ ૫૮॥

ન તસ્ય વિદ્યેત કાર્યં કારણં ચ ન વિદ્યતે ।
ન તત્સમોઽધિકશ્ચાપિ ક્વચિજ્જગતિ દૃશ્યતે ॥ ૫૯॥

પરાસ્ય વિવિધા શક્તિઃ શ્રુતૌ સ્વાભાવિકી શ્રુતા ।
જ્ઞાનં બલં ક્રિયાં ચૈવ યાભ્યો વિશ્વમિદં કૃતમ્ ॥ ૬૦॥

ન તસ્યાસ્તિ પતિઃ કશ્ચિન્નૈવ લિઙ્ગં ન ચેશિતા ।
કારણં કારણાનાં ચ સ તેષામધિપાધિપઃ ॥ ૬૧॥

ન ચાસ્ય જનિતા કશ્ચિન્ન ચ જન્મ કુતશ્ચન ।
ન જન્મહેતવસ્તદ્વન્મલમાયાદિસંજ્ઞકાઃ ॥ ૬૨॥

સ એકઃ સર્વભૂતેષુ ગૂઢો વ્યાપ્તશ્ચ વિશ્વતઃ ।
સર્વભૂતાન્તરાત્મા ચ ધર્માધ્યક્ષઃ સ કથ્યતે ॥ ૬૩॥

સર્વભૂતાધિવાસશ્ચ સાક્ષી ચેતા ચ નિર્ગુણઃ ।
એકો વશી નિષ્ક્રિયાણાં બહૂનાં વિવશાત્મનામ્ ॥ ૬૪॥

નિત્યાનામપ્યસૌ નિત્યશ્ચેતનાનાં ચ ચેતનઃ ।
એકો બહૂનાં ચાકામઃ કામાનીશઃ પ્રયચ્છતિ ॥ ૬૫॥

સાઙ્ખ્યયોગાધિગમ્યં યત્ કારણં જગતાં પતિમ્ ।
જ્ઞાત્વા દેવં પશુઃ પાશૈઃ સર્વૈરેવ વિમુચ્યતે ॥ ૬૬॥

વિશ્વકૃદ્ વિશ્વવિત્ સ્વાત્મયોનિજ્ઞઃ કાલકૃદ્ ગુણી ।
પ્રધાનઃ ક્ષેત્રજ્ઞપતિર્ગુણેશઃ પાશમોચકઃ ॥ ૬૭॥

બ્રહ્માણં વિદધે પૂર્વં વેદાંશ્ચોપાદિશત્સ્વયમ્ ।
યો દેવસ્તમહં બુદ્ધ્વા સ્વાત્મબુદ્ધિપ્રસાદતઃ ॥ ૬૮॥

મુમુક્ષુરસ્માત્ સંસારાત્ પ્રપદ્યે શરણં શિવમ્ ।

નિષ્કલં નિષ્ક્રિયં શાન્તં નિરવદ્યં નિરઞ્જનમ્ ॥ ૬૯॥

અમૃતસ્ય પરં સેતું દગ્ધેન્ધનમિવાનલમ્ ॥ ૭૦॥

યદા ચર્મવદાકાશં વેષ્ટયિષ્યન્તિ માનવાઃ ।
તદા શિવમવિજ્ઞાય દુઃખસ્યાન્તો ભવિષ્યતિ ॥ ૭૧॥

તપઃપ્રભાવાદ્દેવસ્ય પ્રસાદાચ્ચ મહર્ષયઃ ।
આત્માશ્રમોચિતજ્ઞાનં પવિત્રં પાપનાશનમ્ ॥ ૭૨॥

વેદાન્તે પરમં ગુહ્યં પુરા કલ્પપ્રચોદિતમ્ ।
બ્રહ્મણો વદનાલ્લબ્ધં મયેદં ભાગ્યગૌરવાત્ ॥ ૭૩॥

નાપ્રશાન્તાય દાતવ્યમેતજ્જ્ઞાનમનુત્તમમ્ ।
ન પુત્રાયાસુવૃત્તાય નાશિષ્યાય ચ સર્વથા ॥ ૭૪॥

યસ્ય દેવે પરાભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૭૫॥

અતશ્ચ સઙ્ક્ષેપમિદં શ ૃણુધ્વં
શિવઃ પરસ્તાત્પ્રકૃતેશ્ચ પુંસઃ ।
સ સર્ગકાલે ચ કરોતિ સર્વં
સંહારકાલે પુનરાદદાતિ ॥ ૭૬॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે શિવતત્ત્વજ્ઞાનવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૭.૧.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૭. સપ્તમોઽધ્યાયઃ । કાલમહિમવર્ણનમ્ ।

મુનય ઊચુઃ ।
કાલાદુત્પદ્યતે સર્વં કાલાદેવ વિપદ્યતે ।
ન કાલનિરપેક્ષં હિ ક્વચિત્કિઞ્ચન વિદ્યતે ॥ ૧॥

યદાસ્યાન્તર્ગતં વિશ્વં શશ્વત્સંસારમણ્ડલમ્ ।
સર્ગસંહૃતિમુદ્રાભ્યાં ચક્રવત્પરિવર્તતે ॥ ૨॥

બ્રહ્મા હરિશ્ચ રુદ્રશ્ચ તથાન્યે ચ સુરાસુરાઃ ।

યત્કૃતાં નિયતિં પ્રાપ્ય પ્રભવો નાતિવર્તિતુમ્ ॥ ૩॥

ભૂતભવ્યભવિષ્યાદ્યૈર્વિભજ્ય જરયન્ પ્રજાઃ ।
અતિપ્રભુરિતિ સ્વૈરં વર્તતેઽતિભયઙ્કરઃ ॥ ૪॥

ક એષ ભગવાન્ કાલઃ કસ્ય વા વશવર્ત્યયમ્ ।
ક એવાસ્ય વશે ન સ્યાત્કથયૈતદ્વિચક્ષણ ॥ ૫॥

વાયુરુવાચ ।
કાલકાષ્ઠાનિમેષાદિકલાકલિતવિગ્રહમ્ ।
કાલાત્મેતિ સમાખ્યાતં તેજો માહેશ્વરં પરમ્ ॥ ૬॥

યદલઙ્ઘ્યમશેષસ્ય સ્થાવરસ્ય ચરસ્ય ચ ।
નિયોગરૂપમીશસ્ય બલં વિશ્વનિયામકમ્ ॥ ૭॥

તસ્યાંશાંશમયી શક્તિઃ કાલાત્મનિ મહાત્મનિ ।
તતો નિષ્ક્રમ્ય સઙ્ક્રાન્તા વિસૃષ્ટાગ્રેરિવાયસી ॥ ૮॥

તસ્માત્કાલવશે વિશ્વં ન સ વિશ્વવશે સ્થિતઃ ।
શિવસ્ય તુ વશે કાલો ન કાલસ્ય વશે શિવઃ ॥ ૯॥

યતોઽપ્રતિહતં શાર્વં તેજઃ કાલે પ્રતિષ્ઠિતમ્ ।
મહતી તેન કાલસ્ય મર્યાદા હિ દુરત્યયા ॥ ૧૦॥

કાલં પ્રજ્ઞાવિશેષેણ કોઽતિવર્તિતુમર્હતિ ।
કાલેન તુ કૃતં કર્મ ન કશ્ચિદતિવર્તતે ॥ ૧૧॥

એકચ્છત્રાં મહીં કૃત્સ્નાં યે પરાક્રમ્ય શાસતિ ।
તેઽપિ નૈવાતિવર્તન્તે કાલં વેલામિવાબ્ધયઃ ॥ ૧૨॥

યે નિગૃહ્યેન્દ્રિયગ્રામં જયન્તિ સકલં જગત્ ।
ન જયન્ત્યપિ તે કાલં કાલો જયતિ તાનપિ ॥ ૧૩॥

આયુર્વેદવિદો વૈદ્યાઃ ત્વનુષ્ઠિતરસાયનાઃ ।
ન મૃત્યુમતિવર્તન્તે કાલો હિ દુરતિક્રમઃ ॥ ૧૪॥

શ્રિયા રૂપેણ શીલેન બલેન ચ કુલેન ચ ।
અન્યચ્ચિન્તયતે જન્તુઃ કાલોઽન્યત્કુરુતે બલાત્ ॥ ૧૫॥

અપ્રિયૈશ્ચ પ્રિયૈશ્ચૈવ હ્યચિન્તિતસમાગમૈઃ ।
સંયોજયતિ ભૂતાનિ વિયોજયતિ ચેશ્વરઃ ॥ ૧૬॥

યદૈવ દુઃખિતઃ કશ્ચિત્તદૈવ સુખિતઃ પરઃ ।
દુર્વિજ્ઞેયસ્વભાવસ્ય કાલાસ્યાહો વિચિત્રતા ॥ ૧૭॥

યો યુવા સ ભવેદ્ વૃદ્ધો યો બલીયાન્સ દુર્બલઃ ।
યઃ શ્રીમાન્સોઽપિ નિઃશ્રીકઃ કાલશ્ચિત્રગતિર્દ્વિજા ॥ ૧૮॥

નાભિજાત્યં ન વૈ શીલં ન બલં ન ચ નૈપુણમ્ ।
ભવેત્કાર્યાય પર્યાપ્તં કાલશ્ચત્ પ્રતિરોધકઃ ॥ ૧૯॥

યે સનાથાશ્ચ દાતારો ગીતવાદ્યૈરુપસ્થિતાઃ ।
યે ચાનાથાઃ પરાન્નાદાઃ કાલસ્તેષુ સમક્રિયઃ ॥ ૨૦॥

ફલન્ત્યકાલે ન રસાયનાનિ
સમ્યક્ પ્રયુક્તાન્યપિ ચૌષધાનિ ।
તાન્યેવ કાલેન સમાહૃતાનિ
સિદ્ધિં પ્રયાન્ત્યાશુ સુખં દિશન્તિ ॥ ૨૧॥

નાકાલતોઽયં મ્રિયતે જાયતે વા
નાકાલતઃ પુષ્ટિમગ્ર્યામુપૈતિ ।
નાકાલતઃ સુખિતં દુઃખિતં વા
નાકાલિકં વસ્તુ સમસ્તિ કિઞ્ચિત્ ॥ ૨૨॥

કાલેન શીતઃ પ્રતિવાતિ વાતઃ
કાલેન વૃષ્ટિર્જલદાનુપૈતિ ।
કાલેન ચોષ્મા પ્રશમં પ્રયાતિ
કાલેન સર્વં સફલત્વમેતિ ॥ ૨૩॥

કાલશ્ચ સર્વસ્ય ભવસ્ય હેતુઃ
કાલેન સસ્યાનિ ભવન્તિ નિત્યમ્ ।
કાલેન સસ્યાનિ લયં પ્રયાન્તિ
કાલેન સઞ્જીવતિ જીવલોકઃ ॥ ૨૪॥

ઇત્થં કાલાત્મનસ્તત્ત્વં યો વિજાનાતિ તત્ત્વતઃ ।
કાલાત્માનમતિક્રમ્ય કાલાતીતં સ પશ્યતિ ॥ ૨૫॥

ન યસ્ય કાલો ન ચ બન્ધમુક્તી
ન યઃ પુમાન્ન પ્રકૃતિર્ન વિશ્વમ્ ।

વિચિત્રરૂપાય શિવાય તસ્મૈ
નમઃપરસ્મૈ પરમેશ્વરાય ॥ ૨૬॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે કાલમહિમવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૭.૧.૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૮. અષ્ટમોઽધ્યાયઃ । કાલપ્રભાવે ત્રિદેવાયુર્વર્ણનમ્ ।

ઋષય ઊચુઃ ।
કેન માનેન કાલેઽસ્મિન્નાયુઃ સઙ્ખ્યા પ્રકલ્પ્યતે ।
સઙ્ખ્યારૂપસ્ય કાલસ્ય કઃ પુનઃ પરમોઽવધિઃ ॥ ૧॥

વાયુરુવાચ ।
આયુષોઽત્ર નિમેષાખ્યમાદ્યમાનં પ્રચક્ષતે ।
સઙ્ખ્યારૂપસ્ય કાલસ્ય શાન્ત્યતીતકલાવધિ ॥ ૨॥

અક્ષિપક્ષ્મપરિક્ષેપો નિમેષઃ પરિકલ્પિતઃ ।
તાદૃશાનાં નિમેષાણાં કાષ્ઠા દશ ચ પઞ્ચ ચ ॥ ૩॥

કાષ્ઠાસ્ત્રિંશત્કલા નામ કલાસ્ત્રિંશન્મુહૂર્તકઃ ।
મુહૂર્ત્તાનામપિ ત્રિંશદહોરાત્રં પ્રચક્ષતે ॥ ૪॥

ત્રિંશત્સઙ્ખ્યૈરહોરાત્રૈર્માસઃ પક્ષદ્વયાત્મકઃ ॥ ૫॥

જ્ઞેયં પિત્ર્યમહોરાત્રં માસઃ કૃષ્ણસિતાત્મકઃ ॥ ૬॥

માસૈસ્તૈરયનં ષડ્ભિર્વર્ષં દ્વે ચાયનં મતમ્ ।
લૌકિકેનૈવ માનેન હ્યબ્દો યો માનુષઃ સ્મૃતઃ ॥ ૭॥

એતદ્દિવ્યમહોરાત્રમિતિ શાસ્ત્રસ્ય નિશ્ચયઃ ।
દક્ષિણં ચાયનં રાત્રિસ્તથોદગયનં દિનમ્ ॥ ૮॥

માસસ્ત્રિંશદહોરાત્રૈર્દિવ્યો માનુષવત્સ્મૃતઃ ।
સંવત્સરોઽપિ દેવાનાં માસૈર્દ્વાદશભિસ્તથા ॥ ૯॥

ત્રીણિ વર્ષશતાન્યેવ ષષ્ટિવર્ષયુતાન્યપિ ।
દિવ્યઃ સંવત્સરો જ્ઞેયો માનુષેણ પ્રકીર્તિતઃ ॥ ૧૦॥

દિવ્યેનૈવ પ્રમાણેન યુગસઙ્ખ્યા પ્રવર્તતે ।
ચત્વારિ ભારતે વર્ષે યુગાનિ કવયો વિદુઃ ॥ ૧૧॥

પૂર્વં કૃતયુગં નામ તતસ્ત્રેતા વિધીયતે ।
દ્વાપરં ચ કલિશ્ચૈવ યુગાન્યેતાનિ કૃત્સ્નશઃ ॥ ૧૨॥

ચત્વારિ તુ સહસ્રાણિ વર્ષાણાં તત્કૃતં યુગમ્ ।
તસ્ય તાવચ્છતી સન્ધ્યા સન્ધ્યાંશશ્ચ તથાવિધઃ ॥ ૧૩॥

ઇતરેષુ સસન્ધ્યેષુ સસન્ધ્યાંશેષુ ચ ત્રિષુ ।
એકાપાયેન વર્તન્તે સહસ્રાણિ શતાનિ ચ ॥ ૧૪॥

એતદ્દ્વાદશસાહસ્રં સાધિકં ચ ચતુર્યુગમ્ ।
ચતુર્યુગસહસ્રં યત્સઙ્કલ્પ ઇતિ કથ્યતે ॥ ૧૫॥

ચતુર્યુગૈકસપ્તત્યા મનોરન્તરમુચ્યતે ।
કલ્પે ચતુર્દશૈકસ્મિન્મનૂનાં પરિવૃત્તયઃ ॥ ૧૬॥

એતેન ક્રમયોગેન કલ્પમન્વન્તરાણિ ચ ।
સપ્રજાનિ વ્યતીતાનિ શતશોઽથ સહસ્રશઃ ॥ ૧૭॥

અજ્ઞેયત્વાચ્ચ સર્વેષામસઙ્ખ્યેયતયા પુનઃ ।
શક્યો નૈવાનુપૂર્વ્યાદ્વૈ તેષાં વક્તું સુવિસ્તરઃ ॥ ૧૮॥

કલ્પો નામ દિવા પ્રોક્તો બ્રહ્મણોઽવ્યક્તજન્મનઃ ।
કલ્પાનાં વૈ સહસ્રં ચ બ્રાહ્મં વર્ષમિહોચ્યતે ॥ ૧૯॥

વર્ષાણામષ્ટસાહસ્રં યચ્ચ તદ્બ્રહ્મણો યુગમ્ ।
સવનં યુગસાહસ્રં બ્રહ્મણઃ પદ્મજન્મનઃ ॥ ૨૦॥

સવનાનાં સહસ્રં ચ ત્રિગુણં ત્રિવૃતં તથા ।
કલ્પ્યતે સકલઃ કાલો બ્રહ્મણઃ પરમેષ્ઠિનઃ ॥ ૨૧॥

તસ્ય વૈ દિવસે યાન્તિ ચતુર્દશ પુરન્દરાઃ ।
શતાનિ માસે ચત્વારિ વિંશત્યા સહિતાનિ ચ ॥ ૨૨॥

અબ્દે પઞ્ચ સહસ્રાણિ ચત્વારિંશદ્યુતાનિ ચ ।
ચત્વારિંશત્સહસ્રાણિ પઞ્ચ લક્ષાણિ ચાયુષિ ॥ ૨૩॥

બ્રહ્મા વિષ્ણોર્દિને ચૈકો વિષ્ણૂ રુદ્રદિને તથા ।
ઈશ્વરસ્ય દિને રુદ્રઃ સદાખ્યસ્ય તથેશ્વરઃ ॥ ૨૪॥

સાક્ષાચ્છિવસ્ય તત્સઙ્ખ્યસ્તથા સોઽપિ સદાશિવઃ ।
ચત્વારિંશત્સહસ્રાણિ પઞ્ચલક્ષાણિ ચાયુષિ ॥ ૨૫॥

તસ્મિન્સાક્ષાચ્છિવેનૈષ કાલાત્મા સમ્પ્રવર્તતે ।
યત્તત્સૃષ્ટેઃ સમાખ્યાતં કાલાન્તરમિહ દ્વિજાઃ ॥ ૨૬॥

એતત્કાલાન્તરં જ્ઞેયમહર્વૈ પારમેશ્વરમ્ ।
રાત્રિશ્ચ તાવતી જ્ઞેયા પરમેશસ્ય કૃત્સ્નશઃ ॥ ૨૭॥

અહસ્તસ્ય તુ યા સૃષ્ટી રાત્રિશ્ચ પ્રલયઃ સ્મૃતઃ ।
અહર્ન વિદ્યતે તસ્ય ન રાત્રિરિતિ ધારયેત્ ॥ ૨૮॥

એષોપચારઃ ક્રિયતે લોકાનાં હિતકામ્યયા ।
પ્રજાઃ પ્રજાનાં પતયો મૂર્તયશ્ચ સુરાસુરાઃ ॥ ૨૯॥

ઇન્દ્રિયાણીન્દ્રિયાર્થાશ્ચ મહાભૂતાનિ પઞ્ચ ચ ।
તન્માત્રાણ્યથ ભૂતાદિર્બુદ્ધિશ્ચ સહ દૈવતૈઃ ॥ ૩૦॥

અહસ્તિષ્ઠન્તિ સર્વાણિ પરમેશસ્ય ધીમતઃ ।
અહરન્તે પ્રલીયન્તે રાત્ર્યન્તે વિશ્વસમ્ભવઃ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે કાલપ્રભાવે ત્રિદેવાયુર્વર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૭.૧.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૯. નવમોઽધ્યાયઃ । સૃષ્ટિપાલનપ્રલયકર્તૃત્વવર્ણનમ્ ।

મુનય ઊચુઃ ।
કથં જગદિદં કૃત્સ્નં વિધાય ચ નિધાય ચ ।
આજ્ઞયા પરમાં ક્રીડાં કરોતિ પરમેશ્વરઃ ॥ ૧॥

કિં તત્પ્રથમસમ્ભૂતં કેનેદમખિલં તતમ્ ।
કેન વા પુનરેવેદં ગ્રસ્યતે પૃથુકુક્ષિણા ॥ ૨॥

વાયુરુવાચ ।

શક્તિઃ પ્રથમસમ્ભૂતા શાન્ત્યતીતપદોત્તરા ।
તતો માયા તતોऽવ્યક્તં શિવાચ્છક્તિમતઃ પ્રભોઃ ॥ ૩॥

શાન્ત્યતીતપદં શક્તેસ્તતઃ શાન્તિપદં ક્રમાત્ ।
તતો વિદ્યાપદં તસ્માત્પ્રતિષ્ઠાપદસમ્ભવઃ ॥ ૪॥

નિવૃત્તિપદમુત્પન્નં પ્રતિષ્ઠાપદતઃ ક્રમાત્ ।
એવમુક્તા સમાસેન સૃષ્ટિરીશ્વરચોદિતા ॥ ૫॥

આનુલોમ્યાત્તથૈતેષાં પ્રાતિલોમ્યેન સંહૃતિઃ ।
અસ્માત્પઞ્ચપદોદ્દિષ્ટાત્પરઃ સ્રષ્ટા સમિષ્યતે ॥ ૬॥

કલાભિઃ પઞ્ચભિર્વ્યાપ્તં તસ્માદ્વિશ્વમિદં જગત્ ।
અવ્યક્તં કારણં યત્તદાત્મના સમનુષ્ઠિતમ્ ॥ ૭॥

મહદાદિવિશેષાન્તં સૃજતીત્યપિ સમ્મતમ્ ।
કિં તુ તત્રાપિ કર્તૃત્વં નાવ્યક્તસ્ય ન ચાત્મનઃ ॥ ૮॥

અચેતનત્વાત્પ્રકૃતેરજ્ઞત્વાત્પુરુષસ્ય ચ ।
પ્રધાનપરમાણ્વાદિ યાવત્કિઞ્ચિદચેતનમ્ ॥ ૯॥

તત્કર્તૃકં સ્વયં દૃષ્ટં બુદ્ધિમત્કારણં વિના ।
જગચ્ચ કર્તૃસાપેક્ષં કાર્યં સાવયવં યતઃ ॥ ૧૦॥

તસ્માચ્છક્તઃ સ્વતન્ત્રો યઃ સર્વશક્તિશ્ચ સર્વવિત્ ।
અનાદિનિધનશ્ચાયં મહદૈશ્વર્યસંયુતઃ ॥ ૧૧॥

સ એવ જગતઃ કર્તા મહાદેવો મહેશ્વરઃ ।
પાતા હર્તા ચ સર્વસ્ય તતઃ પૃથગનન્વયઃ ॥ ૧૨॥

પરિણામઃ પ્રધાનસ્ય પ્રવૃત્તિઃ પુરુષસ્ય ચ ।
સર્વં સત્યવ્રતસ્યૈવ શાસનેન પ્રવર્તતે ॥ ૧૩॥

ઇતીયં શાશ્વતી નિષ્ઠા સતાં મનસિ વર્તતે ।
ન ચૈનં પક્ષમાશ્રિત્ય વર્તતે સ્વલ્પચેતનઃ ॥ ૧૪॥

યાવદાદિસમારમ્ભો યાવદ્યઃ પ્રલયો મહાન્ ।
તાવદપ્યેતિ સકલં બ્રહ્મણઃ શારદાં શતમ્ ॥ ૧૫॥

પરમિત્યાયુષો નામ બ્રહ્મણોऽવ્યક્તજન્મનઃ ।
તત્પરાખ્યં તદર્દ્ધં ચ પરાર્ધમભિધીયતે ॥ ૧૬॥

પરાર્દ્ધદ્વયકાલાન્તે પ્રલયે સમુપસ્થિતે ।
અવ્યક્તમાત્મનઃ કાર્યમાદાયાત્મનિ તિષ્ઠતિ ॥ ૧૭॥

આત્મન્યવસ્થિતેઽવ્યક્તે વિકારે પ્રતિસંહૃતે ।
સાધર્મ્યેણાધિતિષ્ઠેતે પ્રધાનપુરુષાવુભૌ ॥ ૧૮॥

તમઃ સત્ત્વગુણાવેતૌ સમત્વેન વ્યવસ્થિતૌ ।
અનુદ્રિક્તાવનૂનૌ તાવોતપ્રોતૌ પરસ્પરમ્ ॥ ૧૯॥

ગુણસામ્યે તદા તસ્મિન્નવિભાગે તમોદયે ।
શાન્તવાતૈકનીરે ચ ન પ્રાજ્ઞાયત કિઞ્ચન ॥ ૨૦॥

અપ્રજ્ઞાતે જગત્યસ્મિન્નેક એવ મહેશ્વરઃ ।
ઉપાસ્ય રજનીં કૃત્સ્નાં પરાં માહેશ્વરીં તતઃ ॥ ૨૧॥

પ્રભાતાયાં તુ શર્વર્યાં પ્રધાનપુરુષાવુભૌ ।
પ્રવિશ્ય ક્ષોભયામાસ માયાયોગાન્મહેશ્વરઃ ॥ ૨૨॥

તતઃ પુનરશેષાણાં ભૂતાનાં પ્રભવાપ્યયાત્ ।
અવ્યક્તાદભવત્સૃષ્ટિરાજ્ઞયા પરમેષ્ઠિનઃ ॥ ૨૩॥

વિશ્વોત્તરોત્તરવિચિત્રમનોરથસ્ય
યસ્યૈકશક્તિશકલે સકલઃ સમાપ્તઃ ।
આત્માનમધ્વપતિમધ્વવિદો વદન્તિ
તસ્મૈ નમઃ સકલલોકવિલક્ષણાય ॥ ૨૪॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે સૃષ્ટિપાલનપ્રલયકર્તૃત્વવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૭.૧.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૦. દશમોઽધ્યાયઃ । બ્રહ્માણ્ડસ્થિતિવર્ણનમ્ ।

વાયુરુવાચ ।
પુરુષાધિષ્ઠિતાત્પૂર્વમવ્યક્તાદીશ્વરાજ્ઞયા ।

બુદ્ધ્યાદયો વિશેષાન્તા વિકારાશ્ચાભવન્ ક્રમાત્ ॥ ૧॥

તતસ્તેભ્યો વિકારેભ્યો રુદ્રો વિષ્ણુઃ પિતામહઃ ।
કારણત્વેન સર્વેષાં ત્રયો દેવાઃ પ્રજજ્ઞિરે ॥ ૨॥

સર્વતો ભુવનવ્યાપ્તિશક્તિમવ્યાહતાં ક્વચિત્ ।
જ્ઞાનમપ્રતિમં શશ્વદૈશ્વર્યં ચાણિમાદિકમ્ ॥ ૩॥

સૃષ્ટિસ્થિતિલયાખ્યેષુ કર્મસુ ત્રિષુ હેતુતામ્ ।
પ્રભુત્વેન સહૈતેષાં પ્રસીદતિ મહેશ્વરઃ ॥ ૪॥

કલ્પાન્તરે પુનસ્તેષામસ્પર્દ્ધાબુદ્ધિમોહિનામ્ ।
સર્ગરક્ષાલયાચારં પ્રત્યેકં પ્રદદૌ ચ સઃ ॥ ૫॥

એતે પરસ્પરોત્પન્ના ધારયન્તિ પરસ્પરમ્ ।
પરસ્પરેણ વર્દ્ધન્તે પરસ્પરમનુવ્રતાઃ ॥ ૬॥

ક્વચિદ્બ્રહ્મા ક્વચિદ્વિષ્ણુઃ ક્વચિદ્ રુદ્રઃ પ્રશસ્યતે ।
નાનેન તેષામાધિક્યમૈશ્વર્યં ચાતિરિચ્યતે ॥ ૭॥

મૂર્ખા નિન્દન્તિ તાન્વાગ્ભિઃ સંરમ્ભાભિનિવેશિનઃ ।
યાતુધાના ભવન્ત્યેવ પિશાચાશ્ચ ન સંશયઃ ॥ ૮॥

દેવો ગુણત્રયાતીતશ્ચતુર્વ્યૂહો મહેશ્વરઃ ।
સકલઃ સકલાધારઃ શક્તેરુત્પત્તિકારણમ્ ॥ ૯॥

સોઽયમાત્મા ત્રયસ્યાસ્ય પ્રકૃતેઃ પુરુષસ્ય ચ ।
લીલાકૃતજગત્સૃષ્ટિરીશ્વરત્વે વ્યવસ્થિતઃ ॥ ૧૦॥

યઃ સર્વસ્માત્પરો નિત્યો નિષ્કલઃ પરમેશ્વરઃ ।
સ એવ ચ તદાધારસ્તદાત્મા તદધિષ્ઠિતઃ ॥ ૧૧॥

તસ્માન્મહેશ્વરશ્ચૈવ પ્રકૃતિઃ પુરુષસ્તથા ।
સદાશિવો ભવો વિષ્ણુર્બ્રહ્મા સર્વં શિવાત્મકમ્ ॥ ૧૨॥

પ્રધાનાત્પ્રથમં જજ્ઞે બુદ્ધિઃ ખ્યાતિર્મતિર્મહાન્ ।
મહત્તત્ત્વસ્ય સઙ્ક્ષોભાદહઙ્કારસ્ત્રિધાઽભવત્ ॥ ૧૩॥

અહઙ્કારશ્ચ ભૂતાનિ તન્માત્રાણીન્દ્રિયાણિ ચ ।
વૈકારિકાદહઙ્કારાત્સત્ત્વોદ્રિક્તાત્તુ સાત્ત્વિકઃ ॥ ૧૪॥

વૈકારિકઃ સ સર્ગસ્તુ યુગપત્સમ્પ્રવર્તતે ।
બુદ્ધીન્દ્રિયાણિ પઞ્ચૈવ પઞ્ચકર્મેન્દ્રિયાણિ ચ ॥ ૧૫॥

એકાદશં મનસ્તત્ર સ્વગુણેનોભયાત્મકમ્ ।
તમોયુક્તાદહઙ્કારાદ્ભૂતતન્માત્રસમ્ભવઃ ॥ ૧૬॥

ભૂતાનામાદિભૂતત્વાદ્ ભૂતાદિઃ કથ્યતે તુ સઃ ।
ભૂતાદેઃ શબ્દમાત્રં સ્યાત્તત્ર ચાકાશસમ્ભવઃ ॥ ૧૭॥

આકાશાત્સ્પર્શ ઉત્પન્નઃ સ્પર્શાદ્વાયુસમુદ્ભવઃ ।
વાયો રૂપં તતસ્તેજસ્તેજસો રસસમ્ભવઃ ॥ ૧૮॥

રસાદાપઃ સમુત્પન્નાસ્તાભ્યો ગન્ધસમુદ્ભવઃ ।
ગન્ધાચ્ચ પૃથિવી જાતા ભૂતેભ્યોઽન્યચ્ચરાચરમ્ ॥ ૧૯॥

પુરુષાધિષ્ઠિતત્વાચ્ચ અવ્યક્તાનુગ્રહેણ ચ ।
મહદાદિવિશેષાન્તા હ્યણ્ડમુત્પાદયન્તિ તે ॥ ૨૦॥

તત્ર કાર્યં ચ કરણં સંસિદ્ધં બ્રહ્મણો યદા ।
તદણ્ડે સુપ્રવૃદ્ધોઽભૂત્ ક્ષેત્રજ્ઞો બ્રહ્મસંજ્ઞિતઃ ॥ ૨૧॥

સ વૈ શરીરી પ્રથમઃ સ વૈ પુરુષ ઉચ્યતે ।
આદિકર્તા સ ભૂતાનાં બ્રહ્માગ્રે સમવર્તત ॥ ૨૨॥

તસ્યેશ્વરસ્યાપ્રતિમા જ્ઞાનવૈરાગ્યલક્ષણા ।
ધર્મૈશ્વર્યકરી બુદ્ધિર્બ્રાહ્મી યજ્ઞેઽભિમાનિનઃ ॥ ૨૩॥

અવ્યક્તાજ્જાયતે તસ્ય મનસા યદ્યદીપ્સિતમ્ ।
વશીકૃતત્વાત્ત્રૈગુણ્યાત્સાપેક્ષત્વાત્સ્વભાવતઃ ॥ ૨૪॥

ત્રિધા વિભજ્ય ચાત્માનં ત્રૈલોક્યે સમ્પ્રવર્ત્તતે ।
સૃજતે ગ્રસતે ચૈવ વીક્ષતે ચ ત્રિભિઃ સ્વયમ્ ॥ ૨૫॥

ચતુર્મુખસ્તુ બ્રહ્મત્વે કાલત્વે ચાન્તકઃ સ્મૃતઃ ।
સહસ્રમૂર્દ્ધા પુરુષસ્તિસ્રોઽવસ્થાસ્સ્વયમ્ભુવઃ ॥ ૨૬॥

સત્ત્વં રજશ્ચ બ્રહ્મત્વે ચ કાલત્વે ચ તમો રજઃ ।
વિષ્ણુત્વે કેવલં સત્ત્વં ગુણવૃદ્ધિસ્ત્રિધા વિભોઃ ॥ ૨૭॥

બ્રહ્મત્વે સૃજતે લોકાન્ કાલત્વે સઙ્ક્ષિપત્યપિ ।
પુરુષત્વેઽત્યુદાસીનઃ કર્મ ચ ત્રિવિધં વિભોઃ ॥ ૨૮॥

એવં ત્રિધા વિભિન્નત્વાદ્ બ્રહ્મા ત્રિગુણ ઉચ્યતે ।
ચતુર્દ્ધા પ્રવિભક્તત્વાચ્ચાતુર્વ્યૂહઃ પ્રકીર્તિતઃ ॥ ૨૯॥

આદિત્વાદાદિદેવોઽસાવજાતત્વાદજઃ સ્મૃતઃ ।
પાતિ યસ્માત્પ્રજાઃ સર્વાઃ પ્રજાપતિરિતિ સ્મૃતઃ ॥ ૩૦॥

હિરણ્મયસ્તુ યો મેરુસ્તસ્યોલ્બં સુમહાત્મનઃ ।
ગર્ભોદકં સમુદ્રાશ્ચ જરાયુશ્ચાઽપિ પર્વતાઃ ॥ ૩૧॥

તસ્મિન્નણ્ડે ત્વિમે લોકા અન્તર્વિશ્વમિદં જગત્ ।
ચન્દ્રાદિત્યૌ સનક્ષત્રૌ સગ્રહૌ સહ વાયુના ॥ ૩૨॥

અદ્ભિર્દશગુણાભિસ્તુ બાહ્યતોઽણ્ડં સમાવૃતમ્ ।
આપો દશગુણેનૈવ તેજસા બહિરાવૃતાઃ ॥ ૩૩॥

તેજો દશગુણેનૈવ વાયુના બહિરાવૃતમ્ ।
આકાશેનાવૃતો વાયુઃ ખં ચ ભૂતાદિનાઽઽવૃતમ્ ॥ ૩૪॥

ભૂતાદિર્મહતા તદ્વદવ્યક્તેનાવૃતો મહાન્ ।
એતૈરાવરણૈરણ્ડં સપ્તભિર્બહિરાવૃતમ્ ॥ ૩૫॥

એતદાવૃત્ય ચાન્યોઽન્યમષ્ટૌ પ્રકૃતયઃ સ્થિતાઃ ।
સૃષ્ટિપાલનવિધ્વંસકર્મકર્ત્ર્યો દ્વિજોત્તમાઃ ॥ ૩૬॥

એવં પરસ્પરોત્પન્ના ધારયન્તિ પરસ્પરમ્ ।
આધારાધેયભાવેન વિકારાસ્તુ વિકારિષુ ॥ ૩૭॥

કૂર્મોઽઙ્ગાનિ યથા પૂર્વં પ્રસાર્ય્ય વિનિયચ્છતિ ।
વિકારાંશ્ચ તથાઽવ્યક્તં સૃષ્ટ્વા ભૂયો નિયચ્છતિ ॥ ૩૮॥

અવ્યક્તપ્રભવં સર્વમાનુલોમ્યેન જાયતે ।
પ્રાપ્તે પ્રલયકાલે તુ પ્રાતિલોમ્યેઽનુલીયતે ॥ ૩૯॥

ગુણાઃ કાલવશાદેવ ભવન્તિ વિષમાઃ સમાઃ ।
ગુણસામ્યે લયો જ્ઞેયો વૈષમ્યે સૃષ્ટિરુચ્યતે ॥ ૪૦॥

તદિદં બ્રહ્મણો યોનિરેતદણ્ડં ઘનં મહત્ ।
બ્રહ્મણઃ ક્ષેત્રમુદ્દિષ્ટં બ્રહ્મા ક્ષેત્રજ્ઞ ઉચ્યતે ॥ ૪૧॥

ઇતીદૃશાનામણ્ડાનાં કોટ્યો જ્ઞેયાઃ સહસ્રશઃ ।

સર્વગત્વાત્પ્રધાનસ્ય તિર્યગૂર્ધ્વમધઃ સ્થિતાઃ ॥ ૪૨॥

તત્ર તત્ર ચતુર્વક્ત્રા બ્રહ્માણો હરયો ભવાઃ ।
સૃષ્ટા પ્રધાનેન તથા લબ્ધ્વા શમ્ભોસ્તુ સન્નિધિમ્ ॥ ૪૩॥

મહેશ્વરઃ પરોવ્યક્તાદણ્ડમવ્યક્તસમ્ભવમ્ ।
અણ્ડાજ્જજ્ઞે વિભુર્બ્રહ્મા લોકાસ્તેન કૃતાસ્ત્વિમે ॥ ૪૪॥

અબુદ્ધિપૂર્વઃ કથિતો મયૈષઃ
પ્રધાનસર્ગઃ પ્રથમઃ પ્રવૃત્તઃ ।
આત્યન્તિકશ્ચ પ્રલયોઽન્તકાલે
લીલાકૃતઃ કેવલમીશ્વરસ્ય ॥ ૪૫॥

યત્તત્સ્મૃતં કારણમપ્રમેયં
બ્રહ્મ પ્રધાનં પ્રકૃતેઃ પ્રસૂતિઃ ।
અનાદિમધ્યાન્તમનન્તવીર્યં
શુક્લં સુરક્તં પુરુષેણ યુક્તમ્ ॥ ૪૬॥

ઉત્પાદકત્વાદ્રજસોઽતિરેકા
લ્લોકસ્ય સન્તાનવિવૃદ્ધિહેતૂન્ ।
અષ્ટૌ વિકારાનપિ ચાદિકાલે
સૃષ્ટ્વા સમશ્નાતિ તથાન્તકાલે ॥ ૪૭॥

પ્રકૃત્યવસ્થાપિતકારણાનાં
યા ચ સ્થિતિર્યા ચ પુનઃ પ્રવૃત્તિઃ ।
તત્સર્વમપ્રાકૃતવૈભવસ્ય
સઙ્કલ્પમાત્રેણ મહેશ્વરસ્ય ॥ ૪૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે બ્રહ્માણ્ડસ્થિતિવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૭.૧.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૧. એકાદશોઽધ્યાયઃ । સૃષ્ટ્યાદિવર્ણનમ્ ।

મુનય ઊચુઃ ।
મન્વન્તરાણિ સર્વાણિ કલ્પભેદાંશ્ચ સર્વશઃ ।
તેષ્વેવાન્તરસર્ગં ચ પ્રતિસર્ગં ચ નો વદ ॥ ૧॥

વાયુરુવાચ ।
કાલસઙ્ખ્યાવિવૃત્તસ્ય પરાર્દ્ધો બ્રહ્મણઃ સ્મૃતઃ ।
તાવાંશ્ચૈવાસ્ય કાલોઽન્યસ્તસ્યાન્તે પ્રતિસૃજ્યતે ॥ ૨॥

દિવસે દિવસે તસ્ય બ્રહ્મણઃ પૂર્વજન્મનઃ ।
ચતુર્દશ મહાભાગા મનૂનાં પરિવૃત્તયઃ ॥ ૩॥

અનાદિત્વાદનન્તત્વાદજ્ઞેયત્વાચ્ચ કૃત્સ્નશઃ ।
મન્વન્તરાણિ કલ્પાશ્ચ ન શક્યા વચનાત્પૃથક્ ॥ ૪॥

ઉક્તેષ્વપિ ચ સર્વેષુ શ ृણ્વતાં વો વચો મમ ।
કિમિહાસ્તિ ફલં તસ્માન્ન પૃથગ વક્તુમુત્સહે ॥ ૫॥

ય એવ ખલુ કલ્પેષુ કલ્પઃ સમ્પ્રતિ વર્તતે ।
તત્ર સઙ્ક્ષિપ્ય વર્તન્તે સૃષ્ટયઃ પ્રતિસૃષ્ટયઃ ॥ ૬॥

યસ્ત્વયં વર્તતે કલ્પો વારાહો નામ નામતઃ ।
અસ્મિન્નપિ દ્વિજશ્રેષ્ઠા મનવસ્તુ ચતુર્દશ ॥ ૭॥

સ્વાયમ્ભુવાદયઃ સપ્ત સપ્ત સાવર્ણિકાદયઃ ।
તેષુ વૈવસ્વતો નામ સપ્તમો વર્તતે મનુઃ ॥ ૮॥

મન્વન્તરેષુ સર્વેષુ સર્ગસંહારવૃત્તયઃ ।
પ્રાયઃ સમા ભવન્તીતિ તર્કઃ કાર્યો વિજાનતા ॥ ૯॥

પૂર્વકલ્પે પરાવૃત્તે પ્રવૃત્તે કાલમારુતે ।
સમુન્મૂલિતમૂલેષુ વૃક્ષેષુ ચ વનેષુ ચ ॥ ૧૦॥

જગન્તિ તૃણવત્ક્રીણિ દેવે દહતિ પાવકે ।
વૃષ્ટ્યા ભુવિ નિષિક્તાયાં વિવેલેષ્વર્ણવેષુ ચ ॥ ૧૧॥

દિક્ષુ સર્વાસુ મગ્નાસુ વારિપૂરે મહીયસિ ।
તદદ્ભિશ્ચટુલાક્ષેપૈસ્તરઙ્ગભુજમણ્ડલૈઃ ॥ ૧૨॥

પ્રારબ્ધચણ્ડનૃત્યેષુ તતઃ પ્રલયવારિષુ ।

બ્રહ્મા નારાયણો ભૂત્વા સુષ્વાપ સલિલે સુખમ્ ॥ ૧૩॥

ઇમં ચોદાહરન્મન્ત્રં શ્લોકં નારાયણં પ્રતિ ।
તં શ઼ૃણુધ્વં મુનિશ્રેષ્ઠાસ્તદર્થં ચાક્ષરાશ્રયમ્ ॥ ૧૪॥

આપો નારા ઇતિ પ્રોક્તા આપો વૈ નરસૂનવઃ ।
અયનં તસ્ય તા યસ્માત્તેન નારાયણઃ સ્મૃતઃ ॥ ૧૫॥

શિવયોગમયીં નિદ્રાં કુર્વન્તં ત્રિદશેશ્વરમ્ ।
બદ્ધાઞ્જલિપુટાઃ સિદ્ધા જનલોકનિવાસિનઃ ॥ ૧૬॥

સ્તોત્રૈઃ પ્રબોધયામાસુઃ પ્રભાતસમયે સુરાઃ ।
યથા સૃષ્ટ્યાદિસમયે ઈશ્વરં શ્રુતયઃ પુરા ॥ ૧૭॥

તતઃ પ્રબુદ્ધ ઉત્થાય શયનાત્તોયમધ્યગાત્ ।
ઉદૈક્ષત દિશઃ સર્વા યોગનિદ્રાલસેક્ષણઃ ॥ ૧૮॥

નાપશ્યત્સ તદા કિઞ્ચિત્સ્વાત્મનો વ્યતિરેકિ યત્ ।
સવિસ્મય ઇવાસીનઃ પરાં ચિન્તામુપાગમત્ ॥ ૧૯॥

ક્વ સા ભગવતી યા તુ મનોજ્ઞા મહતી મહી ।
નાનાવિધમહાશૈલનદીનગરકાનના ॥ ૨૦॥

એવં સઞ્ચિન્તયન્બ્રહ્મા બુબુધે નૈવ ભૂસ્થિતિમ્ ।
તદા સસ્માર પિતરં ભગવન્તં ત્રિલોચનમ્ ॥ ૨૧॥

સ્મરણાદ્દેવદેવસ્ય ભવસ્યામિતતેજસઃ ।
જ્ઞાતવાન્સલિલે મગ્નાં ધરણીં ધરણીપતિઃ ॥ ૨૨॥

તતો ભૂમેઃ સમુદ્ધારં કર્તુકામઃ પ્રજાપતિઃ ।
જલક્રીડોચિતં દિવ્યં વારાહં રૂપમસ્મરત્ ॥ ૨૩॥

મહાપર્વતવર્ષ્માણં મહાજલદનિઃસ્વનમ્ ।
નીલમેઘપ્રતીકાશં દીપ્તશબ્દં ભયાનકમ્ ॥ ૨૪॥

પીનવૃત્તઘનસ્કન્ધં પીનોન્નતકટીતટમ્ ।
હ્રસ્વવૃત્તોરુજઙ્ઘાગ્રં સુતીક્ષ્ણખુરમણ્ડલમ્ ॥ ૨૫॥

પદ્મરાગમણિપ્રખ્યં વૃત્તભીષણલોચનમ્ ।
વૃત્તદીર્ઘમહાગાત્રં સ્તબ્ધકર્ણસ્થલોજ્જ્વલમ્ ॥ ૨૬॥

ઉદીર્ણોચ્છ્વાસનિઃશ્વાસઘૂર્ણિતપ્રલયાર્ણવમ્ ।
વિસ્ફુરત્સુસટાચ્છન્નકપોલસ્કન્ધબન્ધુરમ્ ॥ ૨૭॥

મણિભિર્ભૂષણૈશ્ચિત્રૈર્મહારત્નૈઃ પરિષ્કૃતમ્ ।
વિરાજમાનં વિદ્યુદ્ભિર્મેઘસઙ્ઘમિવોન્નતમ્ ॥ ૨૮॥

આસ્થાય વિપુલં રૂપં વારાહમમિતં વિધિઃ ।
પૃથિવ્યુદ્ધરણાર્થાય પ્રવિવેશ રસાતલમ્ ॥ ૨૯॥

સ તદા શુશુભેઽતીવ સૂકરો ગિરિસન્નિભઃ ।
લિઙ્ગાકૃતેર્મહેશસ્ય પાદમૂલં ગતો યથા ॥ ૩૦॥

તતઃ સ સલિલે મગ્નાં પૃથિવીં પૃથિવીન્ધરઃ ।
ઉદ્ધૃત્યાલિઙ્ગ્ય દંષ્ટ્રાભ્યામુન્મમજ્જ રસાતલાત્ ॥ ૩૧॥

તં દૃષ્ટ્વા મુનયઃ સિદ્ધા જનલોકનિવાસિનઃ ।
મુમુદુર્નનૃતુર્મૂર્ધ્નિ તસ્ય પુષ્પૈરવાકિરન્ ॥ ૩૨॥

વપુર્મહાવરાહસ્ય શુશુભે પુષ્પસંવૃતમ્ ।
પતદ્ભિરિવ ખદ્યોતૈઃ પ્રાશુરઞ્જનપર્વતઃ ॥ ૩૩॥

તતઃ સંસ્થાનમાનીય વરાહો મહતીં મહીમ્ ।
સ્વમેવ રૂપમાસ્થાય સ્થાપયામાસ વૈ વિભુઃ ॥ ૩૪॥

પૃથિવીં ચ સમીકૃત્ય પૃથિવ્યાં સ્થાપયન્ ગિરીન્ ।
ભૂરાદ્યાંશ્ચતુરો લોકાન્ કલ્પયામાસ પૂર્વવત્ ॥ ૩૫॥

ઇતિ સહ મહતીં મહીં મહીધ્રૈઃ
પ્રલયમહાજલધેરધઃસ્થમધ્યાત્ ।
ઉપરિ ચ વિનિવેશ્ય વિશ્વકર્મા
ચરમચરં ચ જગત્સસર્જ ભૂયઃ ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે સૃષ્ટ્યાદિવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૭.૧.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૨. દ્વાદશોઽધ્યાયઃ । સૃષ્ટિવર્ણનમ્ ।

વાયુરુવાચ ।
સર્ગં ચિન્તયતસ્તસ્ય તદા વૈ બુદ્ધિપૂર્વકમ્ ।
પ્રધ્યાનકાલે મોહસ્તુ પ્રાદુર્ભૂતસ્તમોમયઃ ॥ ૧॥

તમોમોહો મહામોહસ્તામિસ્રશ્ચાન્ધસંજ્ઞિતઃ ।
અવિદ્યા પઞ્ચમી ચૈષા પ્રાદુર્ભૂતા મહાત્મનઃ ॥ ૨॥

પઞ્ચધાઽવસ્થિતઃ સર્ગો ધ્યાયતસ્ત્વભિમાનિનઃ ।
સર્વતસ્તમસાતીવ બીજકુમ્ભવદાવૃતઃ ॥ ૩॥

બહિરન્તશ્ચાપ્રકાશઃ સ્તબ્ધો નિઃસંજ્ઞ એવ ચ ।
તસ્માત્તેષાં વૃતા બુદ્ધિર્મુખાનિ કરણાનિ ચ ॥ ૪॥

તસ્માત્તે સંવૃતાત્માનો નગા મુખ્યાઃ પ્રકીર્તિતાઃ ।
તં દૃષ્ટ્વાસાધકં બ્રહ્મા પ્રથમં સર્ગમીદૃશમ્ ॥ ૫॥

અપ્રસન્નમના ભૂત્વા દ્વિતીયં સોઽભ્યમન્યત ।
તસ્યાભિધાયતઃ સર્ગં તિર્યક્સ્રોતોઽભ્યવર્ત્તત ॥ ૬॥

અન્તઃપ્રકાશાસ્તિર્યઞ્ચ આવૃતાશ્ચ બહિઃ પુનઃ ।
પશ્વાત્માનસ્તતો જાતા ઉત્પથગ્રાહિણશ્ચ તે ॥ ૭॥

તમપ્યસાધકં જ્ઞાત્વા સર્ગમન્યમમન્યત ।
તદોર્ધ્વસ્રોતસો વૃત્તો દેવસર્ગસ્તુ સાત્ત્વિકઃ ॥ ૮॥

તે સુખપ્રીતિબહુલા બહિરન્તશ્ચ નાવૃતાઃ ।
પ્રકાશા બહિરન્તશ્ચ સ્વભાવાદેવ સંજ્ઞિતાઃ ॥ ૯॥

તતોઽભિધ્યાયતોઽવ્યક્તાદર્વાક્સ્રોતસ્તુ સાધકઃ ।
મનુષ્યનામા સઞ્જાતઃ સર્ગો દુઃખસમુત્કટઃ ॥ ૧૦॥

પ્રકાશા બહિરન્તસ્તે તમોદ્રિક્તા રજોઽધિકાઃ ।
પઞ્ચમોઽનુગ્રહઃ સર્ગશ્ચતુર્ધા સંવ્યવસ્થિતઃ ॥ ૧૧॥

વિપર્ય્યેણ શક્ત્યા ચ તુષ્ટ્યા સિદ્ધ્યા તથૈવ ચ ।
તેઽપરિગ્રાહિણઃ સર્વે સંવિભાગરતાઃ પુનઃ ॥ ૧૨॥

ખાદનાશ્ચાપ્યશીલાશ્ચ ભૂતાદ્યાઃ પરિકીર્તિતાઃ ।
પ્રથમો મહતઃ સર્ગો બ્રહ્મણઃ પરમેષ્ઠિનઃ ॥ ૧૩॥

તન્માત્રાણાં દ્વિતીયસ્તુ ભૂતસર્ગઃ સ ઉચ્યતે ।
વૈકારિકસ્તૃતીયસ્તુ સર્ગ ઐન્દ્રિયકઃ સ્મૃતઃ ॥ ૧૪॥

ઇત્યેષ પ્રકૃતેઃ સર્ગઃ સમ્ભૃતોઽબુદ્ધિપૂર્વકઃ ।
મુખ્યસર્ગશ્ચતુર્થસ્તુ મુખ્યા વૈ સ્થાવરાઃ સ્મૃતાઃ ॥ ૧૫॥

તિર્યક્સ્રોતસ્તુ યઃ પ્રોક્તસ્તિર્યગ્યોનિઃ સ પઞ્ચમઃ ।
તદૂર્ધ્વસ્રોતસઃ ષષ્ઠો દેવસર્ગસ્તુ સ સ્મૃતઃ ॥ ૧૬॥

તતોઽર્વાક્ સ્રોતસાં સર્ગઃ સપ્તમઃ સ તુ માનુષઃ ।
અષ્ટમોઽનુગ્રહઃ સર્ગઃ કૌમારો નવમઃ સ્મૃતઃ ॥ ૧૭॥

પ્રાકૃતાશ્ચ ત્રયઃ પૂર્વે સર્ગાસ્તેઽબુદ્ધિપૂર્વકાઃ ।
બુદ્ધિપૂર્વં પ્રવર્ત્તન્તે મુખ્યાદ્યાઃ પઞ્ચ વૈકૃતાઃ ॥ ૧૮॥

અગ્રે સસર્જ વૈ બ્રહ્મા માનસાનાત્મનઃ સમાન્ ।
સનન્દં સનકં ચૈવ વિદ્વાંસઞ્ચ સનાતનમ્ ॥ ૧૯॥

ઋભું સનત્કુમારં ચ પૂર્વમેવ પ્રજાપતિઃ ।
સર્વે તે યોગિનો જ્ઞેયા વીતરાગા વિમત્સરાઃ ॥ ૨૦॥

ઈશ્વરાસક્તમનસો ન ચક્રુઃ સૃષ્ટયે મતિમ્ ।
તેષુ સૃષ્ટ્યનપેક્ષેષુ ગતેષુ સનકાદિષુ ॥ ૨૧॥

સ્રષ્ટુકામઃ પુનર્બ્રહ્મા તતાપ પરમં તપઃ ।
તસ્યૈવં તપ્યમાનસ્ય ન કિઞ્ચિત્સમવર્ત્તત ॥ ૨૨॥

તતો દીર્ઘેણ કાલેન દુઃખાત્ક્રોધો વ્યજાયત ।
ક્રોધાવિષ્ટસ્ય નેત્રાભ્યાં પ્રાપતન્નશ્રુબિન્દવઃ ॥ ૨૩॥

તતસ્તેભ્યોઽશ્રુબિન્દુભ્યો ભૂતાઃ પ્રેતાસ્તદાભવન્ ।
સર્વાંસ્તાનશ્રુજાન્દૃષ્ટ્વા બ્રહ્માત્માનમનિન્દત ॥ ૨૪॥

તસ્ય તીવ્રાઽભવન્મૂર્છા ક્રોધામર્ષસમુદ્ભવા ।
મૂર્ચ્છિતસ્તુ જહૌ પ્રાણાન્ક્રોધાવિષ્ટઃ પ્રજાપતિઃ ॥ ૨૫॥

તતઃ પ્રાણેશ્વરો રુદ્રો ભગવાન્નીલલોહિતઃ ।
પ્રસાદમતુલં કર્ત્તું પ્રાદુરાસીત્પ્રભોર્મુખાત્ ॥ ૨૬॥

દશધા ચૈકધા ચક્રે સ્વાત્માનં પ્રભુરીશ્વરઃ ।

તે તેનોક્તા મહાત્માનો દશધા ચૈકધા કૃતાઃ ॥ ૨૭॥

યૂયં સૃષ્ટા મયા વત્સા લોકાનુગ્રહકારણાત્ ।
તસ્માત્સર્વસ્ય લોકસ્ય સ્થાપનાય હિતાય ચ ॥ ૨૮॥

પ્રજાસન્તાનહેતોશ્ચ પ્રયતધ્વમતન્દ્રિતાઃ ।
એવમુક્તાશ્ચ રુરુદુર્દુદ્રુવુશ્ચ સમન્તતઃ ॥ ૨૯॥

રોદનાદ્ દ્રાવણાચ્ચૈવ તે રુદ્રા નામતઃ સ્મૃતાઃ ।
યેરુદ્રાસ્તે ખલુ પ્રાણા યે પ્રાણાસ્તે મહાત્મકાઃ ॥ ૩૦॥

તતો મૃતસ્ય દેવસ્ય બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
ઘૃણી દદૌ પુનઃ પ્રાણાન્ બ્રહ્મપુત્રો મહેશ્વરઃ ॥ ૩૧॥

પ્રહૃષ્ટવદનો રુદ્રઃ પ્રાણપ્રત્યાગમાદ્વિભોઃ ।
અભ્યભાષત વિશ્વેશો બ્રહ્માણં પરમં વચઃ ॥ ૩૨॥

મા ભૈર્માભૈર્મહાભાગ વિરિઞ્ચે જગતાં ગુરો ।
મયા તે પ્રાણિતાઃ પ્રાણાઃ સુખમુત્તિષ્ઠ સુવ્રત ॥ ૩૩॥

સ્વપ્નાનુભૂતમિવ તચ્છ્રુત્વા વાક્યં મનોહરમ્ ।
હરં નિરીક્ષ્ય શનકૈર્નેત્રૈઃ ફુલ્લામ્બુજપ્રભૈઃ ॥ ૩૪॥

તથા પ્રત્યાગતપ્રાણઃ સ્નિગ્ધગમ્ભીરયા ગિરા ।
ઉવાચ વચનં બ્રહ્મા તમુદ્દિશ્ય કૃતાઞ્જલિઃ ॥ ૩૫॥

ત્વં હિ દર્શનમાત્રેણ ચાનન્દયસિ મે મનઃ ।
કો ભવાન્ વિશ્વમૂર્ત્યા વા સ્થિત એકાદશાત્મકઃ ॥ ૩૬॥

તસ્ય તદ્વચનં શ્રુત્વા વ્યાજહાર મહેશ્વરઃ ।
સ્પૃશન્ કરાભ્યાં બ્રહ્માણં સુસુખાભ્યાં સુરેશ્વરઃ ॥ ૩૭॥

માં વિદ્ધિ પરમાત્માનં તવ પુત્રત્વમાગતમ્ ।
એતે ચૈકાદશ રુદ્રાસ્ત્વાં સુરક્ષિતુમાગતાઃ ॥ ૩૮॥

તસ્માત્તીવ્રામિમાં મૂર્ચ્છાં વિધૂય મદનુગ્રહાત્ ।
પ્રબુધ્યસ્વ યથાપૂર્વં પ્રજા વૈ સ્રષ્ટુમર્હસિ ॥ ૩૯॥

એવં ભગવતા પ્રોક્તો બ્રહ્મા પ્રીતમના હ્યભૂત્ ।
નામાષ્ટકેન વિશ્વાત્મા તુષ્ટાવ પરમેશ્વરમ્ ॥ ૪૦॥

બ્રહ્મોવાચ ।
નમસ્તે ભગવન્ રુદ્ર ભાસ્કરામિતતેજસે ।
નમો ભવાય દેવાય રસાયામ્બુમયાત્મને ।
શર્વાય ક્ષિતિરૂપાય સદાસુરભયે નમઃ ॥ ૪૧॥

ઈશાય વસવે તુભ્યં નમઃ સ્પર્શમયાત્મને ।
પશૂનાં પતયે ચૈવ પાવકાયાતિતેજસે ।
ભીમાય વ્યોમરૂપાય શબ્દમાત્રાય તે નમઃ ॥ ૪૨॥

ઉગ્રાયોગ્રસ્વરૂપાય યજમાનાત્મને નમઃ ।
મહાશિવાય સોમાય નમોઽસ્ત્વમૃતમૂર્તયે ॥ ૪૩॥

એવં સ્તુત્વા મહાદેવં બ્રહ્મા લોકપિતામહઃ ।
પ્રાર્થયામાસ વિશ્વેશં ગિરા પ્રણતિપૂર્વયા ॥ ૪૪॥

ભગવન્ ભૂતભવ્યેશ મમ પુત્ર મહેશ્વર ।
સૃષ્ટિહેતોસ્ત્વમુત્પન્નો મમાઙ્ગેઽનઙ્ગનાશન ॥ ૪૫॥

તસ્માન્મહતિ કાર્યેઽસ્મિન્ વ્યાપૃતસ્ય જગત્પ્રભો ।
સહાયં કુરુ સર્વત્ર સ્રષ્ટુમર્હસિ સુપ્રજાઃ ॥ ૪૬॥

તેનૈવં પ્રાર્થિતો દેવો રુદ્રસ્ત્રિપુરમર્દનઃ ।
બાઢમિત્યેવ તાં વાણીં પ્રતિજગ્રાહ શઙ્કરઃ ॥ ૪૭॥

તતઃ સ ભગવાન્ બ્રહ્મા હૃષ્ટં તમભિનન્દ્ય ચ ।
સ્રષ્ટું તેનાભ્યનુજ્ઞાતસ્તથાન્યાશ્ચાસૃજત્પ્રજાઃ ॥ ૪૮॥

મરીચિભૃગ્વઙ્ગિરસઃ પુલસ્ત્યં પુલહં ક્રતુમ્ ।
દક્ષમત્રિં વસિષ્ઠં ચ સોઽસૃજન્મનસૈવ ચ ।
પુરસ્તાદસૃજદ્ બ્રહ્મા ધર્મં સઙ્કલ્પમેવ ચ ॥ ૪૯॥

ઇત્યેતે બ્રહ્મણઃ પુત્રા દ્વાદશાદૌ પ્રકીર્તિતાઃ ।
સહ રુદ્રેણ સમ્ભૂતાઃ પુરાણા ગૃહમેધિનઃ ॥ ૫૦॥

તેષાં દ્વાદશ વંશાઃ સ્યુર્દિવ્યા દેવગણાન્વિતાઃ ।
પ્રજાવન્તઃ ક્રિયાવન્તો મહર્ષિભિરલઙ્કૃતાઃ ॥ ૫૧॥

અથ દેવાસુરાન્ પિતૃન્ મનુષ્યાંશ્ચ ચતુષ્ટયમ્ ।
સહ રુદ્રેણ સિસૃક્ષુરમ્ભસ્યેતાનિ વૈ વિધિઃ ॥ ૫૨॥

સ સૃષ્ટ્યર્થં સમાધાય બ્રહ્માત્માનમયૂયુજત્ ।
મુખાદજનયદ્દેવાન્ પિતૄંશ્ચૈવોપપક્ષતઃ ॥ ૫૩॥

જઘનાદસુરાન્ સર્વાન્ પ્રજનાદપિ માનુષાન્ ।
અવસ્કરે ક્ષુધાવિષ્ટા રાક્ષસાસ્તસ્ય જજ્ઞિરે ॥ ૫૪॥

પુત્રાસ્તમોરજઃપ્રાયા બલિનસ્તે નિશાચરાઃ ।
સર્પા યક્ષાસ્તથા ભૂતા ગન્ધર્વાઃ સમ્પ્રજજ્ઞિરે ॥ ૫૫॥

વયાંસિ પક્ષતઃ સૃષ્ટાઃ પક્ષિણો વક્ષસોઽસૃજત્ ।
મુખતોઽજાંસ્તથા પાર્શ્વાદુરગાંશ્ચ વિનિર્મમે ॥ ૫૬॥

પદ્ભ્યાં ચાશ્વાન્સમાતઙ્ગાન્ શરભાન્ ગવયાન્ મૃગાન્ ।
ઉષ્ટ્રાનશ્વતરાંશ્ચૈવ ન્યઙ્કૂનન્યાશ્ચ જાતયઃ ॥ ૫૭॥

ઔષધ્યઃ ફલમૂલાનિ રોમભ્યસ્તસ્ય જજ્ઞિરે ।
ગાયત્રીં ચ ઋચં ચૈવ ત્રિવૃત્સામ રથન્તરમ્ ॥ ૫૮॥

અગ્નિષ્ટોમં ચ યજ્ઞાનાં નિર્મમે પ્રથમાન્મુખાત્ ।
યજૂંષિ ત્રૈષ્ટુભં છન્દઃ સ્તોમં પઞ્ચદશં તથા ॥ ૫૯॥

બૃહત્સામ તથોક્થં ચ દક્ષિણાદસૃજન્મુખાત્ ।
સામાનિ જગતીછન્દઃ સ્તોમં સપ્તદશં તથા ॥ ૬૦॥

વૈરૂપ્યમતિરાત્રં ચ પશ્ચિમાદસૃજન્ મુખાત્ ।
એકવિંશમથર્વાણમાપ્તોર્યામાણમેવ ચ ॥ ૬૧॥

અનુષ્ટુભં સ વૈરાજમુત્તરાદસૃજન્મુખાત્ ।
ઉચ્ચાવચાનિ ભૂતાનિ ગાત્રેભ્યસ્તસ્ય જજ્ઞિરે ॥ ૬૨॥

યક્ષાઃ પિશાચા ગન્ધર્વાસ્તથૈવાપ્સરસાં ગણાઃ ।
નરકિન્નરરક્ષાંસિ વયઃપશુમૃગોરગાઃ ॥ ૬૩॥

અવ્યયં ચૈવ યદિદં જગત્ સ્થાવરજઙ્ગમમ્ ।
તેષાં વૈ યાનિ કર્માણિ પ્રાક્સૃષ્ટાનિ પ્રપેદિરે ॥ ૬૪॥

તાન્યેવ તે પ્રપદ્યન્તે સૃજ્યમાનાઃ પુનઃ પુનઃ ।
હિંસ્રાહિંસ્રે મૃદુ ક્રૂરે ધર્માધર્માવૃતાનૃતે ॥ ૬૫॥

તદ્ભાવિતાઃ પ્રપદ્યન્તે તસ્માત્તત્તસ્ય રોચતે ।
મહાભૂતેષુ નાનાત્વમિન્દ્રિયાર્થેષુ મુક્તિષુ ॥ ૬૬॥

વિનિયોગં ચ ભૂતાનાં ધાતૈવ વ્યદધત્સ્વયમ્ ।
નામરૂપં ચ ભૂતાનાં પ્રાકૃતાનાં પ્રપઞ્ચનમ્ ॥ ૬૭॥

વેદશબ્દેભ્ય એવાદૌ નિર્મમેઽસૌ પિતામહઃ ।
આર્ષાણિ ચૈવ નામાનિ યાશ્ચ વેદેષુ વૃત્તયઃ ॥ ૬૮॥

શર્વર્ય્યન્તે પ્રસૂતાનાં તાન્યેવૈભ્યો દદાવજઃ ।
યથર્તાવૃતુલિઙ્ગાનિ નાનારૂપાણિ પર્ય્યયે ॥ ૬૯॥

દૃશ્યન્તે તાનિ તાન્યેવ તથા ભાવા યુગાદિષુ ।
ઇત્યેષ કરણોદ્ભૂતો લોકસર્ગઃ સ્વયમ્ભુવઃ ॥ ૭૦॥

મહદાદ્યો વિશેષાન્તો વિકારઃ પ્રકૃતેઃ સ્વયમ્ ।
ચન્દ્રસૂર્યપ્રભાજુષ્ટો ગ્રહનક્ષત્રમણ્ડિતઃ ॥ ૭૧॥

નદીભિશ્ચ સમુદ્રૈશ્ચ પર્વતૈશ્ચ સ મણ્ડિતઃ ।
પરૈશ્ચ વિવિધૈ રમ્યૈઃ સ્ફીતૈર્જનપદૈસ્તથા ॥ ૭૨॥

તસ્મિન્ બ્રહ્મવનેઽવ્યક્તો બ્રહ્મા ચરતિ સર્વવિત્ ।
અવ્યક્તબીજપ્રભવ ઈશ્વરાનુગ્રહે સ્થિતઃ ॥ ૭૩॥

બુદ્ધિસ્કન્ધમહાશાખ ઇન્દ્રિયાન્તરકોટરઃ ।
મહાભૂતપ્રમાણશ્ચ વિશેષામલપલ્લવઃ ॥ ૭૪॥

ધર્માધર્મસુપુષ્પાઢ્યઃ સુખદુઃખફલોદયઃ ।
આજીવ્યઃ સર્વભૂતાનાં બ્રહ્મવૃક્ષઃ સનાતનઃ ॥ ૭૫॥

દ્યાં મૂર્દ્ધાનં તસ્ય વિપ્રા વદન્તિ
ખં વૈ નાભિં ચન્દ્રસૂર્યૌ ચ નેત્રે ।
દિશઃ શ્રોત્રે ચરણૌ ચ ક્ષિતિં ચ
સોઽચિન્ત્યાત્મા સર્વભૂતપ્રણેતા ॥ ૭૬॥

વક્ત્રાત્તસ્ય બ્રાહ્મણાઃ સમ્પ્રસૂતાઃ
તદ્વક્ષસઃ ક્ષત્રિયાઃ પૂર્વભાગાત્ ।
વૈશ્યા ઉરુભ્યાં તસ્ય પદ્ભ્યાં ચ શૂદ્રાઃ
સર્વે વર્ણા ગાત્રતઃ સમ્પ્રસૂતાઃ ॥ ૭૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે સૃષ્ટિવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૭.૧.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૩. ત્રયોદશોઽધ્યાયઃ । બ્રહ્મવિષ્ણુસૃષ્ટિકથનમ્ ।

ઋષય ઊચુઃ ।
ભવતા કથિતા સૃષ્ટિર્ભવસ્ય પરમાત્મનઃ ।
ચતુર્મુખમુખાત્તસ્ય સંશયો નઃ પ્રજાયતે ॥ ૧॥

દેવશ્રેષ્ઠો વિરૂપાક્ષો દીપ્તઃ શૂલધરો હરઃ ।
કાલાત્મા ભગવાન્ રુદ્રઃ કપર્દી નીલલોહિતઃ ॥ ૨॥

સબ્રહ્મકમિમં લોકં સવિષ્ણુમપિ પાવકમ્ ।
યઃ સંહરતિ સઙ્ક્રુદ્ધો યુગાન્તે સમુપસ્થિતે ॥ ૩॥

યસ્ય બ્રહ્મા ચ વિષ્ણુશ્ચ પ્રણામં કુરુતો ભયાત્ ।
લોકસઙ્કોચકસ્યાસ્ય યસ્ય તૌ વશવર્તિનૌ ॥ ૪॥

યોઽયં દેવઃ સ્વકાદઙ્ગાદ્ બ્રહ્મવિષ્ણૂ પુરાસૃજત્ ।
સ એવ હિ તયોર્નિત્યં યોગક્ષેમકરઃ પ્રભુઃ ॥ ૫॥

સ કથં ભગવાન્ રુદ્ર આદિદેવઃ પુરાતનઃ ।
પુત્રત્વમગમચ્છમ્ભુર્બ્રહ્મણોઽવ્યક્તજન્મનઃ ॥ ૬॥

પ્રજાપતિશ્ચ વિષ્ણુશ્ચ રુદ્રસ્યૈતૌ પરસ્પરમ્ ।
સૃષ્ટૌ પરસ્પરસ્યાઙ્ગાદિતિ પ્રાગપિ શુશ્રુમ ॥ ૭॥

કથં પુનરશેષાણાં ભૂતાનાં હેતુભૂતયોઃ ।
ગુણપ્રધાનભાવેન પ્રાદુર્ભાવઃ પરસ્પરાત્ ॥ ૮॥

નાપૃષ્ટં ભવતા કિઞ્ચિન્નાશ્રુતં ચ કથઞ્ચન ।
ભગવચ્છિષ્યભૂતેન ભવતા સકલં સ્મૃતમ્ ॥ ૯॥

તત્ત્વં વદ યથા બ્રહ્મા મુનીનામવદદ્વિભુઃ ।
વયં શ્રદ્ધાલવસ્તાત શ્રોતુમીશ્વરસદ્યશઃ ॥ ૧૦॥

વાયુરુવાચ ।
સ્થાને પૃષ્ટમિદં વિપ્રા ભવદ્ભિઃ પ્રશ્નકોવિદૈઃ ।

ઇદમેવ પુરા પૃષ્ટો મમ પ્રાહ પિતામહઃ ॥ ૧૧॥

તદહં સમ્પ્રવક્ષ્યામિ યથા રુદ્રસમુદ્ભવઃ ।
યથા ચ પુનરુત્પત્તિર્બ્રહ્મવિષ્ણ્વોઃ પરસ્પરમ્ ॥ ૧૨॥

ત્રયસ્તે કારણાત્માનો જાતાઃ સાક્ષાન્મહેશ્વરાત્ ।
ચરાચરસ્ય વિશ્વસ્ય સર્ગસ્થિત્યન્તહેતવઃ ॥ ૧૩॥

પરમૈશ્વર્યસંયુક્તાઃ પરમેશ્વરભાવિતાઃ ।
તચ્છક્ત્યાધિષ્ઠિતા નિત્યં તત્કાર્યકરણક્ષમાઃ ॥ ૧૪॥

પિત્રા નિયમિતાઃ પૂર્વં ત્રયોઽપિ ત્રિષુ કર્મસુ ।
બ્રહ્મા સર્ગે હરિસ્ત્રાણે રુદ્રઃ સંહરણે તથા ॥ ૧૫॥

તથાપ્યન્યોઽન્યમાત્સર્યાદન્યોઽન્યાતિશયાશિનઃ ।
તપસા તોષયિત્વા સ્વં પિતરં પરમેશ્વરમ્ ॥ ૧૬॥

લબ્ધ્વા સર્વાત્મના તસ્ય પ્રસાદાત્પરમેષ્ઠિનઃ ।
બ્રહ્મનારાયણૌ પૂર્વં રુદ્રઃ કલ્પાન્તરેઽસૃજત્ ॥ ૧૭॥

કલ્પાન્તરે પુનર્બ્રહ્મા રુદ્રવિષ્ણૂ જગન્મયઃ ।
વિષ્ણુશ્ચ ભગવાન્ રુદ્રં બ્રહ્માણમસૃજત્પુનઃ ॥ ૧૮॥

નારાયણં પુનર્બ્રહ્મા બ્રહ્માણં ચ પુનર્ભવઃ ।
એવં કલ્પેષુ કલ્પેષુ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૧૯॥

પરસ્પરેણ જાયન્તે પરસ્પરહિતૈષિણઃ ।
તત્તત્કલ્પાન્તવૃત્તાન્તમધિકૃત્ય મહર્ષિભિઃ ॥ ૨૦॥

પ્રભાવઃ કથ્યતે તેષાં પરસ્પરસમુદ્ભવાત્ ।
શ ૃણુ તેષાં કથાં ચિત્રાં પુણ્યાં પાપપ્રમોચિનીમ્ ॥ ૨૧॥

કલ્પે તત્પુરુષે વૃત્તાં બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
પુરા નારાયણો નામ કલ્પે વૈ મેઘવાહને ॥ ૨૨॥

દિવ્યં વર્ષસહસ્રં તુ મેઘો ભૂત્વાવહદ્ધરામ્ ।
તસ્ય ભાવં સમાલક્ષ્ય વિષ્ણોર્વિશ્વજગદ્ગુરુઃ ॥ ૨૩॥

સર્વઃ સર્વાત્મભાવેન પ્રદદૌ શક્તિમવ્યયામ્ ।
શક્તિં લબ્ધ્વા તુ સર્વાત્મા શિવાત્સર્વેશ્વરાત્તદા ॥ ૨૪॥

સસર્જ ભગાવન્ વિષ્ણુર્વિશ્વં વિશ્વસૃજા સહ ।
વિષ્ણોસ્તદ્વૈભવં દૃષ્ટ્વા સૃષ્ટસ્તેન પિતામહઃ ॥ ૨૫॥

ઈર્ષ્યયા પરયા ગ્રસ્તઃ પ્રહસન્નિદમબ્રવીત્ ।
ગચ્છ વિષ્ણો મયા જ્ઞાતં તવ સર્ગસ્ય કારણમ્ ।
આવયોરધિકશ્ચાસ્તિ સ રુદ્રો નાત્ર સંશયઃ ॥ ૨૬॥

તસ્ય દેવાધિદેવસ્ય પ્રસાદાત્પરમેષ્ઠિનઃ ।
સ્રષ્ટા ત્વં ભગવાનાદ્યઃ પાલકઃ પરમાર્થતઃ ॥ ૨૭॥

અહં ચ તપસારાધ્ય રુદ્રં ત્રિદશનાયકમ્ ।
ત્વયા સહ જગત્સર્વં સ્રક્ષ્યામ્યત્ર ન સંશયઃ ॥ ૨૮॥

એવં વિષ્ણુમુપાલભ્ય ભગવાનબ્જસમ્ભવઃ ।
એવં વિજ્ઞાપયામાસ તપસા પ્રાપ્ય શઙ્કરમ્ ॥ ૨૯॥

ભગવન્ દેવદેવેશ વિશ્વેશ્વર મહેશ્વર ।
તવ વામાઙ્ગજો વિષ્ણુર્દક્ષિણાઙ્ગભવો હ્યહમ્ ॥ ૩૦॥

મયા સહ જગત્સર્વં તથાપ્યસૃજદચ્યુતઃ ।
સ મત્સરાદુપાલબ્ધસ્ત્વદાશ્રયબલાન્મયા ॥ ૩૧॥

મદ્ભાવાન્નાધિકસ્તેઽતિભાવસ્ત્વયિ મહેશ્વરે ।
ત્વત્ત એવ સમુત્પત્તિરાવયોઃ સદૃશી યતઃ ॥ ૩૨॥

તસ્ય ભક્ત્યા યથાપૂર્વં પ્રસાદં કૃતવાનસિ ।
તથા મમાપિ તત્સર્વં દાતુમર્હસિ શઙ્કર ॥ ૩૩॥

ઇતિ વિજ્ઞાપિતસ્તેન ભગવાન્ ભગનેત્રહા ।
ન્યાયેન વૈ દદૌ સર્વં તસ્યાપિ સ ઘૃણાનિધિઃ ॥ ૩૪॥

લબ્ધ્વૈવમીશ્વરાદેવ બ્રહ્મા સર્વાત્મતાં ક્ષણાત્ ।
ત્વરમાણોઽથ સઙ્ગમ્ય દદર્શ પુરુષોત્તમમ્ ॥ ૩૫॥

ક્ષીરાર્ણવાલયે શુભ્રે વિમાને સૂર્યસન્નિભે ।
હેમરત્નાન્વિતે દિવ્યે મનસા તેન નિર્મિતે ॥ ૩૬॥

અનન્તભોગશય્યાયાં શયાનં પઙ્કજેક્ષણમ્ ।
ચતુર્ભુજમુદારાઙ્ગં સર્વાભરણભૂષિતમ્ ॥ ૩૭॥

શઙ્ખચક્રધરં સૌમ્યં ચન્દ્રબિમ્બસમાનનમ્ ।

શ્રીવત્સવક્ષસં દેવં પ્રસન્નમધુરસ્મિતમ્ ॥ ૩૮॥

ધરામૃદુકરામ્ભોજસ્પર્શરક્તપદામ્બુજમ્ ।
ક્ષીરાર્ણવામૃતમિવ શયાનં યોગનિદ્રયા ॥ ૩૯॥

તમસા કાલરુદ્રાખ્યં રજસા કનકાણ્ડજમ્ ।
સત્ત્વેન સર્વગં વિષ્ણું નિર્ગુણત્વે મહેશ્વરમ્ ॥ ૪૦॥

તં દૃષ્ટ્વા પુરુષં બ્રહ્મા પ્રગલ્ભમિદમબ્રવીત્ ।
ગ્રસામિ ત્વામહં વિષ્ણો ત્વમાત્માનં યથા પુરા ॥ ૪૧॥

તસ્ય તદ્વચનં શ્રુત્વા પ્રતિબુદ્ધ્ય પિતામહમ્ ।
ઉદૈક્ષત મહાબાહુઃ સ્મિતમીષચ્ચકાર ચ ॥ ૪૨॥

તસ્મિન્નવસરે વિષ્ણુર્ગ્રસ્તસ્તેન મહાત્મના ।
સૃષ્ટશ્ચ બ્રહ્મણા સદ્યો ભ્રુવોર્મધ્યાદયત્નતઃ ॥ ૪૩॥

તસ્મિન્નવસરે સાક્ષાદ્ભગવાનિન્દુભૂષણઃ ।
શક્તિં તયોરપિ દ્રષ્ટુમરૂપો રૂપમાસ્થિતઃ ॥ ૪૪॥

પ્રસાદમતુલં કર્તું પુરા દત્તવરસ્તયોઃ ।
આગચ્છત્તત્ર યત્રેમૌ બ્રહ્મનારાયણૌ સ્થિતૌ ॥ ૪૫॥

અથ તુષ્ટુવતુર્દેવં પ્રીતૌ ભીતૌ ચ કૌતુકાત્ ।
પ્રણેમતુશ્ચ બહુશો બહુમાનેન દૂરતઃ ॥ ૪૬॥

ભવોઽપિ ભગવાનેતાવનુગૃહ્ય પિનાકધૃક્ ।
સાદરં પશ્યતોરેવ તયોરન્તરધીયત ॥ ૪૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે બ્રહ્મવિષ્ણુસૃષ્ટિકથનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૭.૧.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૪. ચતુર્દશોઽધ્યાયઃ । રુદ્રાવિર્ભાવવર્ણનમ્ ।

વાયુરુવાચ ।
પ્રતિકલ્પં પ્રવક્ષ્યામિ રુદ્રાવિર્ભાવકારણમ્ ।

યતોઽવિચ્છિન્નસન્તાના બ્રહ્મસૃષ્ટિઃ પ્રવર્તતે ॥ ૧॥

કલ્પે કલ્પે પ્રજાઃ સૃષ્ટ્વા બ્રહ્મા બ્રહ્માણ્ડસમ્ભવઃ ।
અવૃદ્ધિહેતોર્ભૂતાનાં મુમોહ ભૃશદુઃખિતઃ ॥ ૨॥

તસ્ય દુઃખપ્રશાન્ત્યર્થં પ્રજાનાં ચ વિવૃદ્ધયે ।
તત્તત્કલ્પેષુ કાલાત્મા રુદ્રો રુદ્રગણાધિપઃ ॥ ૩॥

નિર્દિષ્ટઃ પરમેશેન મહેશો નીલલોહિતઃ ।
પુત્રો ભૂત્વાનુગૃહ્ણાતિ બ્રહ્માણં બ્રહ્મણોઽનુજઃ ॥ ૪॥

સ એવ ભગવાનીશસ્તેજોરાશિરનામયઃ ।
અનાદિનિધનો ધાતા ભૂતસઙ્કોચકો વિભુઃ ॥ ૫॥

પરમૈશ્વર્યસંયુક્તઃ પરમેશ્વરભાવિતઃ ।
તચ્છક્ત્યાધિષ્ઠિતઃ શશ્વત્તચ્ચિહ્નૈરપિ ચિહ્નિતઃ ॥ ૬॥

તન્નામનામા તદ્રૂપસ્તત્કાર્યકરણક્ષમઃ ।
તત્તુલ્યવ્યવહારશ્ચ તદાજ્ઞાપરિપાલકઃ ॥ ૭॥

સહસ્રાદિત્યસઙ્કાશશ્ચન્દ્રાવયવભૂષણઃ ।
ભુજઙ્ગહારકેયૂરવલયો મુઞ્જમેખલઃ ॥ ૮॥

જલન્ધરવિરિઞ્ચેન્દ્રકપાલશકલોજ્જ્વલઃ ।
ગઙ્ગાતુઙ્ગતરઙ્ગાર્દ્રપિઙ્ગલાનનમૂર્દ્ધજઃ ॥ ૯॥

ભગ્નદંષ્ટ્રાઙ્કુરાક્રાન્તપ્રાન્તકાન્તધરાધરઃ ।
સવ્યશ્રવણપાર્શ્વાન્તમણ્ડલીકૃતકુણ્ડલઃ ॥ ૧૦॥

મહાવૃષભનિર્યાણો મહાજલદનિઃસ્વનઃ ।
મહાનલસમપ્રખ્યો મહાબલપરાક્રમઃ ॥ ૧૧॥

એવં ઘોરમહારૂપો બ્રહ્મપુત્રો મહેશ્વરઃ ।
વિજ્ઞાનં બ્રહ્મણે દત્ત્વા સર્ગં સહ કરોતિ ચ ॥ ૧૨॥

તસ્માદ્ રુદ્રપ્રસાદેન પ્રતિકલ્પં પ્રજાપતેઃ ।
પ્રવાહરૂપતો નિત્યા પ્રજાસૃષ્ટિઃ પ્રવર્તતે ॥ ૧૩॥

કદાચિત્પ્રાર્થિતઃ સ્રષ્ટું બ્રહ્મણા નીલલોહિતઃ ।
સ્વાત્મના સદૃશાન્ સર્વાન્ સસર્જ મનસા વિભુઃ ॥ ૧૪॥

કપર્દિનો નિરાતઙ્કાન્નીલગ્રીવાઁસ્ત્રિલોચનાન્ ।
જરામરણનિર્મુક્તાન્ દીપ્તશૂલવરાયુધાન્ ॥ ૧૫॥

તૈસ્તુ સઞ્છાદિતં સર્વં ચતુર્દશવિધં જગત્ ।
તાન્દૃષ્ટ્વા વિવિધાન્ રુદ્રાન્ રુદ્રમાહ પિતામહઃ ॥ ૧૬॥

નમસ્તે દેવદેવેશ માસ્રાક્ષીરીદૃશીઃ પ્રજાઃ ।
અન્યાઃ સૃજ ત્વં ભદ્રં તે પ્રજા મૃત્યુસમન્વિતાઃ ॥ ૧૭॥

ઇત્યુક્તઃ પ્રહસન્પ્રાહ બ્રહ્માણં પરમેશ્વરઃ ।
નાસ્તિ મે તાદૃશઃ સર્ગઃ સૃજ ત્વમશુભાઃ પ્રજાઃ ॥ ૧૮॥

યે ત્વિમે મનસા સૃષ્ટા મહાત્માનો મહાબલાઃ ।
ચરિષ્યન્તિ મયા સાર્દ્ધં સર્વ એવ હિ યાજ્ઞિકાઃ ॥ ૧૯॥

ઇત્યુક્ત્વા વિશ્વકર્માણં વિશ્વભૂતેશ્વરો હરઃ ।
સહ રુદ્રૈઃ પ્રજાસર્ગાન્નિવૃત્તાત્માધ્યતિષ્ઠત ॥ ૨૦॥

તતઃ પ્રભૃતિ દેવોઽસૌ ન પ્રસૂતે પ્રજાઃ શુભાઃ ।
ઊર્ધ્વરેતાઃ સ્થિતઃ સ્થાણુર્યાવદાભૂતસમ્પ્લવમ્ ॥ ૨૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે રુદ્રાવિર્ભાવવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૭.૧.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૫. પઞ્ચદશોઽધ્યાયઃ । શિવશિવાસ્તુતિવર્ણનમ્ ।

વાયુરુવાચ ।
યદા પુનઃ પ્રજાઃ સૃષ્ટા ન વ્યવર્દ્ધન્ત વેધસઃ ।
તદા મૈથુનજાં સૃષ્ટિં બ્રહ્મા કર્તુમમન્યત ॥ ૧॥

ન નિર્ગતં પુરા યસ્માન્નારીણાં કુલમીશ્વરાત્ ।
તેન મૈથુનજાં સૃષ્ટિં ન શશાક પિતામહઃ ॥ ૨॥

તતઃ સ વિદધે બુદ્ધિમર્થનિશ્ચયગામિનીમ્ ।
પ્રજાનમેવ વૃદ્ધ્યર્થં પ્રષ્ટવ્યઃ પરમેશ્વર ॥ ૩॥

પ્રસાદેન વિના તસ્ય ન વર્દ્ધેરન્નિમાઃ પ્રજાઃ ।
એવં સઞ્ચિન્ત્ય વિશ્વાત્મા તપઃ કર્તું પ્રચક્રમે ॥ ૪॥

તદાદ્યા પરમા શક્તિરનન્તા લોકભાવિની ।
આદ્યા સૂક્ષ્મતરા શુદ્ધા ભાવગમ્યા મનોહરા ॥ ૫॥

નિર્ગુણા નિષ્પ્રપઞ્ચા ચ નિષ્કલા નિરુપપ્લવા ।
નિરન્તરરતા નિત્યા નિત્યમીશ્વરપાર્શ્વગા ॥ ૬॥

તયા પરમયા શક્ત્યા ભગવન્તં ત્રિયમ્બકમ્ ।
સઞ્ચિન્ત્ય હૃદયે બ્રહ્મા તતાપ પરમં તપઃ ॥ ૭॥

તીવ્રેણ તપસા તસ્ય યુક્તસ્ય પરમેષ્ઠિનઃ ।
અચિરેણૈવ કાલેન પિતા સમ્પ્રતુતોષ હ ॥ ૮॥

તતઃ કેનચિદંશેન મૂર્તિમાવિશ્ય કામપિ ।
અર્દ્ધનારીશ્વરો ભૂત્વા યયૌ દેવઃ સ્વયં હરઃ ॥ ૯॥

તં દૃષ્ટ્વા પરમં દેવં તમસઃ પરમવ્યયમ્ ।
અદ્વિતીયમનિર્દેશ્યમદૃશ્યમકૃતાત્મભિઃ ॥ ૧૦॥

સર્વલોકવિધાતારં સર્વલોકેશ્વરેશ્વરમ્ ।
સર્વલોકવિધાયિન્યા શક્ત્યા પરમયા યુતમ્ ॥ ૧૧॥

અપ્રતર્ક્યમનાભાસમમેયમજરં ધ્રુવમ્ ।
અચલં નિર્ગુણં શાન્તમનન્તમહિમાસ્પદમ્ ॥ ૧૨॥

સર્વગં સર્વદં સર્વસદસદ્વ્યક્તિવર્જિતમ્ ।
સર્વોપમાનનિર્મુક્તં શરણ્યં શાશ્વતં શિવમ્ ॥ ૧૩॥

પ્રણમ્ય દણ્ડવદ્ બ્રહ્મા સમુત્થાય કૃતાઞ્જલિઃ ।
શ્રદ્ધાવિનયસમ્પન્નૈઃ શ્રાવ્યૈઃ સંસ્કારસંયુતૈઃ ॥ ૧૪॥

યથાર્થયુક્તસર્વાર્થૈર્વેદાર્થપરિબૃંહિતૈઃ ।
તુષ્ટાવ દેવં દેવીં ચ સૂક્તૈઃ સૂક્ષ્માર્થગોચરૈઃ ॥ ૧૫॥

બ્રહ્મોવાચ ।
જય દેવ મહાદેવ જયેશ્વર મહેશ્વર ।
જય સર્વગુણશ્રેષ્ઠ જય સર્વસુરાધિપ ॥ ૧૬॥

જય પ્રકૃતિકલ્યાણિ જય પ્રકૃતિનાયિકે ।

જય પ્રકૃતિદૂરે ત્વં જય પ્રકૃતિસુન્દરિ ॥ ૧૭॥

જયામોઘમહામાય જયામોઘમનોરથ ।
જયામોઘમહાલીલ જયામોઘમહાબલ ॥ ૧૮॥

જય વિશ્વજગન્માતર્જય વિશ્વજગન્મયિ ।
જય વિશ્વજગદ્ધાત્રિ જય વિશ્વજગત્સખિ ॥ ૧૯॥

જય શાશ્વતિકૈશ્વર્ય જય શાશ્વતિકાલય ।
જય શાશ્વતિકાકાર જય શાશ્વતિકાનુગ ॥ ૨૦॥

જયાત્મત્રયનિર્માત્રિ જયાત્મત્રયપાલિનિ ।
જયાત્મત્રયસંહર્ત્રિ જયાત્મત્રયનાયિકે ॥ ૨૧॥

જયાવલોકનાયત્તજગત્કારણબૃંહણ ।
જયોપેક્ષાકટાક્ષોત્થહુતભુગ્ભુક્તભૌતિક ॥ ૨૨॥

જય દેવાદ્યવિજ્ઞેયે સ્વાત્મસૂક્ષ્મદૃશોજ્જ્વલે ।
જય સ્થૂલાત્મશક્ત્યેશે જય વ્યાપ્તચરાચરે ॥ ૨૩॥

જય નાનૈકવિન્યસ્તવિશ્વતત્ત્વસમુચ્ચય ।
જયાસુરશિરોનિષ્ઠશ્રેષ્ઠાનુગકદમ્બક ॥ ૨૪॥

જયોપાશ્રિતસંરક્ષાસંવિધાનપટીયસિ ।
જયોન્મૂલિતસંસારવિષવૃક્ષાઙ્કુરોદ્ગમે ॥ ૨૫॥

જય પ્રાદેશિકૈશ્વર્યવીર્યશૌર્યવિજૃમ્ભણ ।
જય વિશ્વબહિર્ભૂત નિરસ્તપરવૈભવ ॥ ૨૬॥

જય પ્રણીતપઞ્ચાર્થપ્રયોગપરમામૃત ।
જય પઞ્ચાર્થવિજ્ઞાનસુધાસ્રોતઃસ્વરૂપિણિ ॥ ૨૭॥

જયાતિઘોરસંસારમહારોગભિષગ્વર ।
જયાનાદિમલાજ્ઞાનતમઃપટલચન્દ્રિકે ॥ ૨૮॥

જય ત્રિપુરકાલાગ્ને જય ત્રિપુરભૈરવિ ।
જય ત્રિગુણનિર્મુક્તે જય ત્રિગુણમર્દિનિ ॥ ૨૯॥

જય પ્રથમસર્વજ્ઞ જય સર્વપ્રબોધિકે ।
જય પ્રચુરદિવ્યાઙ્ગ જય પ્રાર્થિતદાયિનિ ॥ ૩૦॥

ક્વ દેવ તે પરં ધામ ક્વ ચ તુચ્છં ચ નો વચઃ ।
તથાપિ ભગવન્ ભક્ત્યા પ્રલપન્તં ક્ષમસ્વ મામ્ ॥ ૩૧॥

વિજ્ઞાપ્યૈવંવિધૈઃ સૂક્તૈર્વિશ્વકર્મા ચતુર્મુખઃ ।
નમશ્ચકાર રુદ્રાય રુદ્રાણ્યૈ ચ મુહુર્મુહુઃ ॥ ૩૨॥

ઇદં સ્તોત્રવરં પુણ્યં બ્રહ્મણા સમુદીરિતમ્ ।
અર્દ્ધનારીશ્વરં નામ શિવયોર્હર્ષવર્દ્ધનમ્ ॥ ૩૩॥

ય ઇદં કીર્ત્તયેદ્ભક્ત્યા યસ્ય કસ્યાપિ કાઙ્ક્ષયા ।
સ તત્ફલમવાપ્નોતિ શિવયોઃ પ્રીતિકારણાત્ ॥ ૩૪॥

સકલભુવનભૂતભાવનાભ્યાં
જનનવિનાશવિહીનવિગ્રહાભ્યામ્ ।
નરવરયુવતીવપુર્દ્ધરાભ્યાં
સતતમહં પ્રણતોઽસ્મિ શઙ્કરાભ્યામ્ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે શિવશિવાસ્તુતિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૭.૧.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૬. ષોડશોઽધ્યાયઃ । દેવીશક્ત્યુદ્ભવઃ ।

વાયુરુવાચ ।
અથ દેવો મહાદેવો મહાજલદનાદયા ।
વાચા મધુરગમ્ભીરશિવદશ્લક્ષ્ણવર્ણયા ॥ ૧॥

અર્થસમ્પન્નપદયા રાજલક્ષણયુક્તયા ।
અશેષવિષયારમ્ભરક્ષાવિમલયદક્ષયા ॥ ૨॥

મનોહરતરોદારમધુરસ્મિતપૂર્વયા ।
સમ્બભાષેસુસમ્પ્રીતો વિશ્વકર્માણમીશ્વરઃ ॥ ૩॥

ઈશ્વર ઉવાચ ।
વત્સ વત્સ મહાભાગ મમ પુત્ર પિતામહ ।

જ્ઞાતમેવ મયા સર્વં તવ વાક્યસ્ય ગૌરવમ્ ॥ ૪॥

પ્રજાનામેવ વૃદ્ધ્યર્થં તપસ્તપ્તં ત્વયાધુના ।
તપસાનેન તુષ્ટોઽસ્મિ દદામિ ચ તવેપ્સિતમ્ ॥ ૫॥

ઇત્યુક્ત્વા પરમોદારં સ્વભાવમધુરં વચઃ ।
સસર્જ વપુષો ભાગાદ્દેવીં દેવવરો હરઃ ॥ ૬॥

યામાહુર્બ્રહ્મવિદ્વાંસો દેવીં દિવ્યગુણાન્વિતામ્ ।
પરસ્ય પરમાં શક્તિં ભવસ્ય પરમાત્મનઃ ॥ ૭॥

યસ્યાં ન ખલુ વિદ્યન્તે જન્મમૃત્યુજરાદયઃ ।
યા ભવાની ભવસ્યાઙ્ગાત્સમાવિરભવત્કિલ ॥ ૮॥

યસ્યા વાચો નિવર્તન્તે મનસા ચેન્દ્રિયૈઃ સહ ।
સા ભર્તુર્વપુષો ભાગાજ્જાતેવ સમદૃશ્યત ॥ ૯॥

યા સા જગદિદં કૃત્સ્નં મહિમ્ના વ્યાપ્ય તિષ્ઠતિ ।
શરીરિણીવ સ દેવી વિચિત્રં સમલક્ષ્યત ॥ ૧૦॥

સર્વં જગદિદં ચૈષા સમ્મોહયતિ માયયા ।
ઈશ્વરાત્સૈવ જાતાઽભૂદજાતા પરમાર્થતઃ ॥ ૧૧॥

ન યસ્યાઃ પરમો ભાવઃ સુરાણામપિ ગોચરઃ ।
વિશ્વામરેશ્વરી ચૈવ વિભક્તા ભર્તુરઙ્ગતઃ ॥ ૧૨॥

તાં દૃષ્ટ્વા પરમેશાનીં સર્વલોકમહેશ્વરીમ્ ।
સર્વજ્ઞાં સર્વગાં સૂક્ષ્માં સદસદ્વ્યક્તિવર્જિતામ્ ॥ ૧૩॥

પરમાં નિખિલં ભાસા ભાસયન્તીમિદં જગત્ ।
પ્રણિપત્ય મહાદેવીં પ્રાર્થયામાસ વૈ વિરાટ્ ॥ ૧૪॥

બ્રહ્મોવાચ ।
દેવિ દેવેન સૃષ્ટોઽહમાદૌ સર્વજગન્મયિ ।
પ્રજાસર્ગે નિયુક્તશ્ચ સૃજામિ સકલં જગત્ ॥ ૧૫॥

મનસા નિર્મિતાઃ સર્વે દેવિ દેવાદયો મયા ।
ન વૃદ્ધિમુપગચ્છન્તિ સૃજ્યમાનાઃ પુનઃ પુનઃ ॥ ૧૬॥

મિથુનપ્રભવામેવ કૃત્વા સૃષ્ટિમતઃ પરમ્ ।
સંવર્ધયિતુમિચ્છામિ સર્વા એવ મમ પ્રજાઃ ॥ ૧૭॥

ન નિર્ગતં પુરા ત્વત્તો નારીણાં કુલમવ્યયમ્ ।
તેન નારીકુલં સ્રષ્ટું શક્તિર્મમ ન વિદ્યતે ॥ ૧૮॥

સર્વાસામેવ શક્તીનાં ત્વત્તઃ ખલુ સમુદ્ભવઃ ।
તસ્માત્સર્વત્ર સર્વેષાં સર્વશક્તિપ્રદાયિનીમ્ ॥ ૧૯॥

ત્વામેવ વરદાં માયાં પ્રાર્થયામિ સુરેશ્વરીમ્ ।
ચરાચરવિવૃદ્ધ્યર્થમંશેનૈકેન સર્વગે ॥ ૨૦॥

દક્ષસ્ય મમ પુત્રસ્ય પુત્રી ભવ ભવાર્દિનિ ।
એવં સા યાચિતા દેવી બ્રહ્મણા બ્રહ્મયોનિના ॥ ૨૧॥

શક્તિમેકાં ભ્રુવોર્મધ્યાત્ સસર્જાત્મસમપ્રભામ્ ।
તામાહ પ્રહસન્ પ્રેક્ષ્ય દેવદેવવરો હરઃ ॥ ૨૨॥

બ્રહ્માણં તપસારાધ્ય કુરુ તસ્ય યથેપ્સિતમ્ ।
તામાજ્ઞાં પરમેશસ્ય શિરસા પ્રતિગૃહ્ય સા ॥ ૨૩॥

બ્રહ્મણો વચનાદ્દેવી દક્ષસ્ય દુહિતાઽભવત્ ।
દત્ત્વૈવમતુલાં શક્તિં બ્રહ્મણે બ્રહ્મરૂપિણીમ્ ॥ ૨૪॥

વિવેશ દેહં દેવસ્ય દેવશ્ચાન્તરધીયત ।
તદાપ્રભૃતિ લોકેઽસ્મિન્ સ્ત્રિયાં ભોગઃ પ્રતિષ્ઠિતઃ ॥ ૨૫॥

પ્રજાસૃષ્ટિશ્ચ વિપ્રેન્દ્રા મૈથુનેન પ્રવર્તતે ।
બ્રહ્માપિ પ્રાપ સાનન્દં સન્તોષં મુનિપુઙ્ગવાઃ ॥ ૨૬॥

એતદ્વઃ સર્વમાખ્યાતં દેવ્યાઃ શક્તિસમુદ્ભવમ્ ।
પુણ્યવૃદ્ધિકરં શ્રાવ્યં ભૂતસર્ગાનુષઙ્ગતઃ ॥ ૨૭॥

ય ઇદં કીર્તયેન્નિત્યં દેવ્યાઃ શક્તિસમુદ્ભવમ્ ।
પુણ્યં સર્વમવાપ્નોતિ પુત્રાંશ્ચ લભતે શુભાન્ ॥ ૨૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે દેવીશક્ત્યુદ્ભવો નામ ષોડશોઽધ્યાયઃ ॥ ૭.૧.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૭. સપ્તદશોઽધ્યાયઃ । સૃષ્ટિકથનમ્ ।

વાયુરુવાચ ।
એવં લબ્ધ્વા પરાં શક્તિમીશ્વરાદેવ શાશ્વતીમ્ ।
મૈથુનપ્રભવાં સૃષ્ટિં કર્તુકામઃ પ્રજાપતિઃ ॥ ૧॥

સ્વયમપ્યર્દ્ધતો નારી ચાર્દ્ધેન પુરુષોઽભવત્ ।
યાર્દ્ધેન નારી સા તસ્માચ્છતરૂપા વ્યજાયત ॥ ૨॥

વિરાજમસૃજદ્બ્રહ્મા સોઽર્દ્ધેન પુરુષોઽભવત્ ।
સ વૈ સ્વાયમ્ભુવઃ પૂર્વં પુરુષો મનુરુચ્યતે ॥ ૩॥

સા દેવી શતરૂપા તુ તપઃ કૃત્વા સુદુશ્ચરમ્ ।
ભર્ત્તારં દીપ્તયશસં મનુમેવાન્વપદ્યત ॥ ૪॥

તસ્માત્તુ શતરૂપા સા પુત્રદ્વયમસૂયત ।
પ્રિયવ્રતોત્તાનપાદૌ પુત્રૌ પુત્રવતાં વરૌ ॥ ૫॥

કન્યે દ્વે ચ મહાભાગે યાભ્યાં જાતાસ્ત્વિમાઃ પ્રજાઃ ।
આકૂતિરેકા વિજ્ઞેયા પ્રસૂતિરપરા સ્મૃતા ॥ ૬॥

સ્વાયમ્ભુવઃ પ્રસૂતિં ચ દદૌ દક્ષાય તાં પ્રભુઃ ।
રુચેઃ પ્રજાપતેશ્ચૈવ ચાકૂતિં સમપાદયત્ ॥ ૭॥

આકૂત્યાં મિથુનં જજ્ઞે માનસસ્ય રુચેઃ શુભમ્ ।
યજ્ઞશ્ચ દક્ષિણા ચૈવ યાભ્યાં સંવર્તિતં જગત્ ॥ ૮॥

સ્વાયમ્ભુવસુતાયાં તુ પ્રસૂત્યાં લોકમાતરઃ ।
ચતસ્રો વિંશતિઃ કન્યા દક્ષસ્ત્વજનયત્પ્રભુઃ ॥ ૯॥

શ્રદ્ધા લક્ષ્મીર્ધૃતિઃ પુષ્ટિસ્તુષ્ટિર્મેધા ક્રિયા તથા ।
બુદ્ધિર્લજ્જા વપુઃ શાન્તિસ્સિદ્ધિઃ કીર્તિસ્ત્રયોદશી ॥ ૧૦॥

પત્ન્યર્થં પ્રતિજગ્રાહ ધર્મો દાક્ષાયણીઃ પ્રભુઃ ।
તાભ્યઃ શિષ્ટા યવીયસ્ય એકાદશ સુલોચનાઃ ॥ ૧૧॥

ખ્યાતિઃ સત્યથ સમ્ભૂતિઃ સ્મૃતિઃ પ્રીતિઃ ક્ષમા તથા ।
સન્નતિશ્ચાનસૂયા ચ ઊર્જા સ્વાહા સ્વધા તથા ॥ ૧૨॥

ભૃગુઃ શર્વો મરીચિશ્ચ અઙ્ગિરાઃ પુલહઃ ક્રતુઃ ।
પુલસ્ત્યોઽત્રિર્વશિષ્ઠશ્ચ પાવકઃ પિતરસ્તથા ॥ ૧૩॥

ખ્યાત્યાદ્યા જગૃહુઃ કન્યા મુનયો મુનિસત્તમાઃ ।
કામાદ્યાસ્તુ યશોઽન્તા યે તે ત્રયોદશ સૂનવઃ ॥ ૧૪॥

ધર્મસ્ય જજ્ઞિરે તાસ્તુ શ્રદ્ધાદ્યાઃ સુસુખોત્તરાઃ ।
દુઃખોત્તરાશ્ચ હિંસાયામધર્મસ્ય ચ સન્તતૌ ॥ ૧૫॥

નિકૃત્યાદય ઉત્પન્નાઃ પુત્રાશ્ચ ધર્મલક્ષણાઃ ।
નૈષાં ભાર્યાશ્ચ પુત્રા વા સર્વે ત્વનિયમાઃ સ્મૃતાઃ ॥ ૧૬॥

સ એષ તામસઃ સર્ગો જજ્ઞે ધર્મનિયામકઃ ।
યા સા દક્ષસ્ય દુહિતા રુદ્રસ્ય દયિતા સતી ॥ ૧૭॥

ભર્તૃનિન્દાપ્રસઙ્ગેન ત્યક્ત્વા દાક્ષાયિણીં તનુમ્ ।
દક્ષં ચ દક્ષભાર્યાં ચ વિનિન્દ્ય સહ બન્ધુભિઃ ॥ ૧૮॥

સા મેનાયામાવિરભૂત્પુત્રી હિમવતો ગિરેઃ ।
રુદ્રસ્તુ તાં સતીં દૃષ્ટ્વા રુદ્રાંસ્ત્વાત્મસમપ્રભાન્ ॥ ૧૯॥

યથાઽસૃજદસઙ્ખ્યાતાંસ્તથા કથિતમેવ ચ ।
ભૃગોઃ ખ્યાત્યાં સમુત્પન્ના લક્ષ્મીર્નારાયણપ્રિયા ॥ ૨૦॥

દેવૌ ધાતૃવિધાતારૌ મન્વન્તરવિધારિણૌ ।
તયોર્વૈ પુત્રપૌત્રાદ્યાઃ શતશોઽથ સહસ્રશઃ ॥ ૨૧॥

સ્વાયમ્ભુવેઽન્તરે નીતાઃ સર્વે તે ભાર્ગવા મતાઃ ।
મરીચેરપિ સમ્ભૂતિઃ પૌર્ણમાસમસૂયત ॥ ૨૨॥

કન્યાચતુષ્ટયં ચૈવ મહીયાંસસ્તદન્વયાઃ ।
યેષાં વંશે સમુત્પન્નો બહુપુત્રસ્ય કશ્યપઃ ॥ ૨૩॥

સ્મૃતિશ્ચાઙ્ગિરસઃ પત્ની જનયામાસ વૈ સુતૌ ।
આગ્નીધ્રં શરભઞ્ચૈવ તથા કન્યાચતુષ્ટયમ્ ॥ ૨૪॥

તદીયાઃ પુત્રપૌત્રાશ્ચ યેઽતીતાસ્તે સહસ્રશઃ ।
પ્રીત્યાં પુલસ્ત્યભાર્યાયાં દન્તોઽગ્નિરભવત્સુતઃ ।
પૂર્વજન્મનિ યોઽગસ્ત્યઃ સ્મૃતઃ સ્વાયમ્ભુવેઽન્તરે ॥ ૨૫॥

તત્સન્તતીયા બહવઃ પૌલસ્ત્યા ઇતિ વિશ્રુતાઃ ।
ક્ષમા તુ સુષુવે પુત્રાન્ પુલહસ્ય પ્રજાપતેઃ ॥ ૨૬॥

કર્દમશ્ચાસુરિશ્ચૈવ સહિષ્ણુશ્ચેતિ તે ત્રયઃ ।
ત્રેતાગ્નિવર્ચસઃ સર્વે યેષાં વંશઃ પ્રતિષ્ઠિતઃ ॥ ૨૭॥

ક્રતોઃ ક્રતુસમાન્ભાર્યા સન્નતિઃ સુષુવે સુતાન્ ।
નૈષાં ભાર્યાશ્ચ પુત્રાશ્ચ સર્વે તે હ્યૂર્ધ્વરેતસઃ ॥ ૨૮॥

ષષ્ટિસ્તાનિ સહસ્રાણિ વાલખિલ્યા ઇતિ સ્મૃતાઃ ।
અનૂરોરગ્રતો યાન્તિ પરિવાર્ય્ય દિવાકરમ્ ॥ ૨૯॥

અત્રેર્ભાર્યાનસૂયા ચ પઞ્ચાત્રેયાનસૂયત ।
કન્યકાં ચ શ્રુતિં નામ માતા શઙ્ખપદસ્ય ચ ॥ ૩૦॥

સત્યનેત્રશ્ચ હવ્યશ્ચ આપોમૂર્તિઃ શનૈશ્ચરઃ ।
સોમશ્ચ પઞ્ચમસ્ત્વેતે પઞ્ચાત્રેયાઃ પ્રકીર્તિતાઃ ॥ ૩૧॥

તેષાં પુત્રાશ્ચ પૌત્રાશ્ચ હ્યાત્રેયાણાં મહાત્મનામ્ ।
સ્વાયમ્ભુવેઽન્તરેઽતીતાઃ શતશોઽથ સહસ્રશઃ ॥ ૩૨॥

ઊર્જાયાં તુ વસિષ્ઠસ્ય પુત્રા વૈ સપ્ત જજ્ઞિરે ।
જ્યાયસી ચ સ્વસા તેષાં પુણ્ડરીકા સુમધ્યમા ॥ ૩૩॥

રજોગાત્રોર્ધ્વબાહૂ ચ સવનશ્ચાનયશ્ચ યઃ ।
સુતપાઃ શુક્ર ઇત્યેતે સપ્ત સપ્તર્ષયઃ સ્મૃતાઃ ॥ ૩૪॥

ગોત્રાણિ નામભિસ્તેષાં વાસિષ્ઠાનાં મહાત્મનામ્ ।
સ્વાયમ્ભુવેઽન્તરેઽતીતાન્યર્બુદાનિ શતાનિ ચ ॥ ૩૫॥

ઇત્યેષ ઋષિસર્ગસ્તુ સાનુબન્ધઃ પ્રકીર્તિતઃ ।
સમાસાદ્વિસ્તરાદ્વક્તુમશક્યોઽયમિતિ દ્વિજાઃ ॥ ૩૬॥

યોઽસૌ રુદ્રાત્મકો વહ્નિબ્રહ્મણો માનસઃ સુતઃ ।
સ્વાહા તસ્ય પ્રિયા લેભે પુત્રાંસ્ત્રીનમિતૌજસઃ ॥ ૩૭॥

પાવકઃ પવમાનશ્ચ શુચિરિત્યેષ તે ત્રયઃ ।
નિર્મન્થ્યઃ પવમાનઃ સ્યાદ્વૈદ્યુતઃ પાવકઃ સ્મૃતઃ ॥ ૩૮॥

સૂર્યે તપતિ યશ્ચાસૌ શુચિઃ સૌર ઉદાહૃતઃ ।
હવ્યવાહઃ કવ્યવાહઃ સહરક્ષા ઇતિ ત્રયઃ ॥ ૩૯॥

ત્રયાણાં ક્રમશઃ પુત્રા દેવપિતૃસુરાશ્ચ તે ।
એતેષાં પુત્રપૌત્રાશ્ચ ચત્વારિંશન્નવૈવ તે ॥ ૪૦॥

કામ્યનૈમિત્તિકાજસ્રકર્મસુ ત્રિષુ સંસ્થિતાઃ ।
સર્વે તપસ્વિનો જ્ઞેયાઃ સર્વે વ્રતભૃતસ્તથા ॥ ૪૧॥

સર્વે રુદ્રાત્મકાશ્ચૈવ સર્વે રુદ્રપરાયણાઃ ।
તસ્માદગ્નિમુખે યત્તદ્ હુતં સ્યાદેવ કેનચિત્ ॥ ૪૨॥

તત્સર્વં રુદ્રમુદ્દિશ્ય દત્તં સ્યાન્નાત્ર સંશયઃ ।
ઇત્યેવં નિશ્ચયોઽગ્નીનામનુક્રાન્તો યથાતથમ્ ॥ ૪૩॥

નાતિવિસ્તરતો વિપ્રાઃ પિતૄન્વક્ષ્યામ્યતઃ પરમ્ ।
યસ્માત્ષડ્ ઋતવસ્તેષાં સ્થાનં સ્થાનાભિમાનિનામ્ ॥ ૪૪॥

ઋતવઃ પિતરસ્તસ્માદિત્યેષા વૈદિકી શ્રુતિઃ ।
યુષ્માદ્ ઋતુષુ સર્વે હિ જાયન્તે સ્થાસ્નુજઙ્ગમાઃ ॥ ૪૫॥

તસ્માદેતે હિ પિતર આર્તવા ઇતિ ચ શ્રુતમ્ ।
એવં પિતૄણામેતેષામૃતુકાલાભિમાનિનામ્ ॥ ૪૬॥

આત્મૈશ્વર્યા મહાત્માનસ્તિષ્ઠન્તીહાભ્રસઙ્ગમાત્ ।
આગ્નિષ્વાત્તા બર્હિષદઃ પિતરો દ્વિવિધાઃ સ્મૃતાઃ ॥ ૪૭॥

અયજ્વાનશ્ચ યજ્વાનઃ ક્રમાત્તે ગૃહમેધિનઃ ।
સ્વધાઽસૂત પિતૃભ્યશ્ચ દ્વે કન્યે લોકવિશ્રુતે ॥ ૪૮॥

મેનાં ચ ધરણીં ચૈવ યાભ્યાં વિશ્વમિદં ધૃતમ્ ।
અગ્નિષ્વાત્તસુતા મેના ધરણી બર્હિષત્સુતા ॥ ૪૯॥

મેના હિમવતઃ પત્ની મૈનાકં ક્રૌઞ્ચમેવ ચ ।
ગૌરીં ગઙ્ગાં ચ સુષુવે ભવાઙ્ગાશ્લેષપાવનીમ્ ॥ ૫૦॥

મેરોસ્તુ ધરણી પત્ની દિવ્યૌષધિસમન્વિતમ્ ।
મન્દરં સુષુવે પુત્રં ચિત્રિસુન્દરકન્ધરમ્ ॥ ૫૧॥

સ એવ મન્દરઃ શ્રીમાન્મેરુપુત્રસ્તપોબલાત્ ।
સાક્ષાચ્છ્રીકણ્ઠનાથસ્ય શિવસ્યાવસથં ગતઃ ॥ ૫૨॥

સાઽસૂતા ધરણી ભૂયસ્તિસ્રઃ કન્યાશ્ચ વિશ્રુતાઃ ।
વેલાં ચ નિયતિં ચૈવ તૃતીયામપિ ચાયતિમ્ ॥ ૫૩॥

આયતિર્નિયતિશ્ચૈવ પત્ન્યૌ દ્વે ભૃગુપુત્રયોઃ ।

સ્વાયમ્ભુવેઽન્તરે પૂર્વં કથિતસ્તે તદન્વયઃ ॥ ૫૪॥

સુષુવે સાગરાદ્વેલા કન્યામેકામનિન્દિતામ્ ।
સવર્ણાં નામ સામુદ્રીં પત્નીં પ્રાચીનબર્હિષઃ ॥ ૫૫॥

સામુદ્રી સુષુવે પુત્રાન્દશ પ્રાચીનબર્હિષઃ ।
સર્વે પ્રાચેતસા નામ ધનુર્વેદસ્ય પારગાઃ ॥ ૫૬॥

યેષાં સ્વાયમ્ભુવે દક્ષઃ પુત્રત્વમગમત્પુરા ।
ત્રિયમ્બકસ્ય શાપેન ચાક્ષુષસ્યાન્તરે મનોઃ ॥ ૫૭॥

ઇત્યેતે બ્રહ્મપુત્રાણાં ધર્માદીનાં મહાત્મનામ્ ।
નાતિસઙ્ક્ષેપતો વિપ્રા નાતિવિસ્તરતઃ ક્રમાત્ ॥ ૫૮॥

વર્ણિતા વૈ મયા વંશા દિવ્યા દેવગણાન્વિતાઃ ।
ક્રિયાવન્તઃ પ્રજાવન્તો મહર્દ્ધિભિરલઙ્કૃતાઃ ॥ ૫૯॥

પ્રજાનાં સન્નિવેશોઽયં પ્રજાપતિસમુદ્ભવઃ ।
ન હિ શક્યઃ પ્રસઙ્ખ્યાતું વર્ષકોટિશતૈરપિ ॥ ૬૦॥

રાજ્ઞામપિ ચ યો વંશો દ્વિધા સોઽપિ પ્રવર્તતે ।
સૂર્યવંશઃ સોમવંશ ઇતિ પુણ્યતમઃ ક્ષિતૌ ॥ ૬૧॥

ઇક્ષ્વાકુરમ્બરીષશ્ચ યયાતિર્નાહુષાદયઃ ।
પુણ્યશ્લોકાઃ શ્રુતા યેઽત્ર તેઽપિ તદ્વંશસમ્ભવાઃ ॥ ૬૨॥

અન્યે ચ રાજઋષયો નાનાવીર્યસમન્વિતાઃ ।
કિં તૈઃ ફલમનુત્ક્રાન્તૈરુક્તપૂર્વૈઃ પુરાતનૈઃ ॥ ૬૩॥

કિં ચેશ્વરકથાવૃત્તૌ યત્ર તત્રાન્યકીર્તનમ્ ।
ન સદ્ભિઃ સમ્મતં મત્વા નોત્સહે બહુભાષિતુમ્ ॥ ૬૪॥

પ્રસઙ્ગાદીશ્વરસ્યૈવ પ્રભાવદ્યોતનાદપિ ।
સર્ગાદયોઽપિ કથિતા ઇત્યત્ર તત્પ્રવિસ્તરૈઃ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે સૃષ્ટિકથનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૭.૧.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૮. અષ્ટાદશોઽધ્યાયઃ । સતીદેહત્યાગઃ ।

ઋષય ઊચુઃ ।
દેવી દક્ષસ્ય તનયા ત્યક્ત્વા દાક્ષાયણીં તનુમ્ ।
કથં હિમવતઃ પુત્રી મેનાયામભવત્પુરા ॥ ૧॥

કથં ચ નિન્દિતો રુદ્રો દક્ષેણ ચ મહાત્મના ।
નિમિત્તમપિ કિં તત્ર યેન સ્યાન્નિન્દિતો ભવઃ ॥ ૨॥

ઉત્પન્નશ્ચ કથં દક્ષો હ્યભિશાપાદ્ભવસ્ય તુ ।
ચાક્ષુષસ્યાન્તરે પૂર્વં મનોઃ પ્રબ્રૂહિ મારુત ॥ ૩॥

વાયુરુવાવ
શ‍ૃણ્વન્તુ કથયિષ્યામિ દક્ષસ્ય લઘુચેતસઃ ।
વૃત્તં પાપાત્ પ્રમાદાચ્ચ વિશ્વામરવિદૂષણમ્ ॥ ૪॥

પુરા સુરાસુરાઃ સર્વે સિદ્ધાશ્ચ પરમર્ષયઃ ।
કદાચિદ્ દ્રષ્ટુમીશાનં હિમવચ્છિખરં યયુઃ ॥ ૫॥

તદા દેવશ્ચ દેવી ચ દિવ્યાસનગતાવુભૌ ।
દર્શનં દદતુસ્તેષાં દેવાદીનાં દ્વિજોત્તમાઃ ॥ ૬॥

તદાનીમેવ દક્ષોઽપિ ગતસ્તત્ર સહામરૈઃ ।
જામાતરં હરં દ્રષ્ટું દેવીં ચાત્મસુતાં સતીમ્ ॥ ૭॥

તદાત્મગૌરવાદ્દેવો દેવ્યા દક્ષે સમાગતે ।
દેવાદિભ્યો વિશેષેણ ન કદાચિદભૂત્સ્મૃતિઃ ॥ ૮॥

તસ્ય તસ્યાઃ પરં ભાવમજ્ઞાતુશ્ચાપિ કેવલમ્ ।
પુત્રીત્યેવં વિમૂઢસ્ય તસ્યાં વૈરમજાયત ॥ ૯॥

તતસ્તેનૈવ વૈરેણ વિધિના ચ પ્રચોદિતઃ ।
નાજુવાહ ભવં દક્ષો દીક્ષિતસ્તામપિ દ્વિષન્ ॥ ૧૦॥

અન્યાઞ્જામાતરઃ સર્વાનાહૂય સ યથાક્રમમ્ ।
શતશઃ પુષ્કલામર્ચાઞ્ચકાર ચ પૃથક્ પૃથક્ ॥ ૧૧॥

તથા તાન્સઙ્ગતાન્ શ્રુત્વા નારદસ્ય મુખાત્તદા ।
યયૌ રુદ્રાય રુદ્રાણી વિજ્ઞાપ્ય ભવનં પિતુઃ ॥ ૧૨॥

અથ સન્નિહિતં દિવ્યં વિમાનં વિશ્વતોમુખમ્ ।

લક્ષણાઢ્યં સુખારોહમતિમાત્રં મનોહરમ્ ॥ ૧૩॥

તમ્રજામ્બૂનદપ્રખ્યં ચિત્રરત્નપરિષ્કૃતમ્ ।
મુક્તામયવિતાનાગ્ર્યં સ્રગ્દામસમલઙ્કૃતમ્ ॥ ૧૪॥

તપ્તકઞ્ચનનિર્વ્યૂહં રત્નસ્તમ્ભશતાવૃતમ્ ।
વજ્રકલ્પિતસોપાનં વિદ્રુમસ્તમ્ભતોરણમ્ ॥ ૧૫॥

પુષ્પપટ્ટપરિસ્તીર્ણં ચિત્રરત્નમહાસનમ્ ।
વજ્રજાલકિરચ્છિદ્રમચ્છિદ્રમણિકુટ્ટિમમ્ ॥ ૧૬॥

મણિદણ્ડમનોજ્ઞેન મહાવૃષભલક્ષ્મણા ।
અલઙ્કૃતપુરોભાગમભ્રશુભ્રેણ કેતુના ॥ ૧૭॥

રત્નકઞ્ચુકગુપ્તાઙ્ગૈશ્ચિત્રવેત્રૈકપાણિભિઃ ।
અધિષ્ઠિતમહાદ્વારમપ્રધૃષ્યૈર્ગણેશ્વરૈઃ ॥ ૧૮॥

મૃદઙ્ગતાલગીતાદિવેણુવીણાવિશારદૈઃ ।
વિદગ્ધવેષભૂષૈશ્ચ બહુભિઃ સ્ત્રીજનૈર્વૃતમ્ ॥ ૧૯॥

આરુરોહ મહાદેવી સહ પ્રિયસખીજનૈઃ ।
ચામારવ્યજને તસ્યા વજ્રદણ્ડમનોહરે ॥ ૨૦॥

ગૃહીત્વા રુદ્રકન્યે દ્વે વિવીજતુરુભે શુભે ।
તદા ચામરયોર્મધ્યે દેવ્યા વદનમાબભૌ ॥ ૨૧॥

અન્યોઽન્યં યુધ્યતોર્મધ્યે હંસયોરિવ પઙ્કજમ્ ।
છત્રં શશિનિભં તસ્યાશ્ચૂડોપરિ સુમાલિની ॥ ૨૨॥

ધૃતમુક્તાપરિક્ષિપ્તં બભાર પ્રેમનિર્ભરા ।
તચ્છત્રમુજ્જ્વલં દેવ્યા રુરુચે વદનોપરિ ॥ ૨૩॥

ઉપર્યમૃતભાણ્ડસ્ય મણ્ડલં શશિનો યથા ।
અથ ચાગ્રે સમાસીના સુસ્મિતાસ્યા શુભાવતી ॥ ૨૪॥

અક્ષદ્યૂતવિનોદેન રમયામાસ વૈ સતીમ્ ।
સુયશાઃ પાદુકે દેવ્યાઃ શુભે રત્નપરિષ્કૃતે ॥ ૨૫॥

સ્તનયોરન્તરે કૃત્વા તદા દેવીમસેવત ।
અન્યા કાઞ્ચનચાર્વઙ્ગી દીપ્તં જગ્રાહ દર્પણમ્ ॥ ૨૬॥

અપરા તાલવૃન્તં ચ પરા તામ્બૂલપેટિકામ્ ।
કાચિત્ક્રીડાશુકં ચારુ કરેઽકુરુત ભામિની ॥ ૨૭॥

કાચિત્તુ સુમનોજ્ઞાનિ પુષ્પાણિ સુરભીણિ ચ ।
કાચિદાભરણાધારં બભાર કમલેક્ષણા ॥ ૨૮॥

કાચિચ્ચ પુનરાલેપં સુપ્રસૂનં શુભાઞ્જનમ્ ।
અન્યાશ્ચ સદૃશાસ્તાસ્તા યથાસ્વમુચિતક્રિયાઃ ॥ ૨૯॥

આવૃત્ય તાં મહાદેવીમસેવન્ત સમન્તતઃ ।
અતીવ શુશુભે તાસામન્તરે પરમેશ્વરી ॥ ૩૦॥

તારાપરિષદો મધ્યે ચન્દ્રલેખેવ શારદી ।
તતઃ શઙ્ખસમુત્થસ્ય નાદસ્ય સમનન્તરમ્ ॥ ૩૧॥

પ્રાસ્થાનિકો મહાનાદઃ પટહઃ સમતાડ્યત ।
તતો મધુરવાદ્યાનિ સહ તાલોદ્યતૈઃ સ્વનૈઃ ॥ ૩૨॥

અનાહતાનિ સન્નેદુઃ કાહલાનાં શતાનિ ચ ।
સાયુધાનાં ગણેશાનાં મહેશસમતેજસામ્ ॥ ૩૩॥

સહસ્રાણિ શતાન્યષ્ટૌ તદાનીં પુરતો યયુઃ ।
તેષાં મધ્યે વૃષારૂઢો ગજારૂઢો યથા ગુરુઃ ॥ ૩૪॥

જગામ ગણપઃ શ્રીમાન્ સોમનન્દીશ્વરાર્ચિતઃ ।
દેવદુન્દુભયો નેદુર્દિવિ દિવ્યસુખા ઘનાઃ ॥ ૩૫॥

નનૃતુર્મુનયઃ સર્વે મુમુદુઃ સિદ્ધયોગિનઃ ।
સસૃજુઃ પુષ્પવૃષ્ટિં ચ વિતાનોપરિ વારિદાઃ ॥ ૩૬॥

તદા દેવગણૈશ્ચાન્યૈઃ પથિ સર્વત્ર સઙ્ગતાઃ ।
ક્ષણાદિવ પિતુર્ગેહં પ્રવિવેશ મહેશ્વરી ॥ ૩૭॥

તાં દૃષ્ટ્વા કુપિતો દક્ષશ્ચાત્મનઃ ક્ષયકારણાત્ ।
તસ્યા યવીયસીભ્યોઽપિ ચક્રે પૂજામસત્કૃતામ્ ॥ ૩૮॥

તદા શશિમુખી દેવી પિતરં સદસિ સ્થિતમ્ ।
અમ્બિકા યુક્તમવ્યગ્રમુવાચાકૃપણં વચઃ ॥ ૩૯॥

દેવ્યુવાચ ।
બ્રહ્માદયઃ પિશાચાન્તા યસ્યાજ્ઞાવશવર્તિનઃ ।

સ દેવઃ સામ્પ્રતં તાત વિધિના નાર્ચિતઃ કિલ ॥ ૪૦॥

તદાસ્તાં મમ જ્યાયસ્યાઃ પુત્ર્યાઃ પૂજાં કિમીદૃશીમ્ ।
અસત્કૃતામવજ્ઞાય કૃતવાનસિ ગર્હિતમ્ ॥ ૪૧॥

એવમુક્તોઽબ્રવીદેનાં દક્ષઃ ક્રોધાદમર્ષિતઃ ।
ત્વત્તઃ શ્રેષ્ઠા વિશિષ્ટાશ્ચ પૂજ્યા બાલાઃ સુતા મમ ॥ ૪૨॥

તાસાં તુ યે ચ ભર્ત્તારસ્તે મે બહુમતા મુદા ।
ગુણૈશ્ચાપ્યધિકાઃ સર્વે ભર્તુસ્તે ત્ર્યમ્બકાદપિ ॥ ૪૩॥

સ્તબ્ધાત્મા તામસઃ શર્વઃ ત્વમિમં સમુપાશ્રિતા ।
તેન ત્વામવમન્યેઽહં પ્રતિકૂલો હિ મે ભવઃ ॥ ૪૪॥

તથોક્તા પિતરં દક્ષં ક્રુદ્ધા દેવી તમબ્રવીત્ ।
શૃણ્વતામેવ સર્વેષાં યે યજ્ઞસદસિ સ્થિતાઃ ॥ ૪૫॥

અકસ્માન્મમ ભર્તારમજાતાશેષદૂષણમ્ ।
વાચા દૂષયસે દક્ષ સાક્ષાલ્લોકમહેશ્વરમ્ ॥ ૪૬॥

વિદ્યાચૌરો ગુરુદ્રોહી વેદેશ્વરવિદૂષકઃ ।
ત એતે બહુપાપ્માનઃ સર્વે દણ્ડ્યા ઇતિ શ્રુતિઃ ॥ ૪૭॥

તસ્માદત્યુત્કટસ્યાસ્ય પાપસ્ય સદૃશો ભૃશમ્ ।
સહસા દારુણો દણ્ડસ્તવ દૈવાદ્ભવિષ્યતિ ॥ ૪૮॥

ત્વયા ન પૂજિતો યસ્માદ્દેવદેવસ્ત્રિયમ્બકઃ ।
તસ્માત્તવ કુલં દુષ્ટં નષ્ટમિત્યવધારય ॥ ૪૯॥

ઇત્યુક્ત્વા પિતરં રુષ્ટા સતી સન્ત્યક્તસાધ્વસા ।
તદીયાં ચ તનું ત્યક્ત્વા હિમવન્તં યયૌ ગિરિમ્ ॥ ૫૦॥

સ પર્વતપરઃ શ્રીમાઁલ્લબ્ધપુણ્યફલોદયઃ ।
તદર્થમેવ કૃતવાન્ સુચિરં દુશ્ચરં તપઃ ॥ ૫૧॥

તસ્માત્તમનુગૃહ્ણાતિ ભૂધરેશ્વરમીશ્વરી ।
સ્વેચ્છયા પિતરં ચક્રે સ્વાત્મનો યોગમાયયા ॥ ૫૨॥

યદા ગતા સતી દક્ષં વિનિન્દ્ય ભયવિહ્વલમ્ ।
તદા તિરોહિતા મન્ત્રા વિહતશ્ચ તતોઽધ્વરઃ ॥ ૫૩॥

તદુપશ્રુત્ય ગમનં દેવ્યાસ્ત્રિપુરુમર્દનઃ ।
દક્ષાય ચ ઋષિભ્યશ્ચ ચુકોપ ચ શશાપ તાન્ ॥ ૫૪॥

યસ્માદવમતા દક્ષમત્કૃતેઽનાગસા સતી ।
પૂજિતાશ્ચેતરાઃ સર્વાઃ સ્વસુતા ભર્તૃભિઃ સહ ॥ ૫૫॥

વૈવસ્વતેઽન્તરે તસ્માત્તવ જામાતરસ્ત્વમી ।
ઉત્પત્સ્યન્તે સમં સર્વે બ્રહ્મયજ્ઞેષ્વયોનિજાઃ ॥ ૫૬॥

ભવિતા માનુષો રાજા ચાક્ષુષસ્ય ત્વમન્વયે ।
પ્રાચીનબર્હિષઃ પૌત્રઃ પુત્રશ્ચાપિ પ્રચેતસઃ ॥ ૫૭॥

અહં તત્રાપિ તે વિઘ્નમાચરિષ્યામિ દુર્મતે ।
ધર્માર્થકામયુક્તેષુ કર્મસ્વપિ પુનઃ પુનઃ ॥ ૫૮॥

તેનૈવં વ્યાહૃતો દક્ષો રુદ્રેણામિતતેજસા ।
સ્વાયમ્ભુવીં તનું ત્યક્ત્વા પપાત ભુવિ દુઃખિતઃ ॥ ૫૯॥

તતઃ પ્રાચેતસો દક્ષો જજ્ઞે વૈ ચાક્ષુષેઽન્તરે ।
પ્રાચીનબર્હિષઃ પૌત્રઃ પુત્રશ્ચૈવ પ્રચેતસામ્ ॥ ૬૦॥

ભૃગ્વાદયોઽપિ જાતા વૈ મનોર્વૈવસ્વતસ્ય તુ ।
અન્તરે બ્રહ્મણો યજ્ઞે વારુણીં બિભ્રતસ્તનુમ્ ॥ ૬૧॥

તદા દક્ષસ્ય ધર્માર્થં પ્રવૃત્તસ્ય દુરાત્મનઃ ।
મહેશઃ કૃતવાન્ વિઘ્નં મનૌ વૈવસ્વતે સતિ ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે સતીદેહત્યાગો નામાષ્ટાદશોઽધ્યાયઃ ॥ ૭.૧.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૧૯. એકોનવિંશોઽધ્યાયઃ । વીરભદ્રોત્પત્તિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
કથં દક્ષસ્ય ધર્માર્થં પ્રવૃત્તસ્ય દુરાત્મનઃ ।
મહેશઃ કૃતવાન્ વિઘ્નમેતદિચ્છામ વેદિતુમ્ ॥ ૧॥

વાયુરુવાચ ।

વિશ્વસ્ય જગતો માતુરપિ દેવ્યાસ્તપોબલાત્ ।
પિતૃભાવમુપાગમ્ય મુદિતે હિમવદ્ગિરૌ ॥ ૨॥

દેવેઽપિ તત્કૃતોદ્વાહે હિમવચ્છિખરાલયે ।
સઙ્ક્રીડતિ તયા સાર્દ્ધં કાલે બહુતરે ગતે ॥ ૩॥

વૈવસ્વતેઽન્તરે પ્રાપ્તે દક્ષઃ પ્રાચેતસઃ સ્વયમ્ ।
અશ્વમેધેન યજ્ઞેન યક્ષ્યમાણોઽન્વપદ્યત ॥ ૪॥

તતો હિમવતઃ પૃષ્ઠે દક્ષો વૈ યજ્ઞમાહરત્ ।
ગઙ્ગાદ્વારે શુભે દેશે ઋષિસિદ્ધનિષેવિતે ॥ ૫॥

તસ્ય તસ્મિન્મખે દેવાઃ સર્વે શક્રપુરોગમાઃ ।
ગમનાય સમાગમ્ય બુદ્ધિમાપેદિરે તદા ॥ ૬॥

આદિત્યા વસવો રુદ્રાઃ સાધ્યાઃ સહ મરુદ્ગણૈઃ ।
ઊષ્મપાઃ સોમપાશ્ચૈવ આજ્યપા ધૂમપાસ્તથા ॥ ૭॥

અશ્વિનૌ પિતરશ્ચૈવ તથા ચાન્યે મહર્ષયઃ ।
વિષ્ણુના સહિતાઃ સર્વે સ્વાગતા યજ્ઞભાગિનઃ ॥ ૮॥

દૃષ્ટ્વા દેવકુલં સર્વમીશ્વરેણ વિના ગતમ્ ।
દધીચો મન્યુનાવિષ્ટો દક્ષમેવમભાષત ॥ ૯॥

દધીચ ઉવાચ ।
અપ્યપૂજ્યે ચૈવ પૂજા પૂજ્યાનાં ચાપ્યપૂજને ।
નરઃ પાપમવાપ્નોતિ મહદ્વૈ નાત્ર સંશયઃ ॥ ૧૦॥

અસતાં સમ્મતિર્યત્ર સતામવમતિસ્તથા ।
દણ્ડો દેવકૃતસ્તત્ર સદ્યઃ પતતિ દારુણઃ ॥ ૧૧॥

એવમુક્ત્વા તુ વિપ્રર્ષિઃ પુનર્દક્ષમભાષત ।
પૂજ્યં તુ પશુભર્તારં કસ્માન્નાર્ચયસે પ્રભુમ્ ॥ ૧૨॥

દક્ષ ઉવાચ ।
સન્તિ મે બહવો રુદ્રાઃ શૂલહસ્તાઃ કપર્દિનઃ ।
એકાદશાવસ્થિતા યે નાન્યં વેદ્મિ મહેશ્વરમ્ ॥ ૧૩॥

દધીચ ઉવાચ ।
કિમેભિરમરૈરન્યૈઃ પૂજિતૈરધ્વરે ફલમ્ ।

રાજા ચેદધ્વરસ્યાસ્ય ન રુદ્રઃ પૂજ્યતે ત્વયા ॥ ૧૪॥

બ્રહ્મવિષ્ણુમહેશાનાં સ્રષ્ટા યઃ પ્રભુરવ્યયઃ ।
બ્રહ્માદયઃ પિશાચાન્તા યસ્ય કૈઙ્કર્યવાદિનઃ ॥ ૧૫॥

પ્રકૃતીનાં પરશ્ચૈવ પુરુષસ્ય ચ યઃ પરઃ ।
ચિન્ત્યતે યોગવિદ્વદ્ભિરૃષિભિસ્તત્ત્વદર્શિભિઃ ॥ ૧૬॥

અક્ષરં પરમં બ્રહ્મ હ્યસચ્ચ સદસચ્ચ યત્ ।
અનાદિમધ્યનિધનમપ્રતર્ક્યં સનાતનમ્ ॥ ૧૭॥

યઃ સ્રષ્ટા ચૈવ સંહર્તા ભર્તા ચૈવ મહેશ્વરઃ ।
તસ્માદન્યં ન પશ્યામિ શઙ્કરાત્માનમધ્વરે ॥ ૧૮॥

દક્ષ ઉવાચ ।
એતન્મખેશસ્ય સુવર્ણપાત્રે
હવિઃ સમસ્તં વિધિમન્ત્રપૂતમ્ ।
વિષ્ણોર્નયામ્યપ્રતિમસ્ય ભાગં
પ્રભોર્વિભજ્યાહવનીયમદ્ય ॥ ૧૯॥

દધીચ ઉવાચ ।
યસ્માન્નારાધિતો રુદ્રઃ સર્વદેવેશ્વરેશ્વરઃ ।
તસ્માદ્દક્ષ તવાશેષો યજ્ઞોઽયં ન ભવિષ્યતિ ॥ ૨૦॥

ઇત્યુક્ત્વા વચનં ક્રુદ્ધો દધીચો મુનિસત્તમઃ ।
નિર્ગમ્ય ચ તતો દેશાજ્જગામ સ્વકમાશ્રમમ્ ॥ ૨૧॥

નિર્ગતેઽપિ મુનૌ તસ્મિન્દેવા દક્ષં ન તત્યજુઃ ।
અવશ્યમનુભાવિત્વાદનર્થસ્ય તુ ભાવિનઃ ॥ ૨૨॥

એતસ્મિન્નેવ કાલે તુ જ્ઞાત્વૈતત્સર્વમીશ્વરાત્ ।
દગ્ધું દક્ષાધ્વરં વિપ્રા દેવી દેવમચોદયત્ ॥ ૨૩॥

દેવ્યા સઞ્ચોદિતો દેવો દક્ષાધ્વરજિઘાંસયા ।
સસર્જ સહસા વીરં વીરભદ્રં ગણેશ્વરમ્ ॥ ૨૪॥

સહસ્રવદનં દેવં સહસ્રકમલેક્ષણમ્ ।
સહસ્રમુદ્ગરધરં સહસ્રશરપાણિકમ્ ॥ ૨૫॥

શૂલટઙ્ગગદાહસ્તં દીપ્તકાર્મુકધારિણમ્ ।

ચક્રવજ્રધરં ઘોરં ચન્દ્રાર્દ્ધકૃતશેખરમ્ ॥ ૨૬॥

કુલિશોદ્યોતિતકરં તડિજ્જ્વલિતમૂર્દ્ધજમ્ ।
દંષ્ટ્રાકરાલં બિભ્રાણં મહાવક્ત્રં મહોદરમ્ ॥ ૨૭॥

વિદ્યુજ્જિહ્વં પ્રલમ્બોષ્ઠં મેઘસાગરનિઃસ્વનમ્ ।
વસાનં ચર્મ વૈયાઘ્રં મહદ્રુધિરનિસ્રવમ્ ॥ ૨૮॥

ગણ્ડદ્વિતયસંસૃષ્ટમણ્ડલીકૃતકુણ્ડલમ્ ।
વરામરશિરોમાલાવલીકલિતશેખરમ્ ॥ ૨૯॥

રણન્નૂપુરકેયૂરમહાકનકભૂષિતમ્ ।
રત્નસઞ્ચયસન્દીપ્તં તારહારાવૃતોરસમ્ ॥ ૩૦॥

મહાશરભશાર્દૂલસિંહૈઃ સદૃશવિક્રમમ્ ।
પ્રશસ્તમત્તમાતઙ્ગસમાનગમનાલસમ્ ॥ ૩૧॥

શઙ્ખચામરકુન્દેન્દુમૃણાલસદૃશપ્રભમ્ ।
સતુષારમિવાદ્રીન્દ્રં સાક્ષાજ્જઙ્ગમતાં ગતમ્ ॥ ૩૨॥

જ્વાલામાલાપરિક્ષિપ્તં દીપ્તમૌક્તિકભૂષણમ્ ।
તેજસા ચૈવ દીવ્યન્તં યુગાન્ત ઇવ પાવકમ્ ॥ ૩૩॥

સ જાનુભ્યાં મહીં ગત્વા પ્રણતઃ પ્રાઞ્જલિસ્તતઃ ।
પાર્શ્વતો દેવદેવસ્ય પર્યતિષ્ઠદ્ ગણેશ્વરઃ ॥ ૩૪॥

મન્યુના ચાસૃજદ્ભદ્રાં ભદ્રકાલીં મહેશ્વરીમ્ ।
આત્મનઃ કર્મસાક્ષિત્વે તેન ગન્તું સહૈવ તુ ॥ ૩૫॥

તં દૃષ્ટ્વાવસ્થિતં વીરભદ્રં કાલાગ્નિસન્નિભમ્ ।
ભદ્રયા સહિતં પ્રાહ ભદ્રમસ્ત્વિતિ શઙ્કરઃ ॥ ૩૬॥

સ ચ વિજ્ઞાપયામાસ સહ દેવ્યા મહેશ્વરમ્ ।
આજ્ઞાપય મહાદેવ કિં કાર્યં કરવાણ્યહમ્ ॥ ૩૭॥

તતસ્ત્રિપુરહા પ્રાહ હૈમવત્યાઃ પ્રિયેચ્છયા ।
વીરભદ્રં મહાબાહું વાચા વિપુલનાદયા ॥ ૩૮॥

મહાદેવ ઉવાચ ।
પ્રાચેતસસ્ય દક્ષસ્ય યજ્ઞં સદ્યો વિનાશય ।
ભદ્રકાલ્યા સહાસિ ત્વમેતત્કૃત્યં ગણેશ્વર ॥ ૩૯॥

અહમપ્યનયા સાર્દ્ધં રૈભ્યાશ્રમસપીપતઃ ।
સ્થિત્વા વીક્ષે ગણેશાન વિક્રમં તવ દુઃસહમ્ ॥ ૪૦॥

વૃક્ષાઃ કનખલે યે તુ ગઙ્ગાદ્વારસમીપગાઃ ।
સુવર્ણશૃઙ્ગસ્ય ગિરેર્મેરુમન્દરસન્નિભાઃ ॥ ૪૧॥

તસ્મિન્પ્રદેશે દક્ષસ્ય યજ્ઞઃ સમ્પ્રતિ વર્તતે ।
સહસા તસ્ય યજ્ઞસ્ય વિઘાતં કુરુ મા ચિરમ્ ॥ ૪૨॥

ઇત્યુક્તે સતિ દેવેન દેવી હિમગિરીન્દ્રજા ।
ભદ્રં ભદ્રાં ચ સમ્પ્રેક્ષ્ય વત્સં ધેનુરિવૌરસમ્ ॥ ૪૩॥

આલિઙ્ગ્ય ચ સમાઘ્રાય મૂર્ધ્નિ ષડ્વદનં યથા ।
સસ્મિતા વચનં પ્રાહ મધુરં મધુરં સ્વયમ્ ॥ ૪૪॥

દેવ્યુવાચ ।
વત્સ ભદ્ર મહાભાગ મહાબલપરાક્રમ ।
મત્પ્રિયાર્થં ત્વમુત્પન્નો મમ મન્યું પ્રમાર્જય ॥ ૪૫॥

યજ્ઞેશ્વરમનાહૂય યજ્ઞકર્મરતોઽભવત્ ।
દક્ષં વૈરેણ તં તસ્માદ્ભિન્ધિ યજ્ઞં ગણેશ્વર ॥ ૪૬॥

યજ્ઞલક્ષ્મીમલક્ષ્મીં ત્વં ભદ્ર કૃત્વા મમાજ્ઞયા ।
યજમાનં ચ તં હત્વા વત્સ હિંસય ભદ્રયા ॥ ૪૭॥

અશેષામિવ તામાજ્ઞાં શિવયોશ્ચિત્રકૃત્યયોઃ ।
મૂર્ધ્નિ કૃત્વા નમસ્કૃત્ય ભદ્રો ગન્તું પ્રચક્રમે ॥ ૪૮॥

અથૈષ ભગવાન્ક્રુદ્ધઃ પ્રેતાવાસકૃતાલયઃ ।
વીરભદ્રો મહાદેવો દેવ્યા મન્યુપ્રમાર્જકઃ ॥ ૪૯॥

સસર્જ રોમકૂપેભ્યો રોમજાખ્યાન્ ગણેશ્વરાન્ ।
દક્ષિણાદ્ભુજદેશાત્તુ શતકોટિગણેશ્વરાન્ ॥ ૫૦॥

પાદાત્તથોરુદેશાચ્ચ પૃષ્ઠાત્પાર્શ્વાન્મુખાદ્ગલાત્ ।
ગુહ્યાદ્ ગુલ્ફાચ્છિરોમધ્યાત્કણ્ઠાદાસ્યાત્તથોદરાત્ ॥ ૫૧॥

તદા ગણેશ્વરૈર્ભદ્રૈર્ભદ્રતુલ્યપરાક્રમૈઃ ।
સઞ્છાદિતમભૂત્સર્વં સાકાશવિવરં જગત્ ॥ ૫૨॥

સર્વે સહસ્રહસ્તાસ્તે સહસ્રાયુધપાણયઃ ।
રુદ્રસ્યાનુચરાઃ સર્વે સર્વે રુદ્રસમપ્રભાઃ ॥ ૫૩॥

શૂલશક્તિગદાહસ્તાષ્ટઙ્કોપલશિલાધરાઃ ।
કાલાગ્નિરુદ્રસદૃશાસ્ત્રિનેત્રાશ્ચ જટાધરાઃ ॥ ૫૪॥

નિપેતુર્ભૃશમાકાશે શતશઃ સિંહવાહનાઃ ।
વિનેદુશ્ચ મહાનાદાઞ્જલદા ઇવ ભદ્રજાઃ ॥ ૫૫॥

તૈર્ભદ્રૈર્ભગવાન્ ભદ્રસ્તથા પરિવૃતો બભૌ ।
કાલાનલશતૈર્યુક્તો યથાન્તે કાલભૈરવઃ ॥ ૫૬॥

તેષાં મધ્યે સમારુહ્ય વૃષેન્દ્રં વૃષભધ્વજઃ ।
જગામ ભગવાન્ ભદ્રઃ શુભ્રમભ્રં યથા ભવઃ ॥ ૫૭॥

તસ્મિન્વૃષભમારૂઢે ભદ્રે તુ ભસિતપ્રભઃ ।
બભાર મૌક્તિકં છત્રં ગૃહીતસિતચામરઃ ॥ ૫૮॥

સ તદા શુશુભે પાર્શ્વે ભદ્રસ્ય ભસિતપ્રભઃ ।
ભગવાનિવ શૈલેન્દ્રઃ પાર્શ્વે વિશ્વજગદ્ગુરોઃ ॥ ૫૯॥

સોઽપિ તેન બભૌ ભદ્રઃ શ્વેતચામરપાણિના ।
બાલસોમેન સૌમ્યેન યથા શૂલવરાયુધઃ ॥ ૬૦॥

દધ્મૌ શઙ્ખં સિતં ભદ્રં ભદ્રસ્ય પુરતઃ શુભમ્ ।
ભાનુકમ્પો મહાતેજા હેમરત્નૈરલઙ્કૃતઃ ॥ ૬૧॥

દેવદુન્દુભયો નેદુર્દિવ્યસઙ્કુલનિઃસ્વનાઃ ।
વવૃષુઃ શતશો મૂર્ધ્નિ પુષ્પવર્ષં બલાહકાઃ ॥ ૬૨॥

ફુલ્લાનાં મધુગર્ભાણાં પુષ્પાણાં ગન્ધબન્ધવઃ ।
માર્ગાનુકૂલસંવાહા વવુશ્ચ પથિ મારુતાઃ ॥ ૬૩॥

તતો ગણેશ્વરાઃ સર્વે મત્તા યુદ્ધબલોદ્ધતાઃ ।
નનૃતુર્મુમુદુર્નેદુર્જહસુર્જગદુર્જગુઃ ॥ ૬૪॥

તદા ભદ્રગણાન્તઃસ્થો બભૌ ભદ્રઃ સભદ્રયા ।
યથા રુદ્રગણાન્તઃ સ્થસ્ત્ર્યમ્બકોઽમ્બિકયા સહ ॥ ૬૫॥

તત્ક્ષણાદેવ દક્ષસ્ય યજ્ઞવાટં હિરણ્મયમ્ ।
પ્રવિવેશ મહાબાહુર્વીરભદ્રો મહાનુગઃ ॥ ૬૬॥

તતસ્તુ દક્ષપ્રતિપાદિતસ્ય
ક્રતુપ્રધાનસ્ય ગણપ્રધાનઃ ।
પ્રયોગભૂમિં પ્રવિવેશ ભદ્રો
રુદ્રો યથાન્તે ભુવનં દિધક્ષુઃ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે વીરભદ્રોત્પત્તિવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૭.૧.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૦. વિંશોઽધ્યાયઃ । યજ્ઞવિધ્વંસનઃ ।

વાયુરુવાચ ।
તતો વિષ્ણુપ્રધાનાનાં સુરાણામમિતૌજસામ્ ।
દદર્શ ચ મહત્સત્રં ચિત્રધ્વજપરિચ્છદમ્ ॥ ૧॥

સુદર્ભઋતુસંસ્તીર્ણં સુસમિદ્ધહુતાશનમ્ ।
કાઞ્ચનૈર્યજ્ઞભાણ્ડૈશ્ચ ભ્રાજિષ્ણુભિરલઙ્કૃતમ્ ॥ ૨॥

ઋષિભિર્યજ્ઞપટુભિર્યથાવત્કર્મકર્તૃભિઃ ।
વિધિના વેદદૃષ્ટેન સ્વનુષ્ઠિતબહુક્રમમ્ ॥ ૩॥

દેવાઙ્ગનાસહસ્રાઢ્યમપ્સરોગણસેવિતમ્ ।
વેણુવીણારવૈર્જુષ્ટં વેદઘોષૈશ્ચ બૃંહિતમ્ ॥ ૪॥

દૃષ્ટ્વા દક્ષાધ્વરં વીરો વીરભદ્રઃ પ્રતાપવાન્ ।
સિંહનાદં તદા ચક્રે ગમ્ભીરો જલદો યથા ॥ ૫॥

તતઃ કિલકિલાશબ્દ આકાશં પૂરયન્નિવ ।
ગણેશ્વરૈઃ કૃતો જજ્ઞે મહાન્યક્કૃતસાગરઃ ॥ ૬॥

તેન શબ્દેન મહતા ગ્રસ્તાઃ સર્વે દિવૌકસઃ ।
દુદ્રુવુઃ પરિતો ભીતાઃ સ્રસ્તવસ્ત્રવિભૂષણાઃ ॥ ૭॥

કિંસ્વિદ્ભગ્નો મહામેરુઃ કિંસ્વિત્સન્દીર્યતે મહી ।

કિમિદં કિમિદં વેતિ જજલ્પુસ્ત્રિદશા ભૃશમ્ ॥ ૮॥

મૃગેન્દ્રાણાં યથા નાદં ગજેન્દ્રા ગહને વને ।
શ્રુત્વા તથાવિધં કેચિત્તત્યજુર્જીવિતં ભયાત્ ॥ ૯॥

પર્વતાશ્ચ વ્યશીર્યન્ત ચકમ્પે ચ વસુન્ધરા ।
મરુતશ્ચ વ્યઘૂર્ણન્ત ચુક્ષુભે મકરાલયઃ ॥ ૧૦॥

અગ્નયો નૈવ દીપ્યન્તે ન ચ દીપ્યતિ ભાસ્કરઃ ।
ગ્રહાશ્ચ ન પ્રકાશન્તે નક્ષત્રાણિ ચ તારકાઃ ॥ ૧૧॥

એતસ્મિન્નેવ કાલે તુ યજ્ઞવાટં તદુજ્જ્વલમ્ ।
સમ્પ્રાપ ભગવાન્ભદ્રો ભદ્રૈશ્ચ સહ ભદ્રયા ॥ ૧૨॥

તં દૃષ્ટ્વા ભીતભીતોઽપિ દક્ષો દૃઢ ઇવ સ્થિતઃ ।
ક્રુદ્ધવદ્ વચનં પ્રાહ કો ભવાન્ કિમિહેચ્છસિ ॥ ૧૩॥

તસ્ય તદ્વચનં શ્રુત્વા દક્ષસ્ય ચ દુરાત્મનઃ ।
વીરભદ્રો મહાતેજા મેઘગમ્ભીરનિઃસ્વનઃ ॥ ૧૪॥

સ્મયન્નિવ તમાલોક્ય દક્ષં દેવાંશ્ચ ઋત્વિજઃ ।
અર્થગર્ભમસમ્ભ્રાન્તમવોચદુચિતં વચઃ ॥ ૧૫॥

વીરભદ્ર ઉવાચ ।
વયં હ્યનુચરાઃ સર્વે શર્વસ્યામિતતેજસઃ ।
ભાગાભિલિપ્સયા પ્રાપ્તા ભાગો નઃ સમ્પ્રદીયતામ્ ॥ ૧૬॥

અથ ચેદધ્વરેઽસ્માકં ન ભાગઃ પરિકલ્પિતઃ ।
કથ્યતાં કારણં તત્ર યુધ્યતાં વા મયામરૈઃ ॥ ૧૭॥

ઇત્યુક્તાસ્તે ગણેન્દ્રેણ દેવા દક્ષપુરોગમાઃ ।
ઊચુર્મન્ત્રાઃ પ્રમાણં નો ન વયં પ્રભવસ્ત્વિતિ ॥ ૧૮॥

મન્ત્રા ઊચુસ્સુરા યૂયં મોહોપહતચેતસઃ ।
યેન પ્રથમભાગાર્હં ન યજધ્વં મહેશ્વરમ્ ॥ ૧૯॥

મન્ત્રોક્તા અપિ તે દેવાઃ સર્વે સમ્મૂઢચેતસઃ ।
ભદ્રાય ન દદુર્ભાગં તત્પ્રહાણમભીપ્સવઃ ॥ ૨૦॥

યદા તથ્યં ચ પથ્યં ચ સ્વવાક્યં તદ્વૃથાઽભવત્ ।
તદા તતો યયુર્મન્ત્રા બ્રહ્મલોકં સનાતનમ્ ॥ ૨૧॥

અથોવાચ ગણાધ્યક્ષો દેવાન્ વિષ્ણુપુરોગમાન્ ।
મન્ત્રાઃ પ્રમાણં ન કૃતા યુષ્માભિર્બલગર્વિતૈઃ ॥ ૨૨॥

યસ્માદસ્મિન્ મખે દેવૈરિત્થં વયમસત્કૃતાઃ ।
તસ્માદ્વો જીવિતૈસ્સાર્દ્ધમપનેષ્યામિ ગર્વિતમ્ ॥ ૨૩॥

ઇત્યુક્ત્વા ભગવાન્ ક્રુદ્ધો વ્યદહન્નેત્રવહ્નિના ।
યજ્ઞવાટં મહાકૂટં યથા તિસ્રઃ પુરો હરઃ ॥ ૨૪॥

તતો ગણેશ્વરાઃ સર્વે પર્વતોદગ્રવિગ્રહાઃ ।
યૂપાનુત્પાટ્ય હોતૄણાં કણ્ઠેષ્વાબધ્ય રજ્જુભિઃ ॥ ૨૫॥

યજ્ઞપાત્રાણિ ચિત્રાણિ ભિત્ત્વા સઞ્ચૂર્ણ્ય વારિણિ ।
ગૃહીત્વા ચૈવ યજ્ઞાઙ્ગં ગઙ્ગાસ્રોતસિ ચિક્ષિપુઃ ॥ ૨૬॥

તત્ર દિવ્યાન્નપાનાનાં રાશયઃ પર્વતોપમાઃ ।
ક્ષીરનદ્યોઽમૃતસ્રાવાઃ સુસ્નિગ્ધદધિકર્દમાઃ ॥ ૨૭॥

ઉચ્ચાવચાનિ માંસાનિ ભક્ષ્યાણિ સુરભીણિ ચ ।
રસવન્તિ ચ પાનાનિ લેહ્યચોષ્યાણિ તાનિ વૈ ॥ ૨૮॥

વીરાસ્તદ્ભુઞ્જતે વક્ત્રૈર્વિલુમ્પન્તિ ક્ષિપન્તિ ચ ।
વજ્રૈશ્ચક્રૈર્મહાશૂલૈઃ શક્તિભિઃ પાશપટ્ટિશૈઃ ॥ ૨૯॥

મુસલૈરસિભિષ્ટઙ્કૈર્ભિન્દિપાલૈઃ પરશ્વધૈઃ ।
ઉદ્ધતાંસ્ત્રિદશાન્સર્વાંલ્લોકપાલપુરસ્સરાન્ ॥ ૩૦॥

બિભિદુર્બલિનો વીરા વીરભદ્રાઙ્ગસમ્ભવાઃ ।
છિન્ધિ ભિન્ધિ ક્ષિપ ક્ષિપ્રં માર્યતાં દાર્યતામિતિ ॥ ૩૧॥

હરસ્વ પ્રહરસ્વેતિ પાટયોત્પાટયેતિ ચ ।
સંરમ્ભપ્રભવાઃ ક્રૂરાઃ શબ્દાઃ શ્રવણશઙ્કવઃ ॥ ૩૨॥

યત્ર તત્ર ગણેશાનાં જજ્ઞિરે સમરોચિતાઃ ।
વિવૃત્તનયનાઃ કેચિદ્ દષ્ટદંષ્ટ્રોષ્ઠતાલવઃ ॥ ૩૩॥

આશ્રમસ્થાન્ સમાકૃષ્ય મારયન્તિ તપોધનાન્ ।
સ્રુવાનપહરન્તશ્ચ ક્ષિપન્તોઽગ્નિં જલેષુ ચ ॥ ૩૪॥

કલશાનપિ ભિન્દન્તશ્છિન્દન્તો મણિવેદિકાઃ ।

ગાયન્તશ્ચ નદન્તશ્ચ હસન્તશ્ચ મુહુર્મુહુઃ ।
રક્તાસવં પિબન્તશ્ચ નનૃતુર્ગણપુઙ્ગવાઃ ॥ ૩૫॥

નિર્મથ્ય સેન્દ્રાનમરાન્ ગણેન્દ્રા
વૃષેન્દ્રનાગેન્દ્રમૃગેન્દ્રસારાઃ ।
ચક્રુર્બહૂન્યપ્રતિમભાવાઃ
સહર્ષરોમાણિ વિચેષ્ટિતાનિ ॥ ૩૬॥

નન્દન્તિ કેચિત્પ્રહરન્તિ કેચિત્
ધાવન્તિ કેચિત્પ્રલપન્તિ કેચિત્ ॥ ૩૭॥

નૃત્યન્તિ કેચિદ્વિહસન્તિ કેચિત્
વલ્ગન્તિ કેચિત્પ્રમથા બલેન ॥ ૩૮॥

કેચિજ્જિઘૃક્ષન્તિ ઘનાન્સ તોયાન્
કેચિદ્ગ્રહીતું રવિમુત્પતન્તિ ।
કેચિત્પ્રસર્તું પવનેન સાર્દ્ધ-
મિચ્છન્તિ ભીમાઃ પ્રમથા વિયત્સ્થાઃ ॥ ૩૯॥

આક્ષિપ્ય કેચિચ્ચ વરાયુધાનિ
મહાભુજઙ્ગાનિવ વૈનતેયાઃ ।
ભ્રમન્તિ દેવાનપિ વિદ્રવન્તઃ
ખમણ્ડલે પર્વતકૂટકલ્પાઃ ॥ ૪૦॥

ઉત્પાટ્ય ચોત્પાટ્ય ગૃહાણિ કેચિત્
સજાલવાતાયનવેદિકાનિ ।
વિક્ષિપ્ય વિક્ષિપ્ય જલસ્ય મધ્યે
કાલામ્બુદાભાઃ પ્રમથા નિનેદુઃ ॥ ૪૧॥

ઉદ્વર્તિતદ્વારકપાટકુડ્યં
વિધ્વસ્તશાલાવલભીગવાક્ષમ્ ।
અહો બતાભજ્યત યજ્ઞવાટ-
મનાસ્રવદ્વાક્યમિવાયથાર્થમ્ ॥ ૪૨॥

હા નાથ તાતેતિ પિતુઃ સુતેતિ
ભ્રાતર્મમામ્બેતિ ચ માતુલેતિ ।
ઉત્પાટ્યમાનેષુ ગૃહેષુ નાર્યો હ્યનાથશબ્દાન્બહુશઃ પ્રચક્રુઃ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે યજ્ઞવિધ્વંસનો નામ વિંશોઽધ્યાયઃ ॥ ૭.૧.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૧. એકવિંશોઽધ્યાયઃ । દેવદણ્ડવર્ણનમ્ ।

વાયુરુવાચ ।
તતસ્ત્રિદશમુખ્યાસ્તે વિષ્ણુશક્રપુરોગમાઃ ।
સર્વે ભયપરિત્રસ્તા દુદ્રુવુર્ભયવિહ્વલાઃ ॥ ૧॥

નિર્જૈરદૂષિતૈરઙ્ગૈર્દૃષ્ટ્વા દેવાનુપદ્રુતાન્ ।
દણ્ડ્યાનદણ્ડિતાન્ મત્વા ચુકોપ ગણપુઙ્ગવઃ ॥ ૨॥

તતસ્ત્રિશૂલમાદાય શર્વશક્તિનિબર્હણમ્ ।
ઊર્ધ્વદૃષ્ટિર્મહાબાહુર્મુખાજ્જ્વાલાઃ સમુત્સૃજન્ ॥ ૩॥

અમરાનપિ દુદ્રાવ દ્વિરદાનિવ કેસરી ।
તાનભિદ્રવતસ્તસ્ય ગમનં સુમનોહરમ્ ॥ ૪॥

વારણસ્યેવ મત્તસ્ય જગામ પ્રેક્ષણીયતામ્ ।
તતસ્તત્ક્ષોભયામાસ મહત્સુરબલં બલી ॥ ૫॥

મહાસરોવરં યદ્વન્મત્તો વારણયૂથપઃ ।
વિકુર્વન્બહુધા વર્ણાન્નીલપાણ્ડુરલોહિતાન્ ॥ ૬॥

બિભ્રદ્ વ્યાઘ્રાજિનં વાસો હેમપ્રવરતારકમ્ ।
છિન્દન્ ભિન્દન્નુદન્ ક્લિન્દન્દારયન્પ્રમથન્નપિ ॥ ૭॥

વ્યચરદ્દેવસઙ્ઘેષુ ભદ્રોઽગ્નિરિવ કક્ષગઃ ।
યત્ર તત્ર મહાવેગાચ્ચરન્તં શૂલધારિણમ્ ॥ ૮॥

તમેકં ત્રિદશાઃ સર્વે સહસ્રમિવ મેનિરે ।
ભદ્રકાલી ચ સઙ્ક્રુદ્ધા યુદ્ધવૃદ્ધમદોદ્ધતા ॥ ૯॥

મુક્તજ્વાલેન શૂલેન નિર્બિભેદ રણે સુરાન્ ।
સ તયા રુરુચે ભદ્રો રુદ્રકોપસમુદ્ભવઃ ॥ ૧૦॥

પ્રભયેવ યુગાન્તાગ્નિશ્ચલયા ધૂમધૂમ્રયા ।

ભદ્રકાલી તદા યુદ્ધે વિદ્રુતત્રિદશા બભૌ ॥ ૧૧॥

કલ્પે શેષાનલજ્વાલા દગ્ધાવિશ્વજગદ્યથા ।
તદા સવાજિનં સૂર્યં રુદ્રાન્ રુદ્રગણાગ્રણીઃ ॥ ૧૨॥

ભદ્રો મૂર્ધ્નિ જઘાનાશુ વામપાદેન લીલયા ।
અસિભિઃ પાવકં ભદ્રઃ પટ્ટિશૈસ્તુ યમં યમીમ્ ॥ ૧૩॥

રુદ્રાન્ દૃઢેન શૂલેન મુદ્ગરૈર્વરુણં દૃઢૈઃ ।
પરિઘૈર્નિરૃતિં વાયું ટઙ્કૈષ્ટઙ્કધરઃ સ્વયમ્ ॥ ૧૪॥

નિર્બિભેદ રણે વીરો લીલયૈવ ગણેશ્વરઃ ।
સર્વાન્દેવગણાન્સર્ઘો મુનીન્ શમ્ભોર્વિરોધિનઃ ॥ ૧૫॥

તતો દેવઃ સરસ્વત્યા નાસિકાગ્રં સુશોભનમ્ ।
ચિચ્છેદ કરજાગ્રેણ દેવમાતુસ્તથૈવ ચ ॥ ૧૬॥

ચિચ્છેદ ચ કુઠારેણ બાહુદણ્ડં વિભાવસોઃ ।
અગ્રતો દ્વ્યઙ્ગુલાં જિહ્વામાત્તહવ્યાં લુલાવ ચ ॥ ૧૭॥

સ્વાહાદેવ્યાસ્તથા દેવો દક્ષિણં નાસિકાપુટમ્ ।
ચકર્ત કરજાગ્રેણ વામં ચ સ્તનચૂચુકમ્ ॥ ૧૮॥

ભગસ્ય વિપુલે નેત્રે શતપત્રસમપ્રભે ।
પ્રસહ્યોત્પાટયામાસ ભદ્રઃ પરમવેગવાન્ ॥ ૧૯॥

પૂષ્ણો દશનરેખાં ચ દીપ્તાં મુક્તાવલીમિવ ।
જઘાન ધનુષઃ કોટ્યા સ તેનાસ્પષ્ટવાગભૂત્ ॥ ૨૦॥

તતશ્ચન્દ્રમસં દેવઃ પાદાઙ્ગુષ્ઠેન લીલયા ।
ક્ષણં કૃમિવદાક્રમ્ય ઘર્ષયામાસ ભૂતલે ॥ ૨૧॥

શિરશ્ચિચ્છેદ દક્ષસ્ય ભદ્રઃ પરમકોપતઃ ।
ક્રોશન્ત્યામેવ વૈરિણ્યાં ભદ્રકાલ્યૈ દદૌ ચ તત્ ॥ ૨૨॥

તત્પ્રહૃષ્ટા સમાદાય શિરસ્તાલફલોપમમ્ ।
સા દેવી કન્દુકક્રીડાં ચકાર સમરાઙ્ગણે ॥ ૨૩॥

તતો દક્ષસ્ય યજ્ઞસ્ત્રી કુશીલા ભર્તૃભિર્યથા ।
પાદાભ્યાં ચૈવ હસ્તાભ્યાં હન્યતે સ્મ ગણેશ્વરૈઃ ॥ ૨૪॥

અરિષ્ટનેમિનં સોમં ધર્મં ચૈવ પ્રજાપતિમ્ ।
બહુપુત્રં ચાઙ્ગિરસં કૃશાશ્વં કાશ્યપં તથા ॥ ૨૫॥

ગલે પ્રગૃહ્ય બલિનો ગણપાઃ સિંહવિક્રમાઃ ।
ભર્ત્સયન્તો ભૃશં વાગ્ભિર્નિજઘ્નુર્મૂર્ધ્નિ મુષ્ટિભિઃ ॥ ૨૬॥

ધર્ષિતા ભૂતવેતાલૈર્દારાઃ સુતપરિગ્રહાઃ ।
યથા કલિયુગે જારૈર્બલેન કુલયોષિતઃ ॥ ૨૭॥

તચ્ચ વિધ્વસ્તકલશં ભગ્નયૂપં ગતોત્સવમ્ ।
પ્રદીપિતમહાશાલં પ્રભિન્નદ્વારતોરણમ્ ॥ ૨૮॥

ઉત્પાટિતસુરાનીકં હન્યમાનતપોધનમ્ ।
પ્રશાન્તબ્રહ્મનિર્ઘોષં પ્રક્ષીણજનસઞ્ચયમ્ ॥ ૨૯॥

ક્રન્દમાનાતુરસ્ત્રીકં હતાશેષપરિચ્છદમ્ ।
શૂન્યારણ્યનિભં જજ્ઞે યજ્ઞવાટં તદાર્દિતમ્ ॥ ૩૦॥

શૂલવેગપ્રરુગ્ણાશ્ચ ભિન્નબાહૂરુવક્ષસઃ ।
વિનિકૃત્તોત્તમાઙ્ગાશ્ચ પેતુરુર્વ્યાં સુરોત્તમાઃ ॥ ૩૧॥

હતેષુ તેષુ દેવેષુ પતિતેષુ સહસ્રશઃ ।
પ્રવિવેશ ગણેશાનઃ ક્ષણાદાહવનીયકમ્ ॥ ૩૨॥

પ્રવિષ્ટમથ તં દૃષ્ટ્વા ભદ્રં કાલાગ્નિસન્નિભમ્ ।
દુદ્રાવ મરણાદ્ભીતો યજ્ઞો મૃગવપુર્ધરઃ ॥ ૩૩॥

સ વિસ્ફાર્ય મહચ્ચાપં દૃઢજ્યાઘોષણભીષણમ્ ।
ભદ્રસ્તમભિદુદ્રાવ વિક્ષિપન્નેવ સાયકાન્ ॥ ૩૪॥

આકર્ણપૂર્ણમાકૃષ્ટં ધનુરમ્બુદસન્નિભમ્ ।
નાદયામાસ ચ જ્યાં દ્યાં ખં ચ ભૂમિં ચ સર્વશઃ ॥ ૩૫॥

તમુપશ્રુત્ય સન્નાદં હતોઽસ્મીત્યેવ વિહ્વલમ્ ।
શરેણાર્ધેન વક્રેણ સ વીરોઽધ્વરપૂરુષમ્ ॥ ૩૬॥

મહાભયસ્ખલત્પાદં વેપન્તં વિગતત્વિષમ્ ।
મૃગરૂપેણ ધાવન્તં વિશિરસ્કં તદાકરોત્ ॥ ૩૭॥

તમીદૃશમવજ્ઞાતં દૃષ્ટ્વા વૈ સૂર્યસમ્ભવમ્ ।
વિષ્ણુઃ પરમસઙ્ક્રુદ્ધો યુદ્ધાયાભવદુદ્યતઃ ॥ ૩૮॥

તમુવાહ મહાવેગાત્સ્કન્ધેન નતસન્ધિના ।
સર્વેષાં વયસાં રાજા ગરુડઃ પન્નગાશનઃ ॥ ૩૯॥

દેવાશ્ચ હતશિષ્ટા યે દેવરાજપુરોગમાઃ ।
પ્રચક્રુસ્તસ્ય સાહાય્યં પ્રાણાંસ્ત્યક્તુમિવોદ્યતાઃ ॥ ૪૦॥

વિષ્ણુના સહિતાન્ દેવાન્ મૃગેન્દ્રઃ ક્રોષ્ટુકાનિવ ।
દૃષ્ટ્વા જહાસ ભૂતેન્દ્રો મૃગેન્દ્ર ઇવ વિવ્યથઃ ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે દેવદણ્ડવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૭.૧.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૨. દ્વાવિંશોઽધ્યાયઃ । દક્ષયજ્ઞવિધ્વંસવર્ણનમ્ ।

વાયુરુવાચ
તસ્મિન્નવસરે વ્યોમ્નિ સમાવિરભવદ્રથઃ ।
સહસ્રસૂર્યસઙ્કાશશ્ચારુચીરવૃષધ્વજઃ ॥ ૧॥

અશ્વરત્નદ્વયોદારો રથચક્રચતુષ્ટયઃ ।
સઞ્ચિતાનેકદિવ્યાસ્ત્રશસ્ત્રરત્નપરિષ્કૃતઃ ॥ ૨॥

તસ્યાપિ રથવર્યસ્યાસીત્સ એવ હિ સારથિઃ ।
યશ્ચૈવ ત્રૈપુરે યુદ્ધે પૂર્વં શાર્વરથે સ્થિતઃ ॥ ૩॥

સ તં રથવરં બ્રહ્મા શાસનાદેવ શૂલિનઃ ।
હરેઃ સમીપમાનીય કૃતાઞ્જલિરભાષત ॥ ૪॥

ભગવન્ ભદ્ર ભદ્રાઙ્ગ ભગવાનિન્દુભૂષણઃ ।
આજ્ઞાપયતિ વીરસ્ત્વાં રથમારોઢુમવ્યયઃ ॥ ૫॥

રૈભ્યાશ્રમસમીપસ્થસ્ત્ર્યમ્બકોઽમ્બિકયા સહ ।
સમ્પશ્યતે મહાબાહો દુસ્સહં તે પરાક્રમમ્ ॥ ૬॥

તસ્ય તદ્વચનં શ્રુત્વા સ વીરો ગણકુઞ્જરઃ ।
આરુરોહ રથં દિવ્યમનુગૃહ્ય પિતામહમ્ ॥ ૭॥

તથા રથવરે તસ્મિન્ સ્થિતે બ્રહ્મણિ સારથૌ ।
ભદ્રસ્ય વવૃધે લક્ષ્મી રુદ્રસ્યેવ પુરદ્વિષઃ ॥ ૮॥

તતઃ શઙ્ખવરં દીપ્તં પૂર્ણચન્દ્રસમપ્રભમ્ ।
પ્રદધ્મૌ વદને કૃત્વા ભાનુકમ્પો મહાબલઃ ॥ ૯॥

તસ્ય શઙ્ખસ્ય તં નાદં ભિન્નસાગરસન્નિભમ્ ।
શ્રુત્વા ભયેન દેવાનાં જજ્વાલ જઠરાનલઃ ॥ ૧૦॥

યક્ષવિદ્યાધરાહીન્દ્રૈઃ સિદ્ધૈર્યુદ્ધદિદૃક્ષુભિઃ ।
ક્ષણેન નિબિડીભૂતાઃ સાકાશવિવરા દિશઃ ॥ ૧૧॥

તતઃ શાર્ઙ્ગણ ચાપાઙ્ગાત્સ નારાયણનીરદઃ ।
મહતા બાણવર્ષેણ તુતોદ ગણગોવૃષમ્ ॥ ૧૨॥

તં દૃષ્ટ્વા વિષ્ણુમાયાન્તં શતધા બાણવર્ષિણમ્ ।
સ ચાદદે ધનુર્જૈત્રં ભદ્રો બાણસહસ્રમુક્ ॥ ૧૩॥

સમાદાય ચ તદ્દિવ્યં ધનુઃ સમરભૈરવમ્ ।
શનૈર્વિસ્ફારયામાસ મેરું ધનુરિવેશ્વરઃ ॥ ૧૪॥

તસ્ય વિસ્ફાર્યમાણસ્ય ધનુષોઽભૂન્મહાસ્વનઃ ।
તેન સ્વનેન મહતા પૃથિવીં સમકમ્પયત્ ॥ ૧૫॥

તતઃ શરવરં ઘોરં દીપ્તમાશીવિષોપમમ્ ।
જગ્રાહ ગણપઃ શ્રીમાન્સ્વયમુગ્રપરાક્રમઃ ॥ ૧૬॥

બાણોદ્ધારે ભુજો હ્યસ્ય તૂણીવદનસઙ્ગતઃ ।
પ્રત્યદૃશ્યત વલ્મીકં વિવેક્ષુરિવ પન્નગઃ ॥ ૧૭॥

સમુદ્ધૃતઃ કરે તસ્ય તત્ક્ષણં રુરુચે શરઃ ।
મહાભુજઙ્ગસન્દષ્ટો યથા બાલભુજઙ્ગમઃ ॥ ૧૮॥

શરેણ ઘનતીવ્રેણ ભદ્રો રુદ્રપરાક્રમઃ ।
વિવ્યાધ કુપિતો ગાઢં લલાટે વિષ્ણુમવ્યયમ્ ॥ ૧૯॥

લલાટેઽભિહતો વિષ્ણુઃ પૂર્વમેવાવમાનિતઃ ।
ચુકોપ ગણપેન્દ્રાય મૃગેન્દ્રાયેવ ગોવૃષઃ ॥ ૨૦॥

તતસ્ત્વશનિકલ્પેન ક્રૂરાસ્યેન મહેષુણા ।
વિવ્યાધ ગણરાજસ્ય ભુજે ભુજગસન્નિભે ॥ ૨૧॥

સોઽપિ તસ્ય ભુજે ભૂયઃ સૂર્યાયુતસમપ્રભમ્ ।
વિસસર્જ શરં વેગાદ્વીરભદ્રો મહાબલઃ ॥ ૨૨॥

સ ચ વિષ્ણુઃ પુનર્ભદ્રં ભદ્રો વિષ્ણું તથા પુનઃ ।
સ ચ તં ચ સ તં વિપ્રાઃ શરૈસ્તાવનુજઘ્નતુઃ ॥ ૨૩॥

તયોઃ પરસ્પરં વેગાચ્છરાનાશુ વિમુઞ્ચતોઃ ।
દ્વયોઃ સમભવદ્યુદ્ધં તુમુલં રોમહર્ષણમ્ ॥ ૨૪॥

તદ્દૃષ્ટ્વા તુમુલં યુદ્ધં તયોરેવ પરસ્પરમ્ ।
હાહાકારો મહાનાસીદાકાશે ખેચરેરિતઃ ॥ ૨૫॥

તતસ્ત્વનલતુણ્ડેન શરેણાદિત્યવર્ચસા ।
વિવ્યાધ સુદૃઢં ભદ્રં વિષ્ણોર્મહતિ વક્ષસિ ॥ ૨૬॥

સ તુ તીવ્રપ્રપાતેન શરેણ દૃઢમાહતઃ ।
મહતીં રુજમાસાદ્ય નિપપાત વિમોહિતઃ ॥ ૨૭॥

પુનઃ ક્ષણાદિવોત્થાય લબ્ધસંજ્ઞસ્તદા હરિઃ ।
સર્વાણ્યપિ ચ દિવ્યાસ્ત્રાણ્યથૈનં પ્રત્યવાસૃજત્ ॥ ૨૮॥

સ ચ વિષ્ણુર્ધનુર્મુક્તાન્સર્વાન્ શર્વચમૂપતિઃ ।
સહસા વારયામાસ ઘોરૈઃ પ્રતિશરૈઃ શરાન્ ॥ ૨૯॥

તતો વિષ્ણુઃ સ્વનામાઙ્કં બાણમવ્યાહતં ક્વચિત્ ।
સસર્જ ક્રોધરક્તાક્ષઃ તમુદ્દિશ્ય ગણેશ્વરમ્ ।
તં બાણં બાણવર્યેણ ભદ્રો ભદ્રાહ્વયેણ તુ ॥ ૩૦॥

અપ્રાપ્તમેવ ભગવાન્ ચિચ્છેદ શતધા પથિ ।
અથૈકેનેષુણા શાર્ઙ્ગ દ્વાભ્યાં પક્ષૌ ગરુત્મતઃ ॥ ૩૧॥

નિમેષાદેવ ચિચ્છેદ તદદ્ભુતમિવાભવત્ ।
તતો યોગબલાદ્વિષ્ણુર્દેહાદ્દેવાન્ સુદારુણાન્ ॥ ૩૨॥

શઙ્ખચક્રગદાહસ્તાન્ વિસસર્જ સહસ્રશઃ ।
સર્વાંસ્તાન્ક્ષણમાત્રેણ ત્રૈપુરાનિવ શઙ્કરઃ ॥ ૩૩॥

નિર્દદાહ મહાબાહુર્નેત્રસૃષ્ટેન વહ્નિના ।
તતઃ ક્રુદ્ધતરો વિષ્ણુશ્ચક્રમુદ્યમ્ય સત્વરઃ ॥ ૩૪॥

તસ્મિન્વીરે સમુત્સ્રષ્ટું તદાનીમુદ્યતોઽભવત્ ।
તં દૃષ્ટ્વા ચક્રમુદ્યમ્ય પુરતઃ સમુપસ્થિતમ્ ॥ ૩૫॥

સ્મયન્નિવ ગણેશાનો વ્યષ્ટમ્ભયદયત્નતઃ ।
સ્તમ્ભિતાઙ્ગસ્તુ તચ્ચક્રં ઘોરમપ્રતિમં ક્વચિત્ ॥ ૩૬॥

ઇચ્છન્નપિ સમુત્સ્રષ્ટું ન વિષ્ણુરભવત્ક્ષમઃ ।
શ્વસન્નિવૈકમુદ્ધૃત્ય બાહું ચક્રસમન્વિતમ્ ॥ ૩૭॥

અતિષ્ઠદલસો ભૂત્વા પાષાણામિવ નિશ્ચલઃ ।
વિશરીરો યથા જીવો વિશ‍ૃઙ્ગો વા યથા વૃષઃ ॥ ૩૮॥

વિદંષ્ટ્રશ્ચ યથા સિંહસ્તથા વિષ્ણુરવસ્થિતઃ ।
તં દૃષ્ટ્વા દુર્દશાપન્નં વિષ્ણુમિન્દ્રાદયઃ સુરાઃ ।
સમુન્નદ્ધા ગણેન્દ્રેણ મૃગેન્દ્રેણેવ ગોવૃષાઃ ॥ ૩૯॥

પ્રગૃહીતાયુધા યૌદ્ધું ક્રુદ્ધાઃ સમુપતસ્થિરે ।
તાન્દૃષ્ટ્વા સમરે ભદ્રઃ ક્ષુદ્રાનિવ હરિર્મૃગાન્ ॥ ૪૦॥

સાક્ષાદ્ રુદ્રતનુર્વીરો વરવીરગણાવૃતઃ ।
અટ્ટહાસેન ઘોરેણ વ્યષ્ટમ્ભયદનિન્દિતઃ ॥ ૪૧॥

તથા શતમખસ્યાપિ સવજ્રો દક્ષિણઃ કરઃ ।
સિસૃક્ષોરેવ ઉદ્વજશ્ચિત્રીકૃત ઇવાભવત્ ॥ ૪૨॥

અન્યેષામપિ સર્વેષાં સરક્તા અપિ બાહવઃ ।
અલસાનામિવારમ્ભાસ્તાદૃશાઃ પ્રતિયાન્ત્યુત ॥ ૪૩॥

એવં ભગવતા તેન વ્યાહતાશેષવૈભવાત્ ।
અમરાઃ સમરે તસ્ય પુરતઃ સ્થાતુમક્ષમાઃ ॥ ૪૪॥

સ્તબ્ધૈરવયવૈરેવ દુદ્રુવુર્ભયવિહ્વલાઃ ।
સ્થિતિં ચ ચક્રિરે યુદ્ધે વીરતેજોઽભયાકુલાઃ ॥ ૪૫॥

વિદ્રુતાંસ્ત્રિદશાન્વીરાન્વીરભદ્રો મહાભુજઃ ।
વિવ્યાધ નિશિતૈર્બાણૈર્મેઘો વર્ષૈરિવાચલાન્ ॥ ૪૬॥

બહવસ્તસ્ય વીરસ્ય બાહવઃ પરિઘોપમાઃ ।
શસ્ત્રૈશ્ચકાશિરે દીપ્તૈઃ સાગ્નિજ્વાલા ઇવોરગાઃ ॥ ૪૭॥

અસ્ત્રશસ્ત્રાણ્યનેકાનિ સ વીરો વિસૃજન્બભૌ ।

વિસૃજન્સર્વભૂતાનિ યથાદૌ વિશ્વસમ્ભવઃ ॥ ૪૮॥

યથા રશ્મિભિરાદિત્યઃ પ્રચ્છાદયતિ મેદિનીમ્ ।
તથા વીરઃ ક્ષણાદેવ શરૈઃ પ્રાચ્છાદયદ્દિશઃ ॥ ૪૯॥

ખમણ્ડલે ગણેન્દ્રસ્ય શરાઃ કનકભૂષિતાઃ ।
ઉત્પતન્તસ્તડિદ્રૂપૈરુપમાનપદં યયુઃ ॥ ૫૦॥

મહાન્તસ્તે સુરગણાન્ મણ્ડૂકાનિવ ડુણ્ડુભાઃ ।
પ્રાણૈર્વિયોજયામાસુઃ પપુશ્ચ રુધિરાસવમ્ ॥ ૫૧॥

નિકૃત્તબાહવઃ કેચિત્કેચિલ્લૂનવરાનનાઃ ।
પાર્શ્વે વિદારિતાઃ કેચિન્નિપેતુરમરા ભુવિ ॥ ૫૨॥

વિશિખોન્મથિતૈર્ગાત્રૈર્બહુભિશ્છિન્નસન્ધિભિઃ ।
વિવૃત્તનયનાઃ કેચિન્નિપેતુર્ભૂતલે મૃતાઃ ।
ગાં પ્રવેષ્ટુમિવેચ્છન્તઃ ખં ગન્તુમિવ લિપ્સવઃ ॥ ૫૩॥

અલબ્ધાત્મનિરોધાનાં વ્યલીયન્તઃ પરસ્પરમ્ ।
ભૂમૌ કેચિત્પ્રવિવિશુઃ પર્વતાનાં ગુહાઃ પરે ॥ ૫૪॥

અપરે જગ્મુરાકાશં પરે ચ વિવિશુર્જલમ્ ।
તથા સઞ્છિન્નસર્વાઙ્ગૈઃ સ વીરસ્ત્રિદશૈર્બભૌ ॥ ૫૫॥

પરિગ્રસ્તઃ પ્રજાવર્ગો ભગવાનિવ ભૈરવઃ ।
દગ્ધત્રિપુરસંવ્યૂહસ્ત્રિપુરારિર્યથાઽભવત્ ॥ ૫૬॥

એવં દેવબલં સર્વં દીનં બીભત્સદર્શનમ્ ।
ગણેશ્વરસમુત્પન્નં કૃપણં વપુરાદદે ॥ ૫૭॥

તદા ત્રિદશવીરાણામસૃક્સલિલવાહિની ।
પ્રાવર્તત નદી ઘોરા પ્રાણિનાં ભયશંસિની ॥ ૫૮॥

રુધિરેણ પરિક્લિન્ના યજ્ઞભૂમિસ્તદા બભૌ ।
રક્તાર્દ્રવસના શ્યામા હતશુમ્ભેવ કૈશિકી ॥ ૫૯॥

તસ્મિન્મહતિ સંવૃત્તે સમરે ભૃશદારુણે ।
ભયેનેવ પરિત્રસ્તા પ્રચચાલ વસુન્ધરા ॥ ૬૦॥

મહોર્મિકલિલાવર્તશ્ચુક્ષુભે ચ મહોદધિઃ ।
પેતુશ્ચોલ્કા મહોત્પાતાઃ શાખાશ્ચ મુમુચુર્દ્રુમાઃ ॥ ૬૧॥

અપ્રસન્ના દિશઃ સર્વાઃ પવનશ્ચાશિવો વવૌ ।
અહો વિધિવિપર્યાસસ્ત્વશ્વમેધોઽયમધ્વરઃ ।
યજમાનઃ સ્વયં દક્ષૌ બ્રહ્મપુત્રપ્રજાપતિઃ ॥ ૬૨॥

ધર્માદયઃ સદસ્યાશ્ચ રક્ષતો ગરુડધ્વજઃ ।
ભાગાંશ્ચ પ્રતિગૃહ્ણન્તિ સાક્ષાદિન્દ્રાદયઃ સુરાઃ ॥ ૬૩॥

તથાપિ યજમાનસ્ય યજ્ઞસ્ય ચ સહર્ત્વિજઃ ।
સદ્ય એવ શિરશ્છેદઃ સાધુ સમ્પદ્યતે ફલમ્ ॥ ૬૪॥

તસ્માન્નાવેદનિર્દિષ્ટં ન ચેશ્વરબહિષ્કૃતમ્ ।
નાસત્પરિગૃહીતં ચ કર્મ કુર્યાત્કદાચન ॥ ૬૫॥

કૃત્વાપિ સુમહત્પુણ્યમિષ્ટ્વા યજ્ઞશતૈરપિ ।
ન તત્ફલમવાપ્નોતિ ભક્તિહીનો મહેશ્વરે ॥ ૬૬॥

કૃત્વાપિ સુમહત્પાપં ભક્ત્યા યજતિ યઃ શિવમ્ ।
મુચ્યતે પાતકૈઃ સર્વૈર્નાત્ર કાર્યા વિચારણા ॥ ૬૭॥

બહુનાત્ર કિમુક્તેન વૃથા દાનં વૃથા તપઃ ।
વૃથા યજ્ઞો વૃથા હોમઃ શિવનિન્દારતસ્ય તુ ॥ ૬૮॥

તતઃ સનારાયણકાઃ સરુદ્રાઃ
સલોકપાલાઃ સમરે સુરૌઘાઃ ।
ગણેન્દ્રચાપચ્યુતબાણવિદ્ધાઃ
પ્રદુદ્રુવુર્ગાઢરુજાભિભૂતાઃ ॥ ૬૯॥

ચેલુઃ ક્વચિત્કેચન શીર્ણકેશાઃ
સેદુઃ ક્વચિત્કેચન દીર્ઘગાત્રાઃ ।
પેતુઃ ક્વચિત્કેચન ભિન્નવક્ત્રા
નેશુઃ ક્વચિત્કેચન દેવવીરાઃ ॥ ૭૦॥

કેચિચ્ચ તત્ર ત્રિદશા વિપન્ના
વિસ્રસ્તવસ્ત્રાભરણાસ્ત્રશસ્ત્રાઃ ।
નિપેતુરુદ્ભાસિતદીનમુદ્રા
મદં ચ દર્પં ચ બલં ચ હિત્વા ॥ ૭૧॥

સસ્મુત્પથપ્રસ્થિતમપ્રધૃષ્યો

વિક્ષિપ્ય દક્ષાધ્વરમક્ષતાસ્ત્રૈઃ ।
બભૌ ગણેશઃ સ ગણેશ્વરાણાં
મધ્યે સ્થિતઃ સિંહ ઇવર્ષભાણામ્ ॥ ૭૨॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્ખણ્ડે દક્ષયજ્ઞવિધ્વંસવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૭.૧.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૩. ત્રયોવિંશોઽધ્યાયઃ । ગિરિશાનુનયઃ ।

વાયુરુવાચ ।
ઇતિ સઞ્છિન્નભિન્નાઙ્ગા દેવા વિષ્ણુપુરોગમાઃ ।
ક્ષણાત્કષ્ટાં દશામેત્ય ત્રેસુઃ સ્તોકાવશેષિતાઃ ॥ ૧॥

ત્રસ્તાંસ્તાન્સમરે વીરાન્ દેવાનન્યાંશ્ચ વૈ ગણાઃ ।
પ્રમથાઃ પરમક્રુધ્દા વીરભદ્રપ્રણોદિતાઃ ॥ ૨॥

પ્રગૃહ્ય ચ તથા દોષં નિગડૈરાયસૈર્દૃઢૈઃ ।
બબન્ધુઃ પાણિપાદેષુ કન્ધરેષૂદરેષુ ચ ॥ ૩॥

તસ્મિન્નવસરે બ્રહ્મા ભદ્રમદ્રીન્દ્રજાનુતમ્ ।
સારથ્યાલ્લબ્ધવાત્સલ્યઃ પ્રાર્થયન્ પ્રણતોઽબ્રવીત્ ॥ ૪॥

અલં ક્રોધેન ભગવન્નષ્ટાશ્ચૈતે દિવૌકસઃ ।
પ્રસીદ ક્ષમ્યતાં સર્વં રોમજૈઃ સહ સુવ્રત ॥ ૫॥

એવં વિજ્ઞાપિતસ્તેન બ્રહ્મણા પરમેષ્ઠિના ।
શમં જગામ સમ્પ્રીતો ગણપસ્તસ્ય ગૌરવાત્ ॥ ૬॥

દેવાશ્ચ લબ્ધાવસરા દેવદેવસ્ય મન્ત્રિણઃ ।
ધારયન્તોઽઞ્જલીન્મૂર્ધ્નિ તુષ્ટુવુર્વિવિધૈઃ સ્તવૈઃ ॥ ૭॥

દેવા ઊચુઃ ।
નમઃ શિવાય શાન્તાય યજ્ઞહન્ત્રે ત્રિશૂલિને ।
રુદ્રભદ્રાય રુદ્રાણાં પતયે રુદ્રભૂતયે ॥ ૮॥

કાલાગ્નિરુદ્રરૂપાય કાલકામાઙ્ગહારિણે ।
દેવતાનાં શિરોહન્ત્રે દક્ષસ્ય ચ દુરાત્મનઃ ॥ ૯॥

સંસર્ગાદસ્ય પાપસ્ય દક્ષસ્ય ક્લિષ્ટકર્મણઃ ।
શાસિતાઃ સમરે વીર ત્વયા વયમનિન્દિતાઃ ॥ ૧૦॥

દગ્ધાશ્ચામી વયં સર્વે ત્વત્તો ભીતાશ્ચ ભો પ્રભો ।
ત્વમેવ ગતિરસ્માકં ત્રાહિ નઃ શરણાગતાન્ ॥ ૧૧॥

વાયુરુવાચ ।
તુષ્ટસ્ત્વેવં સ્તુતો દેવાન્ વિસૃજ્ય નિગડાત્પ્રભુઃ ।
આનયદ્દેવદેવસ્ય સમીપમમરાનિહ ॥ ૧૨॥

દેવોઽપિ તત્ર ભગવાનન્તરિક્ષે સ્થિતઃ પ્રભુઃ ।
સગણઃ સર્વગઃ શર્વઃ સર્વલોકમહેશ્વરઃ ॥ ૧૩॥

તં દૃષ્ટ્વા પરમેશાનં દેવા વિષ્ણુપુરોગમાઃ ।
પ્રીતા અપિ ચ ભીતાશ્ચ નમશ્ચક્રુર્મહેશ્વરમ્ ॥ ૧૪॥

દૃષ્ટ્વા તાનમરાન્ભીતાન્પ્રણતાર્તિહરો હરઃ ।
ઇદમાહ મહાદેવઃ પ્રહસન્ પ્રેક્ષ્ય પાર્વતીમ્ ॥ ૧૫॥

મહાદેવ ઉવાચ ।
મા ભૈષ્ટ ત્રિદશાઃ સર્વે યૂયં વૈ મામિકાઃ પ્રજાઃ ।
અનુગ્રહાર્થમેવેહ ધૃતો દણ્ડઃ કૃપાલુના ॥ ૧૬॥

ભવતાં નિર્જ્જરાણાં હિ ક્ષાન્તોઽસ્માભિર્વ્યતિક્રમઃ ।
ક્રુદ્ધેષ્વસ્માસુ યુષ્માકં ન સ્થિતિર્ન ચ જીવિતમ્ ॥ ૧૭॥

વાયુરુવાચ ।
ઇત્યુક્તાસ્ત્રિદશાઃ સર્વે શર્વેણામિતતેજસા ।
સદ્યો વિગતસન્દેહા નનૃતુર્વિબુધા મુદા ॥ ૧૮॥

પ્રસન્નમનસો ભૂત્વાનન્દવિહ્વલમાનસાઃ ।
સ્તુતિમારેભિરે કર્તું શઙ્કરસ્ય દિવૌકસઃ ॥ ૧૯॥

દેવા ઊચુઃ ।
ત્વમેવ દેવાખિલલોકકર્તા
પાતા ચ હર્તા પરમેશ્વરોઽસિ ।

કવિષ્ણુરુદ્રાખ્યસ્વરૂપભેદૈ
રજસ્તમઃ સત્ત્વધૃતાત્મમૂર્ત્તે ॥ ૨૦॥

સર્વમૂર્ત્તે નમસ્તેઽસ્તુ વિશ્વભાવન પાવન ।
અમૂર્ત્તે ભક્તહેતોર્હિ ગૃહીતાકૃતિસૌખ્યદ ॥ ૨૧॥

ચન્દ્રોઽગદો હિ દેવેશ કૃપાતસ્તવ શઙ્કર ।
નિમજ્જનાન્મૃતઃ પ્રાપ સુખં મિહિરજાજલિઃ ॥ ૨૨॥

સીમન્તિની હતધવા તવ પૂજનતઃ પ્રભો ।
સૌભાગ્યમતુલં પ્રાપ સોમવારવ્રતાત્સુતાન્ ॥ ૨૩॥

શ્રીકરાય દદૌ દેવઃ સ્વીયં પદમનુત્તમમ્ ।
સુદર્શનમરક્ષસ્ત્વં નૃપમણ્ડલભીતિતઃ ॥ ૨૪॥

મેદુરં તારયામાસ સદારં ચ ઘૃણાનિધિઃ ।
શારદાં વિધવાં ચક્રે સધવાં ક્રિયયા ભવાન્ ॥ ૨૫॥

ભદ્રાયુષો વિપત્તિં ચ વિચ્છિદ્ય ત્વમદાઃ સુખમ્ ।
સૌમિની ભવબન્ધાદ્વૈ મુક્તાભૂત્તવ સેવનાત્ ॥ ૨૬॥

વિષ્ણુરુવાચ ।
ત્વં શમ્ભો કહરીશાશ્ચ રજસ્સત્ત્વતમોગુણૈઃ ।
કર્તા પાતા તથા હર્તા જનાનુગ્રહકાઙ્ક્ષયા ॥ ૨૭॥

સર્વગર્વાપહારી ચ સર્વતેજોવિલાસકઃ ।
સર્વવિદ્યાદિગૂઢશ્ચ સર્વાનુગ્રહકારકઃ ॥ ૨૮॥

ત્વત્તઃ સર્વં ચ ત્વં સર્વં ત્વયિ સર્વં ગિરીશ્વર ।
ત્રાહિ ત્રાહિ પુનસ્ત્રાહિ કૃપાં કુરુ મમોપરિ ॥ ૨૯॥

અથાસ્મિન્નન્તરે બ્રહ્મા પ્રણિપત્ય કૃતાઞ્જલિઃ ।
એવં ત્વવસરં પ્રાપ્ય વ્યજ્ઞાપયત શૂલિને ॥ ૩૦॥

બ્રહ્મોવાચ ।
જય દેવ મહાદેવ પ્રણતાર્તિવિભઞ્જન ।
ઈદૃશેષ્વપરાધેષુ કોઽન્યસ્ત્વત્તઃ પ્રસીદતિ ॥ ૩૧॥

લબ્ધાત્માનો ભવિષ્યન્તિ યે પુરા નિહતા મૃધે ।
પ્રત્યાપત્તિર્ન કસ્ય સ્યાત્પ્રસન્ને પરમેશ્વરે ॥ ૩૨॥

યદિદં દેવદેવાનાં કૃતમન્તુષુ દૂષણમ્ ।
તદિદં ભૂષણં મન્યે ત અઙ્ગીકારગૌરવાત્ ॥ ૩૩॥

ઇતિ વિજ્ઞાપ્યમાનસ્તુ બ્રહ્મણા પરમેષ્ઠિના ।
વિલોક્ય વદનં દેવ્યા દેવદેવઃ સ્મયન્નિવ ॥ ૩૪॥

પુત્રભૂતસ્ય વાત્સલ્યાદ્ બ્રહ્મણઃ પદ્મજન્મનઃ ।
દેવાદીનાં યથાપૂર્વમઙ્ગાનિ પ્રદદૌ પ્રભુઃ ॥ ૩૫॥

પ્રમથાદ્યૈશ્ચ યા દેવ્યો દણ્ડિતા દેવમાતરઃ ।
તાસામપિ યથાપૂર્વાણ્યઙ્ગાનિ ગિરિશો દદૌ ॥ ૩૬॥

દક્ષસ્ય ભગવાનેવ સ્વયં બ્રહ્મા પિતામહઃ ।
તત્પાપાનુગુણં ચક્રે જરચ્છાગમુખં મુખમ્ ॥ ૩૭॥

સોઽપિ સંજ્ઞાં તતો લબ્ધ્વા સ દૃષ્ટ્વા જીવિતઃ સુધીઃ ।
ભીતઃ કૃતાઞ્જલિઃ શમ્ભું તુષ્ટાવ પ્રલપન્બહુ ॥ ૩૮॥

દક્ષ ઉવાચ ।
જય દેવ જગન્નાથ લોકાનુગ્રહકારક ।
કૃપાં કુરુ મહેશાનાપરાધં મે ક્ષમસ્વ હ ॥ ૩૯॥

કર્ત્તા ભર્ત્તા ચ હર્તા ચ ત્વમેવ જગતાં પ્રભુઃ ।
મયા જ્ઞાતં વિશેષેણ વિષ્ણ્વાદિસકલેશ્વરઃ ॥ ૪૦॥

ત્વયૈવ વિતતં સર્વં વ્યાપ્તં સૃષ્ટં ચ નાશિતમ્ ।
ન હિ ત્વદધિકાઃ કેચિદીશાસ્તેઽચ્યુતકાદયઃ ॥ ૪૧॥

વાયુરુવાચ ।
તં તથા વ્યાકુલં ભીતં પ્રલપન્તં કૃતાગસમ્ ।
સ્મયન્નિવાવદત્પ્રેક્ષ્ય મા ભૈરિતિ ઘૃણાનિધિઃ ॥ ૪૨॥

તથોક્ત્વા બ્રહ્મણસ્તસ્ય પિતુઃ પ્રિયચિકીર્ષયા ।
ગાણપત્યં દદૌ તસ્મૈ દક્ષાયાક્ષયમીશ્વરઃ ॥ ૪૩॥

તતો બ્રહ્માદયો દેવા અભિવન્દ્ય કૃતાઞ્જલિઃ ।
તુષ્ટુવુઃ પ્રશ્રયા વાચા શઙ્કરં ગિરિજાધિપમ્ ॥ ૪૪॥

બ્રહ્માદય ઊચુઃ ।
જય શઙ્કર દેવેશ દીનાનાથ મહાપ્રભો ।

કૃપાં કુરુ મહેશાનાપરાધં નો ક્ષમસ્વ વૈ ॥ ૪૫॥

મખપાલ મખાધીશ મખવિધ્વંસકારક ।
કૃપાં કુરુ મહેશાનાપરાધં નઃ ક્ષમસ્વ વૈ ॥ ૪૬॥

દેવદેવ પરેશાન ભક્તપ્રાણપ્રપોષક ।
દુષ્ટદણ્ડપ્રદઃ સ્વામિન્કૃપાં કુરુ નમોઽસ્તુ તે ॥ ૪૭॥

ત્વં પ્રભો ગર્વહર્તા વૈ દુષ્ટાનાં ત્વામજાનતામ્ ।
રક્ષકો હિ વિશેષેણ સતાં ત્વત્સક્તચેતસામ્ ॥ ૪૮॥

અદ્ભુતં ચરિતં તે હિ નિશ્ચિતં કૃપયા તવ ।
સર્વાપરાધઃ ક્ષન્તવ્યો વિભવો દીનવત્સલાઃ ॥ ૪૯॥

વાયુરુવાચ ।
ઇતિ સ્તુતો મહાદેવો બ્રહ્માદ્યૈરમરૈઃ પ્રભુઃ ।
સ ભક્તવત્સલઃ સ્વામી તુતોષ કરુણોદધિઃ ॥ ૫૦॥

ચકારાનુગ્રહં તેષાં બ્રહ્માદીનાં દિવૌકસામ્ ।
દદૌ વરાંશ્ચ સુપ્રીત્યા શઙ્કરો દીનવત્સલઃ ॥ ૫૧॥

સ ચ તતસ્ત્રિદશાન્ શરણાગતાન્
પરમકારુણિકઃ પરમેશ્વરઃ ।
અનુગતસ્મિતલક્ષણયા ગિરા
શમિતસર્વભયઃ સમભાષત ॥ ૫૨॥

શિવ ઉવાચ ।
યદિદમાગ ઇહાચરિતં સુરૈ-
ર્વિધિનિયોગવશાદિવ યન્ત્રિતૈઃ ।
શરણમેવ ગતાનવલોક્ય વ-
સ્તદખિલં કિલ વિસ્મૃતમેવ નઃ ॥ ૫૩॥

તદિહ યૂયમપિ પ્રકૃતં મન-
સ્યવિગણય્ય વિમર્દમપત્રપાઃ ।
હરિવિરિઞ્ચિસુરેન્દ્રમુખાઃ
સુખં વ્રજત દેવપુરં પ્રતિ સમ્પ્રતિ ॥ ૫૪॥

ઇતિ સુરાનભિધાય સુરેશ્વરો
નિકૃતદક્ષકૃતક્રતુરક્રતુઃ ।

સ ગિરિજાનુચરઃ સપરિચ્છદઃ
સ્થિત ઇવામ્બરતોન્તરધાદ્ધરઃ ॥ ૫૫॥

અથ સુરા અપિ તે વિગતવ્યથાઃ
કથિતભદ્રસુભદ્રપરાક્રમાઃ ।
સપદિ ખેન સુખેન યથાસુખં
યયુરનેકમુખાઃ મઘવન્મુખાઃ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે ગિરિશાનુનયો નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૭.૧.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૪. ચતુર્વિંશોઽધ્યાયઃ । શિવમન્દરગિરિનિવાસક્રીડોક્તિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
અન્તર્ધાનગતો દેવ્યા સહ સાનુચરો હરઃ ।
ક્વ યાતઃ કુત્ર વા વાસઃ કિં કૃત્વા વિરરામ હ ॥ ૧॥

વાયુરુવાચ ।
મહીધરવરઃ શ્રીમાન્ મન્દરશ્ચિત્રકન્દરઃ ।
દયિતો દેવદેવસ્ય નિવાસસ્તપસોઽભવત્ ॥ ૨॥

તપો મહત્કૃતં તેન વોઢું સ્વશિરસા શિવૌ ।
ચિરેણ લબ્ધં તત્પાદપઙ્કજસ્પર્શજં સુખમ્ ॥ ૩॥

તસ્ય શૈલસ્ય સૌન્દર્યં સહસ્રવદનૈરપિ ।
ન શક્યં વિસ્તરાદ્વક્તું વર્ષકોટિશતૈરપિ ॥ ૪॥

શક્યમપ્યસ્ય સૌન્દર્યં ન વર્ણયિતુમુત્સહે ।
પર્વતાન્તરસૌન્દર્યં સાધારણવિધારણાત્ ॥ ૫॥

ઇદં તુ શક્યતે વક્તુમસ્મિન્પર્વતસુન્દરે ।
ઋદ્ધ્યા કયાપિ સૌન્દર્યમીશ્વરાવાસયોગ્યતા ॥ ૬॥

અત એવ હિ દેવેન દેવ્યાઃ પ્રિયચિકીર્ષયા ।
અતીવ રમણીયોઽયં ગિરિરન્તઃપુરીકૃતઃ ॥ ૭॥

મેખલાભૂમયસ્તસ્ય વિમલોપલપાદપાઃ ।
શિવયોર્નિત્યસાન્નિધ્યાચ્ચક્રુર્વન્ત્યખિલં જગત્ ॥ ૮॥

પિતૃભ્યાં જગતો નિત્યં સ્નાનપાનોપયોગતઃ ।
અવાપ્તપુણ્યસંસ્કારઃ પ્રસરદ્ભિરિતસ્તતઃ ॥ ૯॥

લઘુશીતલસંસ્પર્શૈરચ્છાચ્છૈર્નિર્ઝરામ્બુભિઃ ।
અધિરાજ્યેન ચાદ્રીણામદ્રીરેષોઽભિષિચ્યતે ॥ ૧૦॥

નિશાસુ શિખરપ્રાન્તર્વર્તિના સ શિલોચ્ચયઃ ।
ચન્દ્રેણાચલસામ્રાજ્યચ્છત્રેણેવ વિરાજતે ॥ ૧૧॥

સ શૈલશ્ચઞ્ચલીભૂતૈર્બાલૈશ્ચામરયોષિતામ્ ।
સર્વપર્વતસામ્રાજ્યચામરૈરિવ વીજ્યતે ॥ ૧૨॥

પ્રાતરભ્યુદિતે ભાનૌ ભૂધરો રત્નભૂષિતઃ ।
દર્પણે દેહસૌભાગ્યં દ્રષ્ટુકામ ઇવ સ્થિતઃ ॥ ૧૩॥

કૂજદ્વિહઙ્ગવાચાલૈર્વાતોદ્ધૃતલતાભુજૈઃ ।
વિમુક્તપુષ્પૈઃ સતતં વ્યાલમ્બિમૃદુપલ્લવૈઃ ॥ ૧૪॥

લતાપ્રતાનજટિલૈસ્તરુભિસ્તાપસૈરિવ ।
જયાશિષા સહાભ્યર્ચ્ય નિષેવ્યત ઇવાદ્રિરાટ્ ॥ ૧૫॥

અધોમુખૈરૂર્ધ્વમુખૈઃ શ‍ૃઙ્ગૈસ્તિર્યઙ્મુખૈસ્તથા ।
પ્રપતન્નિવ પાતાલે ભૂપૃષ્ઠાદુત્પતન્નિવ ॥ ૧૬॥

પરીતઃ સર્વતો દિક્ષુ ભ્રમન્નિવ વિહાયસિ ।
પશ્યન્નિવ જગત્સર્વં નૃત્યન્નિવ નિરન્તરમ્ ॥ ૧૭॥

ગુહામુખૈઃ પ્રતિદિનં વ્યાત્તાસ્યો વિપુલોદરૈઃ ।
અજીર્ણલાવણ્યતયા જૃમ્ભમાણ ઇવાચલઃ ॥ ૧૮॥

ગ્રસન્નિવ જગત્સર્વં પિબન્નિવ પયોનિધિમ્ ।
વમન્નિવ તમોઽન્તસ્થં માદ્યન્નિવ ખમમ્બુદૈઃ ॥ ૧૯॥

નિવાસભૂમયસ્તાસ્તા દર્પણપ્રતિમોદરાઃ ।
તિરસ્કૃતાતપાઃ સ્નિગ્ધાશ્રમચ્છાયામહીરુહાઃ ॥ ૨૦॥

સરિત્સરસ્તડાગાદિસમ્પર્કશિશિરાનિલાઃ ।
તત્ર તત્ર નિષણ્ણાભ્યાં શિવાભ્યાં સફલીકૃતાઃ ॥ ૨૧॥

તમિમં સર્વતઃ શ્રેષ્ઠં સ્મૃત્વા સામ્બસ્ત્રિયમ્બકઃ ।
રૈભ્યાશ્રમસમીપસ્થશ્ચાન્તર્ધાનં ગતો યયૌ ॥ ૨૨॥

તત્રોદ્યાનમનુપ્રાપ્ય દેવ્યા સહ મહેશ્વરઃ ।
રરામ રમણીયાસુ દેવ્યાન્તઃપુરભૂમિષુ ॥ ૨૩॥

તથા ગતેષુ કાલેષુ પ્રવૃદ્ધાસુ પ્રજાસુ ચ ।
દૈત્યૌ શુમ્ભનિશુમ્ભાખ્યૌ ભ્રાતરૌ સમ્બભૂવતુઃ ॥ ૨૪॥

તાભ્યાં તપોબલાદ્દત્તં બ્રહ્મણા પરમેષ્ઠિના ।
અવધ્યત્વં જગત્યસ્મિન્પુરુષૈરખિલૈરપિ ॥ ૨૫॥

અયોનિજા તુ યા કન્યા હ્યમ્બિકાંશસમુદ્ભવા ।
અજાતપુંસ્પર્શરતિરવિલઙ્ઘ્યપરાક્રમા ॥ ૨૬॥

તયા તુ નૌ વધઃ સઙ્ખ્યે તસ્યાં કામાભિભૂતયોઃ ।
ઇતિ ચાભ્યર્થિતો બ્રહ્મા તાભ્યાં પ્રાહ તથાસ્ત્વિતિ ॥ ૨૭॥

તતઃ પ્રભૃતિ શક્રાદીન્વિજિત્ય સમરે સુરાન્ ।
નિઃસ્વાધ્યાયવષટ્કારં જગચ્ચક્રતુરક્રમાત્ ॥ ૨૮॥

તયોર્વધાય દેવેશં બ્રહ્માભ્યર્થિતવાન્પુનઃ ।
વિનિન્દ્યાપિ રહસ્યમ્બાં ક્રોધયિત્વા યથા તથા ॥ ૨૯॥

તદ્વર્ણકોશજાં શક્તિમકામાં કન્યકાત્મિકામ્ ।
નિશુમ્ભશુમ્ભયોર્હન્ત્રીં સુરેભ્યો દાતુમર્હસિ ॥ ૩૦॥

એવમભ્યર્થિતો ધાત્રા ભગવાન્નીલલોહિતઃ ।
કાલીત્યાહ રહસ્યં વાં નિન્દયન્નિવ સસ્મિતઃ ॥ ૩૧॥

તતઃ ક્રુદ્ધા તદા દેવી સુવર્ણા વર્ણકારણાત્ ।
સ્મયન્તી ચાહ ભર્તારમસમાધેયયા ગિરા ॥ ૩૨॥

દેવ્યુવાચ ।
ઈદૃશે મમ વર્ણેઽસ્મિન્ન રતિર્ભવતોઽસ્તિ ચેત્ ।
એતાવન્તં ચિરં કાલં કથમેષા નિયમ્યતે ॥ ૩૩॥

અરત્યા વર્તમાનોઽપિ કથં ચ રમસે મયા ।
ન હ્યશક્યં જગત્યસ્મિન્નીશ્વરસ્ય જગત્પ્રભોઃ ॥ ૩૪॥

સ્વાત્મારામસ્ય ભવતો રતિર્ન સુખસાધનમ્ ।
ઇતિ હેતોઃ સ્મરો યસ્માત્પ્રસભં ભસ્મસાત્કૃતઃ ॥ ૩૫॥

યા ચ નાભિરતા ભર્તુરપિ સર્વાઙ્ગસુન્દરી ।
સા વૃથૈવ હિ જાયેત સર્વૈરપિ ગુણાન્તરૈઃ ॥ ૩૬॥

ભર્તુર્ભોગૈકશેષો હિ સર્ગ એવૈષ યોષિતામ્ ।
તથાસત્યન્યથા ભૂતા નારી કુત્રોપયુજ્યતે ॥ ૩૭॥

તસ્માદ્વર્ણમિમં ત્યક્ત્વા ત્વયા રહસિ નિન્દિતમ્ ।
વર્ણાન્તરં ભજિષ્યે વા ન ભજિષ્યામિ વા સ્વયમ્ ॥ ૩૮॥

ઇત્યુક્ત્વોત્થાય શયનાદ્દેવી સાચષ્ટ ગદ્ગદમ્ ।
યયાચેઽનુમતિં ભર્તુસ્તપસે કૃતનિશ્ચયા ॥ ૩૯॥

તથા પ્રણયભઙ્ગેન ભીતો ભૂતપતિઃ સ્વયમ્ ।
પાદયોઃ પ્રણમન્નેવ ભવાનીં પ્રત્યભાષત ॥ ૪૦॥

ઈશ્વર ઉવાચ ।
અજાનતી ચ ક્રીડોક્તિં પ્રિયે કિં કુપિતાસિ મે ।
રતિઃ કુતો વા જાયેત ત્વત્તશ્ચેદરતિર્મમ ॥ ૪૧॥

માતા ત્વમસ્ય જગતઃ પિતાહમધિપસ્તથા ।
કથં તદુપપદ્યેત ત્વત્તો નાભિરતિર્મમ ॥ ૪૨॥

આવયોરભિકામોઽપિ કિમસૌ કામકારિતઃ ।
યતઃ કામસમુત્તેઃ પ્રાગેવ જગદુદ્ભવઃ ॥ ૪૩॥

પૃથગ્જનાનાં રતયે કામાત્મા કલ્પિતો મયા ।
તતઃ કથમુપાલબ્ધઃ કામદાહાદહં ત્વયા ॥ ૪૪॥

માં વૈ ત્રિદશસામાન્યં મન્યમાનો મનોભવઃ ।
મનાક્પરિભવં કુર્વન્મયા વૈ ભસ્મસાત્કૃતઃ ॥ ૪૫॥

વિહારોઽપ્યાવયોરસ્ય જગતસ્ત્રાણકારણાત્ ।
તતસ્તદર્થં ત્વય્યદ્ય ક્રીડોક્તિં કૃતવાનહમ્ ॥ ૪૬॥

સ ચાયમચિરાદર્થસ્તવૈવાવિષ્કરિષ્યતે ।
ક્રોધસ્ય જનકં વાક્યં હૃદિ કૃત્વેદમબ્રવીત્ ॥ ૪૭॥

દેવ્યુવાચ ।

શ્રુતપૂર્વં હિ ભગવંસ્તવ ચાટુવચો મયા ।
યેનૈવમતિધીરાહમપિ પ્રાગભિવઞ્ચિતા ॥ ૪૮॥

પ્રાણાનપ્યપ્રિયા ભર્તુર્નારી યા ન પરિત્યજેત્ ।
કુલાઙ્ગના શુભા સદ્ભિઃ કુત્સિતૈવ હિ ગમ્યતે ॥ ૪૯॥

ભૂયસી ચ તવાપ્રીતિરગૌરમિતિ મે વપુઃ ।
ક્રીડોક્તિરપિ કાલીતિ ઘટતે કથમન્યથા ॥ ૫૦॥

સદ્ભિર્વિગર્હિતં તસ્માત્તવ કાષ્ણર્યમસમ્મતમ્ ।
અનુત્સૃજ્ય તપોયોગાત્સ્થાતુમેવેહ નોત્સહે ॥ ૫૧॥

શિવ ઉવાચ ।
યદ્યેવંવિધતાપસ્તે તપસા કિં પ્રયોજનમ્ ।
મમેચ્છયા સ્વેચ્છયા વા વર્ણાન્તરવતી ભવ ॥ ૫૨॥

દેવ્યુવાચ ।
નેચ્છામિ ભવતો વર્ણં સ્વયં વા કર્તુમન્યથા ।
બ્રહ્માણં તપસારાધ્ય ક્ષિપ્રં ગૌરી ભવામ્યહમ્ ॥ ૫૩॥

ઈશ્વર ઉવાચ ।
મત્પ્રસાદાત્પુરા બ્રહ્મા બ્રહ્મત્વં પ્રાપ્તવાન્પુરા ।
તમાહૂય મહાદેવિ તપસા કિં કરિષ્યસિ ॥ ૫૪॥

દેવ્યુવાચ ।
ત્વત્તો લબ્ધપદા એવ સર્વે બ્રહ્માદયઃ સુરાઃ ।
તથાપ્યારાધ્ય તપસા બ્રહ્માણં ત્વન્નિયોગતઃ ॥ ૫૫॥

પુરા કિલ સતી નામ્ના દક્ષસ્ય દુહિતાઽભવમ્ ।
જગતાં પતિમેવ ત્વાં પતિં પ્રાપ્તવતી તથા ॥ ૫૬॥

એવમદ્યાપિ તપસા તોષયિત્વા દ્વિજં વિધિમ્ ।
ગૌરી ભવિતુમિચ્છામિ કો દોષઃ કથ્યતામિહ ॥ ૫૭॥

એવમુક્તો મહાદેવ્યા વામદેવઃ સ્મયન્નિવ ।
ન તાં નિર્બન્ધયામાસ દેવકાર્યચિકીર્ષયા ॥ ૫૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે શિવમન્દરગિરિનિવાસક્રીડોક્તિવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૭.૧.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । દેવીગૌરત્વપ્રાપ્તિઃ ।

વાયુરુવાચ ।
તતઃ પ્રદક્ષિણીકૃત્ય પતિમમ્બા પતિવ્રતા ।
નિયમ્ય ચ વિયોગાર્તિં જગામ હિમવદ્ગિરિમ્ ॥ ૧॥

તપઃ કૃતવતી પૂર્વં દેશે યસ્મિન્સખીજનૈઃ ।
તમેવ દેશમવૃણોત્તપસે પ્રણયાત્પુનઃ ॥ ૨॥

તતઃ સ્વપિતરં દૃષ્ટ્વા માતરં ચ તયોર્ગૃહે ।
પ્રણમ્ય વૃત્તં વિજ્ઞાપ્ય તાભ્યાં ચાનુમતા સતી ॥ ૩॥

પુનસ્તપોવનં ગત્વા ભૂષણાનિ વિસૃજ્ય ચ ।
સ્નાત્વા તપસ્વિનો વેષં કૃત્વા પરમપાવનમ્ ॥ ૪॥

સઙ્કલ્પ્ય ચ મહાતીવ્રં તપઃ પરમદુશ્ચરમ્ ।
સદા મનસિ સન્ધાય ભર્તુશ્ચરણપઙ્કજમ્ ॥ ૫॥

તમેવ ક્ષણિકે લિઙ્ગે ધ્યાત્વા બાહ્યવિધાનતઃ ।
ત્રિસન્ધ્યમભ્યર્ચયન્તી વન્યૈઃ પુષ્પૈઃ ફલાદિભિઃ ॥ ૬॥

સ એવ બ્રહ્મણો મૂર્તિમાસ્થાય તપસઃ ફલમ્ ।
પ્રદાસ્યતિ મમેત્યેવં નિત્યં કૃત્વાઽકરોત્તપઃ ॥ ૭॥

તથા તપશ્ચરન્તીં તાં કાલે બહુતિથે ગતે ।
દૃષ્ટઃ કશ્ચિન્મહાવ્યાઘ્રો દુષ્ટભાવાદુપાગમત્ ॥ ૮॥

તથૈવોપગતસ્યાપિ તસ્યાતીવ દુરાત્મનઃ ।
ગાત્રં ચિત્રાર્પિતમિવ સ્તબ્ધં તસ્યાઃ સકાશતઃ ॥ ૯॥

તં દૃષ્ટ્વાપિ તથા વ્યાઘ્રં દુષ્ટભાવાદુપાગતમ્ ।
ન પૃથગ્જનવદ્દેવી સ્વભાવેન વિવિચ્યતે ॥ ૧૦॥

સ તુ વિષ્ટબ્ધસર્વાઙ્ગો બુભુક્ષાપરિપીડિતઃ ।
મમામિષં તતો નાન્યદિતિ મત્વા નિરન્તરમ્ ॥ ૧૧॥

નિરીક્ષ્યમાણઃ સતતં દેવીમેવ તદાऽનિશમ્ ।
અતિષ્ઠદગ્રતસ્તસ્યા ઉપાસનમિવાચરત્ ॥ ૧૨॥

દેવ્યાશ્ચ હૃદયે નિત્યં મમૈવાયમુપાસકઃ ।
ત્રાતા ચ દુષ્ટસત્ત્વેભ્ય ઇતિ પ્રવવૃતે કૃપા ॥ ૧૩॥

તસ્યા એવ કૃપાયોગાત્સદ્યો નષ્ટમલત્રયઃ ।
બભૂવ સહસા વ્યાઘ્રો દેવીં ચ બુબુધે તદા ॥ ૧૪॥

ન્યવર્તત બુભુક્ષા ચ તસ્યાઙ્ગસ્તમ્ભનં તથા ।
દૌરાત્મ્યં જન્મસિદ્ધં ચ તૃપ્તિશ્ચ સમજાયત ॥ ૧૫॥

તદા પરમભાવેન જ્ઞાત્વા કાર્તાર્થ્યમાત્મનઃ ।
સદ્યોપાસક એવૈષ સિષેવે પરમેશ્વરીમ્ ॥ ૧૬॥

દુષ્ટાનામપિ સત્ત્વાનાં તથાન્યેષાં દુરાત્મનામ્ ।
સ એવ દ્રાવકો ભૂત્વા વિચચાર તપોવને ॥ ૧૭॥

તપશ્ચ વવૃધે દેવ્યાસ્તીવ્રં તીવ્રતરાત્મકમ્ ।
દેવાશ્ચ દૈત્યનિર્બન્ધાદ્ બ્રહ્માણં શરણં ગતાઃ ॥ ૧૮॥

ચક્રુર્નિવેદનં દેવાઃ સ્વદુઃખસ્યારિપીડનાત્ ।
યથા ચ દદતુઃ શુમ્ભનિશુમ્ભૌ વરસમ્મદાત્ ॥ ૧૯॥

સોऽપિ શ્રુત્વા વિધિર્દુઃખં સુરાણાં કૃપયાન્વિતઃ ।
આસીદ્દૈત્યવધાયૈવ સ્મૃત્વા હેત્વાશ્રયાં કથામ્ ॥ ૨૦॥

સામરઃ પ્રાર્થિતો બ્રહ્મા યયૌ દેવ્યાસ્તપોવનમ્ ।
સંસ્મરન્મનસા દેવદુઃખમોક્ષં સ્વયત્નતઃ ॥ ૨૧॥

દદર્શ ચ સુરશ્રેષ્ઠઃ શ્રેષ્ઠે તપસિ નિષ્ઠિતામ્ ।
પ્રતિષ્ઠામિવ વિશ્વસ્ય ભવાનીં પરમેશ્વરીમ્ ॥ ૨૨॥

નનામ ચાસ્ય જગતો માતરં સ્વસ્ય વૈ હરેઃ ।
રુદ્રસ્ય ચ પિતુર્ભાર્યામાર્યામદ્રીશ્વરાત્મજામ્ ॥ ૨૩॥

બ્રહ્માણમાગતં દૃષ્ટ્વા દેવી દેવગણૈઃ સહઃ ।
અર્ઘ્યં તદર્હં દત્ત્વાऽસ્મૈ સ્વાગતાદ્યૈરુપાચરત્ ॥ ૨૪॥

તાં ચ પ્રત્યુપચારોક્તિં પુરસ્કૃત્યાભિનન્દ્ય ચ ।
પપ્રચ્છ તપસો હેતુમજાનન્નિવ પદ્મજઃ ॥ ૨૫॥

બ્રહ્મોવાચ ।
તીવ્રેણ તપસાનેન દેવ્યા કિમિહ સાધ્યતે ।
તપઃફલાનાં સર્વેષાં ત્વદધીના હિ સિદ્ધયઃ ॥ ૨૬॥

યશ્ચૈવ જગતાં ભર્તા તમેવ પરમેશ્વરમ્ ।
ભર્તારમાત્મના પ્રાપ્ય પ્રાપ્તં ચ તપસઃ ફલમ્ ॥ ૨૭॥

અથવા સર્વમેવૈતત્ક્રીડાવિલસિતં તવ ।
ઇદં તુ ચિત્રં દેવસ્ય વિરહં સહસે કથમ્ ॥ ૨૮॥

દેવ્યુવાચ ।
સર્ગાદૌ ભવતો દેવાદુત્પત્તિઃ શ્રૂયતે યદા ।
તદા પ્રજાનાં પ્રથમસ્ત્વં મે પ્રથમજઃ સુતઃ ॥ ૨૯॥

યદા પુનઃ પ્રજાવૃદ્ધ્યૈ લલાટાદ્ભવતો ભવઃ ।
ઉત્પન્નોઽભૂત્તદા ત્વં મે ગુરુઃ શ્વશુરભાવતઃ ॥ ૩૦॥

યદાભવદ્ગિરીન્દ્રસ્તે પુત્રો મમ પિતા સ્વયમ્ ।
તદા પિતામહસ્ત્વં મે જાતો લોકપિતામહ ॥ ૩૧॥

તદીદૃશસ્ય ભવતો લોકયાત્રાવિધાયિનઃ ।
વૃત્તમન્તઃપુરે ભર્ત્રા કથયિષ્યે કથં પુનઃ ॥ ૩૨॥

કિમત્ર બહુના દેહે યશ્ચાયં મમ કાલિમા ।
ત્યક્ત્વા સત્ત્વવિધાનેન ગૌરી ભવિતુમુત્સહે ॥ ૩૩॥

બ્રહ્મોવાચ ।
એતાવતા કિમર્થેન તીવ્રં દેવિ તપઃ કૃતમ્ ।
સ્વેચ્છૈવ કિમપર્યાપ્તા ક્રીડેયં હિ તવેદૃશી ॥ ૩૪॥

ક્રીડાઽપિ ચ જગન્માતસ્તવ લોકહિતાય વૈ ।
અતો મમેષ્ટમનયા ફલં કિમપિ સાધ્યતામ્ ॥ ૩૫॥

નિશુમ્ભશુમ્ભનામાનૌ દૈત્યૌ દત્તવરૌ મયા ।
દૃપ્તૌ દેવાન્પ્રબાધેતે ત્વત્તો લબ્ધસ્તયોર્વધઃ ॥ ૩૬॥

અલં વિલમ્બનેનાત્ર ત્વં ક્ષણેન સ્થિરા ભવ ।
શક્તિર્વિસૃજ્યમાનાદ્ય તયોર્મૃત્યુર્ભવિષ્યતિ ॥ ૩૭॥

બ્રાહ્મણાઽભ્યર્થિતા ચૈવ દેવી ગિરિવરાત્મજા ।
ત્વક્કોશં સહસોત્સૃજ્ય ગૌરી સા સમજાયત ॥ ૩૮॥

સા ત્વક્કોશાત્મનોત્સૃષ્ટા કૌશિકી નામ નામતઃ ।
કાલી કાલામ્બુદપ્રખ્યા કન્યકા સમપદ્યત ॥ ૩૯॥

સા તુ માયાત્મિકા શક્તિર્યોગનિદ્રા ચ વૈષ્ણવી ।
શઙ્ખચક્રત્રિશૂલાદિસાયુધાષ્ટમહાભુજા ॥ ૪૦॥

સૌમ્યા ઘોરા ચ મિશ્રા ચ ત્રિનેત્રા ચન્દ્રશેખરા ।
અજાતપુંસ્પર્શરતિરધૃષ્યા ચાતિસુન્દરી ॥ ૪૧॥

દત્તા ચ બ્રહ્મણે દેવ્યા શક્તિરેષા સનાતની ।
નિશુમ્ભસ્ય ચ શુમ્ભસ્ય નિહન્ત્રી દૈત્યસિંહયોઃ ॥ ૪૨॥

બ્રહ્મણાઽપિ પ્રહૃષ્ટેન તસ્યૈ પરમશક્તયે ।
પ્રબલઃ કેસરી દત્તો વાહનત્વે સમાગતઃ ॥ ૪૩॥

વિન્ધ્યે ચ વસતિં તસ્યાઃ પૂજામાસવપૂર્વકૈઃ ।
માંસૈર્મત્સ્યૈરપૂપૈશ્ચ નિર્વર્ત્યાસૌ સમાદિશત્ ॥ ૪૪॥

સા ચૈવ સમ્મતા શક્તિર્બ્રહ્મણો વિશ્વકર્મણઃ ।
પ્રણમ્ય માતરં ગૌરીં બ્રહ્માણં ચાનુપૂર્વશઃ ॥ ૪૫॥

શક્તિભિશ્ચાપિ તુલ્યાભિઃ સ્વાત્મજાભિરનેકશઃ ।
પરીતા પ્રયયૌ વિન્ધ્યં દૈત્યેન્દ્રૌ હન્તુમુદ્યતા ॥ ૪૬॥

નિહતૌ ચ તયા તત્ર સમરે દૈત્યપુઙ્ગવૌ ।
તદ્બાણૈઃ કામબાણૈશ્ચ ચ્છિન્નભિન્નાઙ્ગમાનસૌ ॥ ૪૭॥

તદ્યુદ્ધવિસ્તરશ્ચાત્ર ન કૃતોઽન્યત્ર વર્ણનાત્ ।
ઊહનીયં પરસ્માચ્ચ પ્રસ્તુતં વર્ણયામિ વઃ ॥ ૪૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે દેવીગૌરત્વપ્રાપ્તિર્નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૭.૧.૨૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૬. ષડ્વિંશોઽધ્યાયઃ । વ્યાઘ્રગતિવર્ણનમ્ ।

વાયુરુવાચ ।
ઉત્પાદ્ય કૌશિકીં ગૌરી બ્રહ્મણે પ્રતિપાદ્ય તામ્ ।
તસ્ય પ્રત્યુપકારાય પિતામહમથાબ્રવીત્ ॥ ૧॥

દેવ્યુવાચ ।
દૃષ્ટઃ કિમેષ ભવતા શાર્દૂલો મદુપાશ્રયઃ ।
અનેન દુષ્ટસત્ત્વેભ્યો રક્ષિતં મત્તપોવનમ્ ॥ ૨॥

મય્યર્પિતમના એષ ભજતે મામનન્યધીઃ ।
અસ્ય સંરક્ષણાદન્યત્પ્રિયં મમ ન વિદ્યતે ॥ ૩॥

ભવિતવ્યમનેનાતો મમાન્તઃપુરચારિણા ।
ગણેશ્વરપદં ચાસ્મૈ પ્રીત્યા દાસ્યતિ શઙ્કરઃ ॥ ૪॥

એનમગ્રેસરં કૃત્વા સખીભિર્ગન્તુમુત્સહે ।
પ્રદીયતામનુજ્ઞા મે પ્રજાનાં પતિના ત્વયા ॥ ૫॥

ઇત્યુક્તઃ પ્રહસન્બ્રહ્મા દેવીં મુગ્ધામિવ સ્મયન્ ।
તસ્ય તીવ્રૈઃ પુરાવૃત્તૈર્દૌરાત્મ્યં સમવર્ણયત્ ॥ ૬॥

બ્રહ્મોવાચ ।
પશૌ દેવિ મૃગાઃ ક્રૂરાઃ ક્વ ચ તેઽનુગ્રહઃ શુભઃ ।
આશીવિષમુખે સાક્ષાદમૃતં કિં નિષિચ્યતે ॥ ૭॥

વ્યાઘ્રમાત્રેણ સન્નેષ દુષ્ટઃ કોઽપિ નિશાચરઃ ।
અનેન ભક્ષિતા ગાવો બ્રાહ્મણાશ્ચ તપોધનાઃ ॥ ૮॥

તર્પયંસ્તાન્ યથાકામં કામરૂપી ચરત્યસૌ ।
અવશ્યં ખલુ ભોક્તવ્યં ફલં પાપસ્ય કર્મણઃ ॥ ૯॥

અતઃ કિં કૃપયા કૃત્યમીદૃશેષુ દુરાત્મસુ ।
અનેન દેવ્યાઃ કિં કૃત્યં પ્રકૃત્યા કલુષાત્મના ॥ ૧૦॥

દેવ્યુવાચ ।
યદુક્તં ભવતા સર્વં તથ્યમસ્ત્વયમીદૃશઃ ।
તથાપિ માં પ્રપન્નોઽભૂન્ન ત્યાજ્યો મામુપાશ્રિતઃ ॥ ૧૧॥

બ્રહ્મોવાચ ।

અસ્ય ભક્તિમવિજ્ઞાય પ્રાગ્વૃત્તં તે નિવેદિતમ્ ।
ભક્તિશ્ચેદસ્ય કિં પાપૈર્ન તે ભક્તઃ પ્રણશ્યતિ ॥ ૧૨॥

પુણ્યકર્માપિ કિં કુર્યાત્ત્વદીયાજ્ઞાનપેક્ષયા ।
અજા પ્રજ્ઞા પુરાણી ચ ત્વમેવ પરમેશ્વરી ॥ ૧૩॥

ત્વદધીના હિ સર્વેષાં બન્ધમોક્ષવ્યવસ્થિતિઃ ।
ત્વદૃતે પરમા શક્તિઃ સંસિદ્ધિઃ કસ્ય કર્મણા ॥ ૧૪॥

ત્વમેવ વિવિધા શક્તિઃ ભવાનામથ વા સ્વયમ્ ।
અશક્તઃ કર્મકરણે કર્તા વા કિં કરિષ્યતિ ॥ ૧૫॥

વિષ્ણોશ્ચ મમ ચાન્યેષાં દેવદાનવરક્ષસામ્ ।
તત્તદૈશ્વર્યસમ્પ્રાપ્ત્યૈ તવૈવાજ્ઞા હિ કારણમ્ ॥ ૧૬॥

અતીતાઃ ખલ્વસઙ્ખ્યાતા બ્રહ્માણો હરયો ભવાઃ ।
અનાગતાસ્ત્વસઙ્ખ્યાતાસ્ત્વદાજ્ઞાનુવિધાયિનઃ ॥ ૧૭॥

ત્વામનારાધ્ય દેવેશિ પુરુષાર્થચતુષ્ટયમ્ ।
લબ્ધું ન શક્યમસ્માભિરપિ સર્વૈઃ સુરોત્તમૈઃ ॥ ૧૮॥

વ્યત્યાસોઽપિ ભવેત્સદ્યો બ્રહ્મત્વસ્થાવરત્વયોઃ ।
સુકૃતં દુષ્કૃતં ચાપિ ત્વયૈવ સ્થાપિતં યતઃ ॥ ૧૯॥

ત્વં હિ સર્વજગદ્ભર્તુઃ શિવસ્ય પરમાત્મનઃ ।
અનાદિમધ્યનિધના શક્તિરાદ્યા સનાતની ॥ ૨૦॥

સમસ્તલોકયાત્રાર્થં મૂર્તિમાવિશ્ય કામપિ ।
ક્રીડસે વિવિધૈર્ભાવૈઃ કસ્ત્વાં જાનાતિ તત્ત્વતઃ ॥ ૨૧॥

અતો દુષ્કૃતકર્માપિ વ્યાઘ્રોઽયં ત્વદનુગ્રહાત્ ।
પ્રાપ્નોતુ પરમાં સિદ્ધિમત્ર કઃ પ્રતિબન્ધકઃ ॥ ૨૨॥

ઇત્યાત્મનઃ પરં ભાવં સ્મારયિત્વાનુરૂપતઃ ।
બ્રહ્મણાભ્યર્થિતા ગૌરી તપસોઽપિ ન્યવર્તત ॥ ૨૩॥

તતો દેવીમનુજ્ઞાપ્ય બ્રહ્મણ્યન્તર્હિતે સતિ ।
દેવીં ચ માતરં દૃષ્ટ્વા મેનાં હિમવતા સહ ॥ ૨૪॥

પ્રણમ્યાશ્વાસ્ય બહુધા પિતરૌ વિરહાસહૌ ।
તપઃ પ્રણયિનો દેવી તપોવનમહીરુહાન્ ॥ ૨૫॥

વિપ્રયોગશુચેવાગ્રે પુષ્પબાષ્પં વિમુઞ્ચતઃ ।
તત્તચ્છાખાસમારૂઢવિહગોદીરિતૈ રુતૈઃ ॥ ૨૬॥

વ્યાકુલં બહુધા દીનં વિલાપમિવ કુર્વતઃ ।
સખીભ્યઃ કથયન્ત્વેવં સત્ત્વરા ભર્તૃદર્શને ॥ ૨૭॥

પુરસ્કૃત્ય ચ તં વ્યાઘ્રં સ્નેહાત્પુત્રમિવૌરસમ્ ।
દેહસ્ય પ્રભયા ચૈવ દીપયન્તી દિશો દશ ॥ ૨૮॥

પ્રયયૌ મન્દરં ગૌરી યત્ર ભર્તા મહેશ્વરઃ ।
સર્વેષાં જગતાં ધાતા કર્તા પાતા વિનાશકૃત્ ॥ ૨૯॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે વ્યાઘ્રગતિવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૭.૧.૨૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૭. સપ્તવિંશોઽધ્યાયઃ । દેવીશિવમિલનવર્ણનમ્ ।

ઋષય ઊચુઃ ।
કૃત્વા ગૌરં વપુર્દિવ્યં દેવી ગિરિવરાત્મજા ।
કથં દદર્શ ભર્તારં પ્રવિષ્ટા મન્દિરં સતી ॥ ૧॥

પ્રવેશસમયે તસ્યા ભવનદ્વારગોચરૈઃ ।
ગણેશૈઃ કિં કૃતં દેવસ્તાં દૃષ્ટ્વા કિં તદાકરોત્ ॥ ૨॥

વાયુરુવાચ ।
પ્રવક્તુમઞ્જસાશક્યઃ તાદૃશઃ પરમો રસઃ ।
યેન પ્રણયગર્ભેણ ભાવો ભાવવતાં હૃતઃ ॥ ૩॥

દ્વાઃસ્થૈઃ સસમ્ભ્રમૈરેવ દેવો દેવ્યાગમોત્સુકઃ ।
શઙ્કમાના પ્રવિષ્ટાન્તસ્તં ચ સા સમપશ્યત ॥ ૪॥

તૈસ્તૈઃ પ્રણયભાવૈશ્ચ ભવનાન્તરવર્તિભિઃ ।
ગણેન્દ્રૈર્વન્દિતા વાચા પ્રણનામ ત્રિયમ્બકમ્ ॥ ૫॥

પ્રણમ્ય નોત્થિતા યાવત્તાવત્તાં પરમેશ્વરઃ ।

પ્રગૃહ્ય દોર્ભ્યામાશ્લિષ્ય પરિતઃ પરયા મુદા ॥ ૬॥

સ્વાઙ્કે ધર્તું પ્રવૃત્તોઽપિ સા પર્યઙ્કે ન્યષીદત ।
પર્યઙ્કતો બલાદ્દેવીં સોઽઙ્કમારોપ્ય સુસ્મિતામ્ ॥ ૭॥

સસ્મિતો વિવૃતૈર્નેત્રૈસ્તદ્વક્ત્રં પ્રપિબન્નિવ ।
તયા સમ્ભાષણાયેશઃ પૂર્વભાષિતમબ્રવીત્ ॥ ૮॥

દેવદેવ ઉવાચ ।
સા દશા ચ વ્યતીતા કિં તવ સર્વાઙ્ગસુન્દરિ ।
યસ્યામનુનયોપાયઃ કોઽપિ કોપાન્ન લભ્યતે ॥ ૯॥

સ્વેચ્છયાપિ ન કાલીતિ નાન્યવર્ણવતીતિ ચ ।
ત્વત્સ્વભાવહૃતં ચિત્તં સુભ્રુ ચિન્તાવહં મમ ॥ ૧૦॥

વિસ્મૃતઃ પરમો ભાવઃ કથં સ્વેચ્છાઙ્ગયોગતઃ ।
ન સમ્ભવન્તિ યે તત્ર ચિત્તકાલુષ્યહેતવઃ ॥ ૧૧॥

પૃથગ્જનવદન્યોઽન્યં વિપ્રિયસ્યાપિ કારણમ્ ।
આવયોરપિ યદ્યસ્તિ નાસ્ત્યેવૈતચ્ચરાચરમ્ ॥ ૧૨॥

અહમગ્નિશિરોનિષ્ઠસ્ત્વં સોમશિરસિ સ્થિતા ।
અગ્નીષોમાત્મકં વિશ્વમાવાભ્યાં સમધિષ્ઠિતમ્ ॥ ૧૩॥

જગદ્ધિતાય ચરતોઃ સ્વેચ્છાધૃતશરીરયોઃ ।
આવયોર્વિપ્રયોગે હિ સ્યાન્નિરાલમ્બનં જગત્ ॥ ૧૪॥

અસ્તિ હેત્વન્તરં ચાત્ર શાસ્ત્રયુક્તિવિનિશ્ચિતમ્ ।
વાગર્થમિવ ચૈવૈતજ્જગત્સ્થાવરજઙ્ગમમ્ ॥ ૧૫॥

ત્વં હિ વાગમૃતં સાક્ષાદહમર્થામૃતં પરમ્ ।
દ્વયમપ્યમૃતં કસ્માદ્વિયુક્તમુપપદ્યતે ॥ ૧૬॥

વિદ્યાપ્રત્યાયિકા ત્વં મે વેદ્યોઽહં પ્રત્યયાત્તવ ।
વિદ્યાવેદ્યાત્મનોરેવ વિશ્લેષઃ કથમાવયોઃ ॥ ૧૭॥

ન કર્મણા સૃજામીદં જગત્પ્રતિસૃજામિ ચ ।
સર્વસ્યાજ્ઞૈકલભ્યત્વાદાજ્ઞાત્વં હિ ગરીયસી ॥ ૧૮॥

આજ્ઞૈકસારમૈશ્વર્યં યસ્માત્સ્વાતન્ત્ર્યલક્ષણમ્ ।
આજ્ઞયા વિપ્રયુક્તસ્ય ચૈશ્વર્યં મમ કીદૃશમ્ ॥ ૧૯॥

ન કદાચિદવસ્થાનમાવયોર્વિપ્રયુક્તયોઃ ।
દેવાનાં કાર્યમુદ્દિશ્ય લીલોક્તિં કૃતવાનહમ્ ॥ ૨૦॥

ત્વયાપ્યવિદિતં નાસ્તિ કથં કુપિતવત્યસિ ।
તતસ્ત્રિલોકરક્ષાર્થે કોપો મય્યપિ તે કૃતઃ ॥ ૨૧॥

યદનર્થાય ભૂતાનાં ન તદસ્તિ ખલુ ત્વયિ ।
ઇતિ પ્રિયંવદે સાક્ષાદીશ્વરે પરમેશ્વરે ॥ ૨૨॥

શ‍ૃઙ્ગારભાવસારાણાં જન્મભૂમિરકૃત્રિમા ।
સ્વભર્ત્રા લલિતં તથ્યમુક્તં મત્વા સ્મિતોત્તરમ્ ॥ ૨૩॥

લજ્જયા ન કિમપ્યૂચે કૌશિકી વર્ણનાત્પરમ્ ।
તદેવ વર્ણયામ્યદ્ય શ‍ૃણુ દેવ્યાશ્ચ વર્ણનમ્ ॥ ૨૪॥

દેવ્યુવાચ ।
કિં દેવેન ન સા દૃષ્ટા યા સૃષ્ટા કૌશિકી મયા ।
તાદૃશી કન્યકા લોકે ન ભૂતા ન ભવિષ્યતિ ॥ ૨૫॥

તસ્યા વીર્યં બલં વિન્ધ્યનિલયં વિજયં તથા ।
શુમ્ભસ્ય ચ નિશુમ્ભસ્ય મારણે ચ રણે તયોઃ ॥ ૨૬॥

પ્રત્યક્ષફલદાનં ચ લોકાય ભજતે સદા ।
લોકાનાં રક્ષણં શશ્વદ્ બ્રહ્મા વિજ્ઞાપયિષ્યતિ ॥ ૨૭॥

ઇતિ સમ્ભાષમાણાયા દેવ્યા એવાજ્ઞયા તદા ।
વ્યાઘ્રઃ સખ્યા સમાનીય પુરોઽવસ્થાપિતસ્તદા ॥ ૨૮॥

તં પ્રેક્ષ્યાહ પુનર્દેવી દેવાનીતમુપાયતમ્ ।
વ્યાઘ્રં પશ્ય ન ચાનેન સદૃશો મદુપાસકઃ ॥ ૨૯॥

અનેન દુષ્ટસઙ્ઘેભ્યો રક્ષિતં મત્તપોવનમ્ ।
અતીવ મમ ભક્તશ્ચ વિશ્રબ્ધશ્ચ સ્વરક્ષણાત્ ॥ ૩૦॥

સ્વદેશં ચ પરિત્યજ્ય પ્રસાદાર્થં સમાગતઃ ।
યદિ પ્રીતિરભૂન્મત્તઃ પરાં પ્રીતિં કરોષિ મે ॥ ૩૧॥

નિત્યમન્તઃપુરદ્વારિ નિયોગાન્નન્દિનઃ સ્વયમ્ ।
રક્ષિભિઃ સહ તચ્ચિહ્નૈર્વર્તતામયમીશ્વર ॥ ૩૨॥

વાયુરુવાચ ।
મધુરં પ્રણયોદર્કં શ્રુત્વા દેવ્યાઃ શુભં વચઃ ।
પ્રીતોઽસ્મીત્યાહ તં દેવઃ સ ચાદૃશ્યત તત્ક્ષણાત્ ॥ ૩૩॥

બિભ્રદ્વેત્રલતાં હૈમીં રત્નચિત્રં ચ કઞ્ચુકમ્ ।
છુરિકામુરગપ્રખ્યાં ગણેશો રક્ષવેષધૃક્ ॥ ૩૪॥

યસ્માત્સોમો મહાદેવો નન્દી ચાનેન નન્દિતઃ ।
સોમનન્દીતિ વિખ્યાતસ્તસ્માદેષ સમાખ્યયા ॥ ૩૫॥

ઇત્થં દેવ્યાઃ પ્રિયં કૃત્વા દેવશ્ચાર્દ્ધેન્દુભૂષણઃ ।
ભૂષયામાસ તં દિવ્યૈર્ભૂષણૈ રત્નભૂષિતૈઃ ॥ ૩૬॥

તતઃ સ ગૌરીં ગિરિશો ગિરીન્દ્રજાં
સગૌરવાં સર્વમનોહરાં હરઃ ।
પર્યઙ્કમારોપ્ય વરાઙ્ગભૂષણૈ-
ર્વિભૂષયામાસ શશાઙ્કભૂષણઃ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે દેવીશિવમિલનવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૭.૧.૨૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । ભસ્મતત્ત્વવર્ણનમ્ ।

ઋષય ઊચુઃ ।
દેવીં સમાદધાનેન દેવેનેદં કિમીરિતમ્ ।
અગ્નિષોમાત્મકં વિશ્વં વાગર્થાત્મકમિત્યપિ ॥ ૧॥

આજ્ઞૈકસારમૈશ્વર્યમાજ્ઞાત્વમિતિ ચોદિતમ્ ।
તદિદં શ્રોતુમિચ્છામો યથાવદનુપૂર્વશઃ ॥ ૨॥

વાયુરુવાચ ।
અગ્નિરિત્યુચ્યતે રૌદ્રી ઘોરા યા તૈજસી તનુઃ ।
સોમઃ શાક્તોઽમૃતમયઃ શક્તેઃ શાન્તિકરી તનુઃ ॥ ૩॥

અમૃતં યત્પ્રતિષ્ઠા સા તેજો વિદ્યા કલા સ્વયમ્ ।
ભૂતસૂક્ષ્મેષુ સર્વેષુ ત એવ રસતેજસી ॥ ૪॥

દ્વિવિધા તેજસો વૃત્તિઃ સૂર્યાત્મા ચાનલાત્મિકા ।
તથૈવ રસવૃત્તિશ્ચ સોમાત્મા ચ જલાત્મિકા ॥ ૫॥

વિદ્યુદાદિમયં તેજો મધુરાદિમયો રસઃ ।
તેજોરસવિભેદૈસ્તુ ધૃતમેતચ્ચરાચરમ્ ॥ ૬॥

અગ્નેરમૃતનિષ્પત્તિરમૃતેનાગ્નિરેધતે ।
અત એવ હિ વિક્રાન્તમગ્નીષોમં જગદ્ધિતમ્ ॥ ૭॥

હવિષે સસ્યસમ્પત્તિર્વૃષ્ટિઃ સસ્યાભિવૃદ્ધયે ।
વૃષ્ટેરેવ હવિસ્તસ્માદગ્નીષોમધૃતં જગત્ ॥ ૮॥

અગ્નિરૂર્ધ્વં જ્વલત્યેષ યાવત્સૌમ્યં પરામૃતમ્ ।
યાવદગ્ન્યાસ્પદં સૌમ્યમમૃતં ચ સ્રવત્યધઃ ॥ ૯॥

અત એવ હિ કાલાગ્નિરધસ્તાચ્છક્તિરૂર્ધ્વતઃ ।
યાવદાદહનં ચોર્ધ્વમધશ્ચાપ્લાવનં ભવેત્ ॥ ૧૦॥

આધારશક્ત્યૈવ ધૃતઃ કાલાગ્નિરયમૂર્ધ્વગઃ ।
તથૈવ નિમ્નગઃ સોમઃ શિવશક્તિપદાસ્પદઃ ॥ ૧૧॥

શિવશ્ચોર્ધ્વમધઃ શક્તિરૂર્ધ્વં શક્તિરધઃ શિવઃ ।
તદિત્થં શિવશક્તિભ્યાં નાવ્યાપ્તમિહ કિઞ્ચન ॥ ૧૨॥

અસકૃચ્ચાગ્નિના દગ્ધં જગદ્યદ્ભસ્મસાત્કૃતમ્ ।
અગ્નેર્વીર્યમિદં ચાહુસ્તદ્વીર્યં ભસ્મ યત્તતઃ ॥ ૧૩॥

યશ્ચેત્થં ભસ્મસદ્ભાવં જ્ઞાત્વા સ્નાતિ ચ ભસ્મના ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈર્બદ્ધઃ પાશાત્પ્રમુચ્યતે ॥ ૧૪॥

અગ્નેર્વીર્યં તુ યદ્ભસ્મ સોમેનાપ્લાવિતં પુનઃ ।
અયોગયુક્ત્યા પ્રકૃતેરધિકારાય કલ્પતે ॥ ૧૫॥

યોગયુક્ત્યા તુ તદ્ભસ્મ પ્લાવ્યમાનં સમન્તતઃ ।
શાક્તેનામૃતવર્ષેણ ચાધિકારાન્નિવર્તયેત્ ॥ ૧૬॥

અતો મૃત્યુઞ્જયાયેત્થમમૃતપ્લાવનં સદા ।
શિવશક્ત્યમૃતસ્પર્શે લબ્ધં યેન કુતો મૃતિઃ ॥ ૧૭॥

યો વેદ દહનં ગુહ્યં પ્લાવનં ચ યથોદિતમ્ ।
અગ્નીષોમપદં હિત્વા ન સ ભૂયોઽભિજાયતે ॥ ૧૮॥

શિવાગ્નિના તનું દગ્ધ્વા શક્તિસૌમ્યામૃતેન યઃ ।
પ્લાવયેદ્યોગમાર્ગેણ સોઽમૃતત્વાય કલ્પતે ॥ ૧૯॥

હૃદિ કૃત્વેમમર્થં વૈ દેવેન સમુદાહૃતમ્ ।
અગ્નીષોમાત્મકં વિશ્વં જગદિત્યનુરૂપતઃ ॥ ૨૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે ભસ્મતત્ત્વવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૭.૧.૨૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૨૯. એકોનત્રિંશોઽધ્યાયઃ । વાગર્થાત્મકતત્ત્વવર્ણનમ્ ।

વાયુરુવાચ ।
નિવેદયામિ જગતો વાગર્થાત્મ્યં કૃતં યથા ।
ષડધ્વવેદનં સમ્યક્ સમાસાન્ન તુ વિસ્તરાત્ ॥ ૧॥

નાસ્તિ કશ્ચિદશબ્દાર્થો નાપિ શબ્દો નિરર્થકઃ ।
તતો હિ સમયે શબ્દઃ સર્વઃ સર્વાર્થબોધકઃ ॥ ૨॥

પ્રકૃતેઃ પરિણામોઽયં દ્વિધા શબ્દાર્થભાવના ।
તામાહુઃ પ્રાકૃતીં મૂર્તિં શિવયોઃ પરમાત્મનોઃ ॥ ૩॥

શબ્દાત્મિકા વિભૂતિર્યા સા ત્રિધા કથ્યતે બુધૈઃ ।
સ્થૂલા સૂક્ષ્મા પરા ચેતિ સ્થૂલા યા શ્રુતિગોચરા ॥ ૪॥

સૂક્ષ્મા ચિન્તામયી પ્રોક્તા ચિન્તયા રહિતા પરા ।
યા શક્તિઃ સા પરા શક્તિઃ શિવતત્ત્વસમાશ્રયા ॥ ૫॥

જ્ઞાનશક્તિસમાયોગાદિચ્છોપોદ્બલિકા તથા ।
સર્વશક્તિસમષ્ટ્યાત્મા શક્તિતત્ત્વસમાખ્યયા ॥ ૬॥

સમસ્તકાર્યજાતસ્ય મૂલપ્રકૃતિતાં ગતા ।
સૈવ કુણ્ડલિની માયા શુદ્ધાધ્વપરમા સતી ॥ ૭॥

સા વિભાગસ્વરૂપૈવ ષડધ્વાત્મા વિજૃમ્ભતે ।
તત્ર શબ્દાસ્ત્રયોઽધ્વાનસ્ત્રયશ્ચાર્થાઃ સમીરિતાઃ ॥ ૮॥

સર્વેષામપિ વૈ પુંસાં નૈજશુદ્ધ્યનુરૂપતઃ ।
લયભોગાધિકારાઃ સ્યુઃ સર્વતત્ત્વવિભાગતઃ ॥ ૯॥

કલાભિસ્તાનિ તત્ત્વાનિ વ્યાપ્તાન્યેવ યથાતથમ્ ।
પરસ્યાઃ પ્રકૃતેરાદૌ પઞ્ચધા પરિણામતઃ ॥ ૧૦॥

કલાશ્ચ તા નિવૃત્ત્યાદ્યાઃ પર્ય્યાપ્તા ઇતિ નિશ્ચયઃ ।
મન્ત્રાધ્વા ચ પદાધ્વા ચ વર્ણાધ્વા ચેતિ શબ્દતઃ ॥ ૧૧॥

ભુવનાધ્વા ચ તત્ત્વાધ્વા કલાધ્વા ચાર્થતઃ ક્રમાત્ ।
અત્રાન્યોઽન્યં ચ સર્વેષાં વ્યાપ્યવ્યાપકતોચ્યતે ॥ ૧૨॥

મન્ત્રાઃ સર્વે પદૈર્વ્યાપ્તા વાક્યભાવાત્પદાનિ ચ ।
વર્ણૈર્વર્ણસમૂહં હિ પદમાહુર્વિપશ્ચિતઃ ॥ ૧૩॥

વર્ણાસ્તુ ભુવનૈર્વ્યાપ્તાસ્તેષાં તેષૂપલમ્ભનાત્ ।
ભુવનાન્યપિ તત્ત્વૌઘૈરુત્પત્ત્યાન્તર્બહિષ્ક્રમાત્ ॥ ૧૪॥

વ્યાપ્તાનિ કારણૈસ્તત્ત્વૈરારબ્ધત્વાદનેકશઃ ।
અન્તરાદુત્થિતાનીહ ભુવનાનિ તુ કાનિચિત્ ॥ ૧૫॥

પૌરાણિકાનિ ચાન્યાનિ વિજ્ઞેયાનિ શિવાગમે ।
સાઙ્ખ્યયોગપ્રસિદ્ધાનિ તત્ત્વાન્યપિ ચ કાનિચિત્ ॥ ૧૬॥

શિવશાસ્ત્રપ્રસિદ્ધાનિ તતોઽન્યાન્યપિ કૃત્સ્નશઃ ।
કલાભિસ્તાનિ તત્ત્વાનિ વ્યાપ્તાન્યેવ યથાતથમ્ ॥ ૧૭॥

પરસ્યાઃ પ્રકૃતેરાદૌ પઞ્ચધા પરિણામતઃ ।
કલાશ્ચ તા નિવૃત્ત્યાદ્યા વ્યાપ્તાઃ પઞ્ચ યથોત્તરમ્ ॥ ૧૮॥

વ્યાપિકાતઃ પરાશક્તિરવિભક્તા ષડધ્વનામ્ ।
પરપ્રકૃતિભાવસ્ય તત્સત્ત્વાચ્છિવતત્ત્વતઃ ॥ ૧૯॥

શક્ત્યાદિ ચ પૃથિવ્યન્તં શિવતત્ત્વસમુદ્ભવમ્ ।
વ્યાપ્તમેકેન તેનૈવ મૃદા કુમ્ભાદિકં યથા ॥ ૨૦॥

શૈવં તત્પરમં ધામ યત્પ્રાપ્યં ષડ્ભિરધ્વભિઃ ।
વ્યાપિકાઽવ્યાપિકા શક્તિઃ પઞ્ચતત્ત્વવિશોધનાત્ ॥ ૨૧॥

નિવૃત્ત્યા રુદ્રપર્યન્તં સ્થિતિરણ્ડસ્ય શોધ્યતે ।
પ્રતિષ્ઠયા તદૂર્ધ્વં તુ યાવદવ્યક્તગોચરમ્ ॥ ૨૨॥

તદૂર્ધ્વં વિદ્યયા મધ્યે યાવદ્વિશ્વેશ્વરાવધિ ।
શાન્ત્યા તદૂર્ધ્વમ્મધ્વાન્તે વિશુદ્ધિઃ શાન્ત્યતીતયા ॥ ૨૩॥

યામાહુઃ પરમં વ્યોમ પરપ્રકૃતિયોગતઃ ।
એતાનિ પઞ્ચતત્ત્વાનિ યૈર્વ્યાપ્તમખિલં જગત્ ॥ ૨૪॥

અત્રૈવ સર્વમેવેદં દ્રષ્ટવ્યં ખલુ સાધકૈઃ ।
અધ્વવ્યાપ્તિમવિજ્ઞાય શુદ્ધિં યઃ કર્તુમિચ્છતિ ॥ ૨૫॥

સ વિપ્રલમ્ભકઃ શુદ્ધેર્નાલં પ્રાપયિતું ફલમ્ ।
વૃથા પરિશ્રમસ્તસ્ય નિરયાયૈવ કેવલમ્ ॥ ૨૬॥

શક્તિપાતસમાયોગાદૃતે તત્ત્વાનિ તત્ત્વતઃ ।
તદ્વ્યાપ્તિસ્તદ્વિવૃદ્ધિશ્ચ જ્ઞાતુમેવં ન શક્યતે ॥ ૨૭॥

શક્તિરાજ્ઞા પરા શૈવી ચિદ્રૂપા પરમેશ્વરી ।
શિવોઽધિતિષ્ઠત્યખિલં યયા કારણભૂતયા ॥ ૨૮॥

નાત્મનો નૈવ માયૈષા ન વિકારો વિચારતઃ ।
ન બન્ધો નાપિ મુક્તિશ્ચ બન્ધમુક્તિવિધાયિની ॥ ૨૯॥

સર્વૈશ્વર્યપરાકાષ્ઠા શિવસ્યાવ્યભિચારિણી ।
સમાનધર્મિણી તસ્ય તૈસ્તૈર્ભાવૈર્વિશેષતઃ ॥ ૩૦॥

સ તયૈવ ગૃહી સાપિ તેનૈવ ગૃહિણી સદા ।
તયોરપત્યં યત્કાર્યં પરપ્રકૃતિજં જગત્ ॥ ૩૧॥

સ કર્તા કારણં સેતિ તયોર્ભેદો વ્યવસ્થિતઃ ।
એક એવ શિવઃ સાક્ષાદ્ દ્વિધાઽસૌ સમવસ્થિતઃ ॥ ૩૨॥

સ્ત્રીપુંસભાવેન તયોર્ભેદ ઇત્યપિ કેચન ।
અપરે તુ પરા શક્તિઃ શિવસ્ય સમવાયિની ॥ ૩૩॥

પ્રભેવ ભાનોશ્ચિદ્રૂપા ભિન્નૈવેતિ વ્યવસ્થિતઃ ।
તસ્માચ્છિવઃ પરો હેતુસ્તસ્યાજ્ઞા પરમેશ્વરી ॥ ૩૪॥

તયૈવ પ્રેરિતા શૈવી મૂલપ્રકૃતિરવ્યયા ।

મહામાયા ચ માયા ચ પ્રકૃતિસ્ત્રિગુણેતિ ચ ॥ ૩૫॥

ત્રિવિધા કાર્યભેદેન સા પ્રસૂતે ષડધ્વનઃ ।
સ વાગર્થમયશ્ચાધ્વા ષડ્વિધો નિખિલં જગત્ ॥ ૩૬॥

અસ્યૈવ વિસ્તરં પ્રાહુઃ શાસ્ત્રજાતમશેષતઃ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે વાગર્થાત્મકતત્ત્વવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૭.૧.૨૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૩૦. ત્રિંશોઽધ્યાયઃ । શિવતત્ત્વપ્રશ્નઃ ।

ઋષય ઊચુઃ ।
ચરિતાનિ વિચિત્રાણિ ગુહ્યાણિ ગહનાનિ ચ ।
દુર્વિજ્ઞેયાનિ દેવૈશ્ચ મોહયન્તિ મનાંસિ નઃ ॥ ૧॥

શિવયોસ્તત્ત્વસમ્બન્ધે ન દોષ ઉપલભ્યતે ।
ચરિતૈઃ પ્રાકૃતો ભાવસ્તયોરપિ વિભાવ્યતે ॥ ૨॥

બ્રહ્માદયોઽપિ લોકાનાં સૃષ્ટિસ્થિત્યન્તહેતવઃ ।
નિગ્રહાનુગ્રહૌ પ્રાપ્ય શિવસ્ય વશવર્તિનઃ ॥ ૩॥

શિવઃ પુનર્ન કસ્યાપિ નિગ્રહાનુગ્રહાસ્પદમ્ ।
અતોઽનાયત્તમૈશ્વર્યં તસ્યૈવેતિ વિનિશ્ચિતમ્ ॥ ૪॥

યદ્યેવમીદૃશૈશ્વર્યં તત્તુ સ્વાતન્ત્ર્યલક્ષણમ્ ।
સ્વભાવસિદ્ધં ચૈતસ્ય મૂર્તિમત્તાસ્પદં ભવેત્ ॥ ૫॥

ન મૂર્તિશ્ચ સ્વતન્ત્રસ્ય ઘટતે મૂલહેતુના ।
મૂર્તેરપિ ચ કાર્યત્વાત્તત્સિદ્ધિઃ સ્યાદહૈતુકી ॥ ૬॥

સર્વત્ર પરમો ભાવોઽપરમશ્ચાન્ય ઉચ્યતે ।
પરમાપરમૌ ભાવૌ કથમેકત્ર સઙ્ગતૌ ॥ ૭॥

નિષ્કલો હિ સ્વભાવોઽસ્ય પરમઃ પરમાત્મનઃ ।
સ એવ સકલઃ કસ્માત્સ્વભાવો હ્યવિપર્યયઃ ॥ ૮॥

સ્વભાવો વિપરીતશ્ચેત્સ્વતન્ત્રઃ સ્વેચ્છયા યદિ ।
ન કરોતિ કિમીશાનો નિત્યાનિત્યવિપર્યયમ્ ॥ ૯॥

મૂર્તાત્મા સકલઃ કશ્ચિત્સ ચાન્યો નિષ્કલઃ શિવઃ ।
શિવેનાધિષ્ઠિતશ્ચેતિ સર્વત્ર લઘુ કથ્યતે ॥ ૧૦॥

મૂર્ત્યાત્મૈવ તદા મૂર્તિઃ શિવસ્યાસ્ય ભવેદિતિ ।
તસ્યાં મૂર્તૌ મૂર્તિમતોઃ પારતન્ત્ર્યં હિ નિશ્ચિતમ્ ॥ ૧૧॥

અન્યથા નિરપેક્ષેણ મૂર્તિઃ સ્વીક્રિયતે કથમ્ ।
મૂર્તિસ્વીકરણં તસ્માન્મૂર્તૌ સાધ્યફલેપ્સયા ॥ ૧૨॥

ન હિ સ્વેચ્છાશરીરત્વં સ્વાતન્ત્ર્યાયોપપદ્યતે ।
સ્વેચ્છૈવ તાદૃશી પુંસાં યસ્માત્કર્માનુસારિણી ॥ ૧૩॥

સ્વીકર્તું સ્વેચ્છયા દેહં હાતું ચ પ્રભવન્ત્યુત ।
બ્રહ્માદયઃ પિશાચાન્તાઃ કિં તે કર્માતિવર્તિનઃ ॥ ૧૪॥

ઇચ્છયા દેહનિર્માણમિન્દ્રજાલોપમં વિદુઃ ।
અણિમાદિગુણૈશ્વર્યવશીકારાનતિક્રમાત્ ॥ ૧૫॥

વિશ્વરૂપં દધદ્વિષ્ણુર્દધીચેન મહર્ષિણા ।
યુધ્યતા સમુપાલબ્ધસ્તદ્રૂપં દધતા સ્વયમ્ ॥ ૧૬॥

સર્વસ્માદધિકસ્યાપિ શિવસ્ય પરમાત્મનઃ ।
શરીરવત્તયાન્યાત્મસાધર્મ્યં પ્રતિભાતિ નઃ ॥ ૧૭॥

સર્વાનુગ્રાહકં પ્રાહુઃ શિવં પરમકારણમ્ ।
સ નિર્ગૃહ્ણાતિ દેવાનાં સર્વાનુગ્રાહકઃ કથમ્ ॥ ૧૮॥

ચિચ્છેદ બહુશો દેવો બ્રહ્મણઃ પઞ્ચમં શિરઃ ।
શિવનિન્દાં પ્રકુર્વન્તં પુત્રેતિ કુમતેર્હઠાત્ ॥ ૧૯॥

વિષ્ણોરપિ નૃસિંહસ્ય રભસા શરભાકૃતિઃ ।
બિભેદ પદ્ભ્યામાક્રમ્ય હૃદયં નખરૈઃ ખરૈઃ ॥ ૨૦॥

દેવસ્ત્રીષુ ચ દેવેષુ દક્ષસ્યાધ્વરકારણાત્ ।
વીરેણ વીરભદ્રેણ ન હિ કશ્ચિદદણ્ડિતઃ ॥ ૨૧॥

પુરત્રયં ચ સસ્ત્રીકં સદૈત્યં સહ બાલકૈઃ ।
ક્ષણેનૈકેન દેવેન નેત્રાગ્નેરિન્ધનીકૃતમ્ ॥ ૨૨॥

પ્રજાનાં રતિહેતુશ્ચ કામો રતિપતિઃ સ્વયમ્ ।
ક્રોશતામેવ દેવાનાં હુતો નેત્રહુતાશને ॥ ૨૩॥

ગાવશ્ચ કશ્ચિદ્દુગ્ધૌઘં સ્રવન્ત્યો મૂર્ધ્નિ ખેચરાઃ ।
સરુષા પ્રેક્ષ્ય દેવેન તત્ક્ષણે ભસ્મસાત્કૃતાઃ ॥ ૨૪॥

જલન્ધરાસુરો દીર્ણશ્ચક્રીકૃત્ય જલં પદા ।
બદ્ધ્વાનન્તેન યો વિષ્ણું ચિક્ષેપ શતયોજનમ્ ॥ ૨૫॥

તમેવ જલસન્ધાયી શૂલેનૈવ જઘાન સઃ ।
તચ્ચક્રં તપસા લબ્ધ્વા લબ્ધવીર્યો હરિઃ સદા ॥ ૨૬॥

જિઘાંસતાં સુરારીણાં કુલં નિર્ઘૃણચેતસામ્ ।
ત્રિશૂલેનાન્ધકસ્યોરઃ શિખિનૈવોપતાપિતમ્ ॥ ૨૭॥

કણ્ઠાત્કાલાઙ્ગનાં સૃષ્ટ્વા દારકોઽપિ નિપાતિતઃ ।
કૌશિકીં જનયિત્વા તુ ગૌર્યાસ્ત્વક્કોશગોચરામ્ ॥ ૨૮॥

શુમ્ભઃ સહ નિશુમ્ભેન પ્રાપિતો મરણં રણે ।
શ્રુતં ચ મહદાખ્યાનં સ્કાન્દે સ્કન્દસમાશ્રયમ્ ॥ ૨૯॥

વધાર્થે તારકાખ્યસ્ય દૈત્યેન્દ્રસ્યેન્દ્રવિદ્વિષઃ ।
બ્રહ્મણાભ્યર્થિતો દેવો મન્દરાન્તઃપુરં ગતઃ ॥ ૩૦॥

વિહૃત્ય સુચિરં દેવ્યા વિહારાતિપ્રસઙ્ગતઃ ।
રસાં રસાતલં નીતામિવ કૃત્વાભિધાં તતઃ ॥ ૩૧॥

દેવીં ચ વઞ્ચયંસ્તસ્યાં સ્વવીર્યમતિદુર્વહમ્ ।
અવિસૃજ્ય વિસૃજ્યાગ્નૌ હવિઃ પૂતમિવામૃતમ્ ॥ ૩૨॥

ગઙ્ગાદિષ્વપિ નિક્ષિપ્ય વહ્નિદ્વારા તદંશતઃ ।
તત્સમાહૃત્ય શનકૈસ્તોકં સ્તોકમિતસ્તતઃ ॥ ૩૩॥

સ્વાહયા કૃત્તિકારૂપાત્સ્વભર્ત્રા રમમાણયા ।
સુવર્ણીભૂતયા ન્યસ્તં મેરૌ શરવણે ક્વચિત્ ॥ ૩૪॥

સન્દીપયિત્વા કાલેન તસ્ય ભાસા દિશો દશ ।
રઞ્જયિત્વા ગિરીન્સર્વાન્ કાઞ્ચનીકૃત્ય મેરુણા ॥ ૩૫॥

તતશ્ચિરેણ કાલેન સઞ્જાતે તત્ર તેજસિ ।

કુમારે સુકુમારાઙ્ગે કુમારાણાં નિદર્શને ॥ ૩૬॥

તચ્છૈશવં સ્વરૂપં ચ તસ્ય દૃષ્ટ્વા મનોહરમ્ ।
સહ દેવાસુરૈર્લોકૈર્વિસ્મિતે ચ વિમોહિતે ॥ ૩૭॥

દેવોઽપિ સ્વયમાયાતઃ પુત્રદર્શનલાલસઃ ।
સહ દેવ્યાકુમારોપ્ય તતોઽસ્ય સ્મેરમાનનમ્ ॥ ૩૮॥

પીતામૃતમિવ સ્નેહવિવશેનાન્તરાત્મના ।
દેવેષ્વપિ ચ પશ્યત્સુ વીતરાગૈસ્તપસ્વિભિઃ ॥ ૩૯॥

સ્વસ્ય વક્ષઃસ્થલે સ્વૈરં નર્તયિત્વા કુમારકમ્ ।
અનુભૂય ચ તત્ક્રીડાં સમ્ભાવ્ય ચ પરસ્પરમ્ ॥ ૪૦॥

સ્તન્યમાજ્ઞાપયન્દેવ્યાઃ પાયયિત્વામૃતોપમમ્ ।
તવાવતારો જગતાં હિતાયેત્યનુશાસ્ય ચ ॥ ૪૧॥

સ્વયં દેવશ્ચ દેવી ચ ન તૃપ્તિમુપજગ્મતુઃ ।
તતઃ શક્રેણ સન્ધાય બિભ્યતા તારકાસુરાત્ ॥ ૪૨॥

કારયિત્વાઽભિષેકં ચ સેનાપત્યે દિવૌકસામ્ ।
પુત્રમન્તરતઃ કૃત્વા દેવેન ત્રિપુરદ્વિષઃ ॥ ૪૩॥

સ્વયમન્તર્હિતેનૈવ સ્કન્દમિન્દ્રાદિરક્ષિતમ્ ।
તચ્છક્ત્યા ક્રૌઞ્ચભેદિન્યા યુધિ કાલાગ્નિકલ્પયા ॥ ૪૪॥

છેદિતં તારકસ્યાપિ શિરઃ શક્રભિયા સહ ।
સ્તુતિં ચક્રુર્વિશેષેણ હરિધાતૃમુખાઃ સુરાઃ ॥ ૪૫॥

તથા રક્ષોઽધિપઃ સાક્ષાદ્રાવણો બલગર્વિતઃ ।
ઉદ્ધરન્સ્વભુજૈર્દીર્ઘૈઃ કૈલાસં ગિરિમાત્મનઃ ॥ ૪૬॥

તદાગોઽસહમાનસ્ય દેવદેવસ્ય શૂલિનઃ ।
પદાઙ્ગુષ્ઠપરિસ્પન્દાન્મમજ્જ મૃદિતો ભુવિ ॥ ૪૭॥

બટોઃ કેનચિદર્થેન સ્વાશ્રિતસ્ય ગતાયુષઃ ।
ત્વરયાગત્ય દેવેન પાદાન્તં ગમિતોઽન્તકઃ ॥ ૪૮॥

સ્વવાહનમવિજ્ઞાય વૃષેન્દ્રં વડવાનલઃ ।
સગલગ્રહમાનીતસ્તતોઽસ્ત્યેકોદકં જગત્ ॥ ૪૯॥

અલોકવિદિતૈસ્તૈસ્તૈર્વૃત્તૈરાનન્દસુન્દરૈઃ ।
અઙ્ગહારક્રમેણેદમસકૃચ્ચાલિતં જગત્ ॥ ૫૦॥

શાન્ત એવ સદા સર્વમનુગૃહ્ણાતિ ચેચ્છિવઃ ।
સર્વાણિ પૂરયેદેવ કથં શક્તેન મોચયેત્ ॥ ૫૧॥

અનાદિકર્મવૈચિત્ર્યમપિ નાત્ર નિયામકમ્ ।
કારણં ખલુ કર્માપિ ભવેદીશ્વરકારિતમ્ ॥ ૫૨॥

કિમત્ર બહુનોક્તેન નાસ્તિક્યં હેતુકારકમ્ ।
યથા હ્યાશુ નિવર્તેત તથા કથય મારુત ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે શિવતત્ત્વપ્રશ્નો નામ ત્રિંશોઽધ્યાયઃ ॥ ૭.૧.૩૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૩૧. એકત્રિંશોઽધ્યાયઃ । જ્ઞાનોપદેશઃ ।

વાયુરુવાચ ।
સ્થને સંશયિતં વિપ્રા ભવદ્ભિર્હેતુચોદિતૈઃ ।
જિજ્ઞાસા હિ ન નાસ્તિક્યં સાધયેત્સાધુબુદ્ધિષુ ॥ ૧॥

પ્રમણમત્ર વક્ષ્યામિ સતાં મોહનિવર્તકમ્ ।
અસતાં ત્વન્યથાભાવઃ પ્રસાદેન વિના પ્રભોઃ ॥ ૨॥

શિવસ્ય પરિપૂર્ણસ્ય પરાનુગ્રહમન્તરા ।
ન કિઞ્ચિદપિ કર્તવ્યમિતિ સાધુ વિનિશ્ચિતમ્ ॥ ૩॥

સ્વભાવ એવ પર્યાપ્તઃ પરાનુગ્રહકર્મણિ ।
અન્યથા નિઃસ્વભાવેન ન કિમપ્યનુગૃહ્યતે ॥ ૪॥

પરં સર્વમનુગ્રાહ્યં પશુપાશાત્મકં જગત્ ।
પરસ્યાનુગ્રહાર્થં તુ પત્યુરાજ્ઞાસમન્વયઃ ॥ ૫॥

પતિરાજ્ઞાપકઃ સર્વમનુગૃહ્ણાતિ સર્વદા ।
તદર્થમર્થસ્વીકારે પરતન્ત્રઃ કથં શિવઃ ॥ ૬॥

અનુગ્રાહ્યાનપેક્ષોઽસ્તિ ન હિ કશ્ચિદનુગ્રહઃ ।

અતઃ સ્વાતન્ત્ર્યશબ્દાર્થાનનપેક્ષત્વલક્ષણઃ ॥ ૭॥

એતત્પુનરનુગ્રાહ્યં પરતન્ત્રં તદિષ્યતે ।
અનુગ્રહાદ્ ઋતે તસ્ય ભુક્તિમુક્ત્યોરનન્વયાત્ ॥ ૮॥

મૂર્તાત્મનોઽપ્યનુગ્રાહ્યા શિવાજ્ઞાનનિવર્તનાત્ ।
અજ્ઞાનાધિષ્ઠિતં શમ્ભોર્ન કિઞ્ચિદિહ વિદ્યતે ॥ ૯॥

યેનોપલભ્યતેઽસ્માભિઃ સકલેનાપિ નિષ્કલઃ ।
સ મૂર્ત્યાત્મા શિવઃ શૈવમૂર્તિરિત્યુપચર્યતે ॥ ૧૦॥

ન હ્યસૌ નિષ્કલઃ સાક્ષાચ્છિવઃ પરમકારણમ્ ।
સાકારેણાનુભાવેન કેનાપ્યનુપલક્ષિતઃ ॥ ૧૧॥

પ્રમાણગમ્યતામાત્રં તત્સ્વભાવોપપાદકમ્ ।
ન તાવતાત્રોપેક્ષાધીરુપલક્ષણમન્તરા ॥ ૧૨॥

આત્મોપમોલ્બણં સાક્ષાન્મૂર્તિરેવ હિ કાચન ।
શિવસ્ય મૂર્તિર્મૂર્ત્યાત્મા પરસ્તસ્યોપલક્ષણમ્ ॥ ૧૩॥

યથા કાષ્ઠેષ્વનારૂઢો ન વહ્નિરુપલભ્યતે ।
એવં શિવોઽપિ મૂર્ત્યાત્મન્યનારૂઢ ઇતિ સ્થિતિઃ ॥ ૧૪॥

યથાગ્નિમાનયેત્યુક્તે જ્વલત્કાષ્ઠાદૃતે સ્વયમ્ ।
નાગ્નિરાનીયતે તદ્વત્પૂજ્યો મૂર્ત્યાત્મના શિવઃ ॥ ૧૫॥

અત એવ હિ પૂજાદૌ મૂર્ત્યાત્મપરિકલ્પનમ્ ।
મૂર્ત્યાત્મનિ કૃતં સાક્ષાચ્છિવ એવ કૃતં યતઃ ॥ ૧૬॥

લિઙ્ગાદાવપિ તત્કૃત્યમર્ચાયાં ચ વિશેષતઃ ।
તત્તન્મૂર્ત્યાત્મભાવેન શિવોઽસ્માભિરુપાસ્યતે ॥ ૧૭॥

યથાનુગૃહ્યતે સોઽપિ મૂર્ત્યાત્મા પારમેષ્ઠિના ।
તથા મૂર્ત્યાત્મનિષ્ઠેન શિવેન પશવો વયમ્ ॥ ૧૮॥

લોકાનુગ્રહણાયૈવ શિવેન પરમેષ્ઠિના ।
સદાશિવાદયઃ સર્વે મૂર્ત્યાત્મનોઽપ્યધિષ્ઠિતાઃ ॥ ૧૯॥

આત્મનામેવ ભોગાય મોક્ષાય ચ વિશેષતઃ ।
તત્ત્વાતત્ત્વસ્વરૂપેષુ મૂર્ત્યાત્મસુ શિવાન્વયઃ ॥ ૨૦॥

ભોગઃ કર્મવિપાકાત્મા સુખદુઃખાત્મકો મતઃ ।
ન ચ કર્મ શિવેઽસ્તીતિ તસ્ય ભોગઃ કિમાત્મકઃ ॥ ૨૧॥

સર્વં શિવોઽનુગૃહ્ણાતિ ન નિગૃહ્ણાતિ કિઞ્ચન ।
નિગૃહ્ણતાં તુ યે દોષાશ્શિવે તેષામસમ્ભવાત્ ॥ ૨૨॥

યે પુનર્નિગ્રહાઃ કેચિદ્ બ્રહ્માદિષુ નિદર્શિતાઃ ।
તેઽપિ લોકહિતાયૈવ કૃતાઃ શ્રીકણ્ઠમૂર્તિના ॥ ૨૩॥

બ્રહ્માણ્ડસ્યાધિપત્યં હિ શ્રીકણ્ઠસ્ય ન સંશયઃ ।
શ્રીકણ્ઠાખ્યાં શિવો મૂર્તિં ક્રીડતીમધિતિષ્ઠતિ ॥ ૨૪॥

સદોષા એવ દેવાદ્યા નિગૃહીતા યથોદિતમ્ ।
તતસ્તેઽપિ વિપાપ્માનઃ પ્રજાશ્ચાપિ ગતજ્વરાઃ ॥ ૨૫॥

નિગ્રહોઽપિ સ્વરૂપેણ વિદુષાં ન જુગુપ્સિતઃ ।
અત એવ હિ દણ્ડ્યેષુ દણ્ડો રાજ્ઞાં પ્રશસ્યતે ॥ ૨૬॥

યત્સિદ્ધિરીશ્વરત્વેન કાર્યવર્ગસ્ય કૃત્સ્નશઃ ।
ન સ ચેદીશતાં કુર્યાજ્જગતઃ કથમીશ્વરઃ ॥ ૨૭॥

ઈશેચ્છા ચ વિધાતૃત્વં વિધેરાજ્ઞાપનં પરમ્ ।
આજ્ઞાવશ્યમિદં કુર્યાન્ન કુર્યાદિતિ શાસનમ્ ॥ ૨૮॥

તચ્છાસનાનુવર્તિત્વં સાધુભાવસ્ય લક્ષણમ્ ।
વિપરીતમસાધોઃ સ્યાન્ન સર્વં તત્તુ દૃશ્યતે ॥ ૨૯॥

સાધુ સંરક્ષણીયં ચેદ્વિનિવર્ત્યમસાધુ યત્ ।
નિવર્તતે ચ સામાદેરન્તે દણ્ડો હિ સાધનમ્ ॥ ૩૦॥

હિતાર્થલક્ષણં ચેદં દણ્ડાન્તમનુશાસનમ્ ।
અતો યદ્વિપરીતં તદહિતં સમ્પ્રચક્ષતે ॥ ૩૧॥

હિતે સદા નિષણ્ણાનામીશ્વરસ્ય નિદર્શનમ્ ।
સ કથં દુષ્યતે સદ્ભિરસતામેવ નિગ્રહાત્ ॥ ૩૨॥

અયુક્તકારિણો લોકે ગર્હણીયા વિવેકિતા ।
યદુદ્વેજયતે લોકં તદયુક્તં પ્રચક્ષતે ॥ ૩૩॥

સર્વોઽપિ નિગ્રહો લોકે ન ચ વિદ્વેષપૂર્વકઃ ।
ન હિ દ્વેષ્ટિ પિતા પુત્રં યો નિગૃહ્યાતિ શિક્ષયેત્ ॥ ૩૪॥

માધ્યસ્થેનાપિ નિગ્રાહ્યાન્યો નિગૃહ્ણાતિ માર્ગતઃ ।
તસ્યાપ્યવશ્યં યત્કિઞ્ચિન્નૈર્ઘૃણ્યમનુવર્તતે ॥ ૩૫॥

અન્યથા ન હિનસ્ત્યેવ સદોષાનપ્યસૌ પરાન્ ।
હિનસ્તિ ચાયમપ્યજ્ઞાન્પરં માધ્યસ્થ્યમાચરન્ ॥ ૩૬॥

તસ્માદ્દુઃખાત્મિકાં હિંસાં કુર્વાણો યઃ સ નિર્ઘૃણઃ ।
ઇતિ નિર્બન્ધયન્ત્યેકે નિયમો નેતિ ચાપરે ॥ ૩૭॥

નિદાનજ્ઞસ્ય ભિષજો રુગ્ણે હિંસાં પ્રયુઞ્જતઃ ।
ન કિઞ્ચિદપિ નૈર્ઘૃણ્યં ઘૃણૈવાત્ર પ્રયોજિકા ॥ ૩૮॥

ઘૃણાપિ ન ગુણાયૈવ હિંસ્રેષુ પ્રતિયોગિષુ ।
તાદૃશેષુ ઘૃણી ભ્રાન્ત્યા ઘૃણાન્તરિતનિર્ઘૃણઃ ॥ ૩૯॥

ઉપેક્ષાપીહ દોષાય રક્ષ્યેષુ પ્રતિયોગિષુ ।
શક્તૌ સત્યામુપેક્ષાતો રક્ષ્યઃ સદ્યો વિપદ્યતે ॥ ૪૦॥

સર્પસ્યાસ્યગતં પશ્યન્ યસ્તુ રક્ષ્યમુપેક્ષતે ।
દોષાભાસાન્સમુત્પ્રેક્ષ્ય ફલતઃ સોઽપિ નિર્ઘૃણઃ ॥ ૪૧॥

તસ્માદ્ ઘૃણા ગુણાયૈવ સર્વથેતિ ન સમ્મતમ્ ।
સમ્મતં પ્રાપ્તકામિત્વં સર્વં ત્વન્યદસમ્મતમ્ ॥ ૪૨॥

મૂર્ત્યાત્મસ્વપિ રાગાદ્યા દોષાઃ સન્ત્યેવ વસ્તુતઃ ।
તથાપિ તેષામેવૈતે ન શિવસ્ય તુ સર્વથા ॥ ૪૩॥

અગ્નાવપિ સમાવિષ્ટં તામ્રં ખલુ સકાલિકમ્ ।
ઇતિ નાગ્નિરસૌ દુષ્યેત્તામ્રસંસર્ગકારણાત્ ॥ ૪૪॥

નાગ્નેરશુચિસંસર્ગાદશુચિત્વમપેક્ષતે ।
અશુચેસ્ત્વગ્નિસંયોગાચ્છુચિત્વમપિ જાયતે ॥ ૪૫॥

એવં શોધ્યાત્મસંસર્ગાન્ન હ્યશુદ્ધઃ શિવો ભવેત્ ।
શિવસંસર્ગતસ્ત્વેષ શોધ્યાત્મૈવ હિ શુદ્ધ્યતિ ॥ ૪૬॥

અયસ્યગ્નૌ સમાવિષ્ટે દાહોઽગ્નેરેવ નાયસઃ ।
મૂર્ત્તાત્મન્યેવમૈશ્વર્યમીશ્વરસ્યૈવ નાત્મનામ્ ॥ ૪૭॥

ન હિ કાષ્ઠં જ્વલત્યૂર્ધ્વમગ્નિરેવ જ્વલત્યસૌ ।

કાષ્ઠસ્યાઙ્ગારતા નાગ્નેરેવમત્રાપિ યોજ્યતામ્ ।
અત એવ જગત્યસ્મિન્કાષ્ઠપાષાણમૃત્સ્વપિ ॥ ૪૮॥

શિવાવેશવશાદેવ શિવત્વમુપચર્યતે ।
મૈત્ર્યાદયો ગુણા ગૌણાસ્તસ્માત્તે ભિન્નવૃત્તયઃ ।
તૈર્ગુણૈરુપરક્તાનાં દોષાય ચ ગુણાય ચ ॥ ૪૯॥

યત્તુ ગૌણમગૌણં ચ તત્સર્વમનુગૃહ્ણતઃ ।
ન ગુણાય ન દોષાય શિવસ્ય ગુણવૃત્તયઃ ॥ ૫૦॥

ન ચાનુગ્રહશબ્દાર્થં ગૌણમાહુર્વિપશ્ચિતઃ ।
સંસારમોચનં કિં તુ શૈવમાજ્ઞામયં હિતમ્ ॥ ૫૧॥

હિતં તદાજ્ઞાકરણં યદ્ધિતં તદનુગ્રહઃ ।
સર્વં હિતે નિયુઞ્જાનઃ સર્વાનુગ્રહકારકઃ ॥ ૫૨॥

યસ્તૂપકારશબ્દાર્થસ્તમપ્યાહુરનુગ્રહમ્ ।
તસ્યાપિ હિતરૂપત્વાચ્છિવઃ સર્વોપકારકઃ ॥ ૫૩॥

હિતે સદા નિયુક્તં તુ સર્વં ચિદચિદાત્મકમ્ ।
સ્વભાવપ્રતિબન્ધં તત્સમં ન લભતે હિતમ્ ॥ ૫૪॥

યથા વિકાસયત્યેવ રવિઃ પદ્માનિ ભાનુભિઃ ।
સમં ન વિકસન્ત્યેવ સ્વસ્વભાવાનુરોધતઃ ॥ ૫૫॥

સ્વભાવોઽપિ હિ ભાવાનાં ભાવિનોઽર્થસ્ય કારણમ્ ।
ન હિ સ્વભાવો નશ્યન્તમર્થં કર્તૃષુ સાધયેત્ ॥ ૫૬॥

સુવર્ણમેવ નાઙ્ગારં દ્રાવયત્યગ્નિસઙ્ગમઃ ।
એવં પક્વમલાનેવ મોચયેન્ન શિવઃ પરાન્ ॥ ૫૭॥

યદ્યથા ભવિતું યોગ્યં તત્તથા ન ભવેત્સ્વયમ્ ।
વિના ભાવનયા કર્તા સ્વતન્ત્રઃ સન્તતો ભવેત્ ॥ ૫૮॥

સ્વભાવવિમલો યદ્વત્સર્વાનુગ્રાહકઃ શિવઃ ।
સ્વભાવમલિનાસ્તદ્વદાત્મનો જીવસંજ્ઞિતાઃ ॥ ૫૯॥

અન્યથા સંસરન્ત્યેતે નિયમાન્ન શિવઃ કથમ્ ।
કર્મમાયાનુબન્ધોઽસ્ય સંસારઃ કથ્યતે બુધૈઃ ॥ ૬૦॥

અનુબન્ધોઽયમસ્યૈવ ન શિવસ્યેતિ હેતુમાન્ ।

સ હેતુરાત્મનામેવ નિજો નાગન્તુકો મલઃ ॥ ૬૧॥

આગન્તુકત્વે કસ્યાપિ ભાવ્યં કેનાપિ હેતુના ।
યોઽયં હેતુરસાવેકસ્ત્વવિચિત્રસ્વભાવતઃ ॥ ૬૨॥

આત્મતાયાઃ સમત્વેઽપિ બદ્ધા મુક્તાઃ પરે યતઃ ।
બદ્ધેષ્વેવ પુનઃ કેચિલ્લયભોગાધિકારતઃ ॥ ૬૩॥

જ્ઞાનૈશ્વર્યાદિવૈષમ્યં ભજન્તે સોત્તરાધરાઃ ।
કેચિન્મૂર્ત્યાત્મતાં યાન્તિ કેચિદાસન્નગોચરાઃ ॥ ૬૪॥

મૂર્ત્યાત્મસુ શિવાઃ કેચિદધ્વનાં મૂર્દ્ધસુ સ્થિતાઃ ।
મધ્યે મહેશ્વરા રુદ્રાસ્ત્વર્વાચીનપદે સ્થિતાઃ ॥ ૬૫॥

આસન્નેઽપિ ચ માયાયાઃ પરસ્માત્કારણાત્ત્રયમ્ ।
તત્રાપ્યાત્મા સ્થિતોઽધસ્તાદન્તરાત્મા ચ મધ્યતઃ ॥ ૬૬॥

પરસ્તાત્પરમાત્મેતિ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
વર્તન્તે વસવઃ કેચિત્પરમાત્મપદાશ્રયાઃ ॥ ૬૭॥

અન્તરાત્મપદે કેચિત્કેચિદાત્મપદે તથા ।
શાન્ત્યતીતપદે શૈવાઃ શાન્તે માહેશ્વરે તતઃ ॥ ૬૮॥

વિદ્યાયાં તુ યથા રૌદ્રાઃ પ્રતિષ્ઠાયાં તુ વૈષ્ણવાઃ ।
નિવૃત્તૌ ચ તથાત્માનો બ્રહ્મા બ્રહ્માઙ્ગયોનયઃ ॥ ૬૯॥

દેવયોન્યષ્ટકં મુખ્યં માનુષ્યમથ મધ્યમમ્ ।
પક્ષ્યાદયોઽધમાઃ પઞ્ચ યોનયસ્તાશ્ચતુર્દશ ॥ ૭૦॥

ઉત્તરાધરભાવોઽપિ જ્ઞેયઃ સંસારિણો મલઃ ।
યથાઽઽમભાવો મુક્તસ્ય પૂર્વં પશ્ચાત્તુ પક્વતા ॥ ૭૧॥

મલોઽપ્યામશ્ચ પક્વશ્ચ ભવેત્સંસારકારણમ્ ।
આમે ત્વધરતા પુંસાં પક્વે તૂત્તરતા ક્રમાત્ ॥ ૭૨॥

પશ્વાત્માનસ્ત્રિધા ભિન્ના એકદ્વિત્રિમલાઃ ક્રમાત્ ।
અત્રોત્તરા એકમલા દ્વિમલા મધ્યમા મતાઃ ।
ત્રિમલાસ્ત્વધમા જ્ઞેયા યથોત્તરમધિષ્ઠિતાઃ ॥ ૭૩॥

ત્રિમલાનધિતિષ્ઠન્તિ દ્વિમલૈકમલાઃ ક્રમાત્ ।
ઇત્થમૌપાધિકો ભેદો વિશ્વસ્ય પરિકલ્પિતઃ ॥ ૭૪॥

એકદ્વિત્રિમલાન્સર્વાઞ્છિવ એકોऽધિતિષ્ઠતિ ।
અશિવાત્મકમપ્યેતચ્છિવેનાધિષ્ઠિતં યથા ॥ ૭૫॥

અરુદ્રાત્મકમિત્યેવં રુદ્રૈર્જગદધિષ્ઠિતમ્ ।
અણ્ડાન્તા હિ મહાભૂમિઃ શતરુદ્રાદ્યધિષ્ઠિતા ॥ ૭૬॥

માયાન્તમન્તરિક્ષં તુ હ્યમરેશાદિભિઃ ક્રમાત્ ।
અઙ્ગુષ્ઠમાત્રપર્યન્તૈઃ સમન્તાત્સન્તતં તતમ્ ॥ ૭૭॥

મહામાયાવસાના દ્યૌર્વાય્વાદ્યૈર્ભુવનાધિપૈઃ ।
અનાશ્રિતાન્તૈરધ્વાન્તર્વર્ત્તિભિઃ સમધિષ્ઠિતાઃ ॥ ૭૮॥

તે હિ સાક્ષાદ્દિવિષદસ્ત્વન્તરિક્ષસદસ્તથા ।
પૃથિવીપદ ઇત્યેવં દેવા દેવવ્રતૈઃ સ્તુતાઃ ॥ ૭૯॥

એવં ત્રિભિર્મલૈરામૈઃ પક્વૈરેવ પૃથક્પૃથક્ ।
નિદાનભૂતૈઃ સંસારરોગઃ પુંસાં પ્રવર્તતે ॥ ૮૦॥

અસ્ય રોગસ્ય ભૈષજ્યં જ્ઞાનમેવ ન ચાપરમ્ ।
ભિષગાજ્ઞાપકઃ શમ્ભુઃ શિવઃ પરમકારણમ્ ॥ ૮૧॥

અદુઃખેનાऽપિ શક્તોऽસૌ પશૂન્મોચયિતું શિવઃ ।
કથં દુઃખં કરોતીતિ નાત્ર કાર્યા વિચારણા ॥ ૮૨॥

દુઃખમેવ હિ સર્વોऽપિ સંસાર ઇતિ નિશ્ચિતમ્ ।
કથં દુઃખમદુઃખં સ્યાત્સ્વભાવો હ્યવિપર્યયઃ ॥ ૮૩॥

ન હિ રોગી હ્યરોગી સ્યાદ્ભિષગ્ભૈષજ્યકારણાત્ ।
રોગાર્તં તુ ભિષગ્રોગાદ્ભૈષજૈઃ સુખમુદ્ધરેત્ ॥ ૮૪॥

એવં સ્વભાવમલિનાન્સ્વભાવાદ્દુઃખિનઃ પશૂન્ ।
સ્વાજ્ઞૌષધવિધાનેન દુઃખાન્મોચયતે શિવઃ ॥ ૮૫॥

ન ભિષક્ કારણં રોગે શિવઃ સંસારકારણમ્ ।
ઇત્યેતદપિ વૈષમ્યં ન દોષાયાસ્ય કલ્પતે ॥ ૮૬॥

દુઃખે સ્વભાવસંસિદ્ધે કથં તત્કારણં શિવઃ ।
સ્વાભાવિકો મલઃ પુંસાં સ હિ સંસારયત્યમૂન્ ॥ ૮૭॥

સંસારકારણં યત્તુ મલં માયાદ્યચેતનમ્ ।

તત્સ્વયં ન પ્રવર્તેત શિવસાન્નિધ્યમન્તરા ॥ ૮૮॥

યથા મણિરયસ્કાન્તઃ સાન્નિધ્યાદુપકારકઃ ।
અયસશ્ચલતસ્તદ્વચ્છિવોઽપ્યસ્યેતિ સૂરયઃ ॥ ૮૯॥

ન નિવર્તયિતું શક્યં સાન્નિધ્યં સદકારણમ્ ।
અધિષ્ઠાતા તતો નિત્યમજ્ઞાતો જગતઃ શિવઃ ॥ ૯૦॥

ન શિવેન વિના કિઞ્ચિત્પ્રવૃત્તમિહ વિદ્યતે ।
તત્પ્રેરિતમિદં સર્વં તથાપિ ન સ મુહ્યતિ ॥ ૯૧॥

શક્તિરાજ્ઞાત્મિકા તસ્ય નિયન્ત્રી વિશ્વતોમુખી ।
તયા તતમિદં શશ્વત્તથાપિ સ ન દુષ્યતિ ॥ ૯૨॥

અનિદં પ્રથમં સર્વમીશિતવ્યં સ ઈશ્વરઃ ।
ઈશનાચ્ચ તદીયાજ્ઞા તથાપિ સ ન દુષ્યતિ ॥ ૯૩॥

યોઽન્યથા મન્યતે મોહાત્સ વિનશ્યતિ દુર્મતિઃ ।
તચ્છક્તિવૈભવાદેવ તથાપિ સ ન દુષ્યતિ ॥ ૯૪॥

એતસ્મિન્નન્તરે વ્યોમ્નઃ શ્રુતા વાગશરીરિણી ।
સત્યમોમમૃતં સૌમ્યમિત્યાવિરભવત્સ્ફુટમ્ ॥ ૯૫॥

તતો હૃષ્ટતરાઃ સર્વે વિનષ્ટાશેષસંશયાઃ ।
મુનયો વિસ્મયાવિષ્ટાઃ પ્રણેમુઃ પવનં પ્રભુમ્ ॥ ૯૬॥

તથા વિગતસન્દેહાન્કૃત્વાપિ પવનો મુનીન્ ।
નૈતે પ્રતિષ્ઠિતજ્ઞાના ઇતિ મત્વૈવમબ્રવીત્ ॥ ૯૭॥

વાયુરુવાચ
પરોક્ષમપરોક્ષં ચ દ્વિવિધં જ્ઞાનમિષ્યતે ।
પરોક્ષમસ્થિરં પ્રાહુરપરોક્ષં તુ સુસ્થિરમ્ ॥ ૯૮॥

હેતૂપદેશગમ્યં યત્તત્પરોક્ષં પ્રચક્ષતે ।
અપરોક્ષં પુનઃ શ્રેષ્ઠાદનુષ્ઠાનાદ્ભવિષ્યતિ ॥ ૯૯॥

નાપરોક્ષાદૃતે મોક્ષ ઇતિ કૃત્વા વિનિશ્ચયમ્ ।
શ્રેષ્ઠાનુષ્ઠાનસિદ્ધ્યર્થં પ્રયતધ્વમતન્દ્રિતાઃ ॥ ૧૦૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે જ્ઞાનોપદેશો નામૈકત્રિંશોઽધ્યાયઃ ॥ ૭.૧.૩૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૩૨. દ્વાત્રિંશોઽધ્યાયઃ । શ્રેષ્ઠાનુષ્ઠાનવર્ણનમ્ ।

ઋષય ઊચુઃ ।
કિં તચ્છ્રેષ્ઠમનુષ્ઠાનં મોક્ષો યેનાપરોક્ષિતઃ ।
તત્તસ્ય સાધનં ચાદ્ય વક્તુમર્હસિ મારુત ॥ ૧॥

વાયુરુવાચ ।
શૈવો હિ પરમો ધર્મઃ શ્રેષ્ઠાનુષ્ઠાનશબ્દિતઃ ।
યત્રાપરોક્ષો લક્ષ્યેત સાક્ષાન્મોક્ષપ્રદઃ શિવઃ ॥ ૨॥

સ તુ પઞ્ચવિધો જ્ઞેયઃ પઞ્ચભિઃ પર્વભિઃ ક્રમાત્ ।
ક્રિયાતપોજપધ્યાનજ્ઞાનાત્મભિરનુત્તરૈઃ ॥ ૩॥

તૈરેવ સોત્તરૈઃ સિદ્ધો ધર્મસ્તુ પરમો મતઃ ।
પરોક્ષમપરોક્ષં ચ જ્ઞાનં યત્ર ચ મોક્ષદમ્ ॥ ૪॥

પરમોઽપરમશ્ચોભૌ ધર્મૌ હિ શ્રુતિચોદિતૌ ।
ધર્મશબ્દાભિધેયેઽર્થે પ્રમાણં શ્રુતિરેવ નઃ ॥ ૫॥

પરમો યોગપર્યન્તો ધર્મઃ શ્રુતિશિરોગતઃ ।
ધર્મસ્ત્વપરમસ્તદ્વદધઃ શ્રુતિમુખોત્થિતઃ ॥ ૬॥

અપશ્વાત્માધિકારત્વાદ્યો ધર્મઃ પરમો મતઃ ।
સાધારણસ્તતોઽન્યસ્તુ સર્વેષામધિકારતઃ ॥ ૭॥

સ ચાયં પરમો ધર્મઃ પરધર્મસ્ય સાધનમ્ ।
ધર્મશાસ્ત્રાદિભિઃ સમ્યક્ સાઙ્ગ એવોપબૃંહિતઃ ॥ ૮॥

શૈવો યઃ પરમો ધર્મઃ શ્રેષ્ઠાનુષ્ઠાનશબ્દિતઃ ।
ઇતિહાસપુરાણાભ્યાં કથઞ્ચિદુપબૃંહિતઃ ॥ ૯॥

શૈવાગમૈસ્તુ સમ્પન્નઃ સહાઙ્ગોપાઙ્ગવિસ્તરઃ ।
તત્સંસ્કારાધિકારૈશ્ચ સમ્યગેવોપબૃંહિતઃ ॥ ૧૦॥

શૈવાગમો હિ દ્વિવિધઃ શ્રૌતોઽશ્રૌતશ્ચ સંસ્કૃતઃ ।

શ્રુતિસારમયઃ શ્રૌતઃ સ્વતન્ત્ર ઇતરો મતઃ ॥ ૧૧॥

સ્વતન્ત્રો દશધા પૂર્વં તથાષ્ટાદશધા પુનઃ ।
કામિકાદિસમાખ્યાભિઃ સિદ્ધઃ સિદ્ધાન્તસંજ્ઞિતઃ ॥ ૧૨॥

શ્રુતિસારમયો યસ્તુ શતકોટિપ્રવિસ્તરઃ ।
પરં પાશુપતં યત્ર વ્રતં જ્ઞાનં ચ કથ્યતે ॥ ૧૩॥

યુગાવર્તેષુ શિષ્યેત યોગાચાર્યસ્વરૂપિણા ।
તત્ર તત્રાવતીર્ણેન શિવેનૈવ પ્રવર્ત્યતે ॥ ૧૪॥

સઙ્ક્ષિપ્યાસ્ય પ્રવક્તારશ્ચત્વારઃ પરમર્ષયઃ ।
રુરુર્દધીચોઽગસ્ત્યશ્ચ ઉપમન્યુર્મહાયશાઃ ॥ ૧૫॥

તે ચ પાશુપતા જ્ઞેયાઃ સંહિતાનાં પ્રવર્તકાઃ ।
તત્સન્તતીયા ગુરવઃ શતશોઽથ સહસ્રશઃ ॥ ૧૬॥

તત્રોક્તઃ પરમો ધર્મશ્ચર્યાદ્યાત્મા ચતુર્વિધઃ ।
તેષુ પાશુપતો યોગઃ શિવં પ્રત્યક્ષયેદ્ દૃઢમ્ ॥ ૧૭॥

તસ્માચ્છ્રેષ્ઠમનુષ્ઠાનં યોગઃ પાશુપતો મતઃ ।
તત્રાપ્યુપાયકો યુક્તો બ્રહ્મણા સ તુ કથ્યતે ॥ ૧૮॥

નામાષ્ટકમયો યોગઃ શિવેન પરિકલ્પિતઃ ।
તેન યોગેન સહસા શૈવી પ્રજ્ઞા પ્રજાયતે ॥ ૧૯॥

પ્રજ્ઞયા પરમં જ્ઞાનમચિરાલ્લભતે સ્થિરમ્ ।
પ્રસીદતિ શિવસ્તસ્ય યસ્ય જ્ઞાનં પ્રતિષ્ઠિતમ્ ॥ ૨૦॥

પ્રસાદાત્પરમો યોગો યઃ શિવં ચાપરોક્ષયેત્ ।
શિવાપરોક્ષાત્સંસારકારણેન વિયુજ્યતે ॥ ૨૧॥

તતઃ સ્યાન્મુક્તસંસારો મુક્તઃ શિવસમો ભવેત્ ।
બ્રહ્મપ્રોક્ત ઇત્યુપાયઃ સ એવ પૃથગુચ્યતે ॥ ૨૨॥

શિવો મહેશ્વરશ્ચૈવ રુદ્રો વિષ્ણુઃ પિતામહઃ ।
સંસારવૈદ્યઃ સર્વજ્ઞઃ પરમાત્મેતિ મુખ્યતઃ ॥ ૨૩॥

નામાષ્ટકમિદં મુખ્યં શિવસ્ય પ્રતિપાદકમ્ ।
આદ્યં તુ પઞ્ચકં જ્ઞેયં શાન્ત્યતીતાદ્યનુક્રમાત્ ॥ ૨૪॥

સંજ્ઞા સદાશિવાદીનાં પઞ્ચોપાધિપરિગ્રહાત્ ।
ઉપાધિવિનિવૃત્તૌ તુ યથાસ્વં વિનિવર્તતે ॥ ૨૫॥

પદમેવ હિ તં નિત્યમનિત્યાઃ પદિનઃ સ્મૃતાઃ ।
પદાનાં પરિવૃત્તૌ તુ મુચ્યન્તે પદિનો યતઃ ॥ ૨૬॥

પરિવૃત્ત્યન્તરે ભૂયસ્તત્પદપ્રાપ્તિરુચ્યતે ।
આત્માન્તરાભિધાનં સ્યાદ્યદાદ્યં નામપઞ્ચકમ્ ॥ ૨૭॥

અન્યત્તુ ત્રિતયં નામ્નામુપાદાનાદિયોગતઃ ।
ત્રિવિધોપાધિવચનાચ્છિવ એવાનુવર્તતે ॥ ૨૮॥

અનાદિમલસંશ્લેષઃ પ્રાગભાવાત્સ્વભાવતઃ ।
અત્યન્તં પરિશુદ્ધાત્મેત્યતોઽયં શિવ ઉચ્યતે ॥ ૨૯॥

અથવાશેષકલ્યાણગુણૈકધન ઈશ્વરઃ ।
શિવ ઇત્યુચ્યતે સદ્ભિઃ શિવતત્ત્વાર્થવાદિભિઃ ॥ ૩૦॥

ત્રયોવિંશતિતત્ત્વેભ્યઃ પ્રકૃતિર્હિ પરા મતા ।
પ્રકૃતેસ્તુ પરં પ્રાહુઃ પુરુષં પઞ્ચવિંશકમ્ ॥ ૩૧॥

યં વેદાદૌ સ્વરં પ્રાહુર્વાચ્યવાચકભાવતઃ ।
વેદૈકવેદ્યયાથાત્મ્યાદ્વેદાન્તે ચ પ્રતિષ્ઠિતઃ ॥ ૩૨॥

તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ ।
તદધીનપ્રવૃત્તિત્વાત્પ્રકૃતેઃ પુરુષસ્ય ચ ॥ ૩૩॥

અથવા ત્રિગુણં તત્ત્વમુપેયમિદમવ્યયમ્ ।
માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ॥ ૩૪॥

માયાવિક્ષોભકોઽનન્તો મહેશ્વરસમન્વયાત્ ।
કાલાત્મા પરમાત્માદિઃ સ્થૂલઃ સૂક્ષ્મઃ પ્રકીર્તિતઃ ॥ ૩૫॥

રુદ્ દુઃખં દુઃખહેતુર્વા તદ્રાવયતિ નઃ પ્રભુઃ ।
રુદ્ર ઇત્યુચ્યતે સદ્ભિઃ શિવઃ પરમકારણમ્ ॥ ૩૬॥

તત્ત્વાદિભૂતપર્યન્તં શરીરાદિષ્વતન્દ્રિતઃ ।
વ્યાપ્યાધિતિષ્ઠતિ શિવસ્તતો રુદ્ર ઇતસ્તતઃ ॥ ૩૭॥

જગતઃ પિતૃભૂતાનાં શિવો મૂર્ત્યાત્મનામપિ ।
પિતૃભાવેન સર્વેષાં પિતામહ ઉદીરિતઃ ॥ ૩૮॥

નિદાનજ્ઞો યથા વૈદ્યો રોગસ્ય વિનિવર્તકઃ ।
ઉપાયૈર્ભેષજૈસ્તદ્વલ્લયભોગાધિકારતઃ ॥ ૩૯॥

સંસારસ્યેશ્વરો નિત્યં સમૂલસ્ય નિવર્તકઃ ।
સંસારવૈદ્ય ઇત્યુક્તઃ સર્વતત્ત્વાર્થવેદિભિઃ ॥ ૪૦॥

દશાર્થજ્ઞાનસિદ્ધ્યર્થમિન્દ્રિયેષ્વેષુ સત્સ્વપિ ।
ત્રિકાલભાવિનો ભાવાન્સ્થૂલાન્સૂક્ષ્માનશેષતઃ ॥ ૪૧॥

અણવો નૈવ જાનન્તિ માયયૈવ મલાવૃતાઃ ।
અસત્સ્વપિ ચ સર્વેષુ સર્વાર્થજ્ઞાનહેતુષુ ॥ ૪૨॥

યદ્યથાવસ્થિતં વસ્તુ તત્તથૈવ સદાશિવઃ ।
અયત્નેનૈવ જાનાતિ તસ્માત્સર્વજ્ઞ ઉચ્યતે ॥ ૪૩॥

સર્વાત્મા પરમૈરેભિર્ગુણૈર્નિત્યસમન્વયાત્ ।
સ્વસ્માત્પરાત્મવિરહાત્પરમાત્મા શિવઃ સ્વયમ્ ॥ ૪૪॥

નામાષ્ટકમિદં ચૈવ લબ્ધ્વાચાર્યપ્રસાદતઃ ।
નિવૃત્ત્યાદિકલાગ્રન્થિં શિવાદ્યૈઃ પઞ્ચનામભિઃ ॥ ૪૫॥

યથાસ્વં ક્રમશશ્છિત્વા શોધયિત્વા યથાગુણમ્ ।
ગુણિતૈરેવ સોદ્ધાતૈઃ નિરુદ્ધૈરથાપિ વા ॥ ૪૬॥

હૃત્કણ્ઠતાલુભ્રૂમધ્યબ્રહ્મરન્ધ્રસમન્વિતામ્ ।
છિત્ત્વા પર્યષ્ટકાકારં સ્વાત્માનં ચ સુષુમ્ણયા ॥ ૪૭॥

દ્વાદશાન્તઃ સ્થિતસ્યેન્દોર્નીત્વોપરિ શિવૌજસિ ।
સંહૃત્ય વદનં પશ્ચાદ્યથાસંસ્કરણં લયાત્ ॥ ૪૮॥

શાક્તેનામૃતવર્ષેણ સંસિક્તાયાં તનૌ પુનઃ ।
અવતાર્ય સ્વમાત્માનમમૃતાત્માકૃતિં હૃદિ ॥ ૪૯॥

દ્વાદશાન્તઃસ્થિતસ્યેન્દોઃ પરસ્તાચ્છ્વેતપઙ્કજે ।
સમાસીનં મહાદેવં શઙ્કરં ભક્તવત્સલમ્ ॥ ૫૦॥

અર્ધનારીશ્વરં દેવં નિર્મલં મધુરાકૃતિમ્ ।
શુદ્ધસ્ફટિકસઙ્કાશં પ્રસન્નં શીતલદ્યુતિમ્ ॥ ૫૧॥

ધ્યાત્વા હિ માનસે દેવં સ્વસ્થચિત્તોઽથ માનવઃ ।

શિવનામાષ્ટકેનૈવ ભાવપુષ્પૈઃ સમર્ચયેત્ ॥ ૫૨॥

અભ્યર્ચ્ચનાન્તે તુ પુનઃ પ્રાણાનાયમ્ય માનવઃ ।
સમ્યક્ ચિત્તં સમાધાય શાર્વં નામાષ્ટકં જપેત્ ॥ ૫૩॥

નાભૌ ચાષ્ટાહુતીર્હુત્વા પૂર્ણાહુત્યા નમસ્તતઃ ।
અષ્ટપુષ્પપ્રદાનેન કૃત્વાભ્યર્ચ્ચનમન્તિમમ્ ॥ ૫૪॥

નિવેદયેત્સ્વમાત્માનં ચુલુકોદકવર્ત્મના ।
એવં કૃત્વાચિરાદેવ જ્ઞાનં પાશુપતં શુભમ્ ॥ ૫૫॥

લભતે તત્પ્રતિષ્ઠાં ચ વૃત્તં ચાનુત્તમં તથા ।
યોગં ચ પરમં લબ્ધ્વા મુચ્યતે નાત્ર સંશયઃ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે શ્રેષ્ઠાનુષ્ઠાનવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૭.૧.૩૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૩૩. ત્રયસ્ત્રિંશોઽધ્યાયઃ । પશુપતિવ્રતવિધાનવર્ણનમ્ ।

ઋષય ઊચુઃ ।
ભગવઞ્છ્રોતુમિચ્છામો વ્રતં પાશુપતં પરમ્ ।
બ્રહ્માદયોઽપિ યત્કૃત્વા સર્વે પાશુપતાઃ સ્મૃતાઃ ॥ ૧॥

વાયુરુવાચ ।
રહસ્યં વઃ પ્રવક્ષ્યામિ સર્વપાપનિકૃન્તનમ્ ।
વ્રતં પાશુપતં શ્રૌતમથર્વશિરસિ શ્રુતમ્ ॥ ૨॥

કાલશ્ચૈત્રી પૌર્ણમાસી દેશઃ શિવપરિગ્રહઃ ।
ક્ષેત્રારામાદ્યરણ્યં વા પ્રશસ્તઃ શુભલક્ષણઃ ॥ ૩॥

તત્ર પૂર્વં ત્રયોદશ્યાં સુસ્નાતઃ સુકૃતાહ્નિકઃ ।
અનુજ્ઞાપ્ય સ્વમાચાર્યં સમ્પૂજ્ય પ્રણિપત્ય ચ ॥ ૪॥

પૂજાં વૈશેષિકીં કૃત્વા શુક્લામ્બરધરઃ સ્વયમ્ ।
શુક્લયજ્ઞોપવીતી ચ શુક્લમાલ્યાનુલેપનઃ ॥ ૫॥

દર્ભાસને સમાસીનો દર્ભમુષ્ટિં પ્રગૃહ્ય ચ ।
પ્રાણાયામત્રયં કૃત્વા પ્રાઙ્મુખો વાપ્યુદઙ્મુખઃ ।
ધ્યાત્વા દેવં ચ દેવીં ચ તદ્વિજ્ઞાપનવર્ત્મના ॥ ૬॥

વ્રતમેતત્કરોમીતિ ભવેત્સઙ્કલ્પ્ય દીક્ષિતઃ ।
યાવચ્છરીરપાતં વા દ્વાદશાબ્દમથાપિ વા ॥ ૭॥

તદર્ધં વા તદર્ધં વા માસદ્વાદશકં તુ વા ।
તદર્ધં વા તદર્ધં વા માસમેકમથાપિ વા ॥ ૮॥

દિનદ્વાદશકં વાથ દિનષટ્કમથાપિ વા ।
તદર્ધં દિનમેકં વા વ્રતસઙ્કલ્પનાવધિ ॥ ૯॥

અગ્નિમાધાય વિધિવદ્વિરજાહોમકારણાત્ ।
હુત્વાજ્યેન સમિદ્ભિશ્ચ ચરુણા ચ યથાક્રમમ્ ॥ ૧૦॥

પૂર્ણામાપૂર્ય તાં ભૂયસ્તત્ત્વાનાં શુદ્ધિમુદ્દિશન્ ।
જુહુયાન્મૂલમન્ત્રેણ તૈરેવ સમિદાદિભિઃ ॥ ૧૧॥

તત્ત્વાન્યેતાનિ મદ્દેહે શુદ્ધ્યન્તામિત્યનુસ્મરન્ ।
પઞ્ચભૂતાનિ તન્માત્રાઃ પઞ્ચકર્મેન્દ્રિયાણિ ચ ॥ ૧૨॥

જ્ઞાનકર્મવિભેદેન પઞ્ચકર્મવિભાગશઃ ।
ત્વગાદિધાતવઃ સપ્ત પઞ્ચ પ્રાણાદિવાયવઃ ॥ ૧૩॥

મનોબુદ્ધિરહઙ્ખ્યાતિર્ગુણાઃ પ્રકૃતિપૂરુષૌ ।
રાગો વિદ્યાકલે ચૈવ નિયતિઃ કાલ એવ ચ ॥ ૧૪॥

માયા ચ શુદ્ધિવિદ્યા ચ મહેશ્વરસદાશિવૌ ।
શક્તિશ્ચ શિવતત્ત્વં ચ તત્ત્વાનિ ક્રમશો વિદુઃ ॥ ૧૫॥

મન્ત્રૈસ્તુ વિરજૈર્હુત્વા હોતાસૌ વિરજા ભવેત્ ।
શિવાનુગ્રહમાસાદ્ય જ્ઞાનવાન્સ હિ જાયતે ॥ ૧૬॥

અથ ગોમયમાદાય પિણ્ડીકૃત્યાભિમન્ત્ર્ય ચ ।
વિન્યસ્યાગ્નૌ ચ સમ્પ્રોક્ષ્ય દિને તસ્મિન્હવિષ્યભુક્ ॥ ૧૭॥

પ્રભાતે તુ ચતુર્દશ્યાં કૃત્વા સર્વં પુરોદિતમ્ ।
દિને તસ્મિન્નિરાહારઃ કાલં શેષં સમાપયેત્ ॥ ૧૮॥

પ્રાતઃ પર્વણિ ચાપ્યેવં કૃત્વા હોમાવસાનતઃ ।

ઉપસંહૃત્ય રુદ્રાગ્નિં ગૃહ્ણીયાદ્ભસ્મ યત્નતઃ ॥ ૧૯॥

તતશ્ચ જટિલો મુણ્ડી શિખૈકજટ એવ વા ।
ભૂત્વા સ્નાત્વા તતો વીતલજ્જશ્ચેત્સ્યાદ્દિગમ્બરઃ ॥ ૨૦॥

અપિ કાષાયવસનશ્ચર્મચીરામ્બરોઽથ વા ।
એકામ્બરો વલ્કલી વા ભવેદ્દણ્ડી ચ મેખલી ॥ ૨૧॥

પ્રક્ષાલ્ય ચરણૌ પશ્ચાદ્ દ્વિરાચમ્યાત્મનસ્તનુમ્ ।
સઙ્કુલીકૃત્ય તદ્ભસ્મ વિરજાનલસમ્ભવમ્ ॥ ૨૨॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ ષડ્ભિરાથર્વણૈઃ ક્રમાત્ ।
વિમૃજ્યાઙ્ગાનિ મૂર્દ્ધાદિચરણાન્તાનિ તૈઃ સ્પૃશેત્ ॥ ૨૩॥

તતસ્તેન ક્રમેણૈવ સમુદ્ધૃત્ય ચ ભસ્મના ।
સર્વાઙ્ગોદ્ધૂલનં કુર્યાત્પ્રણવેન શિવેન વા ॥ ૨૪॥

તતસ્ત્રિપુણ્ડ્રં રચયેત્ત્રિયાયુષસમાહ્વયમ્ ।
શિવભાવં સમાગમ્ય શિવયોગમથાચરેત્ ॥ ૨૫॥

કુર્યાત્ ત્રિસન્ધ્યમપ્યેવમેતત્પાશુપતં વ્રતમ્ ।
ભુક્તિમુક્તિપ્રદં ચૈતત્પશુત્વં વિનિવર્તયેત્ ॥ ૨૬॥

તત્પશુત્વં પરિત્યજ્ય કૃત્વા પાશુપતં વ્રતમ્ ।
પૂજનીયો મહાદેવો લિઙ્ગમૂર્તિઃ સનાતનઃ ॥ ૨૭॥

પદ્મમષ્ટદલં હૈમં નવરત્નૈરલઙ્કૃતમ્ ।
કર્ણિકાકેશરોપેતમાસનં પરિકલ્પયેત્ ॥ ૨૮॥

વિભવે તદભાવે તુ રક્તં સિતમથાપિ વા ।
પદ્મં તસ્યાપ્યભાવે તુ કેવલં ભાવનામયમ્ ॥ ૨૯॥

તત્પદ્મકર્ણિકામધ્યે કૃત્વા લિઙ્ગં કનીયસમ્ ।
સ્ફાટિકં પીઠિકોપેતં પૂજયેદ્વિધિવત્ક્રમાત્ ॥ ૩૦॥

પ્રતિષ્ઠાપ્ય વિધાનેન તલ્લિઙ્ગં કૃતશોધનમ્ ।
પરિકલ્પ્યાસનં મૂર્તિં પઞ્ચવક્ત્રપ્રકારતઃ ॥ ૩૧॥

પઞ્ચગવ્યાદિભિઃ પૂર્ણૈર્યથાવિભવસમ્ભૃતૈઃ ।
સ્નાપયેત્કલશૈઃ પૂર્ણૈરષ્ટાપદસમુદ્ભવૈઃ ॥ ૩૨॥

ગન્ધદ્રવ્યૈઃ સકર્પૂરૈશ્ચન્દનાદ્યૈઃ સકુङ્કુમૈઃ ।
સવેદિકં સમાલિપ્ય લિઙ્ગં ભૂષણભૂષિતમ્ ॥ ૩૩॥

બિલ્વપત્રૈશ્ચ પદ્મૈશ્ચ રક્તૈઃ શ્વેતૈસ્તથોત્પલૈઃ ।
નીલોત્પલૈસ્તથાન્યૈશ્ચ પુષ્પૈસ્તૈસ્તૈસ્સુગન્ધિભિઃ ॥ ૩૪॥

પુણ્યૈઃ પ્રશસ્તૈઃ પત્રૈશ્ચ ચિત્રૈર્દૂર્વાક્ષતાદિભિઃ ।
સમભ્યર્ચ્ય યથાલાભં મહાપૂજાવિધાનતઃ ॥ ૩૫॥

ધૂપં દીપં તથા ચાપિ નૈવેદ્યં ચ સમાદિશેત્ ।
નિવેદયિત્વા વિભવે કલ્યાણં ચ સમાચરેત્ ॥ ૩૬॥

ઇષ્ટાનિ ચ વિશિષ્ટાનિ ન્યાયેનોપાર્જિતાનિ ચ ।
સર્વદ્રવ્યાણિ દેયાનિ વ્રતે તસ્મિન્વિશેષતઃ ॥ ૩૭॥

શ્રીપત્રોત્પલપદ્માનાં સઙ્ખ્યા સાહસ્રિકી મતા ।
પ્રત્યેકમપરા સઙ્ખ્યા શતમષ્ટોત્તરં દ્વિજાઃ ॥ ૩૮॥

તત્રાપિ ચ વિશેષેણ ન ત્યજેદ્બિલ્વપત્રકમ્ ।
હૈમમેકં પરં પ્રાહુઃ પદ્મં પદ્મસહસ્રકાત્ ॥ ૩૯॥

નીલોત્પલાદિષ્વપ્યેતત્સમાનં બિલ્બપત્રકૈઃ ।
પુષ્પાન્તરે ન નિયમો યથાલાભં નિવેદયેત્ ॥ ૪૦॥

અષ્ટાઙ્ગમર્ઘ્યમુત્કૃષ્ટં ધૂપાલેપૌ વિશેષતઃ ।
ચન્દનં વામદેવાખ્યે હરિતાલં ચ પૌરુષે ॥ ૪૧॥

ઈશાને ભસિતં કેચિદાલેપનમિતીદૃશમ્ ।
ન ધૂપમિતિ મન્યન્તે ધૂપાન્તરવિધાનતઃ ।
સિતાગુરુમઘોરાખ્યે મુખે કૃષ્ણાગુરું પુનઃ ॥ ૪૨॥

પૌરુષે ગુગ્ગુલં સદ્યે સૌમ્યે સૌગન્ધિકં મુખે ।
ઈશાનેઽપિ હ્યુશીરાદિ દેયાદ્ ધૂપં વિશેષતઃ ॥ ૪૩॥

શર્કરામધુકર્પૂરકપિલાઘૃતસંયુતમ્ ।
ચન્દનાગરુકાષ્ઠાદ્યં સામાન્યં સમ્પ્રચક્ષતે ॥ ૪૪॥

કર્પૂરવર્તિરાજ્યાઢ્યા દેયા દીપાવલિસ્તતઃ ।
અર્ઘ્યમાચમનં દેયં પ્રતિવક્ત્રમતઃ પરમ્ ॥ ૪૫॥

પ્રથમાવરણે પૂજ્યૌ ક્રમાદ્બ્રેરમ્બષણ્મુખૌ ।

બ્રહ્માઙ્ગાનિ તતશ્ચૈવ પ્રથમાવરણેઽર્ચિતે ॥ ૪૬॥

દ્વિતીયાવરણે પૂજ્યા વિઘ્નેશાશ્ચક્રવર્તિનઃ ।
તૃતીયાવરણે પૂજ્યા ભવાદ્યા અષ્ટમૂર્તયઃ ॥ ૪૭॥

મહાદેવાદયસ્તત્ર તથૈકાદશમૂર્તયઃ ।
ચતુર્થાવરણે પૂજ્યાઃ સર્વ એવ ગણેશ્વરાઃ ॥ ૪૮॥

બહિરેવ તુ પદ્મસ્ય પઞ્ચમાવરણે ક્રમાત્ ।
દશદિક્પતયઃ પૂજ્યાઃ સાસ્ત્રાઃ સાનુચરાસ્તથા ॥ ૪૯॥

બ્રહ્મણો માનસાઃ પુત્રાઃ સર્વેઽપિ જ્યોતિષાં ગણાઃ ।
સર્વા દેવ્યશ્ચ દેવાશ્ચ સર્વે સર્વે ચ ખેચરાઃ ॥ ૫૦॥

પાતાલવાસિનશ્ચાન્યે સર્વે મુનિગણા અપિ ।
યોગિનો હિ મખાઃ સર્વે પતઙ્ગા માતરસ્તથા ॥ ૫૧॥

ક્ષેત્રપાલાશ્ચ સગણાઃ સર્વં ચૈતચ્ચરાચરમ્ ।
પૂજનીયં શિવપ્રીત્યા મત્વા શમ્ભુવિભૂતિમત્ ॥ ૫૨॥

અથાવરણપૂજાન્તે સમ્પૂજ્ય પરમેશ્વરમ્ ।
સાજ્યં સવ્યજનં હૃદ્યં હવિર્ભક્ત્યા નિવેદયેત્ ॥ ૫૩॥

મુખવાસાદિકં દત્ત્વા તામ્બૂલં સોપદંશકમ્ ।
અલઙ્કૃત્ય ચ ભૂયોઽપિ નાનાપુષ્પવિભૂષણૈઃ ॥ ૫૪॥

નીરાજનાન્તે વિસ્તીર્ય પૂજાશેષં સમાપયેત્ ।
ચષકં સોપકારં ચ શયનં ચ સમર્પયેત્ ॥ ૫૫॥

ચન્દ્રસઙ્કાશહારં ચ શયનીયં સમર્પયેત્ ।
આદ્યં નૃપોચિતં હૃદ્યં તત્સર્વમનુરૂપતઃ ॥ ૫૬॥

કૃત્વા ચ કારયિત્વા ચ હુત્વા ચ પ્રતિપૂજનમ્ ।
વ્યોમેશસ્તવં જપ્ત્વા વિદ્યાં પઞ્ચાક્ષરીં જપેત્ ॥ ૫૭॥

પ્રદક્ષિણાં પ્રણામં ચ કૃત્વાત્માનં સમર્પયેત્ ।
તતઃ પુરસ્તાદ્દેવસ્ય ગુરુવિપ્રૌ ચ પૂજયેત્ ॥ ૫૮॥

દત્ત્વાર્ઘ્યમષ્ટૌ પુષ્પાણિ દેવમુદ્વાસ્ય લિઙ્ગતઃ ।
અગ્નેશ્વાગ્નિં સુસંયમ્ય હ્યુદ્વાસ્ય ચ તમપ્યુત ॥ ૫૯॥

પ્રત્યહં ચ જનસ્ત્વેવં કુર્યાત્સેવાં પુરોદિતામ્ ।
તતસ્તત્સામ્બુજં લિઙ્ગં સર્વોપકરણાન્વિતમ્ ॥ ૬૦॥

સમર્પયેત્સ્વગુરવે સ્થાપયેદ્વા શિવાલયે ।
સમ્પૂજ્ય ચ ગુરૂન્વિપ્રાન્ વ્રતિનશ્ચ વિશેષતઃ ॥ ૬૧॥

ભક્તાન્દ્વિજાંશ્ચ શક્તશ્ચેદ્દીનાનાથાંશ્ચ તોષયેત્ ।
સ્વયં ચાનશને શક્તઃ ફલમૂલાશનોઽથ વા ॥ ૬૨॥

પયોવ્રતો વા ભિક્ષાશી ભવેદેકાશનસ્તથા ।
નક્તં યુક્તાશનો નિત્યં ભૂશય્યાનિરતઃ શુચિઃ ॥ ૬૩॥

ભસ્મશાયી તૃણેશાયી ચીરાજિનધૃતોઽથ વા ।
બ્રહ્મચર્યવ્રતો નિત્યં વ્રતમેતત્સમાચરેત્ ॥ ૬૪॥

અર્કવારે તથાર્દ્રાયાં પઞ્ચદશ્યાં ચ પક્ષયોઃ ।
અષ્ટમ્યાં ચ ચતુર્દશ્યાં શક્તસ્તૂપવસેદપિ ॥ ૬૫॥

પાખણ્ડિપતિતોદક્યાઃ સૂતકાન્ત્યજપૂર્વકાન્ ।
વર્જયેત્સર્વયત્નેન મનસા કર્મણા ગિરા ॥ ૬૬॥

ક્ષમાદાનદયાસત્યાહિંસાશીલઃ સદા ભવેત્ ।
સન્તુષ્ટશ્ચ પ્રશાન્તશ્ચ જપધ્યાનરતસ્તથા ॥ ૬૭॥

કુર્યાત્ત્રિષવણસ્નાનં ભસ્મસ્નાનમથાપિ વા ।
પૂજાં વૈશેષિકીં ચૈવ મનસા વચસા ગિરા ॥ ૬૮॥

બહુનાત્ર કિમુક્તેન નાચરેદશિવં વ્રતી ।
પ્રમાદાત્તુ તથાચારે નિરૂપ્ય ગુરુલાઘવે ॥ ૬૯॥

ઉચિતાં નિષ્કૃતિં કુર્યાત્પૂજાહોમજપાદિભિઃ ।
આસમાપ્તેર્વ્રતસ્યૈવમાચરેન્ન પ્રમાદતઃ ॥ ૭૦॥

ગોદાનં ચ વૃષોત્સર્ગં કુર્યાત્પૂજાં ચ સમ્પદા ।
ભક્તશ્ચ શિવપ્રીત્યર્થં સર્વકામવિવર્જિતઃ ॥ ૭૧॥

સામાન્યમેતત્કથિતં વ્રતસ્યાસ્ય સમાસતઃ ।
પ્રતિમાસં વિશેષં ચ પ્રવદામિ યથાશ્રુતમ્ ॥ ૭૨॥

વૈશાખે વજ્રલિઙ્ગં તુ જ્યેષ્ઠે મારકતં શુભમ્ ।
આષાઢે મૌક્તિકં વિદ્યાચ્છ્રાવણે નીલનિર્મિતમ્ ॥ ૭૩॥

માસે ભાદ્રપદે ચૈવ પદ્મરાગમયં પરમ્ ।
આશ્વિને માસિ વિદ્યાદ્વૈ લિઙ્ગં ગોમેદકં વરમ્ ॥ ૭૪॥

કાર્તિક્યાં વૈદ્રુમં લિઙ્ગં વૈદૂર્યં માર્ગશીર્ષકે ।
પુષ્પરાગમયં પૌષે માઘે દ્યુમણિજં તથા ॥ ૭૫॥

ફાલ્ગુણે ચન્દ્રકાન્તોત્થં ચૈત્રે તદ્વ્યત્યયોઽથવા ।
સર્વમાસેષુ રત્નાનામલાભે હૈમમેવ વા ॥ ૭૬॥

હૈમાભાવે રાજતં વા તામ્રજં શૈલજં તથા ।
મૃણ્મયં વા યથાલાભં જાતુષં ચાન્યદેવ વા ॥ ૭૭॥

સર્વગન્ધમયં વાથ લિઙ્ગં કુર્યાદ્યથારુચિ ।
વ્રતાવસાનસમયે સમાચરિતનિત્યકઃ ॥ ૭૮॥

કૃત્વા વૈશેષિકીં પૂજાં હુત્વા ચૈવ યથા પુરા ।
સમ્પૂજ્ય ચ તથાચાર્યં વ્રતિનશ્ચ વિશેષતઃ ॥ ૭૯॥

દેશિકેનાપ્યનુજ્ઞાતઃ પ્રાઙ્મુખો વાપ્યુદઙ્મુખઃ ।
દર્ભાસનો દર્ભપાણિઃ પ્રાણાપાનૌ નિયમ્ય ચ ॥ ૮૦॥

જપિત્વા શક્તિતો મૂલં ધ્યાત્વા સામ્બં ત્રિયમ્બકમ્ ।
અનુજ્ઞાપ્ય યથાપૂર્વં નમસ્કૃત્ય કૃતાઞ્જલિઃ ॥ ૮૧॥

સમુત્સૃજામિ ભગવન્ વ્રતમેતત્ત્વદાજ્ઞયા ।
ઇત્યુક્ત્વા લિઙ્ગમૂલસ્થાન્દર્ભાનુત્તરતસ્ત્યજેત્ ॥ ૮૨॥

તતો દણ્ડજટાચીરમેખલા અપિ ચોત્સૃજેત્ ।
પુનરાચમ્ય વિધિવત્પઞ્ચાક્ષરમુદીરયેત્ ॥ ૮૩॥

યઃ કૃત્વાત્યન્તિકીં દીક્ષામાદેહાન્તમનાકુલઃ ।
વ્રતમેતત્પ્રકુર્વીત સ તુ વૈ નૈષ્ઠિકઃ સ્મૃતઃ ॥ ૮૪॥

સોઽત્યાશ્રમી ચ વિજ્ઞેયો મહાપાશુપતસ્તથા ।
સ એવ તપતાં શ્રેષ્ઠઃ સ એવ ચ મહાવ્રતી ॥ ૮૫॥

ન તેન સદૃશઃ કશ્ચિત્કૃતકૃત્યો મુમુક્ષુષુ ।
યો યતિર્નૈષ્ઠિકો જાતસ્તમાહુર્નૈષ્ઠિકોત્તમમ્ ॥ ૮૬॥

યોઽન્વહં દ્વાદશાહં વા વ્રતમેતત્સમાચરેત્ ।

સોઽપિ નૈષ્ઠિકતુલ્યઃ સ્યાત્તીવ્રવ્રતસમન્વયાત્ ॥ ૮૭॥

ધૃતાક્તો યશ્ચરેદેતદ્ વ્રતં વ્રતપરાયણઃ ।
દ્વિત્રૈકદિવસં વાપિ સ ચ કશ્ચન નૈષ્ઠિકઃ ॥ ૮૮॥

કૃત્યમિત્યેવ નિષ્કામો યશ્ચરેદ્ વ્રતમુત્તમમ્ ।
શિવાર્પિતાત્મા સતતં ન તેન સદૃશઃ ક્વચિત્ ॥ ૮૯॥

ભસ્મચ્છન્નો દ્વિજો વિદ્વાન્મહાપાતકસમ્ભવૈઃ ।
પાપૈઃ સુદારુણૈઃ સદ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૯૦॥

રુદ્રાગ્નિર્યત્પરં વીર્યં તદ્ભસ્મ પરિકીર્તિતમ્ ।
તસ્માત્સર્વેષુ કાલેષુ વીર્યવાન્ભસ્મસંયુતઃ ॥ ૯૧॥

ભસ્મનિષ્ઠસ્ય નશ્યન્તિ દેષા ભસ્માગ્નિસઙ્ગમાત્ ।
ભસ્મસ્નાનવિશુદ્ધાત્મા ભસ્મનિષ્ઠ ઇતિ સ્મૃતઃ ॥ ૯૨॥

ભસ્મના દિગ્ધસર્વાઙ્ગો ભસ્મદીપ્તત્રિપુણ્ડ્રકઃ ।
ભસ્મસ્નાયી ચ પુરુષો ભસ્મનિષ્ઠ ઇતિ સ્મૃતઃ ॥ ૯૩॥

ભૂતપ્રેતપિશાસાશ્ચ રોગાશ્ચાતીવ દુસ્સહાઃ ।
ભસ્મનિષ્ઠસ્ય સાન્નિધ્યાદ્ વિદ્રવન્તિ ન સંશયઃ ॥ ૯૪॥

ભાસનાદ્ભસિતં પ્રોક્તં ભસ્મ કલ્મષભક્ષણાત્ ।
ભૂતિઃ ભૂતિકરી ચૈવ રક્ષા રક્ષાકરી પરમ્ ॥ ૯૫॥

કિમન્યદિહ વક્તવ્યં ભસ્મમાહાત્મ્યકારણમ્ ।
વ્રતી ચ ભસ્મના સ્નાતઃ સ્વયં દેવો મહેશ્વરઃ ॥ ૯૬॥

પરમાસ્ત્રં ચ શૈવાનાં ભસ્મૈતત્પારમેશ્વરમ્ ।
ધૌમ્યાગ્રજસ્ય તપસિ વ્યાપદો યન્નિવારિતાઃ ॥ ૯૭॥

તસ્માત્સર્વપ્રયત્નેન કૃત્વા પાશુપતવ્રતમ્ ।
ધનવદ્ભસ્મ સઙ્ગૃહ્ય ભસ્મસ્નાનરતો ભવેત્ ॥ ૯૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે પશુપતિવ્રતવિધાનવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૧.૩૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૩૪. ચતુસ્ત્રિંશોऽધ્યાયઃ । ઉપમન્યુતપોવર્ણનમ્ ।

ઋષય ઊચુઃ ।
ધૌમ્યાગ્રજેન શિશુના ક્ષીરાર્થં હિ તપઃ કૃતમ્ ।
તસ્માત્ ક્ષીરાર્ણવો દત્તસ્તસ્મૈ દેવેન શૂલિના ॥ ૧॥

સ કથં શિશુકો લેભે શિવશાસ્ત્રપ્રવક્તૃતામ્ ।
કથં વા શિવસદ્ભાવં જ્ઞાત્વા તપસિ નિષ્ઠિતઃ ॥ ૨॥

કથં ચ લબ્ધવિજ્ઞાનસ્તપશ્ચરણપર્વણિ ।
રુદ્રાગ્નેર્યત્પરં વીર્યં લભે ભસ્મ સ્વરક્ષકમ્ ॥ ૩॥

વાયુરુવાચ ।
ન હ્યેષ શિશુકઃ કશ્ચિત્પ્રાકૃતઃ કૃતવાંસ્તપઃ ।
મુનિવર્યસ્ય તનયો વ્યાઘ્રપાદસ્ય ધીમતઃ ॥ ૪॥

જન્માન્તરેણ સંસિદ્ધઃ કેનાપિ ખલુ હેતુના ।
સ્વપદપ્રચ્યુતો દિષ્ટ્યા પ્રાપ્તો મુનિકુમારતામ્ ॥ ૫॥

મહાદેવપ્રસાદસ્ય ભાગ્યાપન્નસ્ય ભાવિનઃ ।
દુગ્ધાભિલાષપ્રભવદ્દ્વારતામગમત્તપઃ ॥ ૬॥

અતઃ સર્વગણેશત્વં કુમારત્વં ચ શાશ્વતમ્ ।
સહ દુગ્ધાબ્ધિના તસ્મૈ પ્રદદૌ શઙ્કરઃ સ્વયમ્ ॥ ૭॥

તસ્ય જ્ઞાનાગમોऽપ્યસ્ય પ્રસાદાદેવ શાઙ્કરાત્ ।
કૌમારં હિ પરં સાક્ષાજ્જ્ઞાનં શક્તિમયં વિદુઃ ॥ ૮॥

શિવશાસ્ત્રપ્રવક્તૃત્વમપિ તસ્ય હિ તત્કૃતમ્ ।
કુમારોમુખતો લબ્ધજ્ઞાનાબ્ધેરિવ નન્દિનઃ ॥ ૯॥

દૃષ્ટં તુ કારણં તસ્ય શિવજ્ઞાનસમન્વયે ।
સ્વમાતૃવચનં સાક્ષાચ્છોકજં ક્ષીરકારણાત્ ॥ ૧૦॥

કદાચિત્ક્ષીરમત્યલ્પં પીતવાન્માતુલાશ્રમે ।
ઈર્ષ્યયા માતુલસુતં સન્તૃપ્તક્ષીરમુત્તમમ્ ॥ ૧૧॥

પીત્વા સ્થિતં યથાકામં દૃષ્ટ્વા વૈ માતુલાત્મજમ્ ।
ઉપમન્યુર્વ્યાઘ્રપાદિઃ પ્રીત્યા પ્રોવાચ માતરમ્ ॥ ૧૨॥

ઉપમન્યુરુવાચ ।
માતર્માતર્મહાભાગે મમ દેહિ તપસ્વિનિ ।
ગવ્યં ક્ષીરમતિસ્વાદુ નાલ્પમુષ્ણં પિબામ્યહમ્ ॥ ૧૩॥

વાયુરુવાચ ।
તચ્છ્રુત્વા પુત્રવચનં તન્માતા ચ તપસ્વિની ।
વ્યાઘ્રપાદસ્ય મહિષી દુઃખમાપત્તદા ચ સા ॥ ૧૪॥

ઉપલાલ્યાથ સુપ્રીત્યા પુત્રમાલિઙ્ગ્ય સાદરમ્ ।
દુઃખિતા વિલલાપાથ સ્મૃત્વા નૈર્ધન્યમાત્મનઃ ॥ ૧૫॥

સ્મૃત્વા સ્મૃત્વા પુનઃ ક્ષીરમુપમન્યુઃ સ બાલકઃ ।
દેહિ દેહીતિ તામાહ રુદન્ભૂયો મહાદ્યુતિઃ ॥ ૧૬॥

તદ્ હઠં સા પરિજ્ઞાય દ્વિજપત્ની તપસ્વિની ।
શાન્તયે તદ્ હઠસ્યાથ શુભોપાયમરીરચત્ ॥ ૧૭॥

ઉઞ્છવૃત્ત્યાર્જિતાન્બીજાન્સ્વયં દૃષ્ટ્વા ચ સા તદા ।
બીજપિષ્ટમથાલોડ્ય તોયેન કલભાષિણી ॥ ૧૮॥

એહ્યેહિ મમ પુત્રેતિ સામપૂર્વં તતઃ સુતમ્ ।
આલિઙ્ગ્યાદાય દુઃખાર્તા પ્રદદૌ કૃત્રિમં પયઃ ॥ ૧૯॥

પીત્વા ચ કૃત્રિમં ક્ષીરં માત્રાં દત્તં સ બાલકઃ ।
નૈતત્ક્ષીરમિતિ પ્રાહ માતરં ચાતિવિહ્વલઃ ॥ ૨૦॥

દુઃખિતા સા તદા પ્રાહ સમ્પ્રેક્ષ્યાઘ્રાય મૂર્દ્ધનિ ।
સમ્માર્જ્ય નેત્રે પુત્રસ્ય કરાભ્યાં કમલાયતે ॥ ૨૧॥

જનન્યુવાચ ।
તટિની રત્નપૂર્ણાસ્તાઃ સ્વર્ગપાતાલગોચરાઃ ।
ભાગ્યહીના ન પશ્યન્તિ ભક્તિહીનાશ્ચ યે શિવે ॥ ૨૨॥

રાજ્યં સ્વર્ગં ચ મોક્ષં ચ ભોજનં ક્ષીરસમ્ભવમ્ ।
ન લભન્તે પ્રિયાણ્યેષાં ન તુષ્યતિ યદા શિવઃ ॥ ૨૩॥

ભવપ્રસાદજં સર્વં નાન્યદ્દેવપ્રસાદજમ્ ।
અન્યદેવેષુ નિરતા દુઃખાર્તા વિભ્રમન્તિ ચ ॥ ૨૪॥

ક્ષીરં તત્ર કુતોઽસ્માકં વને નિવસતાં સદા ।

ક્વ દુગ્ધસાધનં વત્સ ક્વ વયં વનવાસિનઃ ॥ ૨૫॥

કૃત્સ્નાભાવેન દારિદ્ર્યાન્મયા તે ભાગ્યહીનયા ।
મિથ્યાદુગ્ધમિદં દત્તં પિષ્ટમાલોડ્ય વારિણા ॥ ૨૬॥

ત્વં માતુલગૃહે સ્વલ્પં પીત્વા સ્વાદુ પયઃ શ્રુતમ્ ।
જ્ઞાત્વા સ્વાદુ ત્વયા પીતં તજ્જાતીયમનુસ્મરન્ ॥ ૨૭॥

દત્તં ન પય ઇત્યુક્ત્વા રુદન્ દુઃખીકરોષિ મામ્ ।
પ્રસાદેન વિના શમ્ભોઃ પયસ્તવ ન વિદ્યતે ॥ ૨૮॥

પાદપઙ્કજયોસ્તસ્ય સામ્બસ્ય સગણસ્ય ચ ।
ભક્ત્યા સમર્પિતં યત્તત્કારણં સર્વસમ્પદામ્ ॥ ૨૯॥

અધુના વસુદોઽસ્માભિર્મહાદેવો ન પૂજિતઃ ।
સકામાનાં યથાકામં યથોક્તફલદાયકઃ ॥ ૩૦॥

ધનાન્યુદ્દિશ્ય નાસ્માભિરિતઃ પ્રાગર્ચિતઃ શિવઃ ।
અતો દરિદ્રાઃ સઞ્જાતા વયં તસ્માન્ન તે પયઃ ॥ ૩૧॥

પૂર્વજન્મનિ યદ્દત્તં શિવમુદ્દિશ્ય વૈ સુતઃ ।
તદેવ લભ્યતે નાન્યદ્ વિષ્ણુમુદ્દિશ્ય વા પ્રભુમ્ ॥ ૩૨॥

વાયુરુવાચ ।
ઇતિ માતૃવચઃ શ્રુત્વા તથ્યં શોકાદિસૂચકમ્ ।
બાલોઽપ્યનુતપન્નન્તઃ પ્રગલ્ભમિદમબ્રવીત્ ॥ ૩૩॥

ઉપમન્યુરુવાચ ।
શોકેનાલમિતો મતઃ સામ્બો યદ્યસ્તિ શઙ્કરઃ ।
ત્યજ શોકં મહાભાગે સર્વં ભદ્રં ભવિષ્યતિ ॥ ૩૪॥

શ ૃણુ માતર્વચો મેઽદ્ય મહાદેવોઽસ્તિ ચેત્ ક્વચિત્ ।
ચિરાદ્વા હ્યચિરાદ્વાપિ ક્ષીરોદં સાધયામ્યહમ્ ॥ ૩૫॥

વાયુરુવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય બાલકસ્ય મહામતેઃ ।
પ્રત્યુવાચ તદા માતા સુપ્રસન્ના મનસ્વિની ॥ ૩૬॥

માતોવાચ ।
શુભં વિચારિતં તાત ત્વયા મત્પ્રીતિવર્દ્ધનમ્ ।

વિલમ્બં મા કથાસ્ત્વં હિ ભજ સામ્બં સદાશિવમ્ ॥ ૩૭॥

સર્વસ્માદધિકોઽસ્ત્યેવ શિવઃ પરમકારણમ્ ।
તત્કૃતં હિ જગત્સર્વં બ્રહ્માદ્યાસ્તસ્ય કિઙ્કરાઃ ॥ ૩૮॥

તત્પ્રસાદકૃતૈશ્વર્યા દાસાસ્તસ્ય વયં પ્રભોઃ ।
તં વિનાન્યં ન જાનીમઃ શઙ્કરં લોકશઙ્કરમ્ ॥ ૩૯॥

અન્યાન્ દેવાન્ પરિત્યજ્ય કર્મણા મનસા ગિરા ।
તમેવ સામ્બં સગણં ભજ ભાવપુરસ્સરમ્ ॥ ૪૦॥

તસ્ય દેવાધિદેવસ્ય શિવસ્ય વરદાયિનઃ ।
સાક્ષાન્નમઃ શિવાયેતિ મન્ત્રોઽયં વાચકઃ સ્મૃતઃ ॥ ૪૧॥

સપ્તકોટિમહામન્ત્રાઃ સર્વે સપ્રણવાઃ પરે ।
તસ્મિન્નેવ વિલીયન્તે પુનસ્તસ્માદ્વિનિર્ગતાઃ ॥ ૪૨॥

સપ્રસાદાશ્ચ તે મન્ત્રાઃ સ્વાધિકારાદ્યપેક્ષયા ।
સર્વાધિકારસ્ત્વેકોઽયં મન્ત્ર એવેશ્વરાજ્ઞયા ॥ ૪૩॥

યથા નિકૃષ્ટાનુત્કૃષ્ટાન્સર્વાનપ્યાત્મનઃ શિવઃ ।
ક્ષમતે રક્ષિતું તદ્વન્મન્ત્રોઽયમપિ સર્વદા ॥ ૪૪॥

પ્રબલશ્ચ તથા હ્યેષ મન્ત્રો મન્ત્રાન્તરાદપિ ।
સર્વરક્ષાક્ષમોઽપ્યેષ નાપરઃ કશ્ચિદિષ્યતે ॥ ૪૫॥

તસ્માન્મન્ત્રાન્તરાંસ્ત્યક્ત્વા પઞ્ચાક્ષરપરો ભવ ।
તસ્મિન્ જિહ્વાન્તરગતે ન કિઞ્ચિદિહ દુર્લભમ્ ॥ ૪૬॥

અઘોરાસ્ત્રં ચ શૈવાનાં રક્ષાહેતુરનુત્તમમ્ ।
તચ્ચ તત્પ્રભવં મત્વા તત્પરો ભવ નાન્યથા ॥ ૪૭॥

ભસ્મેદં તુ મયા લબ્ધં પિતુરેવ તવોત્તમમ્ ।
વિરજાનલસંસિદ્ધં મહાવ્યાપન્નિવારણમ્ ॥ ૪૮॥

મન્ત્રં ચ તે મયા દત્તં ગૃહાણ મદનુજ્ઞયા ।
અનેનૈવાશુ જપ્તેન રક્ષા તવ ભવિષ્યતિ ॥ ૪૯॥

વાયુરુવાચ ।
એવં માત્રા સમાદિશ્ય શિવમસ્ત્વિત્યુદીર્ય ચ ।
વિસૃષ્ટસ્તદ્વચો મૂર્ધ્નિ કુર્વન્નેવ તદા મુનિઃ ॥ ૫૦॥

તાં પ્રણમ્યૈવમુક્ત્વા ચ તપઃ કર્તું પ્રચક્રમે ।
તમાહ ચ તદા માતા શુભં કુર્વન્તુ તે સુરાઃ ॥ ૫૧॥

અનુજ્ઞાતસ્તયા તત્ર તપસ્તેપે સ દુશ્ચરમ્ ।
હિમવત્પર્વતં પ્રાપ્ય વાયુભક્ષઃ સમાહિતઃ ॥ ૫૨॥

અષ્ટેષ્ટકાભિઃ પ્રાસાદં કૃત્વા લિઙ્ગં ચ મૃણ્મયમ્ ।
તત્રાવાહ્ય મહાદેવં સામ્બં સગણમવ્યયમ્ ॥ ૫૩॥

ભક્ત્યા પઞ્ચાક્ષરેણૈવ પુત્રૈઃ પુષ્પૈર્વનોદ્ભવૈઃ ।
સમભ્યર્ચ્ય ચિરં કાલં ચચાર પરમં તપઃ ॥ ૫૪॥

તતસ્તપશ્ચરત્તં તં બાલમેકાકિનં કૃશમ્ ।
ઉપમન્યું દ્વિજવરં શિવસંસક્તમાનસમ્ ॥ ૫૫॥

પુરા મરીચિના શપ્તાઃ કેચિન્મુનિપિશાચકાઃ ।
સમ્પીડ્ય રાક્ષસૈર્ભાવૈસ્તપસો વિઘ્નમાચરન્ ॥ ૫૬॥

સ ચ તૈઃ પીડ્યમાનોઽપિ તપઃ કુર્વન્કથઞ્ચન ।
સદા નમઃ શિવાયેતિ ક્રોશતિ સ્માર્તનાદવત્ ॥ ૫૭॥

તન્નાદશ્રવણાદેવ તપસો વિઘ્નકારિણઃ ।
તે તં બાલં સમુત્સૃજ્ય મુનયઃ સમુપાચરન્ ॥ ૫૮॥

તપસા તસ્ય વિપ્રસ્ય ચોપમન્યોર્મહાત્મનઃ ।
ચરાચરં ચ મુનયઃ પ્રદીપિતમભૂજ્જગત્ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે ઉપમન્યુતપોવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૧.૩૪॥

૭.૧.૩૪
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૧.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । ઉપમન્યુચરિતવર્ણનમ્ ।

વાયુરુવાચ ।

અથ સર્વે પ્રદીપ્તાઙ્ગા વૈકુણ્ઠં પ્રયયુર્દ્રુતમ્ ।
પ્રણમ્યાહુશ્ચ તત્સર્વં હરયે દેવસત્તમાઃ ॥ ૧॥

શ્રુત્વા તેષાં તદા વાક્યં ભગવાન્પુરુષોત્તમઃ ।
કિમિદં ત્વિતિ સઞ્ચિન્ત્ય જ્ઞાત્વા તત્કારણં ચ સઃ ॥ ૨॥

જગામ મન્દરં તૂર્ણં મહેશ્વરદિદૃક્ષયા ।
દૃષ્ટ્વા દેવં પ્રણમ્યૈવં પ્રોવાચ સુકૃતાઞ્જલિઃ ॥ ૩॥

વિષ્ણુરુવાચ ।
ભગવન્બ્રાહ્મણઃ કશ્ચિદુપમન્યુરિતિ શ્રુતઃ ।
ક્ષીરાર્થમદહત્સર્વં તપસા તન્નિવારય ॥ ૪॥

વાયુરુવાચ ।
ઇતિ શ્રુત્વા વચો વિષ્ણોઃ પ્રાહ દેવો મહેશ્વરઃ ।
શિશું નિવારયિષ્યામિ તત્ત્વં ગચ્છ સ્વમાશ્રમમ્ ॥ ૫॥

તચ્છ્રુત્વા શમ્ભુવચનં સ વિષ્ણુર્દેવવલ્લભઃ ।
જગામાશ્વાસ્ય તાન્સર્વાન્ સ્વલોકમમરાદિકાન્ ॥ ૬॥

એતસ્મિન્નન્તરે દેવઃ પિનાકી પરમેશ્વરઃ ।
શક્રસ્ય રૂપમાસ્થાય ગન્તું ચક્રે મતિં તતઃ ॥ ૭॥

અથ જગામ મુનેસ્તુ તપોવનં
ગજવરેણ સિતેન સદાશિવઃ ।
સહ સુરાસુરસિદ્ધમહોરગૈ-
રમરરાજતનું સ્વયમાસ્થિતઃ ॥ ૮॥

સ વારણશ્ચારુ તદા વિભું તં
નિવીજ્ય વાલવ્યજનેન દિવ્યમ્ ।
દધાર શચ્યા સહિતં સુરેન્દ્રં
કરેણ વામેન સિતાતપત્રમ્ ॥ ૯॥

રરાજ ભગવાન્સોમઃ શક્રરૂપી સદાશિવઃ ।
તેનાતપત્રેણ યથા ચન્દ્રબિમ્બેન મન્દરઃ ॥ ૧૦॥

આસ્થાયૈવં હિ શક્રસ્ય સ્વરૂપં પરમેશ્વરઃ ।
જગામાનુગ્રહં કર્તુમુપમન્યોસ્તદાશ્રમમ્ ॥ ૧૧॥

તં દૃષ્ટ્વા પરમેશાનં શક્રરૂપધરં શિવમ્ ।
પ્રણમ્ય શિરસા પ્રાહ મહામુનિવરઃ સ્વયમ્ ॥ ૧૨॥

ઉપમન્યુરુવાચ ।
પાવિતશ્ચાશ્રમઃ સોઽયં મમ દેવેશ્વર સ્વયમ્ ।
પ્રાપ્તો યત્ત્વં જગન્નાથ ભગવન્દેવસત્તમ ॥ ૧૩॥

વાયુરુવાચ ।
એવમુક્ત્વા સ્થિતં પ્રેક્ષ્ય કૃતાઞ્જલિપુટં દ્વિજમ્ ।
પ્રાહ ગમ્ભીરયા વાચા શક્રરૂપધરો હરઃ ॥ ૧૪॥

શક્ર ઉવાચ ।
તુષ્ટોઽસ્મિ તે વરં બ્રૂહિ તપસાઽનેન સુવ્રત ।
દદામિ ચેપ્સિતાન્સર્વાન્ ધૌમ્યાગ્રજ મહામુને ॥ ૧૫॥

વાયુરુવાચ ।
એવમુક્તસ્તદા તેન શક્રેણ મુનિપુઙ્ગવઃ ।
વરયામિ શિવે ભક્તિમિત્યુવાચ કૃતાઞ્જલિઃ ॥ ૧૬॥

તન્નિશમ્ય હરિઃ પ્રાહ માં ન જાનાસિ લેખપમ્ ।
ત્રૈલોક્યાધિપતિં શક્રં સર્વદેવનમસ્કૃતમ્ ॥ ૧૭॥

મદ્ભક્તો ભવ વિપ્રર્ષે મામેવાર્ચય સર્વદા ।
દદામિ સર્વં ભદ્રં તે ત્યજ રુદ્રં ચ નિર્ગુણમ્ ॥ ૧૮॥

રુદ્રેણ નિર્ગુણેનાપિ કિં તે કાર્યં ભવિષ્યતિ ।
દેવપઙ્ક્તિબહિર્ભૂતો યઃ પિશાચત્વમાગતઃ ॥ ૧૯॥

વાયુરુવાચ ।
તચ્છ્રુત્વા પ્રાહ સ મુનિર્જપન્પઞ્ચાક્ષરં મનુમ્ ।
મન્યમાનો ધર્મવિઘ્નં પ્રાહ તં કર્તુમાગતમ્ ॥ ૨૦॥

ઉપમન્યુરુવાચ ।
ત્વયૈવં કથિતં સર્વં ભવનિન્દારતેન વૈ ।
પ્રસઙ્ગાદેવ દેવસ્ય નિર્ગુણત્વં મહાત્મનઃ ॥ ૨૧॥

ત્વં ન જાનામિ વૈ રુદ્રં સર્વદેવેશ્વરેશ્વરમ્ ।
બ્રહ્મવિષ્ણુમહેશાનાં જનકં પ્રકૃતેઃ પરમ્ ॥ ૨૨॥

સદસદ્વ્યક્તમવ્યક્તં યમાહુર્બ્રહ્મવાદિનઃ ।
નિત્યમેકમનેકં ચ વરં તસ્માદ્ વૃણોમ્યહમ્ ॥ ૨૩॥

હેતુવાદવિનિર્મુક્તં સાઙ્ખ્યયોગાર્થદં પરમ્ ।
ઉપાસતે યં તત્ત્વજ્ઞા વરં તસ્માદ્ વૃણોમ્યહમ્ ॥ ૨૪॥

નાસ્તિ શમ્ભોઃ પરં તત્ત્વં સર્વકારણકારણાત્ ।
બ્રહ્મવિષ્ણ્વાદિદેવાનાં સ્રષ્ટુર્ગુણપરાદ્વિભોઃ ॥ ૨૫॥

બહુનાત્ર કિમુક્તેન મયાદ્યાનુમિતં મહત્ ।
ભવાન્તરે કૃતં પાપં શ્રુતા નિન્દા ભવસ્ય ચેત્ ॥ ૨૬॥

શ્રુત્વા નિન્દાં ભવસ્યાથ તત્ક્ષણાદેવ સન્ત્યજેત્ ।
સ્વદેહં તન્નિહત્યાશુ શિવલોકં સ ગચ્છતિ ॥ ૨૭॥

આસ્તાં તાવન્મમેચ્છેયં ક્ષીરં પ્રતિ સુરાધમ ।
નિહત્ય ત્વાં શિવાસ્ત્રેણ ત્યજામ્યેતં કલેવરમ્ ॥ ૨૮॥

વાયુરુવાચ ।
એવમુક્ત્વોપમન્યુસ્તં મર્તું વ્યવસિતઃ સ્વયમ્ ।
ક્ષીરે વાઞ્છામપિ ત્યક્ત્વા નિહન્તું શક્રમુદ્યતઃ ॥ ૨૯॥

ભસ્માદાય તદા ઘોરમઘોરાસ્ત્રાભિમન્ત્રિતમ્ ।
વિસૃજ્ય શક્રમુદ્દિશ્ય નનાદ સ મુનિસ્તદા ॥ ૩૦॥

સ્મૃત્વા શમ્ભુપદદ્વન્દ્વં સ્વદેહં દુગ્ધુમુદ્યતઃ ।
આગ્નેયીં ધારણાં બિભ્રદુપમન્યુરવસ્થિતઃ ॥ ૩૧॥

એવં વ્યવસિતે વિપ્રે ભગવાન્ ભગનેત્રહા ।
વારયામાસ સૌમ્યેન ધારણાં તસ્ય યોગિનઃ ॥ ૩૨॥

તદ્વિસૃષ્ટમઘોરાસ્ત્રં નન્દીશ્વરનિયોગતઃ ।
જગૃહે મધ્યતઃ ક્ષિપ્તં નન્દી શઙ્કરવલ્લભઃ ॥ ૩૩॥

સ્વં રૂપમેવ ભગવાનાસ્થાય પરમેશ્વરઃ ।
દર્શયામાસ શિપ્રાય બાલેન્દુકૃતશેખરમ્ ॥ ૩૪॥

ક્ષીરાર્ણવસહસ્રં ચ પીયૂષાર્ણવમેવ વા ।
દધ્યાદેરર્ણવાંશ્ચૈવ ઘૃતોદાર્ણવમેવ ચ ॥ ૩૫॥

ફલાર્ણવં ચ બાલસ્ય ભક્ષ્યભોજ્યાર્ણવં તથા ।

અપૂપાનાં ગિરિં ચૈવ દર્શયામાસ સ પ્રભુઃ ॥ ૩૬॥

એવં સ દદૃશે દેવો દેવ્યા સાર્દ્ધં વૃષોપરિ ।
ગણેશ્વરૈસ્ત્રિશૂલાદ્યૈર્દિવ્યાસ્ત્રૈરપિ સંવૃતઃ ॥ ૩૭॥

દિવિ દુન્દુભયો નેદુઃ પુષ્પવૃષ્ટિઃ પપાત ચ ।
વિષ્ણુબ્રહ્મેન્દ્રપ્રમુખૈર્દેવૈશ્છન્ના દિશો દશ ॥ ૩૮॥

અથોપમન્યુરાનન્દસમુદ્રોર્મિભિરાવૃતઃ ।
પપાત દણ્ડવદ્ભૂમૌ ભક્તિનમ્રેણ ચેતસા ॥ ૩૯॥

એતસ્મિન્સમયે તત્ર સસ્મિતો ભગવાન્ભવઃ ।
એહ્યેહીતિ તમાહૂય મૂર્ધ્ન્યાઘ્રાય દદૌ વરાન્ ॥ ૪૦॥

શિવ ઉવાચ ।
ભક્ષ્યભોજ્યાન્યથાકામં બાન્ધવૈર્ભુઙ્ક્ષ્વ સર્વદા ।
સુખી ભવ સદા દુઃખાન્નિર્મુક્તો ભક્તિમાન્મમ ॥ ૪૧॥

ઉપમન્યો મહાભાગ તવામ્બૈષા હિ પાર્વતી ।
મયા પુત્રીકૃતો હ્યદ્ય દત્તઃ ક્ષીરોદકાર્ણવઃ ॥ ૪૨॥

મધુનશ્ચાર્ણવશ્ચૈવ દધ્યન્નાર્ણવ એવ ચ ।
આજ્યૌદનાર્ણવશ્ચૈવ ફલાદ્યર્ણવ એવ ચ ॥ ૪૩॥

અપૂપગિરયશ્ચૈવ ભક્ષ્યભોજ્યાર્ણવસ્તથા ।
એતે દત્તા મયા તે હિ ત્વં ગૃહ્ણીષ્વ મહામુને ॥ ૪૪॥

પિતા તવ મહાદેવો માતા વૈ જગદમ્બિકા ।
અમરત્વં મયા દત્તં ગાણપત્યં ચ શાશ્વતમ્ ॥ ૪૫॥

વરાન્વરય સુપ્રીત્યા મનોઽભિલષિતાન્પરાન્ ।
પ્રસન્નોઽહં પ્રદાસ્યામિ નાત્ર કાર્યા વિચારણા ॥ ૪૬॥

વાયુરુવાચ ।
એવમુક્ત્વા મહાદેવઃ કરાભ્યામુપગૃહ્ય તમ્ ।
મૂર્ધ્ન્યાઘ્રાય સુતસ્તેઽયમિતિ દેવ્યૈ ન્યવેદયત્ ॥ ૪૭॥

દેવી ચ ગુહવત્પ્રીત્યા મૂર્ધ્નિ તસ્ય કરામ્બુજમ્ ।
વિન્યસ્ય પ્રદદૌ તસ્મૈ કુમારપદમવ્યયમ્ ॥ ૪૮॥

ક્ષીરાબ્ધિરપિ સાકારઃ ક્ષીરં સ્વાદુ કરે દધત્ ।

ઉપસ્થાય દદૌ પિણ્ડીભૂતં ક્ષીરમનશ્વરમ્ ॥ ૪૯॥

યોગૈશ્વર્યં સદા તુષ્ટિં બ્રહ્મવિદ્યામનશ્વરામ્ ।
સમૃદ્ધિં પરમાં તસ્મૈ દદૌ સન્તુષ્ટમાનસઃ ॥ ૫૦॥

અથ શમ્ભુઃ પ્રસન્નાત્મા દૃષ્ટ્વા તસ્ય તપો મહઃ ।
પુનર્દદૌ વરં દિવ્યં મુનયે હ્યુપમન્યવે ॥ ૫૧॥

વ્રતં પાશુપતં જ્ઞાનં વ્રતયોગં ચ તત્ત્વતઃ ।
દદૌ તસ્મૈ પ્રવક્તૃત્વપાટવં સુચિરં પરમ્ ॥ ૫૨॥

સોઽપિ લબ્ધ્વા વરાન્દિવ્યાન્ કુમારત્વં ચ સર્વદા ।
તસ્માચ્છિવાચ્ચ તસ્યાશ્ચ શિવાયા મુદિતોઽભવત્ ॥ ૫૩॥

તતઃ પ્રસન્નચેતસ્કઃ સુપ્રણમ્ય કૃતાઞ્જલિઃ ।
યયાચે સ વરં વિપ્રો દેવદેવાન્મહેશ્વરાત્ ॥ ૫૪॥

ઉપમન્યુરુવાચ ।
પ્રસીદ દેવદેવેશ પ્રસીદ પરમેશ્વર ।
સ્વભક્તિં દેહિ પરમાં દિવ્યામવ્યભિચારિણીમ્ ॥ ૫૫॥

શ્રદ્ધાં દેહિ મહાદેવ સ્વસમ્બન્ધિષુ મે સદા ।
સ્વદાસ્યં પરમં સ્નેહં સાન્નિધ્યં ચૈવ સર્વદા ॥ ૫૬॥

મુક્ત્વા પ્રસન્નાત્મા હર્ષગદ્ગદયા ગિરા ।
સ તુષ્ટાવ મહાદેવમુપમન્યુર્દ્વિજોત્તમઃ ॥ ૫૭॥

દેવદેવ મહાદેવ શરણાગતવત્સલ ।
પ્રસીદ કરુણાસિન્ધો સામ્બ શઙ્કર સર્વદા ॥ ૫૮॥

વાયુરુવાચ ।
એવમુક્તો મહાદેવઃ સર્વેષાં ચ વરપ્રદઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મોપમન્યું મુનિસત્તમમ્ ॥ ૫૯॥

શિવ ઉવાચ ।
વત્સોપમન્યો તુષ્ટોઽસ્મિ સર્વં દત્તં મયા હિ તે ।
દૃઢભક્તોઽસિ વિપ્રર્ષે મયા વિજ્ઞાસિતો હ્યસિ ॥ ૬૦॥

અજરશ્ચામરશ્ચૈવ ભવ ત્વં દુઃખવર્જિતઃ ।
યશસ્વી તેજસા યુક્તો દિવ્યજ્ઞાનસમન્વિતઃ ॥ ૬૧॥

અક્ષયા બાન્ધવાશ્ચૈવ કુલં ગોત્રં ચ તે સદા ।
ભવિષ્યતિ દ્વિજશ્રેષ્ઠ મયિ ભક્તિશ્ચ શાશ્વતી ॥ ૬૨॥

સાન્નિધ્યં ચાશ્રમે નિત્યં કરિષ્યામિ દ્વિજોત્તમ ।
ઉપકણ્ઠં મમ ત્વં વૈ સાનન્દં વિહરિષ્યસિ ॥ ૬૩॥

એવમુક્ત્વા સ ભગવાન્ સૂર્યકોટિસમપ્રભઃ ।
ઈશાનઃ સ વરાન્દત્ત્વા તત્રૈવાન્તર્દધે હરઃ ॥ ૬૪॥

ઉપમન્યુઃ પ્રસન્નાત્મા પ્રાપ્ય તસ્માદ્વરાદ્વરાન્ ।
જગામ જનનીસ્થાનં સુખં પ્રાપાધિકં ચ સઃ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે વૈયાસિક્યાં ચતુર્વિંશતિસાહસ્ર્યાં સંહિતાયાં તદન્તર્ગતાયાં સપ્તમ્યાં વાયવીયસંહિતાયાં પૂર્વખણ્ડે ઉપમન્યુચરિતવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૭.૧.૩૫॥

સમાપ્તોઽયં સપ્તમ્યા વાયવીયસંહિતાયાઃ પૂર્વખણ્ડઃ ॥

Proofreading by Revathy Rajaraman/Uma Mahesh

# શ્રીશિવમહાપુરાણમ્ ૭ વાયવીયસસંહિતા

૦૭।૨

શ્રીઃ ॥

શ્રીગણેશાય નમઃ ॥

શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

અથ સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડઃ પ્રારભ્યતે ।

## ૭.૨.૧. પ્રથમોઽધ્યાયઃ । કૃષ્ણપુત્રપ્રાપ્તિવર્ણનમ્ ।

ૐ નમઃ સમસ્ત
સંસારચક્રભ્રમણહેતવે ।
ગૌરીકુચતટદ્વન્દ્વકુઙ્કુમાઙ્કિતવક્ષસે ॥ ૧॥

સૂત ઉવાચ ।
ઉક્ત્વા ભગવતો લબ્ધં પ્રસાદાદુપમન્યુના ।
નિયમાદુત્થિતો વાયુર્મધ્યે પ્રાપ્તે દિવાકરે ॥ ૨॥

ઋષયશ્ચાપિ તે સર્વે નૈમિષારણ્યવાસિનઃ ।
અથાયમર્થઃ પ્રષ્ટવ્ય ઇતિ કૃત્વા વિનિશ્ચયમ્ ॥ ૩॥

કૃત્વા યથા સ્વકં કૃત્યં પ્રત્યહં તે યથા પુરા ।
ભગવન્તમુપાયાન્તં સમીક્ષ્ય સમુપાવિશન્ ॥ ૪॥

અથાસૌ નિયમસ્યાન્તે ભગવાનમ્બરોદ્ભવઃ ।
મધ્યે મુનિસભાયાસ્તુ ભેજે કॢપ્તં વરાસનમ્ ॥ ૫॥

સુખાસનોપવિષ્ટશ્ચ વાયુર્લોકનમસ્કૃતઃ ।
શ્રીમદ્વિભૂતિમીશસ્ય હૃદિ કૃત્વેદમબ્રવીત્ ॥ ૬॥

તં પ્રપદ્યે મહાદેવં સર્વજ્ઞમપરાજિતમ્ ।

વિભૂતિઃ સકલં યસ્ય ચરાચરમિદં જગત્ ॥ ૭॥

ઇત્યાકર્ણ્ય શુભાં વાણીં ઋષયઃ ક્ષીણકલ્મષાઃ ।
વિભૂતિવિસ્તરં શ્રોતુમૂચુસ્તે પરમં વચઃ ॥ ૮॥

ઋષય ઊચુઃ ।
ઉક્તં ભગવતા વૃત્તમુપમન્યોર્મહાત્મનઃ ।
ક્ષીરાર્થેનાપિ તપસા યત્પ્રાપ્તં પરમેશ્વરાત્ ॥ ૯॥

દૃષ્ટોઽસૌ વાસુદેવેન કૃષ્ણેનાક્લિષ્ટકર્મણા ।
ધૌમ્યાગ્રજસ્તતસ્તેન કૃત્વા પાશુપતં વ્રતમ્ ॥ ૧૦॥

પ્રાપ્તં ચ પરમં જ્ઞાનમિતિ પ્રાગેવ શુશ્રુમ ।
કથં સ લબ્ધવાન્ કૃષ્ણો જ્ઞાનં પાશુપતં પરમ્ ॥ ૧૧॥

વાયુરુવાચ ।
સ્વેચ્છયા હ્યવતીર્ણોઽપિ વાસુદેવઃ સનાતનઃ ।
નિન્દયન્નિવ માનુષ્યં દેહશુદ્ધિં ચકાર સઃ ॥ ૧૨॥

પુત્રાર્થં હિ તપસ્તપ્તું ગતસ્તસ્ય મહામુનેઃ ।
આશ્રમં મુનિભિર્દૃષ્ટં દૃષ્ટવાંસ્તત્ર વૈ મુનિમ્ ॥ ૧૩॥

ભસ્માવદાતં સર્વાઙ્ગં ત્રિપુણ્ડ્રાઙ્કિતમસ્તકમ્ ।
રુદ્રાક્ષમાલાભરણં જટામણ્ડલમણ્ડિતમ્ ॥ ૧૪॥

તચ્છિષ્યભૂતૈર્મુનિભિઃ શાસ્ત્રૈર્વેદમિવાવૃતમ્ ।
શિવધ્યાનરતં શાન્તમુપમન્યું મહાદ્યુતિમ્ ॥ ૧૫॥

નમશ્ચકાર તં દૃષ્ટ્વા હૃષ્ટસર્વતનૂરુહઃ ।
બહુમાનેન કૃષ્ણોઽસૌ ત્રિઃ કૃત્વા તુ પ્રદક્ષિણામ્ ।
સ્તુતિં ચકાર સુપ્રીત્યા નતસ્કન્ધઃ કૃતાઞ્જલિઃ ॥ ૧૬॥

તસ્યાવલોકનાદેવ મુનેઃ કૃષ્ણસ્ય ધીમતઃ ।
નષ્ટમાસીન્મલં સર્વં માયાજં કાર્મમેવ ચ ॥ ૧૭॥

તતઃ ક્ષીણમલં કૃષ્ણમુપમન્યુર્યથાવિધિ ।
ભસ્મનોદ્ધૂલ્ય તં મન્ત્રૈરગ્નિરિત્યાદિભિઃ ક્રમાત્ ॥ ૧૮॥

અથ પાશુપતં સાક્ષાદ્ વ્રતં દ્વાદશમાસિકમ્ ।
કારયિત્વા મુનિસ્તસ્મૈ પ્રદદૌ જ્ઞાનમુત્તમમ્ ॥ ૧૯॥

તદાપ્રભૃતિ તં કૃષ્ણં મુનયશ્શંસિતવ્રતાઃ ।
દિવ્યાઃ પાશુપતાઃ સર્વે પરિવૃત્યોપતસ્થિરે ॥ ૨૦॥

તતો ગુરુનિયોગાદ્ વૈ કૃષ્ણઃ પરમશક્તિમાન્ ।
તપશ્ચકાર પુત્રાર્થં સામ્બમુદ્દિશ્ય શઙ્કરમ્ ॥ ૨૧॥

તપસો તેન વર્ષાન્તે દૃષ્ટોઽસૌ પરમેશ્વરઃ ।
શ્રિયા પરમયા યુક્તઃ સામ્બશ્ચ સગણઃ શિવઃ ॥ ૨૨॥

વરાર્થમાવિર્ભૂતસ્ય હરસ્ય સુભગાકૃતેઃ ।
સ્તુતિં ચકાર નત્વાઽસૌ કૃષ્ણઃ સમ્યક્ કૃતાઞ્જલિઃ ॥ ૨૩॥

સામ્બેન સગણેનાપિ લબ્ધવાન્ યુત્રમાત્મનઃ ।
તપસા તુષ્ટચિત્તેન દત્તં વિષ્ણોઃ શિવેન વૈ ॥ ૨૪॥

યસ્માત્સામ્બો મહાદેવઃ પ્રદદૌ પુત્રમાત્મનઃ ।
તસ્માજ્જામ્બવતીસૂનું સામ્બં ચક્રે સ નામતઃ ॥ ૨૫॥

તદેતત્કથિતં સર્વં કૃષ્ણસ્યામિતકર્મણઃ ।
મહર્ષેર્જ્ઞાનલાભશ્ચ પુત્રલાભશ્ચ શઙ્કરાત્ ॥ ૨૬॥

ય ઇદં કીર્તયેન્નિત્યં શ‍ૃણુયાચ્છ્રાવયેત્તથા ।
સ વિષ્ણોર્જ્ઞાનમાસાદ્ય તેનૈવ સહ મોદતે ॥ ૨૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે કૃષ્ણપુત્રપ્રાપ્તિવર્ણનં નમ પ્રથમોઽધ્યાયઃ ॥ ૭.૨.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

## ૭.૨.૨. દ્વિતીયોઽધ્યાયઃ । શિવમાહાત્મ્યવર્ણનમ્ ।

ઋષય ઊચુઃ ।
કિં તત્પાશુપતં જ્ઞાનં કથં પશુપતિઃ શિવઃ ।
કથં ધૌમ્યાગ્રજઃ પૃષ્ટઃ કૃષ્ણેનાક્લિષ્ટકર્મણા ॥ ૧॥

એતત્સર્વં સમાચક્ષ્વ વાયો શઙ્કરવિગ્રહ ।
ત્વત્સમો ન હિ વક્તાસ્તિ ત્રૈલોક્યેષ્વપરઃ પ્રભુઃ ॥ ૨॥

સૂત ઉવાચ ।

ઇત્યાકર્ણ્ય વચસ્તેષાં મહર્ષીણાં પ્રભઞ્જનઃ ।
સંસ્મૃત્ય શિવમીશાનં પ્રવક્તુમુપચક્રમે ॥ ૩॥

વાયુરુવાચ ।
પુરા સાક્ષાત્ મહેશેન શ્રીકણ્ઠાખ્યેન મન્દરે ।
દેવ્યૈ દેવેન કથિતં જ્ઞાનં પાશુપતં પરમ્ ॥ ૪॥

તદેવ પૃષ્ટં કૃષ્ણેન વિષ્ણુના વિશ્વયોનિના ।
પશુત્વં ચ સુરાદીનાં પતિત્વં ચ શિવસ્ય ચ ॥ ૫॥

યથોપદિષ્ટં કૃષ્ણાય મુનિના હ્યુપમન્યુના ।
તથા સમાસતો વક્ષ્યે તચ્છૃણુધ્વમતન્દ્રિતાઃ ॥ ૬॥

પુરોપમન્યુમાસીનં વિષ્ણુઃકૃષ્ણવપુર્ધરઃ ।
પ્રણિપત્ય યથાન્યાયમિદં વચનમબ્રવીત્ ॥ ૭॥

શ્રીકૃષ્ણ ઉવાચ ।
ભગવઞ્છ્રોતુમિચ્છામિ દેવ્યૈ દેવેન ભાષિતમ્ ।
દિવ્યં પાશુપતં જ્ઞાનં વિભૂતિં વાસ્ય કૃત્સ્નશઃ ॥ ૮॥

કથં પશુપતિર્દેવઃ પશવઃ કે પ્રકીર્તિતાઃ ।
કૈઃ પાશૈસ્તે નિબધ્યન્તે વિમુચ્યન્તે ચ તે કથમ્ ॥ ૯॥

ઇતિ સઞ્ચોદિતઃ શ્રીમાનુપમન્યુર્મહાત્મના ।
પ્રણમ્ય દેવં દેવીં ચ પ્રાહ પુષ્ટો યથા તથા ॥ ૧૦॥

ઉપમન્યુરુવાચ ।
બ્રહ્માદ્યાઃ સ્થાવરાન્તાશ્ચ દેવદેવસ્ય શૂલિનઃ ।
પશવઃ પરિકીર્ત્યન્તે સંસારવશવર્તિનઃ ॥ ૧૧॥

તેષાં પતિત્વાદ્દેવેશઃ શિવઃ પશુપતિઃ સ્મૃતઃ ।
મલમાયાદિભિઃ પાશૈઃ સ બધ્નાતિ પશૂન્ પતિઃ ॥ ૧૨॥

સ એવ મોચકસ્તેષાં ભક્ત્યા સમ્યગુપાસિતઃ ।
ચતુર્વિંશતિતત્ત્વાનિ માયાકર્મગુણા અમી ॥ ૧૩॥

વિષયા ઇતિ કથ્યન્તે પાશા જીવનિબન્ધનાઃ ।
બ્રહ્માદિસ્તમ્બપર્યન્તાન્ પશૂન્ બદ્ધ્વા મહેશ્વરઃ ॥ ૧૪॥

પાશૈરેતૈઃ પતિર્દેવઃ કાર્યં કારયતિ સ્વકમ્ ।

તસ્યાજ્ઞયા મહેશસ્ય પ્રકૃતિઃ પુરુષોચિતામ્ ॥ ૧૫॥

બુદ્ધિં પ્રસૂતે સા બુદ્ધિરહઙ્કારમહઙ્કૃતિઃ ।
ઇન્દ્રિયાણિ દશૈકં ચ તન્માત્રાપઞ્ચકં તથા ॥ ૧૬॥

શાસનાદ્દેવદેવસ્ય શિવસ્ય શિવદાયિનઃ ।
તન્માત્રાણ્યપિ તસ્યૈવ શાસનેન મહીયસા ॥ ૧૭॥

મહાભૂતાન્યશેષાણિ ભાવયન્ત્યનુપૂર્વશઃ ।
બ્રહ્માદીનાં તૃણાન્તાનાં દેહિનાં દેહસઙ્ગતિમ્ ॥ ૧૮॥

મહાભૂતાન્યશેષાણિ જનયન્તિ શિવાજ્ઞયા ।
અધ્યવસ્યતિ વૈ બુદ્ધિરહઙ્કારોભિમન્યતે ॥ ૧૯॥

ચિત્તં ચેતયતે ચાપિ મનઃ સઙ્કલ્પયત્યપિ ।
શ્રોત્રાદીનિ ચ ગૃહ્ણન્તિ શબ્દાદીન્વિષયાન્ પૃથક્ ॥ ૨૦॥

સ્વાનેવ નાન્યાન્ દેવસ્ય દિવ્યેનાજ્ઞાબલેન વૈ ।
વાગાદીન્યપિ યાન્યાસંસ્તાનિ કર્મેન્દ્રિયાણિ ચ ॥ ૨૧॥

યથાસ્વં કર્મ કુર્વન્તિ નાન્યત્કિઞ્ચિદ્ શિવાજ્ઞયા ।
શબ્દાદયોઽપિ ગૃહ્યન્તે ક્રિયન્તે વચનાદયઃ ॥ ૨૨॥

અવિલઙ્ઘ્યા હિ સર્વેષામાજ્ઞા શમ્ભોર્ગરીયસી ।
અવકાશમશેષાણાં ભૂતાનાં સમ્પ્રયચ્છતિ ॥ ૨૩॥

આકાશઃ પરમેશસ્ય શાસનાદેવ સર્વગઃ ।
પ્રાણાદ્યૈશ્ચ તથા નામભેદૈરન્તર્બહિર્જગત્ ॥ ૨૪॥

બિભર્તિ સર્વં શર્વસ્ય શાસનેન પ્રભઞ્જનઃ ।
હવ્યં વહતિ દેવાનાં કવ્યં કવ્યાશિનામપિ ॥ ૨૫॥

પાકાદ્યં ચ કરોત્યગ્નિઃ પરમેશ્વરશાસનાત્ ।
સઞ્જીવનાદ્યં સર્વસ્ય કુર્વત્યાપસ્તદાજ્ઞયા ॥ ૨૬॥

વિશ્વમ્ભરા જગન્નિત્યં ધત્તે વિશ્વેશ્વરાજ્ઞયા ।
દેવાન્ યાત્યસુરાન્ હન્તિ ત્રિલોકમભિરક્ષતિ ॥ ૨૭॥

આજ્ઞયા તસ્ય દેવેન્દ્રઃ સર્વૈર્દેવૈરલઙ્ઘ્યયા ।
આધિપત્યમપાં નિત્યં કુરુતે વરુણઃ સદા ॥ ૨૮॥

પાશૈર્બધ્નાતિ ચ યથા દણ્ડ્યાંસ્તસ્યૈવ શાસનાત્ ।
દદાતિ નિત્યં યક્ષેન્દ્રો દ્રવિણં દ્રવિણેશ્વરઃ ॥ ૨૯॥

પુણ્યાનુરૂપં ભૂતેભ્યઃ પુરુષસ્યાનુશાસનાત્ ।
કરોતિ સમ્પદઃ શશ્વત્ જ્ઞાનં ચાપિ સુમેધસામ્ ॥ ૩૦॥

નિગ્રહં ચાપ્યસાધૂનામીશાનઃ શિવશાસનાત્ ।
ધત્તે તુ ધરણીં મૂર્ધ્ના શેષઃ શિવનિયોગતઃ ॥ ૩૧॥

યામાહુસ્તામસીં રૌદ્રીં મૂર્તિમન્તકરીં હરેઃ ।
સૃજત્યશેષમીશસ્ય શાસનાચ્ચતુરાનનઃ ॥ ૩૨॥

અન્યાભિર્મૂર્તિભિઃ સ્વાભિઃ પાતિ ચાન્તે નિહન્તિ ચ ।
વિષ્ણુઃ પાલયતે વિશ્વં કાલકાલસ્ય શાસનાત્ ॥ ૩૩॥

સૃજતે ત્રસતે ચાપિ સ્વકાભિસ્તનુભિસ્ત્રિભિઃ ।
હરત્યન્તે જગત્સર્વં હરસ્તસ્યૈવ શાસનાત્ ॥ ૩૪॥

સૃજત્યપિ ચ વિશ્વાત્મા ત્રિધા ભિન્નસ્તુ રક્ષતિ ।
કાલઃ કરોતિ સકલં કાલસ્સંહરતિ પ્રજાઃ ॥ ૩૫॥

કાલઃ પાલયતે વિશ્વં કાલકાલસ્ય શાસનાત્ ।
ત્રિભિરંશૈર્જગદ્બિભ્રત્તેજોભિર્વૃષ્ટિમાદિશન્ ॥ ૩૬॥

દિવિ વર્ષત્યસૌ ભાનુર્દેવદેવસ્ય શાસનાત્ ।
પુષ્ણાત્યોષધિજાતાનિ ભૂતાન્યાહ્લાદયત્યપિ ॥ ૩૭॥

દેવૈશ્ચ પીયતે ચન્દ્રશ્ચન્દ્રભૂષણશાસનાત્ ।
આદિત્યા વસવો રુદ્રા અશ્વિનૌ મરુતસ્તથા ॥ ૩૮॥

ખેચરા ઋષયસ્સિદ્ધા ભોગિનો મનુજા મૃગાઃ ।
પશવઃ પક્ષિણશ્ચૈવ કીટાદ્યાઃ સ્થાવરાણિ ચ ॥ ૩૯॥

નદ્યસ્સમુદ્રા ગિરયઃ કાનનાનિ સરાંસિ ચ ।
વેદાઃ સાઙ્ગાશ્ચ શાસ્ત્રાણિ મન્ત્રસ્તોમમખાદયઃ ॥ ૪૦॥

કાલાગ્ન્યાદિશિવાન્તાનિ ભુવનાનિ સહાધિપૈઃ ।
બ્રહ્માણ્ડાન્યપ્યસઙ્ખ્યાનિ તેષામાવરણાનિ ચ ॥ ૪૧॥

વર્તમાનાન્યતીતાનિ ભવિષ્યન્ત્યપિ કૃત્સ્નશઃ ।
દિશશ્ચ વિદિશશ્ચૈવ કાલભેદાઃ કલાદયઃ ॥ ૪૨॥

યચ્ચ કિઞ્ચિજ્જગત્યસ્મિન્ દૃશ્યતે શ્રૂયતેऽપિ વા ।
તત્સર્વં શઙ્કરસ્યાજ્ઞાબલેન સમધિષ્ઠિતમ્ ॥ ૪૩॥

આજ્ઞાબલાત્તસ્ય ધરા સ્થિતેહ
ધરાધરા વારિધરાઃ સમુદ્રાઃ ।
જ્યોતિર્ગણાઃ શક્રમુખાશ્ચ દેવાઃ
સ્થિરં ચિરં વા ચિદચિદ્યદસ્તિ ॥ ૪૪॥

ઉપમન્યુરુવાચ ।
અત્યાશ્ચર્યમિદં કૃષ્ણ શમ્ભોરમિતકર્મણઃ ।
આજ્ઞાકૃતં શ‍ૃણુષ્વૈતચ્છ્રુતં શ્રુતિમુખે મયા ॥ ૪૫॥

પુરા કિલ સુરાઃ સેન્દ્રા વિવદન્તઃ પરસ્પરમ્ ।
અસુરાન્સમરે જિત્વા જેતાહમહમિત્યુત ॥ ૪૬॥

તદા મહેશ્વરસ્તેષાં મધ્યતો વરવેષધૃક્ ।
સ્વલક્ષણૈર્વિહીનાઙ્ગઃ સ્વયં યક્ષ ઇવાભવત્ ॥ ૪૭॥

સ તાનાહ સુરાનેકં તૃણમાદાય ભૂતલે ।
ય એતદ્વિકૃતં કર્તું ક્ષમતે સ તુ દૈત્યજિત્ ॥ ૪૮॥

યક્ષસ્ય વચનં શ્રુત્વા વજ્રપાણિઃ શચીપતિઃ ।
કિઞ્ચિત્ ક્રુદ્ધો વિહસ્યૈનં તૃણમાદાતુમુદ્યતઃ ॥ ૪૯॥

ન તત્તૃણમુપદાતું મનસાપિ ચ શક્યતે ।
યથા તથાપિ તચ્છેત્તું વજ્રં વજ્રધરોऽસૃજત્ ॥ ૫૦॥

તદ્વજ્રં નિજવજ્રેણ સંસૃષ્ટમિવ સર્વતઃ ।
તૃણેનાભિહતં તેન તિર્યગગ્રં પપાત હ ॥ ૫૧॥

તતશ્ચાન્યે સુસંરબ્ધા લોકપાલા મહાબલાઃ ।
સસૃજુસ્તૃણમુદ્દિશ્ય સ્વાયુધાનિ સહસ્રશઃ ॥ ૫૨॥

પ્રજજ્વાલ મહાવહ્નિઃ પ્રચણ્ડઃ પવનો વવૌ ।
પ્રવૃદ્ધોऽપામ્પતિર્યદ્વત્પ્રલયે સમુપસ્થિતે ॥ ૫૩॥

એવં દેવૈઃ સમારબ્ધં તૃણમુદ્દિશ્ય યત્નતઃ ।
વ્યર્થમાસીદહો કૃષ્ણ યક્ષસ્યાત્મબલેન વૈ ॥ ૫૪॥

તદાહ યક્ષં દેવેન્દ્રઃ કો ભવાનિત્યમર્ષિતઃ ।
તતઃ સ પશ્યતામેવ તેષામન્તરધાદથ ॥ ૫૫॥

તદન્તરે હૈમવતી દેવી દિવ્યવિભૂષણા ।
આવિરાસીન્નભોરઙ્ગે શોભમાના શુચિસ્મિતા ॥ ૫૬॥

તાં દૃષ્ટ્વા વિસ્મયાવિષ્ટા દેવાઃ શક્રપુરોગમાઃ ।
પ્રણમ્ય યક્ષં પપ્રચ્છુઃ કોઽસૌ યક્ષો વિલક્ષણઃ ॥ ૫૭॥

સાઽબ્રવીત્સસ્મિતં દેવી સ યુષ્માકમગોચરઃ ।
તેનેદં ભ્રમ્યતે ચક્રં સંસારાખ્યં ચરાચરમ્ ॥ ૫૮॥

તેનાદૌ ક્રિયતે વિશ્વં તેન સંહ્રિયતે પુનઃ ।
ન તન્નિયન્તા કશ્ચિત્ સ્યાત્તેન સર્વં નિયમ્યતે ॥ ૫૯॥

ઇત્યુક્ત્વા સા મહાદેવી તત્રૈવાન્તરધત્ત વૈ ।
દેવાશ્ચ વિસ્મિતાઃ સર્વે તાં પ્રણમ્ય દિવં યયુઃ ॥ ૬૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવમાહાત્મ્યવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૭.૨.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩. તૃતીયોઽધ્યાયઃ । ઋષ્ણાયોપમન્યોરુપદેશવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
શ‌ૃણુ કૃષ્ણ મહેશસ્ય શિવસ્ય પરમાત્મનઃ ।
મૂર્ત્યાત્મભિસ્તતં કૃત્સ્નં જગદેતચ્ચરાચરમ્ ॥ ૧॥

સ શિવઃ સર્વમેવેદં સ્વકીયાભિશ્ચ મૂર્તિભિઃ ।
અધિતિષ્ઠત્યમેયાત્મા હ્યેતત્સર્વમનુસ્મૃતમ્ ॥ ૨॥

બ્રહ્મા વિષ્ણુસ્તથા રુદ્રો મહેશાનઃ સદાશિવઃ ।
મૂર્તયસ્તસ્ય વિજ્ઞેયા યાભિર્વિશ્વમિદં તતમ્ ॥ ૩॥

અથાન્યાશ્ચાપિ તનવઃ પઞ્ચ બ્રહ્મસમાહ્વયાઃ ।
તનૂભિસ્તાભિરાવ્યાપ્તમિહ કિઞ્ચિન્ન વિદ્યતે ॥ ૪॥

ઈશાનઃ પુરુષોઽઘોરો વામઃ સદ્યસ્તથૈવ ચ ।
બ્રહ્માણ્યેતાનિ દેવસ્ય મૂર્તયઃ પઞ્ચ વિશ્રુતાઃ ॥ ૫॥

ઈશાનાખ્યા તુ યા તસ્ય મૂર્તિરાદ્યા ગરીયસી ।
ભોક્તારં પ્રકૃતેઃ સાક્ષાત્ ક્ષેત્રજ્ઞમધિતિષ્ઠતિ ॥ ૬॥

સ્થાણોસ્તત્પુરુષાખ્યા યા મૂર્તિર્મૂર્તિમતઃ પ્રભોઃ ।
ગુણાશ્રયાત્મકં ભોગ્યમવ્યક્તમધિતિષ્ઠતિ ॥ ૭॥

ધર્માદ્યષ્ટાઙ્ગસંયુક્તં બુદ્ધિતત્ત્વં પિનાકિનઃ ।
અધિતિષ્ઠત્યઘોરાખ્યા મૂર્તિરત્યન્તપૂજિતા ॥ ૮॥

વામદેવાહ્વયાં મૂર્તિં મહાદેવસ્ય વેધસઃ ।
અહઙ્કૃતેરધિષ્ઠાત્રીમાહુરાગમવેદિનઃ ॥ ૯॥

સદ્યો જાતાહ્વયાં મૂર્તિં શમ્ભોરમિતવર્ચસઃ ।
માનસઃ સમધિષ્ઠાત્રીં મતિમન્તઃ પ્રચક્ષતે ॥ ૧૦॥

શ્રોત્રસ્ય વાચઃ શબ્દસ્ય વિભોર્વ્યોમ્નસ્તથૈવ ચ ।
ઈશ્વરીમીશ્વરસ્યેમામીશાખ્યાં હિ વિદુર્બુધાઃ ॥ ૧૧॥

ત્વક્પાણિસ્પર્શવાયૂનામીશ્વરીં મૂર્તિમૈશ્વરીમ્ ।
પુરુષાખ્યં વિદુઃ સર્વે પુરાણાર્થવિશારદાઃ ॥ ૧૨॥

ચક્ષુષશ્ચરણસ્યાપિ રૂપસ્યાગ્નેસ્તથૈવ ચ ।
અઘોરાખ્યામધિષ્ઠાત્રીં મૂર્તિમાહુર્મનીષિણઃ ॥ ૧૩॥

રમનાયાશ્ચ પાયોશ્ચ રસસ્યાપાં તથૈવ ચ ।
ઈશ્વરીં વામદેવાખ્યાં મૂર્તિં તન્નિરતાં વિદુઃ ॥ ૧૪॥

ઘ્રાણસ્ય ચૈવોપસ્થસ્ય ગન્ધસ્ય ચ ભુવસ્તથા ।
સદ્યોજ્ઞાતાહ્વયાં મૂર્તિમીશ્વરીં સમ્પ્રચક્ષતે ॥ ૧૫॥

મૂર્તયઃ પઞ્ચ દેવસ્ય વન્દનીયાઃ પ્રયત્નતઃ ।
શ્રેયોઽર્થિભિર્નરૈર્નિત્યં શ્રેયસામેકહેતવઃ ॥ ૧૬॥

તસ્ય દેવાદિદેવસ્ય મૂર્ત્યષ્ટકમયં જગત્ ।
તસ્મિન્ વ્યાપ્ય સ્થિતં વિશ્વં સૂત્રે મણિગણા ઇવ ॥ ૧૭॥

શર્વો ભવસ્તથા રુદ્ર ઉગ્રો ભીમઃ પશોઃ પતિઃ ।
ઈશાનશ્ચ મહાદેવો મૂર્તયશ્ચાષ્ટ વિશ્રુતાઃ ॥ ૧૮॥

ભૂમ્યમ્ભોઽગ્નિમરુદ્વ્યોમક્ષેત્રજ્ઞાર્કનિશાકરાઃ ।
અધિષ્ઠિતા મહેશસ્ય શર્વાદ્યૈરષ્ટમૂર્તિભિઃ ॥ ૧૯॥

ચરાચરાત્મકં વિશ્વં ધત્તે વિશ્વમ્ભરાત્મિકા ।
શાર્વી શિવાહ્વયા મૂર્તિરિતિ શાસ્ત્રસ્ય નિશ્ચયઃ ॥ ૨૦॥

સઞ્જીવનં સમસ્તસ્ય જગતઃ સલિલાત્મિકાઞ્ ।
ભાવીતિ ગીયતે મૂર્તિભવસ્ય પરમાત્મનઃ ॥ ૨૧॥

બહિરન્તર્ગતા વિશ્વં વ્યાપ્ય તેજોમયી શુભા ।
રૌદ્રી રુદ્રાવ્યયા મૂર્તિરાસ્થિતા ઘોરરૂપિણી ॥ ૨૨॥

સ્પન્દયત્યનિલાત્મેદં બિભર્તિ સ્પન્દતે સ્વયમ્ ।
ઔગ્રીતિ કથ્યતે સદ્ભિર્મૂર્તિરુગ્રસ્ય વેધસઃ ॥ ૨૩॥

સર્વાવકાશદા સર્વવ્યાપિકા ગગનાત્મિકા ।
મૂર્તિર્ભીમસ્ય ભીમાખ્યા ભૂતવૃન્દસ્ય ભેદિકા ॥ ૨૪॥

સર્વાત્મનામધિષ્ઠાત્રી સર્વક્ષેત્રનિવાસિની ।
મૂર્તિઃ પશુપતેર્જ્ઞેયા પશુપાશનિકૃન્તની ॥ ૨૫॥

દીપયન્તી જગત્સર્વં દિવાકરસમાહ્વયા ।
ઈશાનાખ્યા મહેશસ્ય મૂર્તિર્દિવિ વિસર્પતિ ॥ ૨૬॥

આપ્યાયયતિ યો વિશ્વમમૃતાંશુર્નિશાકરઃ ।
મહાદેવસ્ય સા મૂર્તિર્મહાદેવસમાહ્વયા ॥ ૨૭॥

આત્મા તસ્યાષ્ટમી મૂર્તિઃ શિવસ્ય પરમાત્મનઃ ।
વ્યાપિકેતરમૂર્તીનાં વિશ્વં તસ્માત્ શિવાત્મકમ્ ॥ ૨૮॥

વૃક્ષસ્ય મૂલસેકેન શાખાઃ પુષ્યન્તિ વૈ યથા ।
શિવસ્ય પૂજયા તદ્વત્પુષ્યત્યસ્ય વપુર્જગત્ ॥ ૨૯॥

સર્વાભયપ્રદાનં ચ સર્વાનુગ્રહણં તથા ।
સર્વોપકારકરણં શિવસ્યારાધનં વિદુઃ ॥ ૩૦॥

યથેહ પુત્રપૌત્રાદેઃ પ્રીત્યા પ્રીતો ભવેત્પિતા ।
તથા સર્વસ્ય સમ્પ્રીત્યા પ્રીતો ભવતિ શઙ્કરઃ ॥ ૩૧॥

દેહિનો યસ્ય કસ્યાપિ ક્રિયતે યદિ નિગ્રહઃ ।

અનિષ્ટમષ્ટમૂર્તેસ્તત્કૃતમેવ ન સંશયઃ ॥ ૩૨॥

અષ્ટમૂર્ત્યાત્મના વિશ્વમધિષ્ઠાય સ્થિતં શિવમ્ ।
ભજસ્વ સર્વભાવેન રુદ્રં પરમકારણમ્ ॥ ૩૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે કૃષ્ણાયોપમન્યોરુપદેશવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૭.૨.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

## ૭.૨.૪. ચતુર્થોઽધ્યાયઃ । ગૌરીશઙ્કરવિભૂતિયોગઃ ।

શ્રીકૃષ્ણ ઉવાચ ।
ભગવન્ પરમેશસ્ય શર્વસ્યામિતતેજસઃ ।
મૂર્તિભિર્વિશ્વમેવેદં યથા વ્યાપ્તં તથા શ્રુતમ્ ॥ ૧॥

અથૈતત્ જ્ઞાતુમિચ્છામિ યાથાત્મ્યં પરમેશયોઃ ।
સ્ત્રીપુમ્ભાવાત્મકં ચેદં તાભ્યાં કથમધિષ્ઠિતમ્ ॥ ૨॥

ઉપમન્યુરુવાચ ।
શ્રીમદ્વિભૂતિં શિવયોર્યાથાત્મ્યં ચ સમાસતઃ ।
વક્ષ્યે તદ્વિસ્તરાદ્વક્તું ભવેનાપિ ન શક્યતે ॥ ૩॥

શક્તિ સાક્ષાન્મહાદેવી મહાદેવશ્ચ શક્તિમાન્ ।
તયોર્વિભૂતિલેશો વૈ સર્વમેતચ્ચરાચરમ્ ॥ ૪॥

વસ્તુ કિઞ્ચિદચિદ્રૂપં કિઞ્ચિદ્વસ્તુ ચિદાત્મકમ્ ।
દ્વયં શુદ્ધમશુદ્ધં ચ પરં ચાપરમેવ ચ ॥ ૫॥

યત્સંસરતિ ચિચ્ચક્રમચિચ્ચક્રસમન્વિતમ્ ।
તદેવાશુદ્ધમપરમિતરં તુ પરં શુભમ્ ॥ ૬॥

અપરં ચ પરં ચૈવ દ્વયં ચિદચિદાત્મકમ્ ।
શિવસ્ય ચ શિવાયાશ્ચ સ્વામ્યં ચૈતત્સ્વભાવતઃ ॥ ૭॥

શિવયોર્વૈ વશે વિશ્વં ન વિશ્વસ્ય વશે શિવૌ ।
ઈશિતવ્યમિદં યસ્માત્તસ્માદ્વિશ્વેશ્વરૌ શિવૌ ॥ ૮॥

યથા શિવસ્તથા દેવી યથા દેવી તથા શિવઃ ।

નાનયોરન્તરં વિદ્યાચ્ચન્દ્રચન્દ્રિકયોરિવ ॥ ૯॥

ચન્દ્રો ન ખલુ ભાત્યેષ યથા ચન્દ્રિકયા વિના ।
ન ભાતિ વિદ્યમાનોઽપિ તથા શક્ત્યા વિના શિવઃ ॥ ૧૦॥

પ્રભયા હિ વિના યદ્વદ્ભાનુરેષ ન વિદ્યતે ।
પ્રભા ચ ભાનુના તેન સુતરાં તદુપાશ્રયા ॥ ૧૧॥

એવં પરસ્પરાપેક્ષા શક્તિશક્તિમતોઃ સ્થિતા ।
ન શિવેન વિના શક્તિર્ન શક્ત્યા ચ વિના શિવઃ ॥ ૧૨॥

શક્તૌ યયા શિવો નિત્યં ભક્તૌ મુક્તૌ ચ દેહિનામ્ ।
આદ્યા સૈકા પરા શક્તિશ્ચિન્મયી શિવસંશ્રયા ॥ ૧૩॥

યામાહુરખિલેશસ્ય તૈસ્તૈરનુગુણૈર્ગુણૈઃ ।
સમાનધર્મિણીમેવ શિવસ્ય પરમાત્મનઃ ॥ ૧૪॥

સૈકા પરા ચ ચિદ્રૂપા શક્તિઃ પ્રસવધર્મિણી ।
વિભજ્ય બહુધા વિશ્વં વિદધાતિ શિવેચ્છયા ॥ ૧૫॥

સા મૂલપ્રકૃતિર્માયા ત્રિગુણા ચ ત્રિધા સ્મૃતા ।
શિવયા ચ વિપર્યસ્તં યયા તતમિદં જગત્ ॥ ૧૬॥

એકધા ચ દ્વિધા ચૈવ તથા શતસહસ્રધા ।
શક્તયઃ ખલુ ભિદ્યન્તે બહુધા વ્યવહારતઃ ॥ ૧૭॥

શિવેચ્છયા પરાશક્તિઃ શિવતત્ત્વૈકતાં ગતા ।
તતઃ પરિસ્ફુરત્યાદૌ સર્ગે તૈલં તિલાદિવ ॥ ૧૮॥

તતઃ ક્રિયાખ્યયા શક્ત્યા શક્તૌ શક્તિમદુત્થયા ।
તસ્યાં વિક્ષોભ્યમાણાયામાદૌ નાદઃ સમુદ્બભૌ ॥ ૧૯॥

નાદાદ્વિનિઃસૃતો બિન્દુર્બિન્દોર્દેવઃ સદાશિવઃ ।
તસ્માન્ મહેશ્વરો જાતઃ શુદ્ધવિદ્યા મહેશ્વરાત્ ॥ ૨૦॥

સા વાચામીશ્વરી શક્તિર્વાગીશાખ્યા હિ શૂલિનઃ ।
યા સા વર્ણસ્વરૂપેણ માતૃકેઽપિ વિજૃમ્ભતે ॥ ૨૧॥

અથાનન્તસમાવેશાન્માયા કાલમવાસૃજત્ ।
નિયતિં ચ કલાં વિદ્યાં કલાતો રાગપૂરુષૌ ॥ ૨૨॥

માયાતઃ પુનરેવાભૂદવ્યક્તં ત્રિગુણાત્મકમ્ ।
ત્રિગુણાચ્ચ તતોઽવ્યક્તાદ્વિભક્તાઃ સ્યુસ્ત્રયો ગુણાઃ ॥ ૨૩॥

સત્ત્વં રજસ્તમશ્ચેતિ યૈર્વ્યાપ્તમખિલં જગત્ ।
ગુણેભ્યઃ ક્ષોભ્યમાણેભ્યો ગુણેશાખ્યાસ્ત્રિમૂર્તયઃ ॥ ૨૪॥

અભવન્ મહદાદીનિ તત્ત્વાનિ ચ યથાક્રમમ્ ।
તેભ્યઃ સ્યુરણ્ડપિણ્ડાનિ ત્વસઙ્ખ્યાનિ શિવાજ્ઞયા ।
અધિષ્ઠિતાન્યનન્તાદ્યૈર્વિદ્યેશૈશ્ચક્રવર્તિભિઃ ॥ ૨૫॥

શરીરાન્તરભેદેન શક્તેર્ભેદાઃ પ્રકીર્તિતાઃ ।
નાનારૂપાસ્તુ વિજ્ઞેયાઃ સ્થૂલસૂક્ષ્મવિભેદતઃ ॥ ૨૬॥

રુદ્રસ્ય રૌદ્રી સા શક્તિર્વિષ્ણોર્વૈ વૈષ્ણવી મતા ।
બ્રહ્માણી બ્રહ્મણઃ પ્રોક્તા ચેન્દ્રસ્યૈન્દ્રીતિ કથ્યતે ॥ ૨૭॥

કિમત્ર બહુનોક્તેન યદ્વિશ્વમિતિ કીર્તિતમ્ ।
શક્ત્યાત્મનૈવ તદ્વ્યાપ્તં યથા દેહેઽન્તરાત્મના ॥ ૨૮॥

તસ્માચ્છક્તિમયં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
કલા યા પરમા શક્તિઃ કથિતા પરમાત્મનઃ ॥ ૨૯॥

એવમેષા પરા શક્તિરીશ્વરેચ્છાનુયાયિની ।
સ્થિરં ચરં ચ યદ્વિશ્વં સૃજતીતિ વિનિશ્ચયઃ ॥ ૩૦॥

જ્ઞાનક્રિયા ચિકીર્ષાભિસ્તિસૃભિઃ સ્વાત્મશક્તિભિઃ ।
શક્તિમાનીશ્વરઃ શશ્વત્ વિશ્વં વ્યાપ્યાધિતિષ્ઠતિ ॥ ૩૧॥

ઇદમિત્થમિદં નેત્થં ભવેદિત્યેવમાત્મિકા ।
ઇચ્છાશક્તિર્મહેશસ્ય નિત્યા કાર્યનિયામિકા ॥ ૩૨॥

જ્ઞાનશક્તિસ્તુ તત્કાર્યં કરણં કારણં તથા ।
પ્રયોજનં ચ તત્ત્વેન બુદ્ધિરૂપાધ્યવસ્યતિ ॥ ૩૩॥

યથેપ્સિતં ક્રિયાશક્તિર્યથાધ્યવસિતં જગત્ ।
કલ્પયત્યખિલં કાર્યં ક્ષણાત્સઙ્કલ્પરૂપિણી ॥ ૩૪॥

યથાશક્તિ ત્રયોત્થાનં શક્તિપ્રસવધર્મિણી ।
શક્ત્યા પરમયા નુન્ના પ્રસૂતે સકલં જગત્ ॥ ૩૫॥

એવં શક્તિસમાયોગાત્ શક્તિમાનુચ્યતે શિવઃ ।

શક્તિશક્તિમદુત્થં તુ શાક્તં શૈવમિદં જગત્ ॥ ૩૬॥

યથા ન જાયતે પુત્રઃ પિતરં માતરં વિના ।
તથા ભવં ભવાનીં ચ વિના નૈતચ્ચરાચરમ્ ॥ ૩૭॥

સ્ત્રીપુંસપ્રભવં વિશ્વં સ્ત્રીપુંસાત્મકમેવ ચ
સ્ત્રીપુંસયોર્વિભૂતિશ્ચ સ્ત્રીપુંસાભ્યામધિષ્ઠિતમ્ ॥ ૩૮॥

પરમાત્મા શિવઃ પ્રોક્તઃ શિવા સા ચ પ્રકીર્તિતા
શિવઃ સદાશિવઃ પ્રોક્તઃ શિવા સા ચ મનોન્મની ।
શિવો મહેશ્વરો જ્ઞેયઃ શિવા માયેતિ કથ્યતે ॥ ૩૯॥

પુરુષઃ પરમેશાનઃ પ્રકૃતિઃ પરમેશ્વરી ।
રુદ્રો મહેશ્વરઃ સાક્ષાદ્ રુદ્રાણી રુદ્રવલ્લભા ॥ ૪૦॥

વિષ્ણુર્વિશ્વેશ્વરો દેવો લક્ષ્મીર્વિશ્વેશ્વરપ્રિયા ।
બ્રહ્મા શિવો યદા સ્રષ્ટા બ્રહ્માણી બ્રહ્મણઃ પ્રિયા ॥ ૪૧॥

ભાસ્કરો ભગવાન્ શમ્ભુઃ પ્રભા ભગવતી શિવા ।
મહેન્દ્રો મન્મથારાતિઃ શચી શૈલેન્દ્રકન્યકા ॥ ૪૨॥

જાતવેદા મહાદેવઃ સ્વાહા શર્વાર્ધદેહિની ।
યમસ્ત્રિયમ્બકો દેવસ્તત્પ્રિયા ગિરિકન્યકા ॥ ૪૩॥

નિરૃતિર્ભગવાનીશો નૈરૃતી નગનન્દિની ।
વરુણો ભગવાન્ રુદ્રો વારુણી ભૂધરાત્મજા ॥ ૪૪॥

બાલેન્દુશેખરો વાયુઃ શિવા શિવમનોહરા ।
યક્ષો યજ્ઞશિરોહર્તા ઋદ્ધિર્હિમગિરીન્દ્રજા ॥ ૪૫॥

ચન્દ્રાર્ધશેખરશ્ચન્દ્રો રોહિણી રુદ્રવલ્લભા ।
ઈશાનઃ પરમેશાનસ્તદાર્યા પરમેશ્વરી ॥ ૪૬॥

અનન્તવલયોઽનન્તો હ્યનન્તાનન્તવલ્લભા ।
કાલાગ્નિરુદ્રઃ કાલારિઃ કાલી કાલાન્તકપ્રિયા ॥ ૪૭॥

પુરુષાખ્યો મનુઃ શમ્ભુઃ શતરૂપા શિવપ્રિયા ।
દક્ષઃ સાક્ષાન્મહાદેવઃ પ્રસૂતિઃ પરમેશ્વરી ॥ ૪૮॥

રુચિર્ભવો ભવાની ચ બુધૈરાકૂતિરુચ્યતે ।
ભૃગુર્ભગાક્ષિહા દેવઃ ખ્યાતિસ્ત્રિનયનપ્રિયા ॥ ૪૯॥

મરીચિર્ભગવાન્ રુદ્રઃ સમ્ભૂતિઃ શર્વવલ્લભા ।
ગઙ્ગાધરોઽઙ્ગિરા જ્ઞેયઃ સ્મૃતિઃ સાક્ષાદુમા સ્મૃતા ॥ ૫૦॥

પુલસ્ત્યઃ શશભૃન્મૌલિઃ પ્રીતિઃ કાન્તા પિનાકિનઃ ।
પુલહસ્ત્રિપુરધ્વંસી તત્પ્રિયા તુ શિવપ્રિયા ॥ ૫૧॥

ક્રતુધ્વંસી ક્રતુઃ પ્રોક્તઃ સન્નતિર્દયિતા વિભોઃ ।
ત્રિનેત્રોઽત્રિરુમા સાક્ષાદનસૂયા સ્મૃતા બુધૈઃ ॥ ૫૨॥

કશ્યપઃ કાલહા દેવો દેવમાતા મહેશ્વરી ।
વસિષ્ઠો મન્મથારાતિર્દેવી સાક્ષાદરુન્ધતી ॥ ૫૩॥

શઙ્કરઃ પુરુષાઃ સર્વે સ્ત્રિયઃ સર્વા મહેશ્વરી ।
સર્વે સ્ત્રીપુરુષાસ્તસ્માત્તયોરેવ વિભૂતયઃ ॥ ૫૪॥

વિષયી ભગવાનીશો વિષયઃ પરમેશ્વરી ।
શ્રાવ્યં સર્વમુમારૂપં શ્રોતા શૂલવરાયુધઃ ॥ ૫૫॥

પ્રષ્ટવ્યં વસ્તુજાતં તુ ધત્તે શઙ્કરવલ્લભા ।
પ્રષ્ટા સ એવ વિશ્વાત્મા બાલચન્દ્રાવતંસકઃ ॥ ૫૬॥

દ્રષ્ટવ્યં વસ્તુરૂપં તુ બિભર્તિ ભવવલ્લભા ।
દ્રષ્ટા વિશ્વેશ્વરો દેવઃ શશિખણ્ડશિખામણિઃ ॥ ૫૭॥

રસજાતં મહાદેવી દેવો રસયિતા શિવઃ ।
પ્રેયજાતં ચ ગિરિજા પ્રેયાંશ્ચૈવ ગરાશનઃ ॥ ૫૮॥

મન્તવ્યવસ્તુતાં ધત્તે સદા દેવી મહેશ્વરી ।
મન્તા સ એવ વિશ્વાત્મા મહાદેવો મહેશ્વરઃ ॥ ૫૯॥

બોદ્ધવ્યવસ્તુરૂપં તુ બિભર્તિ ભવવલ્લભા ।
દેવઃ સ એવ ભગવાન્ બોદ્ધા મુગ્ધેન્દુશેખરઃ ॥ ૬૦॥

પ્રાણઃ પિનાકી સર્વેષાં પ્રાણિનાં ભગવાન્ પ્રભુઃ ।
પ્રાણસ્થિતિસ્તુ સર્વેષામમ્બિકા ચામ્બુરૂપિણી ॥ ૬૧॥

બિભર્તિ ક્ષેત્રતાં દેવી ત્રિપુરાન્તકવલ્લભા ।
ક્ષેત્રજ્ઞત્વં તદા ધત્તે ભગવાનન્તકાન્તકઃ ॥ ૬૨॥

અહઃ શૂલાયુધો દેવઃ શૂલપાણિપ્રિયા નિશા ।

આકાશઃ શઙ્કરો દેવઃ પૃથિવી શઙ્કરપ્રિયા ॥ ૬૩॥

સમુદ્રો ભગવાનીશો વેલા શૈલેન્દ્રકન્યકા ।
વૃક્ષો વૃષધ્વજો દેવો લતા વિશ્વેશ્વરપ્રિયા ॥ ૬૪॥

પુઁલ્લિઙ્ગમખિલં ધત્તે ભગવાન્ પુરશાસનઃ ।
સ્ત્રિલિઙ્ગં ચાખિલં ધત્તે દેવી દેવમનોરમા ॥ ૬૫॥

શબ્દજાલમશેષં તુ ધત્તે સર્વસ્ય વલ્લભા ।
અર્થસ્વરૂપમખિલં ધત્તે મુગ્ધેન્દુશેખરઃ ॥ ૬૬॥

યસ્ય યસ્ય પદાર્થસ્ય યા યા શક્તિરુદાહૃતા ।
સા સા વિશ્વેશ્વરી દેવી સ સ સર્વો મહેશ્વરઃ ॥ ૬૭॥

યત્પરં યત્પવિત્રં ચ યત્પુણ્યં યચ્ચ મઙ્ગલમ્ ।
તત્તદાહ મહાભાગાસ્તયોસ્તેજોવિજૃમ્ભિતમ્ ॥ ૬૮॥

યથા દીપસ્ય દીપ્તસ્ય શિખા દીપયતે ગૃહમ્ ।
તથા તેજસ્તયોરેતદ્ વ્યાપ્ય દીપયતે જગત્ ॥ ૬૯॥

તૃણાદિશિવમૂર્ત્યન્તં વિશ્વખ્યાતિશયક્રમઃ ।
સન્નિકર્ષક્રમવશાત્તયોરિતિ પરા શ્રુતિઃ ॥ ૭૦॥

સર્વાકારાત્મકાવેતૌ સર્વશ્રેયોવિધાયિનૌ ।
પૂજનીયૌ નમસ્કાર્યૌ ચિન્તનીયૌ ચ સર્વદા ॥ ૭૧॥

યથાપ્રજ્ઞમિદં કૃષ્ણ યાથાત્મ્યં પરમેશયોઃ ।
કથિતં હિ મયા તેઽદ્ય ન તુ તાવદિયત્તયા ॥ ૭૨॥

તત્કથં શક્યતે વક્તું યાથાત્મ્યં પરમેશયોઃ ।
મહતામપિ સર્વેષાં મનસોઽપિ બહિર્ગતમ્ ॥ ૭૩॥

અન્તર્ગતમનન્યાનામીશ્વરાર્પિતચેતસામ્ ।
અન્યેષાં બુદ્ધ્યનારૂઢમારૂઢં ચ યથૈવ તત્ ॥ ૭૪॥

યેયમુક્તા વિભૂતિર્વૈ પ્રાકૃતી સા પરા મતા ।
અપ્રાકૃતાં પરામન્યાં ગુહ્યાં ગુહ્યવિદો વિદુઃ ॥ ૭૫॥

યતો વાચો નિવર્તન્તે મનસા ચેન્દ્રિયૈઃ સહ ।
અપ્રાકૃતી પરા ચૈષા વિભૂતિઃ પારમેશ્વરી ॥ ૭૬॥

સૈવેહ પરમં ધામ સૈવેહ પરમા ગતિઃ ।
સૈવેહ પરમા કાષ્ઠા વિભૂતિઃ પરમેષ્ઠિનઃ ॥ ૭૭॥

તાં પ્રાપ્તું પ્રયતન્તેઽત્ર જિતશ્વાસા જિતેન્દ્રિયાઃ ।
ગર્ભકારાગૃહદ્વારં નિશ્છિદ્રં ઘટિતં યથા ॥ ૭૮॥

સંસારાશીવિષાલીઢમૃતસઞ્જીવનૌષધમ્ ।
વિભૂતિં શિવયોર્વિદ્વાન્ન બિભેતિ કુતશ્ચન ॥ ૭૯॥

યઃ પરામપરાં ચૈવ વિભૂતિં વેત્તિ તત્ત્વતઃ ।
સોઽપરાં ભૂતિમુલ્લઙ્ઘ્ય પરાં ભૂતિં સમશ્નુતે ॥ ૮૦॥

એતત્તે કથિતં કૃષ્ણ યાથાત્મ્યં પરમાત્મનોઃ ।
રહસ્યમપિ યોગ્યોઽસિ ભર્ગભક્તો ભવાનિતિ ॥ ૮૧॥

નાશિષ્યેભ્યોઽપ્યશૈવેભ્યો નાભક્તેભ્યઃ કદાચન ।
વ્યાહરેદીશયોર્ભૂતિમિતિ વેદાનુશાસનમ્ ॥ ૮૨॥

તસ્માત્ત્વમતિકલ્યાણ પરેભ્યઃ કથયેન્ન હિ ।
ત્વાદૃશેભ્યોઽનુરૂપેભ્યઃ કથયૈતન્ન ચાન્યથા ॥ ૮૩॥

વિભૂતિમેતાં શિવયોર્યોગ્યેભ્યો યઃ પ્રદાપયેત્ ।
સંસારસાગરાન્ મુક્તઃ શિવસાયુજ્યમાપ્નુયાત્ ॥ ૮૪॥

કીર્તનાદસ્ય નશ્યન્તિ મહાન્ત્યઃ પાપકોટયઃ ।
ત્રિશ્ચતુર્ધા સમભ્યસ્તૈર્વિનશ્યન્તિ તતોઽધિકાઃ ॥ ૮૫॥

નશ્યન્ત્યનિષ્ટરિપવો વર્ધન્તે સુહૃદસ્તથા ।
વિદ્યા ચ વર્ધતે શૈવી મતિઃ સત્યે પ્રવર્તતે ॥ ૮૬॥

ભક્તિઃ પરાઃ શિવે સામ્બે સાનુગે સપરિચ્છિદે ।
યદ્યદિષ્ટતમં ચાન્યત્તત્તદાપ્નોત્યસંશયમ્ ॥ ૮૭॥

અન્તઃશુચિઃ શિવે ભક્તો વિસ્રબ્ધઃ કીર્તયેદ્યદિ ।
પ્રબલૈઃ કર્મભિઃ પૂર્વૈઃ ફલં ચેત્પ્રતિબધ્યતે ।
પુનઃ પુનઃ સમભ્યસ્યેત્તસ્ય નાસ્તીહ દુર્લભમ્ ॥ ૮૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે ગૌરીશઙ્કરવિભૂતિયોગો નામ ચતુર્થોઽધ્યાયઃ ॥ ૭.૨.૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

## ૭.૨.૫. પઞ્ચમોऽધ્યાયઃ । પશુપતિત્વજ્ઞાનયોગઃ ।

ઉપમન્યુરુવાચ ।
વિગ્રહં દેવદેવસ્ય વિશ્વમેતત્ ચરાચરમ્ ।
તદેવં ન વિજાનન્તિ પશવઃ પાશગૌરવાત્ ॥ ૧॥

તમેકમેવ બહુધા વદન્તિ યદુનન્દન ।
અજાનન્તઃ પરં ભાવમવિકલ્પં મહર્ષયઃ ॥ ૨॥

અપરં બ્રહ્મરૂપં ચ પરં બ્રહ્માત્મકં તથા ।
કેચિદાહુર્મહાદેવમનાદિનિધનં પરમ્ ॥ ૩॥

ભૂતેન્દ્રિયાન્તઃકરણપ્રધાનવિષયાત્મકમ્ ।
અપરં બ્રહ્મ નિર્દિષ્ટં પરં બ્રહ્મ ચિદાત્મકમ્ ॥ ૪॥

બૃહત્ત્વાદ્ બૃંહણત્વાદ્વા બ્રહ્મ ચેત્યભિધીયતે ।
ઉભે તે બ્રહ્મણો રૂપે બ્રહ્મણોऽધિપતેઃ પ્રભોઃ ।
વિદ્યાવિદ્યાસ્વરૂપીતિ કૈશ્ચિદીશો નિગદ્યતે ॥ ૫॥

વિદ્યાં તુ ચેતનાં પ્રાહુસ્તથાવિદ્યામચેતનામ્ ।
વિદ્યાવિદ્યાત્મકં ચૈવ વિશ્વં વિશ્વગુરોર્વિભોઃ ॥ ૬॥

રૂપમેવ ન સન્દેહો વિશ્વં તસ્ય વશે યતઃ ।
ભ્રાન્તિર્વિદ્યા પરા ચેતિ શાર્વં રૂપં પરં વિદુઃ ॥ ૭॥

અયથાબુદ્ધિરર્થેષુ બહુધા ભ્રાન્તિરુચ્યતે ।
યથાર્થાકારસંવિત્તિર્વિદ્યેતિ પરિકીર્ત્યતે ॥ ૮॥

વિકલ્પરહિતં તત્ત્વં પરમિત્યભિધીયતે ।
વૈપરીત્યાદસત્ શબ્દઃ કથ્યતે વેદવાદિભિઃ ॥ ૯॥

તયોઃ પતિત્વાત્તુ શિવઃ સદસત્પતિરુચ્યતે ।
ક્ષરાક્ષરાત્મકં પ્રાહુઃ ક્ષરાક્ષરપરં પરે ॥ ૧૦॥

ક્ષરઃ સર્વાણિ ભૂતાનિ કૂટસ્થોऽક્ષર ઉચ્યતે ।
ઉભે તે પરમેશસ્ય રૂપે તસ્ય વશે યતઃ ॥ ૧૧॥

તયોઃ પરઃ શિવઃ શાન્તઃ ક્ષરાક્ષરાપરઃ સ્મૃતઃ ।

સમષ્ટિવ્યષ્ટિરૂપં ચ સમષ્ટિવ્યષ્ટિકારણમ્ ॥ ૧૨॥

વદન્તિ મુનયઃ કેચિત્ શિવં પરમકારણમ્ ।
સમષ્ટિમાહુરવ્યક્તં વ્યષ્ટિં વ્યક્તં તથૈવ ચ ॥ ૧૩॥

તે રૂપે પરમેશસ્ય તદિચ્છાયાઃ પ્રવર્તનાત્ ।
તયોઃ કારણભાવેન શિવં પરમકારણમ્ ॥ ૧૪॥

કારણાર્થવિદઃ પ્રાહુઃ સમષ્ટિવ્યષ્ટિકારણમ્ ।
જાતિવ્યક્તિસ્વરૂપીતિ કથ્યતે કૈશ્ચિદીશ્વરઃ ॥ ૧૫॥

યા પિણ્ડેઽપ્યનુવર્તેત સા જાતિરિતિ કથ્યતે ।
વ્યક્તિર્વ્યાવૃત્તિરૂપં તં પિણ્ડજાતં સમાશ્રયમ્ ॥ ૧૬॥

જાતયો વ્યક્તયશ્ચૈવ તદાજ્ઞાપરિપાલિતાઃ ।
યતસ્તતો મહાદેવો જાતિવ્યક્તિવપુઃ સ્મૃતઃ ॥ ૧૭॥

પ્રધાનપુરુષવ્યક્તકાલાત્મા કથ્યતે શિવઃ ।
પ્રધાનં પ્રકૃતિં પ્રાહુઃક્ષેત્રજ્ઞં પુરુષં તથા ॥ ૧૮॥

ત્રયોવિંશતિતત્ત્વાનિ વ્યક્તમાહુર્મનીષિણઃ ।
કાલઃ કાર્યપ્રપઞ્ચસ્ય પરિણામૈકકારણમ્ ॥ ૧૯॥

એષામીશોઽધિપો ધાતા પ્રવર્તકનિવર્તકઃ ।
આવિર્ભાવતિરોભાવહેતુરેકઃ સ્વરાડજઃ ॥ ૨૦॥

તસ્માત્ પ્રધાનપુરુષવ્યક્તકાલસ્વરૂપવાન્ ।
હેતુર્નેતાધિપસ્તેષાં ધાતા ચોક્તો મહેશ્વરઃ ॥ ૨૧॥

વિરાડ્ હિરણ્યગર્ભાત્મા કૈશ્ચિદીશો નિગદ્યતે ।
હિરણ્યગર્ભો લોકાનાં હેતુર્વિશ્વાત્મકો વિરાટ્ ॥ ૨૨॥

અન્તર્યામી પરશ્ચેતિ કથ્યતે કવિભિઃ શિવઃ ।
પ્રાજ્ઞસ્તૈજસવિશ્વાત્મેત્યપરે સમ્પ્રચક્ષતે ॥ ૨૩॥

તુરીયમપરે પ્રાહુઃ સૌમ્યમેવ પરે વિદુઃ ।
માતા માનં ચ મેયં ચ મતિં ચાહુરથાપરે ॥ ૨૪॥

કર્તા ક્રિયા ચ કાર્યં ચ કરણં કારણં પરે ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાત્મેત્યપરે સમ્પ્રચક્ષતે ॥ ૨૫॥

તુરીયમપરે પ્રાહુસ્તુર્યાતીતમિતીતરે ।
તમાહુર્વિગુણં કેચિદ્ગુણવન્તં પરે વિદુઃ ॥ ૨૬॥

કેચિત્સંસારિણં પ્રાહુસ્તમસંસારિણં પરે ।
સ્વતન્ત્રમપરે પ્રાહુરસ્વતન્ત્રં પરે વિદુઃ ॥ ૨૭॥

ઘોરમિત્યપરે પ્રાહુઃ સૌમ્યમેવ પરે વિદુઃ ।
રાગવન્તં પરે પ્રાહુર્વીતરાગં તથા પરે ॥ ૨૮॥

નિષ્ક્રિયં ચ પરે પ્રાહુઃ સક્રિયં ચેતરે જનાઃ ।
નિરિન્દ્રિયં પરે પ્રાહુઃ સેન્દ્રિયં ચ તથા પરે ॥ ૨૯॥

ધ્રુવમિત્યપરે પ્રાહુસ્તમધ્રુવમિતીતરે ।
અરૂપં કેચિદાહુર્વૈ રૂપવન્તં પરે વિદુઃ ॥ ૩૦॥

અદૃશ્યમપરે પ્રાહુર્દૃશ્યમિત્યપરે વિદુઃ ।
વાચ્યમિત્યપરે પ્રાહુરવાચ્યમિતિ ચાપરે ।
શબ્દાત્મકં પરે પ્રાહુશ્શબ્દાતીતમથાપરે ॥ ૩૧॥

કેચિત્ ચિન્તામયં પ્રાહુશ્ચિન્તયા રહિતં પરે ।
જ્ઞાનાત્મકં પરે પ્રાહુર્વિજ્ઞાનમિતિ ચાપરે ॥ ૩૨॥

કેચિત્ જ્ઞેયમિતિ પ્રાહુરજ્ઞેયમિતિ કેચન ।
પરમેકે તમેવાહુરપરં ચ તથા પરે ॥ ૩૩॥

એવં વિકલ્પ્યમાનં તુ યાથાત્મ્યં પરમેષ્ઠિનઃ ।
નાધ્યવસ્યન્તિ મુનયો નાનાપ્રત્યયકારણાત્ ॥ ૩૪॥

યેઃ પુનઃ સર્વભાવેન પ્રપન્નાઃ પરમેશ્વરમ્ ।
તે હિ જાનન્ત્યયત્નેન શિવં પરમકારણમ્ ॥ ૩૫॥

યાવત્પશુર્નૈવ પશ્યત્યનીશં
કવિં પુરાણં ભુવનસ્યેશિતારમ્ ।
તાવદ્દુઃખે વર્તતે બદ્ધપાશઃ
સંસારેઽસ્મિંશ્ચક્રનેમિક્રમેણ ॥ ૩૬॥

યદા પશ્યઃ પશ્યતે રુક્મવર્ણં
કર્તારમીશં પુરુષં બ્રહ્મયોનિમ્ ।
તદા વિદ્વાન્પુણ્યપાપે વિધૂય

નિરઞ્જનઃ પરમમુપૈતિ સામ્યમ્ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે પશુપતિત્વજ્ઞાનયોગો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૭.૨.૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૬. ષષ્ઠોઽધ્યાયઃ । શિવતત્ત્વવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
ન શિવસ્યાણવો બન્ધઃ કાર્યો માયેય એવ વા ।
પ્રાકૃતો વાથ બોદ્ધા વા હ્યહઙ્કારાત્મકસ્તથા ॥ ૧॥

નૈવાસ્ય માનસો બન્ધો ન ચૈત્તો નેન્દ્રિયાત્મકઃ ।
ન ચ તન્માત્રબન્ધોઽપિ ભૂતબન્ધો ન કશ્ચન ॥ ૨॥

ન ચ કાલઃ કલા ચૈવ નાવિદ્યા નિયતિસ્તથા ।
ન રાગો ન ચ વિદ્વેષઃ શમ્ભોરમિતતેજસઃ ॥ ૩॥

ન ચાસ્ત્યભિનિવેશોઽસ્ય કુશલાકુશલાન્યપિ ।
કર્માણિ તદ્વિપાકશ્ચ સુખદુઃખે ચ તત્ફલે ॥ ૪॥

આશયૈર્નાપિ સમ્બન્ધઃ સંસ્કારૈઃ કર્મણામપિ ।
ભોગૈશ્ચ ભોગસંસ્કારૈઃ કાલત્રિતયગોચરૈઃ ॥ ૫॥

ન તસ્ય કારણં કર્તા નાદિરન્તસ્તથાન્તરમ્ ।
ન કર્મ કરણં વાપિ નાકાર્યં કાર્યમેવ ચ ॥ ૬॥

નાસ્ય બન્ધુરબન્ધુર્વા નિયન્તા પ્રેરકોઽપિ વા ।
ન પતિર્ન ગુરુસ્ત્રાતા નાધિકો ન સમસ્તથા ॥ ૭॥

ન જન્મમરણે તસ્ય ન કાઙ્ક્ષિતમકાઙ્ક્ષિતમ્ ।
ન વિધિર્ન નિષેધશ્ચ ન મુક્તિર્ન ચ બન્ધનમ્ ॥ ૮॥

નાસ્તિ યદ્યદકલ્યાણં તત્તદસ્ય કદાચન ।
કલ્યાણં સકલં ચાસ્તિ પરમાત્મા શિવો યતઃ ॥ ૯॥

સ શિવઃ સર્વમેવેદમધિષ્ઠાય સ્વશક્તિભિઃ ।

અપ્રચ્યુતઃ સ્વતો ભાવઃ સ્થિતઃ સ્થાણુરતઃ સ્મૃતઃ ॥ ૧૦॥

શિવેનાધિષ્ઠિતં યસ્માત્ જગત્સ્થાવરજઙ્ગમમ્ ।
સર્વરૂપઃ સ્મૃતઃ શર્વસ્તથા જ્ઞાત્વા ન મુહ્યતિ ॥ ૧૧॥

શર્વો રુદ્રો નમસ્તસ્મૈ પુરુષઃ સત્પરો મહાન્ ।
હિરણ્યબાહુર્ભગવાન્ હિરણ્યપતિરીશ્વરઃ ॥ ૧૨॥

અમ્બિકાપતિરીશાનઃ પિનાકી વૃષવાહનઃ ।
એકો રુદ્રઃ પરં બ્રહ્મ પુરુષઃ કૃષ્ણપિઙ્ગલઃ ॥ ૧૩॥

બાલાગ્રમાત્રો હૃન્મધ્યે વિચિન્ત્યો દહરાન્તરે ।
હિરણ્યકેશઃ પદ્માક્ષો હ્યરુણસ્તામ્ર એવ ચ ॥ ૧૪॥

યોઽવસર્પત્યસૌ દેવો નીલગ્રીવો હિરણ્મયઃ ।
સૌમ્યોઽઘોરસ્તથા મિશ્રશ્ચાક્ષારશ્ચામૃતોઽવ્યયઃ ॥ ૧૫॥

સ પુંવિશેષઃ પરમો ભગવાનન્તકાન્તકઃ ।
ચેતનાચેતનોન્મુક્તઃ પ્રપઞ્ચાચ્ચ પરાત્પરઃ ॥ ૧૬॥

શિવેનાતિશયત્વેન જ્ઞાનૈશ્વર્યે વિલોકિતે ।
લોકેશાતિશયત્વેન સ્થિતં પ્રાહુર્મનીષિણઃ ॥ ૧૭॥

પ્રતિસર્ગપ્રસૂતાનાં બ્રહ્મણાં શાસ્ત્રવિસ્તરમ્ ।
ઉપદેષ્ટા સ એવાદૌ કાલાવચ્છેદવર્તિનામ્ ॥ ૧૮॥

કાલાવચ્છેદયુક્તાનાં ગુરૂણામપ્યસૌ ગુરુઃ ।
સર્વેષામેવ સર્વેશઃ કાલાવચ્છેદવર્જિતઃ ॥ ૧૯॥

શુદ્ધા સ્વાભાવિકી તસ્ય શક્તિઃ સર્વાતિશાયિની ।
જ્ઞાનમપ્રતિમં નિત્યં વપુરત્યન્તનિર્મિલમ્ ॥ ૨૦॥

ઐશ્વર્યમપ્રતિદ્વન્દ્વં સુખમાત્યન્તિકં બલમ્ ।
તેજઃપ્રભાવો વીર્યં ચ ક્ષમા કારુણ્યમેવ ચ ॥ ૨૧॥

પરિપૂર્ણસ્ય સર્ગાદ્યૈર્નાત્મનોઽસ્તિ પ્રયોજનમ્ ।
પરાનુગ્રહ એવાસ્ય ફલં સર્વસ્ય કર્મણઃ ॥ ૨૨॥

પ્રણવો વાચકસ્તસ્ય શિવસ્ય પરમાત્મનઃ ।
શિવરુદ્રાદિશબ્દાનાં પ્રણવો હિ પરઃ સ્મૃતઃ ॥ ૨૩॥

શમ્ભોઃ પ્રણવવાચ્યસ્ય ભવનાત્તજ્જપાદપિ ।
યા સિદ્ધિઃ સા પરા પ્રાપ્યા ભવત્યેવ ન સંશયઃ ॥ ૨૪॥

તસ્માદેકાક્ષરં દેવમાહુરાગમપારગાઃ ।
વાચ્યવાચકયોરૈક્યં મન્યમાના મનસ્વિનઃ ॥ ૨૫॥

અસ્ય માત્રાઃ સમાખ્યાતાશ્ચતસ્રો વેદમૂર્દ્ધનિ ।
અકારશ્ચાપ્યુકારશ્ચ મકારો નાદ ઇત્યપિ ॥ ૨૬॥

અકારં બહ્વૃચં પ્રાહુરુકારો યજુરુચ્યતે ।
મકારઃ સામનાદોઽસ્ય શ્રુતિરાથર્વણી સ્મૃતા ॥ ૨૭॥

અકારશ્ચ મહાબીજં રજઃ સ્રષ્ટા ચતુર્મુખઃ ।
ઉકારઃ પ્રકૃતિર્યોનિઃ સત્ત્વં પાલયિતા હરિઃ ॥ ૨૮॥

મકારઃ પુરુષો બીજં તમઃ સંહારકો હરઃ ।
નાદઃ પરઃ પુમાનીશો નિર્ગુણો નિષ્ક્રિયઃ શિવઃ ॥ ૨૯॥

સર્વં તિસૃભિરેવેદં માત્રાભિર્નિખિલં ત્રિધા ।
અભિધાય શિવાત્માનં બોધયત્યર્ધમાત્રયા ॥ ૩૦॥

યસ્માત્પરં નાપરમસ્તિ કિઞ્ચિદ્-
યસ્માન્નાણીયો ન જ્યાયોઽસ્તિ કિઞ્ચિત્ ।
વૃક્ષ ઇવ સ્તબ્ધો દિવિ તિષ્ઠત્યેક-
સ્તેનેદં પૂર્ણં પુરુષેણ સર્વમ્ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવતત્ત્વવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૭.૨.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૭. સપ્તમોઽધ્યાયઃ । શિવતત્ત્વકથનમ્ ।

ઉપમન્યુરુવચ ।
શક્તિઃ સ્વાભવિકી તસ્ય વિદ્યા વિશ્વવિલક્ષણા ।
એકાનેકસ્ય રૂપેણ ભાતિ ભાનોરિવ પ્રભા ॥ ૧॥

અનન્તાઃ શક્તયો યસ્યા ઇચ્છાજ્ઞાનક્રિયાદયઃ ।

માયાધાશ્ચાભવન્વહ્નોર્વિસ્ફુલિઙ્ગા યથા તથા ॥ ૨॥

સદાશિવેશ્વરાધા હિ વિદ્યાવિદ્યેશ્વરાદયઃ ।
અભવન્ પુરુષાશ્ચાસ્યાઃ પ્રકૃતિશ્ચ પરાત્પરા ॥ ૩॥

મહદાદિવિશેષાન્તાસ્ત્વજાધાશ્ચાપિ મૂર્તયઃ ।
યચ્ચાન્યદસ્તિ તત્સર્વં તસ્યાઃ કાર્યં ન સંશયઃ ॥ ૪॥

સા શક્તિઃ સર્વગા સૂક્ષ્મા પ્રબોધાનન્દરૂપિણી ।
શક્તિમાનુચ્યતે દેવઃ શિવઃ શીતાંશુભૂષણઃ ॥ ૫॥

વેદ્યઃ શિવઃ શિવા વિદ્યા પ્રજ્ઞા ચૈવ શ્રુતિઃ સ્મૃતિઃ ।
ધૃતિરેષા સ્થિતિર્નિષ્ઠા જ્ઞાનેચ્છાકર્મશક્તયઃ ॥ ૬॥

આજ્ઞા ચૈવ પરં બ્રહ્મ દ્વે વિદ્યે ચ પરાપરે ।
શુદ્ધવિદ્યા શુદ્ધકલા સર્વં શક્તિકૃતં યતઃ ॥ ૭॥

માયા ચ પ્રકૃતિર્જીવો વિકારો વિકૃતિસ્તથા ।
અસચ્ચ સચ્ચ યત્કિઞ્ચિત્તયા સર્વમિદં તતમ્ ॥ ૮॥

સા દેવી માયયા સર્વં બ્રહ્માણ્ડં સચરાચરમ્ ।
મોહયત્યપ્રયત્નેન મોચયત્યપિ લીલયા ॥ ૯॥

અનયા સહ સર્વેશઃ સપ્તવિંશપ્રકારયા ।
વિશ્વં વ્યાપ્ય સ્થિતસ્તસ્માત્ મુક્તિરત્ર પ્રવર્તતે ॥ ૧૦॥

મુમુક્ષવઃ પુરા કેચિન્મુનયો બ્રહ્મવાદિનઃ ।
સંશયાવિષ્ટમનસો વિસ્મૃશન્તિ યથાતથમ્ ॥ ૧૧॥

કિં કારણં કુતો જાતા જીવામઃ કેન વા વયમ્ ।
કુત્રાસ્માકં સમ્પ્રતિષ્ઠા કેન વાધિષ્ઠિતા વયમ્ ॥ ૧૨॥

કેન વર્તામહે શશ્વત્સુખેષ્વન્યેષુ ચાનિશમ્ ।
અવિલઙ્ઘ્યા ચ વિશ્વસ્ય વ્યવસ્થા કેન વા કૃતા ॥ ૧૩॥

કાલસ્ય ભાવો નિયતિર્યદૃચ્છા નાત્ર યુજ્યતે ।
ભૂતાનિ યોનિઃ પુરુષો યોગી ચૈષાં પરોઽથવા ॥ ૧૪॥

અચેતનત્વાત્કાલાદેશ્ચેતનત્વેઽપિ ચાત્મનઃ ।
સુખદુઃખાનિ ભૂતત્વાદનીશત્વાદ્વિચાર્યતે ॥ ૧૫॥

તદ્ધ્યાનયોગાનુગતાઃ પ્રપશ્યન્ શક્તિમૈશ્વરીમ્ ।
પાશવિચ્છેદિકાં સાક્ષાન્નિગૂઢાં સ્વગુણૈર્ભૃશમ્ ॥ ૧૬॥

તયા વિચ્છિન્નપાશાસ્તે સર્વકારણકારણમ્ ।
શક્તિમન્તં મહાદેવમપશ્યન્દિવ્યચક્ષુષા ॥ ૧૭॥

યઃ કારણાન્યશેષાણિ કાલાત્મસહિતાનિ ચ ।
અપ્રમેયોઽનયા શક્ત્યા સકલં યોઽધિતિષ્ઠતિ ॥ ૧૮॥

તતઃ પ્રસાદયોગેન યોગેન પરમેણ ચ ।
દૃષ્ટેન ભક્તિયોગેન દિવ્યાં ગતિમવાપ્નુયુઃ ॥ ૧૯॥

તસ્માત્સહ તથા શક્ત્યા હૃદિ પશ્યન્તિ યે શિવમ્ ।
તેષાં શાશ્વતિકી શાન્તિર્નૈતરેષામિતિ શ્રુતિઃ ॥ ૨૦॥

ન હિ શક્તિમતઃ શક્ત્યા વિપ્રયોગોઽસ્તિ જાતુચિત્ ।
તસ્માત્ શક્તેઃ શક્તિમતસ્તાદાત્મ્યાન્નિર્વૃતિર્દ્વયોઃ ॥ ૨૧॥

ક્રમો વિવક્ષિતો નૂનં વિમુક્તૌ જ્ઞાનકર્મણોઃ ।
પ્રસાદે સતિ સા મૂર્તિર્યસ્માત્કરતલે સ્થિતા ॥ ૨૨॥

દેવો વા દાનવો વાપિ પશુર્વા વિહગોઽપિ વા ।
કીરો વાથ કૃમિર્વાપિ મુચ્યતે તત્પ્રસાદતઃ ॥ ૨૩॥

ગર્ભસ્થો જાયમાનો વા બાલો વા તરુણોઽપિ વા ।
વૃદ્ધો વા મ્રિયમાણો વા સ્વર્ગસ્થો વાથ નારકી ॥ ૨૪॥

પતિતો વાપિ ધર્માત્મા પણ્ડિતો મૂઢ એવ વા ।
પ્રસાદે તત્ક્ષણાદેવ મુચ્યતે નાત્ર સંશયઃ ॥ ૨૫॥

અયોગ્યાનાં ચ કારુણ્યાદ્ભક્તાનાં પરમેશ્વરઃ ।
પ્રસીદતિ ન સન્દેહો વિગૃહ્ય વિવિધાન્ મલાન્ ॥ ૨૬॥

પ્રસદાદેવ સા ભક્તિઃ પ્રસાદો ભક્તિસમ્ભવઃ ।
અવસ્થાભેદમુત્પ્રેક્ષ્ય વિદ્વાંસ્તત્ર ન મુહ્યતિ ॥ ૨૭॥

પ્રસાદપૂર્વિકા યેયં ભુક્તિમુક્તિવિધાયિની ।
નૈવ સા શક્યતે પ્રાપ્તું નરૈરેકેન જન્મના ॥ ૨૮॥

અનેકજન્મસિદ્ધાનાં શ્રૌતસ્માર્તાનુવર્તિનામ્ ।
વિરક્તાનાં પ્રબુદ્ધાનાં પ્રસીદતિ મહેશ્વરઃ ॥ ૨૯॥

પ્રસન્ને સતિ દેવેશે પશૌ તસ્મિન્ પ્રવર્તતે ।
અસ્તિ નાથો મમેત્યલ્પા ભક્તિર્બુદ્ધિપુરઃસરા ॥ ૩૦॥

તપસા વિવિધૈઃ શૈવૈર્ધર્મૈઃ સંયુજ્યતે નરઃ ।
તત્રયોગે તદભ્યાસસ્તતો ભક્તિઃ પરા ભવેત્ ॥ ૩૧॥

પરયા ચ તયા ભક્ત્યા પ્રસાદો લભ્યતે પરઃ ।
પ્રસાદાત્સર્વપાશેભ્યો મુક્તિર્મુક્તસ્ય નિર્વૃતિઃ ॥ ૩૨॥

અલ્પભાવોઽપિ યો મર્ત્યઃ સોઽપિ જન્મત્રયાત્પરમ્ ।
ન યોનિયન્ત્રપીડાયૈ ભવેન્નૈવાત્ર સંશયઃ ॥ ૩૩॥

સાઙ્ગાનઙ્ગા ચ યા સેવા સા ભક્તિરિતિ કથ્યતે ।
સા પુનર્ભિદ્યતે ત્રેધા મનોવાક્કાયસાધનૈઃ ॥ ૩૪॥

શિવરૂપાદિચિન્તા યા સા સેવા માનસી સ્મૃતા ।
જપાદિર્વાચિકી સેવા કર્મપૂજાદિ કાયિકી ॥ ૩૫॥

સેયં ત્રિસાધના સેવા શિવધર્મશ્ચ કથ્યતે ।
સ તુ પઞ્ચવિધઃ પ્રોક્તઃ શિવેન પરમાત્મના ॥ ૩૬॥

તપઃ કર્મ જપો ધ્યાનં જ્ઞાનં ચેતિ સમાસતઃ ।
કર્મ લિઙ્ગાર્ચનાદ્યં ચ તપશ્ચાન્દ્રાયણાદિકમ્ ॥ ૩૭॥

જપસ્ત્રિધા શિવાભ્યાસશ્ચિન્તા ધ્યાનં શિવસ્ય તુ ।
શિવાગમોક્તં યજ્જ્ઞાનં તદત્ર જ્ઞાનમુચ્યતે ॥ ૩૮॥

શ્રીકણ્ઠેન શિવેનોક્તં શિવાયૈ ચ શિવાગમઃ ।
શિવાશ્રિતાનાં કારુણ્યાચ્છ્રેયસામેકસાધનમ્ ॥ ૩૯॥

તસ્માદ્વિવર્ધયેદ્ભક્તિં શિવે પરમકારણે ।
ત્યજેચ્ચ વિષયાસઙ્ગં શ્રેયોઽર્થી મતિમાન્નરઃ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવતત્ત્વકથનં નામ સપ્તમોઽધ્યાયઃ ॥ ૭.૨.૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૮. અષ્ટમોઽધ્યાયઃ । શિવતત્ત્વજ્ઞાને વ્યાસાવતારવર્ણનમ્ ।

કૃષ્ણ ઉવાચ ।
ભગવન્ શ્રોતુમિચ્છામિ શિવેન પરિભાષિતમ્ ।
વેદસારં શિવજ્ઞાનં સ્વાશ્રિતાનાં વિમુક્તયે ॥ ૧॥

અભક્તાનામબુદ્ધીનામયુક્તાનામગોચરમ્ ।
અર્થૈર્દશર્ધૈઃ સંયુક્તં ગૂઢમપ્રાજ્ઞનિન્દિતમ્ ॥ ૨॥

વર્ણાશ્રમકૃતૈર્ધર્મૈર્વિપરીતં ક્વચિત્સમમ્ ।
વેદાત્ ષડઙ્ગાદુદ્ધૃત્ય સાઙ્ખ્યાદ્યોગાચ્ચ કૃત્સ્નશઃ ॥ ૩॥

શતકોટિપ્રમાણેન વિસ્તીર્ણં ગ્રન્થસઙ્ખ્યયા ।
કથિતં પરમેશેન તત્ર પૂજા કથં પ્રભોઃ ॥ ૪॥

કસ્યાધિકારઃ પૂજાદૌ જ્ઞાનયોગાદયઃ કથમ્ ।
તત્સર્વં વિસ્તરાદેવ વક્તુમર્હસિ સુવ્રત ॥ ૫॥

ઉપમન્યુરુવાચ ।
શૈવં સઙ્ક્ષિપ્ય વેદોક્તં શિવેન પરિભાષિતમ્ ।
સ્તુતિનિન્દાદિરહિતં સદ્યઃ પ્રત્યયકારકમ્ ॥ ૬॥

ગુરુપ્રસાદજં દિવ્યમનાયાસેન મુક્તિદમ્ ।
કથયિષ્યે સમાસેન તસ્ય શક્યો ન વિસ્તરઃ ॥ ૭॥

સિસૃક્ષયા પુરાવ્યક્તાચ્છિવઃ સ્થાણુર્મહેશ્વરઃ ।
સત્કાર્યકારણોપેતઃ સ્વયમાવિરભૂત્પ્રભુઃ ॥ ૮॥

જનયામાસ ચ તદા ઋષિર્વિશ્વાધિકઃ પ્રભુઃ ।
દેવાનાં પ્રથમં દેવં બ્રહ્માણં બ્રહ્મણસ્પતિમ્ ॥ ૯॥

બ્રહ્માપિ પિતરં દેવં જાયમાનં ન્યવૈક્ષત ।
તં જાયમાનં જનકો દેવઃ પ્રાપશ્યદાજ્ઞયા ॥ ૧૦॥

દૃષ્ટો રુદ્રેણ દેવોઽસાવસૃજદ્વિશ્વમીશ્વરઃ ।
વર્ણાશ્રમવ્યવસ્થાં ચ ચકાર સ પૃથક્ પૃથક્ ॥ ૧૧॥

સોમં સસર્જ યજ્ઞાર્થે સોમાદ્ દ્યૌઃ સમજાયત ।
ધરા ચ વહ્નિઃ સૂર્યશ્ચ યજ્ઞો વિષ્ણુઃ શચીપતિઃ ॥ ૧૨॥

તે ચાન્યે ચ સુરા રુદ્રં રુદ્રાધ્યાયેન તુષ્ટુવુઃ ।

પ્રસન્નવદનસ્તસ્થૌ દેવાનામગ્રતઃ પ્રભુઃ ॥ ૧૩॥

અપહૃત્ય સ્વલીલાર્થં તેષાં જ્ઞાનં મહેશ્વરઃ ।
તમપૃચ્છંસ્તતો દેવાઃ કો ભવાનિતિ મોહિતાઃ ॥ ૧૪॥

સોઽબ્રવીદ્ભગવાન્ રુદ્રો હ્યહમેકઃ પુરાતનઃ ।
આસં પ્રથમમેવાહં વર્તામિ ચ સુરોત્તમાઃ ॥ ૧૫॥

ભવિષ્યામિ ચ મત્તોઽન્યો વ્યતિરિક્તો ન કશ્ચન ।
અહમેવ જગત્ સર્વં તર્પયામિ સ્વતેજસા ॥ ૧૬॥

મત્તોઽધિકઃ સમો નાસ્તિ માં યો વેદ સ મુચ્યતે ।
ઇત્યુક્ત્વા ભગવાન્ રુદ્રસ્તત્રૈવાન્તરધત્ત સઃ ॥ ૧૭॥

અપશ્યન્તસ્તમીશાનં સ્તુવન્તશ્ચૈવ સામભિઃ ।
વ્રતં પાશુપતં કૃત્વા ત્વથર્વશિરસિ સ્થિતમ્ ॥ ૧૮॥

ભસ્મસઞ્છન્નસર્વાઙ્ગા બભૂવુરમરાસ્તદા ।
અથ તેષાં પ્રસાદાર્થં પશૂનાં પતિરીશ્વરઃ ॥ ૧૯॥

સગણશ્ચોમયા સાર્ધં સાન્નિધ્યમકરોત્પ્રભુઃ ।
યં વિનિદ્રા જિતશ્વાસા યોગિનો દગ્ધકિલ્બિષાઃ ॥ ૨૦॥

હૃદિ પશ્યન્તિ તં દેવં દદૃશુર્દેવપુઙ્ગવાઃ ।
યામાહુઃ પરમાં શક્તિમીશ્વરેચ્છાનુવર્તિનીમ્ ॥ ૨૧॥

તામપશ્યન્ મહેશસ્ય વામતો વામલોચનામ્ ।
યે વિનિર્ધૂતસંસારાઃ પ્રાપ્તાઃ શૈવં પરં પદમ્ ॥ ૨૨॥

નિત્યસિદ્ધાશ્ચ યે વાન્યે તે ચ દૃષ્ટા ગણેશ્વરાઃ ।
અથ તં તુષ્ટુવુર્દેવા દેવ્યા સહ મહેશ્વરમ્ ॥ ૨૩॥

સ્તોત્રૈર્માહેશ્વરૈર્દિવ્યૈઃ શ્રૌતૈઃ પૌરાણિકૈરપિ ।
દેવોઽપિ દેવાનાલોક્ય ઘૃણયા વૃષભધ્વજઃ ॥ ૨૪॥

તુષ્ટોઽસ્મીત્યાહ સુપ્રીતઃ સ્વભાવમધુરાં ગિરમ્ ।
અથ સુપ્રીતમનસં પ્રણિપત્ય વૃષધ્વજમ્ ।
અર્થમહત્તમં દેવાઃ પપ્રચ્છુરિમમાદરાત્ ॥ ૨૫॥

દેવા ઊચુઃ ।
ભગવન્ કેન માર્ગેણ પૂજનીયોઽસિ ભૂતલે ।

કસ્યાધિકારઃ પૂજાયાં વક્તુમર્હસિ તત્ત્વતઃ ॥ ૨૬॥

તતઃ સસ્મિતમાલોક્ય દેવીં દેવવરો હરઃ ।
સ્વરૂપં દર્શયામાસ ઘોરં સૂર્યાત્મકં પરમ્ ॥ ૨૭॥

સર્વૈશ્વર્યગુણોપેતં સર્વતેજોમયં પરમ્ ।
શક્તિભિર્મૂર્તિભિશ્ચાઙ્ગૈર્ગ્રહૈર્દેવૈશ્ચ સંવૃતમ્ ॥ ૨૮॥

અષ્ટબાહું ચતુર્વક્ત્રમર્દ્ધનારીકમદ્ભુતમ્ ।
દૃષ્ટ્વૈવમદ્ભુતાકારં દેવા વિષ્ણુપુરોગમાઃ ॥ ૨૯॥

બુદ્ધ્વા દિવાકરં દેવં દેવીં ચૈવ નિશાકરમ્ ।
પઞ્ચભૂતાનિ શેષાણિ તન્મયં ચ ચરાચરમ્ ॥ ૩૦॥

એવમુક્ત્વા નમશ્ચક્રુસ્તસ્મૈ ચાર્ઘ્યં પ્રદાય વૈ ॥ ૩૧॥

સિન્દૂરવર્ણાય સુમણ્ડલાય
સુવર્ણવર્ણાભરણાય તુભ્યમ્ ।
પદ્માભનેત્રાય સપઙ્કજાય
બ્રહ્મેન્દ્રનારાયણકારણાય ॥ ૩૨॥

સુરત્નપૂર્ણં સસુવર્ણતોયં
સુકુઙ્કુમાદ્યં સકુશં સપુષ્પમ્ ।
પ્રદત્તમાદાય સહેમપાત્રં
પ્રશસ્તમર્ઘ્યં ભગવન્ પ્રસીદ ॥ ૩૩॥

નમઃ શિવાય શાન્તાય સગણાયાદિહેતવે ।
રુદ્રાય વિષ્ણવે તુભ્યં બ્રહ્મણે સૂર્યમૂર્તયે ॥ ૩૪॥

યઃ શિવં મણ્ડલે સૌરે સમ્પૂજ્યૈવ સમાહિતઃ ।
પ્રાતર્મધ્યાહ્નસાયાહ્ને પ્રદદ્યાદર્ઘ્યમુત્તમમ્ ॥ ૩૫॥

પ્રણમેદ્વા પઠેદેતાન્ શલોકાન્ શ્રુતિમુખાનિમાન્ ।
ન તસ્ય દુર્લ્લભં કિઞ્ચિદ્ભક્તશ્ચેન્મુચ્યતે દૃઢમ્ ॥ ૩૬॥

તસ્માદભ્યર્ચયેનિત્યં શિવમાદિત્યરૂપિણમ્ ।
ધર્મકામાર્થમુક્ત્યર્થં મનસા કર્મણા ગિરા ॥ ૩૭॥

અથ દેવાન્ સમાલોક્ય મણ્ડલસ્થો મહેશ્વરઃ ।
સર્વાગમોત્તરં દત્ત્વા શાસ્ત્રમન્તરધાદ્ધરઃ ॥ ૩૮॥

તત્ર પૂજાધિકારોઽયં બ્રહ્મક્ષત્રવિશામિતિ ।
જ્ઞાત્વા પ્રણમ્ય દેવેશં દેવા જગ્મુર્યથાગતમ્ ॥ ૩૯॥

અથ કાલેન મહતા તસ્મિન્ શાસ્ત્રે તિરોહિતે ।
ભર્તારં પરિપપ્રચ્છ તદઙ્કસ્થા મહેશ્વરી ॥ ૪૦॥

તયા સઞ્ચોદિતો દેવો દેવ્યા ચન્દ્રવિભૂષણઃ ।
અવદત્કરમુદ્ધૃત્ય શાસ્ત્રં સર્વાગમોત્તરમ્ ॥ ૪૧॥

પ્રવર્તિતં ચ તલ્લોકે નિયોગાત્પરમેષ્ઠિનઃ ।
મયાગસ્ત્યેન ગુરુણા દધીચેન મહર્ષિણા ॥ ૪૨॥

સ્વયમપ્યવતીર્યોર્વ્યાં યુગાવર્તેષુ શૂલધૃક્ ।
સ્વાશ્રિતાનાં વિમુક્ત્યર્થં કુરુતે જ્ઞાનસન્તતિમ્ ॥ ૪૩॥

ઋભુઃ સત્યો ભાર્ગવશ્ચ હ્યઙ્ગિરાઃ સવિતા દ્વિજાઃ ।
મૃત્યુઃ શતક્રતુર્ધીમાન્ વસિષ્ઠો મુનિપુઙ્ગવઃ ॥ ૪૪॥

સારસ્વતસ્ત્રિધામા ચ ત્રિવૃતો મુનિપુઙ્ગવઃ ।
શતતેજાઃ સ્વયં ધર્મો નારાયણ ઇતિ શ્રુતઃ ॥ ૪૫॥

સ્વરક્ષશ્ચારુણિર્ધીમાંસ્તથા ચૈવ કૃતઞ્જયઃ ।
મામતેયો ભરદ્વાજો ગૌતમઃ કવિરુત્તમઃ ॥ ૪૬॥

વાચઃસ્રવા મુનિસ્સાક્ષાત્તથા સૂક્ષ્માયણિઃ શુચિઃ ।
તૃણબિન્દુર્મુનિઃ કૃષ્ણઃ શક્તિઃ શાક્તેય ઉત્તરઃ ॥ ૪૭॥

જાતૂકર્ણ્યો હરિઃ સાક્ષાત્ કૃષ્ણદ્વૈપાયનો મુનિઃ ।
વ્યાસાવતારાન્ શ઼ૃણ્વન્તુ કલ્પયોગેશ્વરાન્ ક્રમાત્ ॥ ૪૮॥

લૈઙ્ગે વ્યાસાવતારા હિ દ્વાપરાન્તેષુ સુવ્રતાઃ ।
યોગાચાર્યાવતારાશ્ચ તથા શિષ્યેષુ શૂલિનઃ ॥ ૪૯॥

તત્ર તત્ર વિભોઃ શિષ્યાશ્ચત્વારઃ સ્યુર્મહૌજસઃ ।
શિષ્યાસ્તેષાં પ્રશિષ્યાશ્ચ શતશોઽથ સહસ્રશઃ ॥ ૫૦॥

તેષાં સમ્ભાવનાલ્લોકે શૈવાજ્ઞાકરણાદિભિઃ ।
ભાગ્યવન્તો વિમુચ્યન્તે ભક્ત્યા ચાત્યન્તભાવિતાઃ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવતત્ત્વજ્ઞાને વ્યાસાવતારવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૭.૨.૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૯. નવમોઽધ્યાયઃ । શિવસ્ય યોગાવતારવર્ણનમ્ ।

કૃષ્ણ ઉવાચ ।
યુગાવર્તેષુ સર્વેષુ યોગાચાર્યચ્છલેન તુ ।
અવતારાન્હિ શર્વસ્ય શિષ્યાંશ્ચ ભગવન્ વદ ॥ ૧॥

ઉપમન્યુરુવાચ ।
શ્વેતઃ સુતારો મદનઃ સુહોત્રઃ કઙ્ક એવ ચ ।
લૌગાક્ષિશ્ચ મહામાયો જૈગીષવ્યસ્તથૈવ ચ ॥ ૨॥

દધિવાહશ્ચ ઋષભો મુનિરુગ્રોઽત્રિરેવ ચ ।
સુપાલકો ગૌતમશ્ચ તથા વેદશિરા મુનિઃ ॥ ૩॥

ગોકર્ણશ્ચ ગુહાવાસી શિખણ્ડી ચાપરઃ સ્મૃતઃ ।
જટામાલી ચાટ્ટહાસો દારુકો લાઙ્ગુલી તથા ॥ ૪॥

મહાકાલશ્ચ શૂલી ચ દણ્ડી મુણ્ડીશ એવ ચ ।
સહિષ્ણુઃ સોમશર્મા ચ લકુલીશ્વર એવ ચ ॥ ૫॥

એતે વારાહકલ્પેઽસ્મિન્ સપ્તમસ્યાન્તરો મનોઃ ।
અષ્ટાવિંશતિસઙ્ખ્યાતા યોગાચાર્યા યુગક્રમાત્ ॥ ૬॥

શિષ્યાઃ પ્રત્યેકમેતેષાં ચત્વારઃ શાન્તચેતસઃ ।
શ્વેતાદયશ્ચ રુષ્યાન્તાંસ્તાન્ બ્રવીમિ યથાક્રમમ્ ॥ ૭॥

શ્વેતઃ શ્વેતશિખશ્ચૈવ શ્વેતાશ્વઃ શ્વેતલોહિતઃ ।
દુન્દુભિઃ શતરૂપશ્ચ ઋચીકઃ કેતુમાંસ્તથા ॥ ૮॥

વિકોશશ્ચ વિકેશશ્ચ વિપાશઃ પાશનાશનઃ ।
સુમુખો દુર્મુખશ્ચૈવ દુર્ગમો દુરતિક્રમઃ ॥ ૯॥

સનત્કુમારઃ સનકઃ સનન્દશ્ચ સનાતનઃ ।
સુધામા વિરજાશ્ચૈવ શઙ્ખશ્ચાણ્ડજ એવ ચ ॥ ૧૦॥

સારસ્વતશ્ચ મેઘશ્ચ મેઘવાહઃ સુવાહકઃ ।
કપિલશ્ચાસુરિઃ પઞ્ચશિખો બાષ્કલ એવ ચ ॥ ૧૧॥

પરાશરાશ્ચ ગર્ગશ્ચ ભાર્ગવશ્ચાઙ્ગિરાસ્તથા ।
બલબન્ધુર્નિરામિત્રાઃ કેતુશૃઙ્ગસ્તપોધનઃ ॥ ૧૨॥

લમ્બોદરશ્ચ લમ્બશ્ચ લમ્બાત્મા લમ્બકેશકઃ ।
સર્વજ્ઞઃ સમબુદ્ધિશ્ચ સાધ્યસિદ્ધિસ્તથૈવ ચ ॥ ૧૩॥

સુધામા કશ્યપશ્ચૈવ વસિષ્ઠો વિરજાસ્તથા ।
અત્રિરુગ્રો ગુરુશ્રેષ્ઠઃ શ્રવનોઽથ શ્રવિષ્ટકઃ ॥ ૧૪॥

કુણિશ્ચ કુણિબાહુશ્ચ કુશરીરઃ કુનેત્રકઃ ।
કાશ્યપો હ્યુશનાશ્ચૈવ ચ્યવનશ્ચ બૃહસ્પતિઃ ॥ ૧૫॥

ઉતથ્યો વામદેવશ્ચ મહાકાલો મહાનિલઃ ।
વાચઃશ્રવાઃ સુવીરશ્ચ શ્યાવકશ્ચ યતીશ્વરઃ ॥ ૧૬॥

હિરણ્યનાભઃ કૌશલ્યો લોકાક્ષિઃ કુથુમિસ્તથા ।
સુમન્તુર્જૈમિનિશ્ચૈવ કુબન્ધઃ કુશકન્ધરઃ ॥ ૧૭॥

પ્લક્ષો દાર્ભાયણિશ્ચૈવ કેતુમાન્ ગૌતમસ્તથા ।
ભલ્લવી મધુપિઙ્ગશ્ચ શ્વેતકેતુસ્તથૈવ ચ ॥ ૧૮॥

ઉશિજો બૃહદશ્વશ્ચ દેવલઃ કવિરેવ ચ ।
શાલિહોત્રઃ સુવેષશ્ચ યુવનાશ્વઃ શરદ્વસુઃ ॥ ૧૯॥

અક્ષપાદઃ કણાદશ્ચ ઉલૂકો વત્સ એવ ચ ।
કુલિકશ્ચૈવ ગર્ગશ્ચ મિત્રકો રુષ્ય એવ ચ ॥ ૨૦॥

એતે શિષ્યા મહેશસ્ય યોગાચાર્યસ્વરૂપિણઃ ।
સઙ્ખ્યા ચ શતમેતેષાં સહ દ્વાદશસઙ્ખ્યયા ॥ ૨૧॥

સર્વે પાશુપતાઃ સિદ્ધા ભસ્મોદ્ધૂલિતવિગ્રહાઃ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞા વેદવેદાઙ્ગપારગાઃ ॥ ૨૨॥

શિવાશ્રમરતાઃ સર્વે શિવજ્ઞાનપરાયણાઃ ।
સર્વે સઙ્ગવિનિર્મુક્તાઃ શિવૈકાસક્તચેતસઃ ॥ ૨૩॥

સર્વદ્વન્દ્વસહા ધીરાઃ સર્વભૂતહિતે રતાઃ ।
ઋજવો મૃદવઃ સ્વસ્થા જિતક્રોધા જિતેન્દ્રિયાઃ ॥ ૨૪॥

રુદ્રાક્ષમાલાભરણાસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકાઃ ।
શિખાજટાઃ સર્વજટા અજટા મુણ્ડશીર્ષકાઃ ॥ ૨૫॥

ફલમૂલાશનપ્રાયાઃ પ્રાણાયામપરાયણાઃ ।
શિવાભિમાનસમ્પન્નાઃ શિવધ્યાનૈકતત્પરાઃ ॥ ૨૬॥

સમુન્મથિતસંસારવિષવૃક્ષાઙ્કુરોદ્ગમાઃ ।
પ્રયાતુમેવ સન્નદ્ધાઃ પરં શિવપુરં પ્રતિ ॥ ૨૭॥

સદેશિકાનિમાન્ મત્વા નિત્યં યઃ શિવમર્ચયેત્ ।
સ યાતિ શિવસાયુજ્યં નાત્ર કાર્યા વિચારણા ॥ ૨૮॥

ઇતિ શ્રીશિવમહાપુરાણે શ્રીશિવમહાપુ સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવસ્ય યોગાવતારવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૭.૨.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૦. દશમોઽધ્યાયઃ । શિવભક્તિવર્ણનમ્ ।

કૃષ્ણ ઉવાચ ।
ભગવન્ સર્વયોગીન્દ્ર ગણેશ્વર મુનીશ્વર ।
ષડાનનસમપ્રખ્ય સર્વજ્ઞાનનિધે ગુરો ॥ ૧॥

પ્રાયસ્ત્વમવતીર્ણોર્વ્યાં પાશવિચ્છિત્તયે નૃણામ્ ।
મહર્ષિવપુરાસ્થાય સ્થિતોઽસિ પરમેશ્વર ॥ ૨॥

અન્યથા હિ જગત્યસ્મિન્ દેવો વા દાનવોઽપિ વા ।
ત્વત્તોઽન્યઃ પરમં ભાવં કો જાનીયાત્ શિવાત્મકમ્ ॥ ૩॥

તસ્માત્તવ મુખોદ્ગીર્ણં સાક્ષાદિવ પિનાકિનઃ ।
શિવજ્ઞાનામૃતં પીત્વા ન મે તૃપ્તમભૂન્મનઃ ॥ ૪॥

સાક્ષાત્સર્વજગત્કર્તુર્ભર્તુરઙ્કં સમાશ્રિતા ।
ભગવત્કિન્નુ પપ્રચ્છ ભર્તારં પરમેશ્વરી ॥ ૫॥

ઉપમન્યુરુવાચ ।

સ્થાને પૃષ્ટં ત્વયા કૃષ્ણ તદ્વક્ષ્યામિ યથાતથમ્ ।
ભવભક્તસ્ય યુક્તસ્ય તવ કલ્યાણચેતસઃ ॥ ૬॥

મહીધરવરે દિવ્યે મન્દરે ચારુકન્દરે ।
દેવ્યા સહ મહાદેવો દિવ્યો ધ્યાનગતોઽભવત્ ॥ ૭॥

તદા દેવ્યાઃ પ્રિયસખી સુસ્મિતાસ્યા શુભાવતી ।
ફુલ્લાન્યતિમનોજ્ઞાનિ પુષ્પાણિ સમુદાહરત્ ॥ ૮॥

તતઃ સ્વમઙ્કમારોપ્ય દેવીં દેવવરોહરઃ ।
અલઙ્કૃત્ય ચ તૈઃ પુષ્પૈરાસ્તે હૃષ્ટતરઃ સ્વયમ્ ॥ ૯॥

અથાન્તઃપુરચારિણ્યો દેવ્યો દિવ્યવિભૂષણાઃ ।
અન્તરઙ્ગા ગણેન્દ્રાશ્ચ સર્વલોકમહેશ્વરીમ્ ॥ ૧૦॥

ભર્તારં પરિપૂર્ણં ચ સર્વલોકમહેશ્વરમ્ ।
ચામરાસક્તહસ્તાશ્ચ દેવીં દેવં સિષેવિરે ॥ ૧૧॥

તતઃ પ્રિયાઃ કથા વૃત્તા વિનોદાય મહેશયોઃ ।
ત્રાણાય ચ નૃણાં લોકે યે શિવં શરણં ગતાઃ ॥ ૧૨॥

તદાવસરમાલોક્ય સર્વલોકમહેશ્વરી ।
ભર્તારં પરિપપ્રચ્છ સર્વલોકમહેશ્વરમ્ ॥ ૧૩॥

દેવ્યુવાચ ।
કેન વશ્યો મહાદેવો મર્ત્યાનાં મન્દચેતસામ્ ।
આત્મતત્ત્વાદ્યશક્તાનામાત્મનામકૃતાત્મનામ્ ॥ ૧૪॥

ઈશ્વર ઉવાચ ।
ન કર્મણા ન તપસા ન જપૈર્નાસનાદિભિઃ ।
ન જ્ઞાનેન ન ચાન્યેન વશ્યોઽહં શ્રદ્ધયા વિના ॥ ૧૫॥

શ્રદ્ધા મય્યસ્તિ ચેત્પુંસાં યેન કેનાપિ હેતુના ।
વશ્યઃ સ્પૃશ્યશ્ચ દૃશ્યશ્ચ પૂજ્યસ્સમ્ભાષ્ય એવ ચ ॥ ૧૬॥

સાધ્યા તસ્માન્ મયિ શ્રદ્ધા માં વશીકર્તુમિચ્છતા ।
શ્રદ્ધા હેતુઃ સ્વધર્મસ્ય રક્ષણં વર્ણિનામિહ ॥ ૧૭॥

સ્વવર્ણાશ્રમધર્મેઽથ વર્તતે યસ્તુ માનવઃ ।
તસ્યૈવ ભવતિ શ્રદ્ધા મયિ નાન્યસ્ય કસ્યચિત્ ॥ ૧૮॥

આમ્નાયસિદ્ધમખિલં ધર્મમાશ્રમિણામિહ ।
બ્રહ્મણા કથિતં પૂર્વં મમૈવાજ્ઞાપુરઃ સરમ્ ॥ ૧૯॥

સ તુ પૈતામહો ધર્મો બહુવિત્તક્રિયાન્વિતઃ ।
નાત્યન્તફલભૂયિષ્ઠઃ ક્લેશાયાસસમન્વિતઃ ।
તેન ધર્મેણ મહતા શ્રદ્ધાં પ્રાપ્ય સુદુર્લ્લભામ્ ॥ ૨૦॥

વર્ણિનો યે પ્રપદ્યન્તે મામનન્યસમાશ્રયાઃ ।
તેષાં સુખેન માર્ગેણ ધર્મકામાર્થમુક્તયઃ ॥ ૨૧॥

વર્ણાશ્રમસમાચારો મયા ભૂયઃ પ્રકલ્પિતઃ ।
તસ્મિન્ ભક્તિમતામેવ મદીયાનાં તુ વર્ણિનામ્ ॥ ૨૨॥

અધિકારો ન ચાન્યેષામિત્યાજ્ઞા નૈષ્ઠિકી મમ ।
તદાજ્ઞપ્તેન માર્ગેણ વર્ણિનો મદુપાશ્રયાઃ ॥ ૨૩॥

મલમાયાદિપાશેભ્યો વિમુક્તા મત્પ્રસાદતઃ ।
પરં મદીયમાસાદ્ય પુનરાવૃત્તિદુર્લભમ્ ।
પરમં મમ સાધર્મ્યં પ્રાપ્ય નિર્વૃતિમાયયુઃ ॥ ૨૪॥

તસ્માત્ લબ્ધ્વાપ્યલબ્ધ્વા વા વર્ણધર્મં મયેરિતમ્ ।
આશ્રિત્ય મમ ભક્તશ્ચેત્સ્વાત્મનાત્માનમુદ્ધરેત્ ॥ ૨૫॥

અલબ્ધલાભ એવૈષ કોટિકોટિગુણાધિકઃ ।
તસ્માન્મે મુખતો લબ્ધં વર્ણધર્મં સમાચરેત્ ॥ ૨૬॥

મમાવતારા હિ શુભે યોગાચાર્યચ્છલેન તુ ।
સર્વાન્તરેષુ સન્ત્યાર્યે સન્તતિશ્ચ સહસ્રશઃ ॥ ૨૭॥

અયુક્તાનામબુદ્ધીનામભક્તાનાં સુરેશ્વરિ ।
દુર્લભં સન્તતિજ્ઞાનં તતો યત્નાત્સમાશ્રયેત્ ॥ ૨૮॥

સા હાનિસ્તન્મહચ્છિદ્રં સ મોહસ્સાન્ધમૂકતા ।
યદન્યત્ર શ્રમં કુર્યાન્મોક્ષમાર્ગબહિષ્કૃતઃ ॥ ૨૯॥

જ્ઞાનં ક્રિયા ચ ચર્યા ચ યોગશ્ચેતિ સુરેશ્વરિ ।
ચતુષ્પાદઃ સમાખ્યાતો મમ ધર્મઃ સનાતનઃ ॥ ૩૦॥

પશુપાશપતિજ્ઞાનં જ્ઞાનમિત્યભિધીયતે ।
ષડધ્વશુદ્ધિર્વિધિના ગુર્વધીના ક્રિયોચ્યતે ॥ ૩૧॥

વર્ણાશ્રમપ્રયુક્તસ્ય મયૈવ વિહિતસ્ય ચ ।
મમાર્ચનાદિધર્મસ્ય ચર્યા ચર્યેતિ કથ્યતે ॥ ૩૨॥

મદુક્તેનૈવ માર્ગેણ મય્યવસ્થિતચેતસઃ ।
વૃત્ત્યન્તરનિરોધો યો યોગ ઇત્યભિધીયતે ॥ ૩૩॥

અશ્વમેધગણાત્ શ્રેષ્ઠં દેવિ ચિત્તપ્રસાધનમ્ ।
મુક્તિદં ચ તથા હ્યેતદ્દુષ્પ્રાપ્યં વિષયૈષિણામ્ ॥ ૩૪॥

વિજિતેન્દ્રિયવર્ગસ્ય યમેન નિયમેન ચ ।
પૂર્વપાપહરો યોગો વિરક્તસ્યૈવ કથ્યતે ॥ ૩૫॥

વૈરાગ્યાજ્જાયતે જ્ઞાનં જ્ઞાનાદ્યોગઃ પ્રવર્તતે ॥ ૩૬॥

યોગજ્ઞઃ પતિતો વાપિ મુચ્યતે નાત્ર સંશયઃ ।
દયા કાર્યાથ સતતમહિંસા જ્ઞાનસઙ્ગ્રહઃ ॥ ૩૭॥

સત્યમસ્તેયમાસ્તિક્યં શ્રદ્ધા ચેન્દ્રિયનિગ્રહઃ ।
અધ્યાપનં ચાધ્યયનં યજનં યાજનં તથા ॥ ૩૮॥

ધ્યાનમીશ્વરભાવશ્ચ સતતં જ્ઞાનશીલતા ।
ય એવં વર્તતે વિપ્રો જ્ઞાનયોગસ્ય સિદ્ધયે ॥ ૩૯॥

અચિરાદેવ વિજ્ઞાનં લબ્ધ્વા યોગં ચ વિન્દતિ ।
દગ્ધ્વા દેહમિમં જ્ઞાની ક્ષણાત્ જ્ઞાનાગ્નિના પ્રિયે ।
પ્રસાદાન્મમ યોગજ્ઞઃ કર્મબન્ધં પ્રહાસ્યતિ ॥ ૪૦॥

પુણ્યઃપુણ્યાત્મકં કર્મ મુક્તેસ્તત્પ્રતિબન્ધકમ્ ।
તસ્માન્નિયોગતો યોગી પુણ્યાપુણ્યં વિવર્જયેત્ ॥ ૪૧॥

ફલકામનયા કર્મકરણાત્પ્રતિબધ્યતે ।
ન કર્મમાત્રકરણાત્તસ્માત્કર્મફલં ત્યજેત્ ॥ ૪૨॥

પ્રથમં કર્મયજ્ઞેન બહિઃ સમ્પૂજ્ય માં પ્રિયે ।
જ્ઞાનયોગરતો ભૂત્વા પશ્ચાદ્યોગં સમભ્યસેત્ ॥ ૪૩॥

વિદિતે મમ યાથાત્મ્યે કર્મયજ્ઞેન દેહિનઃ ।
ન યજન્તિ હિ માં યુક્તાઃ સમલોષ્ટાશ્મકાઞ્ચનાઃ ॥ ૪૪॥

નિત્યયુક્તો મુનિઃ શ્રેષ્ઠો મદ્ભક્તશ્ચ સમાહિતઃ ।
જ્ઞાનયોગરતો યોગી મમ સાયુજ્યમાપ્નુયાત્ ॥ ૪૫॥

અથાવિરક્તચિત્તા યે વર્ણિનો મદુપાશ્રિતાઃ ।
જ્ઞાનચર્યા ક્રિયાસ્વેવ તેઽધિકુર્યુસ્તદર્હકાઃ ॥ ૪૬॥

દ્વિધા મત્પૂજનં જ્ઞેયં બાહ્યમાભ્યન્તરં તથા ।
વાઙ્મનઃકાયભેદાચ્ચ ત્રિધા મદ્ભજનં વિદુઃ ॥ ૪૭॥

તપઃ કર્મ જપો ધ્યાનં જ્ઞાનં વેત્યનુપૂર્વશઃ ।
પઞ્ચધા કથ્યતે સદ્ભિસ્તદેવ ભજનં પુનઃ ॥ ૪૮॥

અન્યાત્મવિદિતં બાહ્યમસ્મદભ્યર્ચનાદિકમ્ ।
તદેવ તુ સ્વસંવેદ્યમાભ્યન્તરમુદાહૃતમ્ ॥ ૪૯॥

મનોમત્પ્રવણં ચિત્તં ન મનોમાત્રમુચ્યતે ।
મન્નામનિરતા વાણી વાઙ્મતા ખલુ નેતરા ॥ ૫૦॥

લિઙ્ગૈર્મચ્છાસનાદિષ્ટૈસ્ત્રિપુણ્ડ્રાદિભિરઙ્કિતઃ ।
મમોપચારનિરતઃ કાયઃ કાયો ન ચેતરઃ ॥ ૫૧॥

મદર્ચા કર્મ વિજ્ઞેયં બાહ્યે યાગાદિનોચ્યતે ।
મદર્થે દેહસંશોષસ્તપઃ કૃચ્છ્રાદિ નો મતમ્ ॥ ૫૨॥

જપઃ પઞ્ચાક્ષરાભ્યાસઃ પ્રણવાભ્યાસ એવ ચ ।
રુદ્રાધ્યાયાદિકાભ્યાસો ન વેદાધ્યયનાદિકમ્ ॥ ૫૩॥

ધ્યાનં મદ્રૂપચિન્તાદ્યં નાત્માદ્યર્થસમાધયઃ ।
મમાગમાર્થવિજ્ઞાનં જ્ઞાનં નાન્યાર્થવેદનમ્ ॥ ૫૪॥

બાહ્યે વાભ્યન્તરે વાથ યત્ર સ્યાન્મનસો રતિઃ ।
પ્રાગ્વાસનાવશાદ્દેવિ તત્ત્વનિષ્ઠાં સમાચરેત્ ॥ ૫૫॥

બાહ્યાદાભ્યન્તરં શ્રેષ્ઠં ભવેચ્છતગુણાધિકમ્ ।
અસઙ્કરત્વાદ્દોષાણાં દૃષ્ટાનામપ્યસમ્ભવાત્ ॥ ૫૬॥

શૌચમાભ્યન્તરં વિદ્યાન્ન બાહ્યં શૌચમુચ્યતે ।
અન્તઃ શૌચવિમુક્તાત્મા શુચિરપ્યશુચિર્યતઃ ॥ ૫૭॥

બાહ્યમાભ્યંર્તરં ચૈવ ભજનં ભવપૂર્વકમ્ ।
ન ભાવરહિતં દેવિ વિપ્રલમ્ભૈકકારણમ્ ॥ ૫૮॥

કૃતકૃત્યસ્ય પૂતસ્ય મમ કિં ક્રિયતે નરૈઃ ।

બહિર્વાભ્યન્તરં વાથ મયા ભાવો હિ ગૃહ્યતે ॥ ૫૯॥

ભાવૈકાત્મા ક્રિયા દેવિ મમ ધર્મઃ સનાતનઃ ।
મનસા કર્મણા વાચા હ્યનપેક્ષ્ય ફલં ક્વચિત્ ॥ ૬૦॥

ફલોદ્દેશેન દેવેશિ લઘુર્મમ સમાશ્રયઃ ।
ફલાર્થી તદભાવે માં પરિત્યક્તું ક્ષમો યતઃ ॥ ૬૧॥

ફલાર્થિનોઽપિ યસ્યૈવ મયિ ચિત્તં પ્રતિષ્ઠિતમ્ ।
ભાવાનુરૂપફલદસ્તસ્યાપ્યહમનિન્દિતે ॥ ૬૨॥

ફલાનપેક્ષયા યેષાં મનો મત્પ્રવણં ભવેત્ ।
પ્રાર્થયેયુઃ ફલં પશ્ચાદ્ભક્તાસ્તેઽપિ મમ પ્રિયાઃ ॥ ૬૩॥

પ્રાક્ સંસ્કારવશાદેવ યે વિચિન્ત્ય ફલાફલે ।
વિવશા માં પ્રપદ્યન્તે મમ પ્રિયતમા મતાઃ ॥ ૬૪॥

મલ્લાભાન્ન પરો લાભસ્તેષામસ્તિ યથાતથમ્ ।
મમાપિ લાભસ્તલ્લાભાન્નાપરઃ પરમેશ્વરિ ॥ ૬૫॥

મદનુગ્રહતસ્તેષાં ભાવો મયિ સમર્પિતઃ ।
ફલં પરમનિર્વાણં પ્રયચ્છતિ બલાદિવ ॥ ૬૬॥

મહાત્મનામનન્યાનાં મયિ સંન્યસ્તચેતસામ્ ।
અષ્ટધા લક્ષણં પ્રાહુર્મમ ધર્માધિકારિણામ્ ॥ ૬૭॥

મદ્ભક્તજનવાત્સલ્યં પૂજાયાં ચાનુમોદનમ્ ।
સ્વયમભ્યર્ચનં ચૈવ મદર્થે ચાઙ્ગચેષ્ટિતમ્ ॥ ૬૮॥

મત્કથાશ્રવણે ભક્તિઃ સ્વરનેત્રાઙ્ગવિક્રિયાઃ ।
મમાનુસ્મરણં નિત્યં યશ્ચ મામુપજીવતિ ॥ ૬૯॥

એવમષ્ટવિધં ચિહ્નં યસ્મિન્ મ્લેચ્છેઽપિ વર્તતે ।
સ વિપ્રેન્દ્રો મુનિઃ શ્રીમાન્ સ યતિઃ સ ચ પણ્ડિતઃ ॥ ૭૦॥

ન મે પ્રિયશ્ચતુર્વેદી મદ્ભક્તો શ્વપચોઽપિ યઃ ।
તસ્મૈ દેયં તતો ગ્રાહ્યં સ ચ પૂજ્યો યથા હ્યહમ્ ॥ ૭૧॥

પત્રં પુષ્પં ફલં તોયં યો મે ભક્ત્યા પ્રયચ્છતિ ।
તસ્યાહં ન પ્રણશ્યામિ સ ચ મે ન પ્રણશ્યતિ ॥ ૭૨॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવભક્તિવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૭.૨.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૧. એકાદશોઽધ્યાયઃ । શિવજ્ઞાનવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
અથ વક્ષ્યામિ દેવેશિ ભક્તાનામધિકારિણામ્ ।
વિદુષાં દ્વિજમુખ્યાનાં વર્ણધર્મસમાસતઃ ॥ ૧॥

ત્રિઃસ્નાનં ચાગ્નિકાર્યં ચ લિઙ્ગાર્ચનમનુક્રમમ્ ।
દાનમીશ્વરભાવશ્ચ દયા સર્વત્ર સર્વદા ॥ ૨॥

સત્યં સન્તોષમાસ્તિક્યમહિંસા સર્વજન્તુષુ ।
હ્રીઃશ્રદ્ધાધ્યયનં યોગઃ સદાધ્યાપનમેવ ચ ॥ ૩॥

વ્યાખ્યાનં બ્રહ્મચર્યં ચ શ્રવણં ચ તપઃ ક્ષમા ।
શૌચં શિખોપવીતં ચ ઉષ્ણીષં ચોત્તરીયકમ્ ॥ ૪॥

નિષિદ્ધાસેવનં ચૈવ ભસ્મરુદ્રાક્ષધારણમ્ ।
પર્વણ્યભ્યર્ચનં દેવિ ચતુર્દશ્યાં વિશેષતઃ ॥ ૫॥

પાનં ચ બ્રહ્મકૂર્ચસ્ય માસિ માસિ યથાવિધિ ।
અભ્યર્ચનં વિશેષેણ તેનૈવ સ્નાપ્ય માં પ્રિયે ॥ ૬॥

સર્વક્રિયાન્નસન્ત્યાગઃ શ્રાદ્ધાન્નસ્ય ચ વર્જનમ્ ।
તથા પર્યુષિતાન્નસ્ય યાવકસ્ય વિશેષતઃ ॥ ૭॥

મદ્યસ્ય મદ્યગન્ધસ્ય નૈવેદ્યસ્ય ચ વર્જનમ્ ।
સામાન્યં સર્વવર્ણાનાં બ્રાહ્મણાનાં વિશેષતઃ ॥ ૮॥

ક્ષમા શાન્તિશ્ચ સન્તોષઃ સત્યમસ્તેયમેવ ચ ।
બ્રહ્મચર્યં મમ જ્ઞાનં વૈરાગ્યં ભસ્મસેવનમ્ ॥ ૯॥

સર્વસઙ્ગનિવૃત્તિશ્ચ દશૈતાનિ વિશેષતઃ ।
લિઙ્ગાનિ યોગિનાં ભૂયો દિવા ભિક્ષાશનં તથા ॥ ૧૦॥

વાનપ્રસ્થાશ્રમસ્થાનાં સમાનમિદમિષ્યતે ।
રાત્રૌ ન ભોજનં કાર્યં સર્વેષાં બ્રહ્મચારિણામ્ ॥ ૧૧॥

અધ્યાપનં યાજનં ચ ક્ષત્રિયસ્યાપ્રતિગ્રહઃ ।
વૈશ્યસ્ય ચ વિશેષેણ મયા નાત્ર વિધીયતે ॥ ૧૨॥

રક્ષણં સર્વવર્ણાનાં યુદ્ધે શત્રુવધસ્તથા ।
દુષ્ટપક્ષિમૃગાણાં ચ દુષ્ટાનાં શાતનં નૃણામ્ ॥ ૧૩॥

અવિશ્વાસશ્ચ સર્વત્ર વિશ્વાસો મમ યોગિષુ ।
સ્ત્રીસંસર્ગશ્ચ કાલેષુ ચમૂરક્ષણમેવ ચ ॥ ૧૪॥

સદા સઞ્ચારિતૈશ્ચારૈર્લોકવૃત્તાન્તવેદનમ્ ।
સદાસ્ત્રધારણં ચૈવ ભસ્મકઞ્ચુકધારણમ્ ॥ ૧૫॥

રાજ્ઞાં મમાશ્રમસ્થાનામેષ ધર્મસ્ય સઙ્ગ્રહઃ ।
ગોરક્ષણં ચ વાણિજ્યં કૃષિર્વૈશ્યસ્ય કથ્યતે ॥ ૧૬॥

શુશ્રૂષેતરવર્ણાનાં ધર્મઃ શૂદ્રસ્ય કથ્યતે ।
ઉદ્યાનકરણં ચૈવ મમ ક્ષેત્રસમાશ્રયઃ ॥ ૧૭॥

ધર્મપત્ન્યાસ્તુ ગમનં ગૃહસ્થસ્ય વિધીયતે ।
બ્રહ્મચર્યં વનસ્થાનાં યતીનાં બ્રહ્મચારિણામ્ ॥ ૧૮॥

સ્ત્રીણાં તુ ભર્તૃશુશ્રૂષા ધર્મો નાન્યઃ સનાતનઃ ।
મમાર્ચનં ચ કલ્યાણિ નિયોગો ભર્તુરસ્તિ ચેત્ ॥ ૧૯॥

યા નારી ભર્તૃશુશ્રૂષાં વિહાય વ્રતતત્પરા ।
સા નારી નરકં યાતિ નાત્ર કાર્યા વિચારણા ॥ ૨૦॥

અથ ભર્તૃવિહીનાયા વક્ષ્યે ધર્મં સનાતનમ્ ।
વ્રતં દાનં તપઃ શૌચં ભૂશય્યાનક્તભોજનમ્ ॥ ૨૧॥

બ્રહ્મચર્યં સદા સ્નાનં ભસ્મના સલિલેન વા ।
શાન્તિર્મૌનં ક્ષમા નિત્યં સંવિભાગો યથાવિધિ ॥ ૨૨॥

અષ્ટમ્યાં ચ ચતુર્દશ્યાં પૌર્ણમાસ્યાં વિશેષતઃ ।
એકાદશ્યાં ચ વિધિવદુપવાસો મમાર્ચનમ્ ॥ ૨૩॥

ઇતિ સઙ્ક્ષેપતઃ પ્રોક્તો મયાશ્રમનિષેવિણામ્ ।
બ્રહ્મક્ષત્રવિશાં દેવિ યતીનાં બ્રહ્મચારિણામ્ ॥ ૨૪॥

તથૈવ વાનપ્રસ્થાનાં ગૃહસ્થાનાં ચ સુન્દરિ ।
શૂદ્રાણામથ નારીણાં ધર્મ એષ સનાતનઃ ॥ ૨૫॥

ધ્યેયસ્ત્વયાઽહં દેવેશિ સદા જાપ્યઃ ષડક્ષરઃ ।
વેદોક્તમખિલં ધર્મમિતિ ધર્માર્થસઙ્ગ્રહઃ ॥ ૨૬॥

અથ યે માનવા લોકે સ્વેચ્છયા ધૃતવિગ્રહાઃ ।
ભાવાતિશયસમ્પન્નાઃ પૂર્વસંસ્કારસંયુતાઃ ॥ ૨૭॥

વિરક્તા વાનુરક્તા વા સ્ત્ર્યાદીનાં વિષયેષ્વપિ ।
પાપૈર્ન તે વિલિમ્પન્તે પદ્મપત્રમિવામ્ભસા ॥ ૨૮॥

તેષાં મમાત્મવિજ્ઞાનં વિશુદ્ધાનાં વિવેકિનામ્ ।
મત્પ્રસાદાદ્વિશુદ્ધાનાં દુઃખમાશ્રમરક્ષણમ્ ॥ ૨૯॥

નાસ્તિ કૃત્યમકૃત્યં ચ સમાધિર્વા પરાયણમ્ ।
ન વિધિર્ન નિષેધશ્ચ તેષાં મમ યથા તથા ॥ ૩૦॥

તથેહ પરિપૂર્ણસ્ય સાધ્યં મમ ન વિદ્યતે ।
તથૈવ કૃતકૃત્યાનાં તેષામપિ ન સંશયઃ ॥ ૩૧॥

મદ્ભક્તાનાં હિતાર્થાય માનુષં ભાવમાશ્રિતાઃ ।
રુદ્રલોકાત્પરિભ્રષ્ટાસ્તે રુદ્રા નાત્ર સંશયઃ ॥ ૩૨॥

મમાનુશાસનં યદ્વદ્ બ્રહ્માદીનાં પ્રવર્તકમ્ ।
તથા નરાણામન્યેષાં તન્નિયોગઃ પ્રવર્તકઃ ॥ ૩૩॥

મમાજ્ઞાધારભાવેન સદ્ભાવાતિશયેન ચ ।
મદાલોકનમાત્રેણ સર્વપાપક્ષયો ભવેત્ ॥ ૩૪॥

પ્રત્યયાશ્ચ પ્રવર્તન્તે પ્રશસ્તફલસૂચકાઃ ।
મયિ ભાવવતાં પુંસાં પ્રાગદૃષ્ટાર્થગોચરાઃ ॥ ૩૫॥

કમ્પસ્વેદોઽશ્રુપાતશ્ચ કણ્ઠે ચ સ્વરવિક્રિયા ।
આનન્દાદ્યુપલબ્ધિશ્ચ ભવેદાકસ્મિકી મુહુઃ ॥ ૩૬॥

સ તૈર્વ્યસ્તૈઃ સમસ્તૈર્વા લિઙ્ગૈરવ્યભિચારિભિઃ ।
મન્દમધ્યોત્તમૈર્ભાવૈર્વિજ્ઞેયાસ્તે નરોત્તમાઃ ॥ ૩૭॥

યથાયોઽગ્નિસમાવેશાન્નાયો ભવતિ કેવલમ્ ।

તથૈવ મમ સાન્નિધ્યાન્ન તે કેવલમાનુષાઃ ॥ ૩૮॥

હસ્તપાદાદિસાધર્મ્યાદ્ રુદ્રાન્ મર્ત્યવપુર્ધરાન્ ।
પ્રાકૃતાનિવ મન્વાનો નાવજાનીત પણ્ડિતઃ ॥ ૩૯॥

અવજ્ઞાનં કૃતં તેષુ નરૈર્વ્યામૂઢચેતનૈઃ ।
આયુઃ શ્રિયં કુલં શીલં હિત્વા નિરયમાવહેત્ ॥ ૪૦॥

બ્રહ્મવિષ્ણુસુરેશાનામપિ તૂલાયતે પદમ્ ।
મત્તોઽન્યદનપેક્ષાણામુદ્ધૃતાનાં મહાત્મનામ્ ॥ ૪૧॥

અશુદ્ધં બૌદ્ધમૈશ્વર્યં પ્રાકૃતં પૌરુષં તથા ।
ગુણેશાનામતસ્ત્યાજ્યં ગુણાતીતપદૈષિણામ્ ॥ ૪૨॥

અથ કિં બહુનોક્તેન શ્રેયઃ પ્રાપ્ત્યૈકસાધનમ્ ।
મયિ ચિત્તસમાસઙ્ગો યેન કેનાપિ હેતુના ॥ ૪૩॥

ઉપમન્યુરુવાચ ।
ઇત્થં શ્રીકણ્ઠનાથેન શિવેન પરમાત્મના ।
હિતાય જગતામુક્તો જ્ઞાનસારાર્થસઙ્ગ્રહઃ ॥ ૪૪॥

વિજ્ઞાનસઙ્ગ્રહસ્યાસ્ય વેદશાસ્ત્રાણિ કૃત્સ્નશઃ ।
સેતિહાસપુરાણાનિ વિદ્યા વ્યાખ્યાનવિસ્તરઃ ॥ ૪૫॥

જ્ઞાનં જ્ઞેયમનુષ્ઠેયમધિકારોઽથ સાધનમ્ ।
સાધ્યં ચેતિ ષડર્થાનાં સઙ્ગ્રહત્વેષ સઙ્ગ્રહઃ ॥ ૪૬॥

ગુરોરધિકૃતં જ્ઞાનં જ્ઞેયં પાશઃ પશુઃ પતિઃ ।
લિઙ્ગાર્ચનાદ્યનુષ્ઠેયં ભક્તસ્ત્વધિકૃતોઽપિ યઃ ॥ ૪૭॥

સાધનં શિવમન્ત્રાદ્યં સાધ્યં શિવસમાનતા ।
ષડર્થસઙ્ગ્રહસ્યાસ્ય જ્ઞાનાત્સર્વજ્ઞતોચ્યતે ॥ ૪૮॥

પ્રથમં કર્મયજ્ઞાદેર્ભક્ત્યા વિત્તાનુસારતઃ ।
બાહ્યેઽભ્યર્ચ્ય શિવં પશ્ચાદન્તર્યાગરતો ભવેત્ ॥ ૪૯॥

રતિરભ્યન્તરે યસ્ય ન બાહ્યે પુણ્યગૌરવાત્ ।
ન કર્મ કરણીયં હિ બહિસ્તસ્ય મહાત્મના ॥ ૫૦॥

જ્ઞાનામૃતેન તૃપ્તસ્ય ભક્ત્યા શૈવશિવાત્મનઃ ।
નાન્તર્ન ચ બહિઃ કૃષ્ણ કૃત્યમસ્તિ કદાચન ॥ ૫૧॥

તસ્માત્ ક્રમેણ સન્ત્યજ્ય બાહ્યમાભ્યન્તરં તથા ।
જ્ઞાનેન જ્ઞેયમાલોક્ય જ્ઞાનં ચાપિ પરિત્યજેત્ ॥ ૫૨॥

નૈકાગ્રં ચેચ્છિવે ચિત્તં કિં કૃતેનાપિ કર્મણા ।
એકાગ્રમેવ ચેચ્ચિત્તં કિં કૃતેનાપિ કર્મણા ॥ ૫૩॥

તસ્માત્કર્માણ્યકૃત્વા વા કૃત્વા વાન્તર્બહિઃક્રમાત્ ।
યેન કેનાપ્યુપાયેન શિવે ચિત્તં નિવેશયેત્ ॥ ૫૪॥

શિવે નિવિષ્ટચિત્તાનાં પ્રતિષ્ઠિતધિયાં સતામ્ ।
પરત્રેહ ચ સર્વત્ર નિર્વૃતિઃ પરમા ભવેત્ ॥ ૫૫॥

ઇહોન્નમઃ શિવાયેતિ મન્ત્રેણાનેન સિદ્ધયઃ ।
સ તસ્માદધિગન્તવ્યઃ પરાવરવિભૂતયે ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવજ્ઞાનવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૭.૨.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૨. દ્વાદશોઽધ્યાયઃ । પઞ્ચાક્ષરમાહાત્મ્યવર્ણનમ્ ।

શ્રીકૃષ્ણ ઉવાચ ।
મહર્ષિવર સર્વજ્ઞ સર્વજ્ઞાનમહોદધે ।
પઞ્ચાક્ષરસ્ય માહાત્મ્યં શ્રોતુમિચ્છામિ તત્ત્વતઃ ॥ ૧॥

ઉપમન્યુરુવાચ ।
પઞ્ચાક્ષરસ્ય માહાત્મ્યં વર્ષકોટિશતૈરપિ ।
અશક્યં વિસ્તરાદ્વક્તું તસ્માત્સઙ્ક્ષેપતઃ શ‍ૃણુ ॥ ૨॥

વેદે શિવાગમે ચાયમુભયત્ર ષડક્ષરઃ ।
સર્વેષાં શિવભક્તાનામશેષાર્થપ્રસાધકઃ ॥ ૩॥

તદલ્પાક્ષરમર્થાઢ્યં વેદસારં વિમુક્તિદમ્ ।
આજ્ઞાસિદ્ધમસન્દિગ્ધં વાક્યમેતત્ શિવાત્મકમ્ ॥ ૪॥

નાનાસિદ્ધિયુતં દિવ્યં લોકચિત્તાનુરઞ્જકમ્ ।

સુનિશ્ચિતાર્થં ગમ્ભીરં વાક્યં તત્પારમેશ્વરમ્ ॥ ૫॥

મન્ત્રં સુખમુખોચ્ચાર્યમશેષાર્થપ્રસિદ્ધયે ।
પ્રાહોન્નમઃ શિવાયેતિ સર્વજ્ઞઃ સર્વદેહિનામ્ ॥ ૬॥

તદ્બીજં સર્વવિદ્યાનાં મન્ત્રમાદ્યં ષડક્ષરમ્ ।
અતિસૂક્ષ્મં મહાર્થં ચ જ્ઞેયં તદ્વટબીજવત્ ॥ ૭॥

દેવો ગુણત્રયાતીતઃ સર્વજ્ઞઃ સર્વકૃત્પ્રભુઃ ।
ઓમિત્યેકાક્ષરે મન્ત્રે સ્થિતઃ સર્વગતઃ શિવઃ ॥ ૮॥

ઇશાનાદ્યાનિ સૂક્ષ્માણિ બ્રહ્માણ્યેકાક્ષરાણિ તુ ।
મન્ત્રે નમઃ શિવાયેતિ સંસ્થિતાનિ યથાક્રમમ્ ।
મન્ત્રે ષડક્ષરે સૂક્ષ્મે પઞ્ચબ્રહ્મતનુઃ શિવઃ ॥ ૯॥

વાચ્યવાચકભાવેન સ્થિતઃ સાક્ષાત્સ્વભાવતઃ ।
વાચ્યઃ શિવોઽપ્રમેયત્વાત્ મન્ત્રસ્તદ્વાચકઃ સ્મૃતઃ ॥ ૧૦॥

વાચ્યવાચકભાવોઽયમનાદિઃ સંસ્થિતસ્તયોઃ ।
યથાનાદિપ્રવૃત્તોઽયં ઘોરસંસારસાગરઃ ॥ ૧૧॥

શિવોઽપિ હિ તથાનાદિઃ સંસારાન્મોચકઃ સ્થિતઃ ।
વ્યાધીનાં ભેષજં યદ્વત્પ્રતિપક્ષઃ સ્વભાવતઃ ॥ ૧૨॥

તદ્વત્સંસારદોષાણાં પ્રતિપક્ષઃ શિવઃ સ્મૃતઃ ।
અસત્યસ્મિન્ જગન્નાથે તમોભૂતમિદં ભવેત્ ॥ ૧૩॥

અચેતનત્વાત્પ્રકૃતેરજ્ઞત્વાત્પુરષસ્ય ચ ।
પ્રધાનપરમાણ્વાદિ યાવત્કિઞ્ચિદચેતનમ્ ॥ ૧૪॥

ન તત્કર્તૃ સ્વયં દૃષ્ટં બુદ્ધિમત્કારણં વિના ।
ધર્માધર્મોપદેશશ્ચ બન્ધમોક્ષૌ વિચારણાત્ ॥ ૧૫॥

ન સર્વજ્ઞં વિના પુંસામાદિસર્ગઃ પ્રસિદ્ધ્યતિ ।
વૈદ્યં વિના નિરાનન્દાઃ ક્લિશ્યન્તે રોગિણો યથા ॥ ૧૬॥

તસ્માદનાદિઃ સર્વજ્ઞઃ પરિપૂર્ણઃ સદાશિવઃ ।
અસ્તિ નાથઃ પરિત્રાતા પુંસાં સંસારસાગરાત્ ॥ ૧૭॥

આદિમધ્યાન્તનિર્મુક્તઃ સ્વભાવવિમલઃ પ્રભુઃ ।
સર્વજ્ઞઃ પરિપૂર્ણશ્ચ શિવો જ્ઞેયઃ શિવાગમે ॥ ૧૮॥

તસ્યાભિધાનમન્ત્રોઽયમભિધેયશ્ચ સ સ્મૃતઃ ।
અભિધાનાભિધેયત્વાત્ મન્ત્રઃ સિદ્ધઃ પરઃ શિવઃ ॥ ૧૯॥

એતાવત્તુ શિવજ્ઞાનમેતાવત્પરમં પદમ્ ।
યદોન્નમઃ શિવાયેતિ શિવવાક્યં ષડક્ષરમ્ ॥ ૨૦॥

વિધિવાક્યમિદં શૈવં નાર્થવાદં શિવાત્મકમ્ ।
યઃ સર્વજ્ઞઃ સુસમ્પૂર્ણઃ સ્વભાવવિમલઃ શિવઃ ॥ ૨૧॥

લોકાનુગ્રહકર્ત્તા ચ સ મૃષાર્થં કથં વદેત્ ।
યદ્યથાવસ્થિતં વસ્તુ ગુણદોષૈઃ સ્વભાવતઃ ॥ ૨૨॥

યાવત્ફલં ચ તત્પૂર્ણં સર્વજ્ઞસ્તુ યથા વદેત્ ।
રાગાજ્ઞાનાદિભિર્દોષૈર્ગ્રસ્તત્વાદનૃતં વદેત્ ॥ ૨૩॥

તે ચેશ્વરે ન વિદ્યેતે બ્રૂયાત્સ કથમન્યથા ।
અજ્ઞાતાશેષદોષેણ સર્વજ્ઞેય શિવેન યત્ ।
પ્રણીતમમલં વાક્યં તત્પ્રમાણં ન સંશયઃ ॥ ૨૪॥

તસ્માદીશ્વરવાક્યાનિ શ્રદ્ધેયાનિ વિપશ્ચિતા ।
યથાર્થપુણ્યપાપેષુ તદશ્રદ્ધો વ્રજત્યધઃ ॥ ૨૫॥

સ્વર્ગાપવર્ગસિદ્ધ્યર્થં ભાષિતં યત્સુશોભનમ્ ।
વાક્યં મુનિવરૈઃ શાન્તૈસ્તદ્વિજ્ઞેયં સુભાષિતમ્ ॥ ૨૬॥

રાગદ્વેષાનૃતક્રોધકામતૃષ્ણાનુસારિ યત્ ।
વાક્યં નિરયહેતુત્વાત્તદ્દુર્ભાષિતમુચ્યતે ॥ ૨૭॥

સંસ્કૃતેનાઽપિ કિં તેન મૃદુના લલિતેન વા ।
અવિદ્યારાગવાક્યેન સંસારક્લેશહેતુના ॥ ૨૮॥

યચ્છ્રુત્વા જાયતે શ્રેયો રાગાદીનાં ચ સઙ્ક્ષયઃ ।
વિરૂપમપિ તદ્વાક્યં વિજ્ઞેયમિતિ શોભનમ્ ॥ ૨૯॥

બહુત્વેઽપિ હિ મન્ત્રાણાં સર્વજ્ઞેન શિવેન યઃ ।
પ્રણીતો વિમલો મન્ત્રો ન તેન સદૃશઃ ક્વચિત્ ॥ ૩૦॥

સાઙ્ગાનિ વેદશાસ્ત્રાણિ સંસ્થિતાનિ ષડક્ષરે ।
ન તેન સદૃશસ્તસ્માન્મન્ત્રોઽપ્યસ્ત્યપરઃ ક્વચિત્ ॥ ૩૧॥

સપ્તકોટિમહામન્ત્રૈરુપમન્ત્રૈરનેકધા ।
મન્ત્રઃ ષડક્ષરો ભિન્નઃ સૂત્રં વૃત્ત્યાત્મના યથા ॥ ૩૨॥

શિવજ્ઞાનાનિ યાવન્તિ વિદ્યાસ્થાનાનિ યાનિ ચ ।
ષડક્ષરસ્ય સૂત્રસ્ય તાનિ ભાષ્યં સમાસતઃ ॥ ૩૩॥

કિં તસ્ય બહુભિર્મન્ત્રૈઃ શાસ્ત્રૈર્વા બહુવિસ્તરૈઃ ।
યસ્યોન્નમઃ શિવાયેતિ મન્ત્રોઽયં હૃદિ સંસ્થિતઃ ॥ ૩૪॥

તેનાધીતં શ્રુતં તેન કૃતં સર્વમનુષ્ઠિતમ્ ।
યેનોન્નમઃ શિવાયેતિ મન્ત્રાભ્યાસઃ સ્થિરીકૃતઃ ॥ ૩૫॥

નમસ્કારાદિસંયુક્તં શિવાયેત્યક્ષરત્રયમ્ ।
જિહ્વાગ્રે વર્તતે યસ્ય સફલં તસ્ય જીવિતમ્ ॥ ૩૬॥

અન્ત્યજો વાધમો વાપિ મૂર્ખો વા પણ્ડિતોઽપિ વા ।
પઞ્ચાક્ષરજપે નિષ્ઠો મુચ્યતે પાપપઞ્જરાત્ ॥ ૩૭॥

ઇત્યુક્તં પરમેશેન દેવ્યા પૃષ્ટેન શૂલિના ।
હિતાય સર્વમર્ત્યાનાં દ્વિજાનાં તુ વિશેષતઃ ॥ ૩૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે પઞ્ચાક્ષરમાહાત્મ્યવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૭.૨.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૩. ત્રયોદશોઽધ્યાયઃ । પઞ્ચાક્ષરમાહાત્મ્યવર્ણનમ્ ।

દેવ્યુવાચ ।
કલૌ કલુષિતે કાલે દુર્જયે દુરતિક્રમે ।
અપુણ્યતમસાચ્છન્ને લોકે ધર્મપરાઙ્મુખે ॥ ૧॥

ક્ષીણે વર્ણાશ્રમાચારે સઙ્કટે સમુપસ્થિતે ।
સર્વાધિકારે સન્દિગ્ધે નિશ્ચિતે વાપિ પર્યયે ॥ ૨॥

તદોપદેશે વિહતે ગુરુશિષ્યક્રમે ગતે ।
કેનોપાયેન મુચ્યન્તે ભક્તાસ્તવ મહેશ્વર ॥ ૩॥

ઈશ્વર ઉવાચ ।
આશ્રિત્ય પરમાં વિદ્યાં હૃદ્યાં પઞ્ચાક્ષરીં મમ ।
ભક્ત્યા ચ ભાવિતાત્માનો મુચ્યન્તે કલિજા નરાઃ ॥ ૪॥

મનોવાક્કાયજૈર્દોષૈર્વક્તું સ્મર્તુમગોચરૈઃ ।
દૂષિતાનાં કૃતઘ્નાનાં નિન્દકાનાં છલાત્મનામ્ ॥ ૫॥

લુબ્ધાનાં વક્રમનસામપિ મત્પ્રવણાત્મનામ્ ।
મમ પઞ્ચાક્ષરી વિદ્યા સંસારભયતારિણી ॥ ૬॥

મયૈવમસકૃદ્દેવિ પ્રતિજ્ઞાતં ધરાતલે ।
પતિતોઽપિ વિમુચ્યેત મદ્ભક્તો વિદ્યયાઽનયા ॥ ૭॥

દેવ્યુવાચ ।
કર્માયોગ્યો ભવેન્મર્ત્યઃ પતિતો યદિ સર્વથા ।
કર્માયોગેન યત્કર્મ કૃતં ચ નરકાય હિ ।
તતઃ કથં વિમુચ્યેત પતિતો વિદ્યયાઽનયા ॥ ૮॥

ઈશ્વર ઉવાચ ।
તથ્યમેતત્ત્વયા પ્રોક્તં તથા હિ શૃણુ સુન્દરિ ।
રહસ્યમિતિ મત્વૈતદ્ગોપિતં યન્મયા પુરા ॥ ૯॥

સમન્ત્રકં માં પતિતઃ પૂજયેદ્યદિ મોહિતઃ ।
નારકી સ્યાન્ન સન્દેહો મમ પઞ્ચાક્ષરં વિના ॥ ૧૦॥

અબ્ભક્ષા વાયુભક્ષાશ્ચ યે ચાન્યે વ્રતકર્શિતાઃ ।
તેષામેતૈર્વ્રતૈર્નાસ્તિ મમ લોકસમાગમઃ ॥ ૧૧॥

ભક્ત્યા પઞ્ચાક્ષરેણૈવ યો હિ માં સકૃદર્ચયેત્ ।
સોઽપિ ગચ્છેન્મમ સ્થાનં મન્ત્રસ્યાસ્યૈવ ગૌરવાત્ ॥ ૧૨॥

તસ્માત્તપાંસિ યજ્ઞાશ્ચ વ્રતાનિ નિયમાસ્તથા ।
પઞ્ચાક્ષરાર્ચનસ્યૈતે કોટ્યંશેનાપિ નો સમઃ ॥ ૧૩॥

બદ્ધો વાપ્યથ મુક્તો વા પાશાત્પઞ્ચાક્ષરેણ યઃ ।
પૂજયેન્માં સ મુચ્યેત નાત્ર કાર્યા વિચારણા ॥ ૧૪॥

અરુદ્રો વા સરુદ્રો વા સકૃત્પઞ્ચાક્ષરેણ યઃ ।
પૂજયેત્પતિતો વાપિ મૂઢો વા મુચ્યતે નરઃ ॥ ૧૫॥

ષડક્ષરેણ વા દેવિ તથા પઞ્ચાક્ષરેણ વા ।
સ બ્રહ્માઙ્ગેન માં ભક્ત્યા પૂજયેદ્યદિ મુચ્યતે ॥ ૧૬॥

પતિતોઽપતિતો વાપિ મન્ત્રેણાનેન પૂજયેત્ ।
મમ ભક્તો જિતક્રોધો સલબ્ધોઽલબ્ધ એવ વા ॥ ૧૭॥

અલબ્ધાલ્લબ્ધ એવેહ કોટિકોટિગુણાધિકઃ ।
તસ્માત્ લબ્ધ્વૈવ માં દેવિ મન્ત્રેણાનેન પૂજયેત્ ॥ ૧૮॥

લબ્ધ્વા સમ્પૂજયેદ્યસ્તુ મૈત્ર્યાદિગુણસંયુતઃ ।
બ્રહ્મચર્યરતો ભક્ત્યા મત્સાદૃશ્યમવાપ્નુયાત્ ॥ ૧૯॥

કિમત્ર બહુનોક્તેન ભક્તાઃ સર્વેઽધિકારિણઃ ।
મમ પઞ્ચાક્ષરે મન્ત્રે તસ્માત્ શ્રેષ્ઠતરો હિ સઃ ॥ ૨૦॥

પઞ્ચાક્ષરપ્રભાવેણ લોકવેદમહર્ષયઃ ।
તિષ્ઠન્તિ શાશ્વતા ધર્મા દેવાઃ સર્વમિદં જગત્ ॥ ૨૧॥

પ્રલયે સમનુપ્રાપ્તે નષ્ટે સ્થાવરજઙ્ગમે ।
સર્વં પ્રકૃતિમાપન્નં તત્ર સંલયમેષ્યતિ ॥ ૨૨॥

એકોઽહં સંસ્થિતો દેવિ ન દ્વિતીયોઽસ્તિ કુત્રચિત્ ।
તદા વેદાશ્ચ શાસ્ત્રાણિ સર્વે પઞ્ચાક્ષરે સ્થિતાઃ ॥ ૨૩॥

તે નાશં નૈવ સમ્પ્રાપ્તા મચ્છક્ત્યા હ્યનુપાલિતાઃ ।
તતઃ સૃષ્ટિરભૂન્મત્તઃ પ્રકૃત્યાત્મપ્રભેદતઃ ॥ ૨૪॥

ગુણમૂર્ત્યાત્મનાં ચૈવ તતોઽવાન્તરસંહૃતિઃ ।
તદા નારાયણઃ શેતે દેવો માયામયીં તનુમ્ ॥ ૨૫॥

આસ્થાય ભોગિપર્યઙ્કશયને તોયમધ્યગઃ ।
તન્નાભિપઙ્કજાજ્જાતઃ પઞ્ચવક્ત્રઃ પિતામહઃ ॥ ૨૬॥

સિસૃક્ષમાણો લોકાંસ્ત્રીન્ન સક્તો હ્યસહાયવાન્ ।
મુનીન્દશ સસર્જાદૌ માનસાનમિતૌજસઃ ॥ ૨૭॥

તેષાં સિદ્ધિવિવૃદ્ધ્યર્થં માં પ્રોવાચ પિતામહઃ ।
મત્પુત્રાણાં મહાદેવ શક્તિં દેહિ મહેશ્વર ॥ ૨૮॥

ઇત્યેવં પ્રાર્થિતસ્તેન પઞ્ચવક્ત્રધરો હ્યહમ્ ।
પઞ્ચાક્ષરાણિ ક્રમશઃ પ્રોક્તવાન્ પદ્મયોનયે ॥ ૨૯॥

સ પઞ્ચવદનૈસ્તાનિ ગૃહ્ણઁલ્લોકપિતામહઃ ।
વાચ્યવાચકભાવેન જ્ઞાતવાન્માં મહેશ્વરમ્ ॥ ૩૦॥

જ્ઞાત્વા પ્રયોગં વિધિવત્ સિદ્ધમન્ત્રઃ પ્રજાપતિઃ ।
પુત્રેભ્યઃ પ્રદદૌ મન્ત્રં મન્ત્રાર્થં ચ યથાતથમ્ ॥ ૩૧॥

તે ચ લબ્ધ્વા મન્ત્રરત્નં સાક્ષાત્ લોકપિતામહાત્ ।
તદાજ્ઞપ્તેન માર્ગેણ મદારાધનકાઙ્ક્ષિણઃ ॥ ૩૨॥

મેરોસ્તુ શિખરે રમ્યે મુઞ્જવાન્નામ પર્વતઃ ।
મત્પ્રિયઃ સતતં શ્રીમાન્મદ્ભક્તૈ રક્ષિતઃ સદા ॥ ૩૩॥

તસ્યાભ્યાશે તપસ્તીવ્રં લોકં સ્રષ્ટું સમુત્સુકાઃ ।
દિવ્યં વર્ષસહસ્રં તુ વાયુભક્ષાઃ સમાચરન્ ॥ ૩૪॥

તેષાં ભક્તિમહં દૃષ્ટ્વા સદ્યઃ પ્રત્યક્ષતામિયામ્ ।
ઋષિં છન્દશ્ચ કીલં ચ બીજશક્તિં ચ દૈવતમ્ ॥ ૩૫॥

ન્યાસં ષડઙ્ગં દિગ્બન્ધં વિનિયોગમશેષતઃ ।
પ્રોક્તવાનહમાર્યાણાં જગત્સૃષ્ટિવિવૃદ્ધયે ॥ ૩૬॥

તતસ્તે મન્ત્રમાહાત્મ્યાદ્ ઋષયસ્તપસૌધિતાઃ ।
સૃષ્ટિં વિતન્વતે સમ્યક્ સદેવાસુરમાનુષીમ્ ॥ ૩૭॥

અસ્યાઃ પરમવિદ્યાયાઃ સ્વરૂપમધુનોચ્યતે ।
આદૌ નમઃ પ્રયોક્તવ્યં શિવાય તુ તતઃ પરમ્ ॥ ૩૮॥

સૈષા પઞ્ચાક્ષરી વિદ્યા સર્વશ્રુતિશિરોગતા ।
સર્વજાતસ્ય સર્વસ્ય બીજભૂતા સનાતની ॥ ૩૯॥

પ્રથમં મન્મુખોદ્ગીર્ણા સા મમૈવાસ્તિ વાચિકા ।
તપ્તચામીકરપ્રખ્યા પીનોન્નતપયોધરા ॥ ૪૦॥

ચતુર્ભુજા ત્રિનયના બાલેન્દુકૃતશેખરા ।
પદ્મોત્પલકરા સૌમ્યા વરદાભયપાણિકા ॥ ૪૧॥

સર્વલક્ષણસમ્પન્ના સર્વાભરણભૂષિતા ।
સિતપદ્માસનાસીના નીલકુઞ્ચિતમૂર્દ્ધજા ॥ ૪૨॥

અસ્યાઃ પઞ્ચવિધા વર્ણાઃ પ્રસ્ફુરદ્ રશ્મિમણ્ડલાઃ ।

પીતઃ કૃષ્ણસ્તથા ધૂમ્રઃ સ્વર્ણાભો રક્ત એવ ચ ॥ ૪૩॥

પૃથક્ પ્રયોજ્યા યદ્યેતે બિન્દુનાદવિભૂષિતાઃ ।
અર્દ્ધચન્દ્રનિભો બિન્દુર્નાદો દીપશિખાકૃતિઃ ॥ ૪૪॥

બીજં દ્વિતીયં બીજેષુ મન્ત્રસ્યાસ્ય વરાનને ।
દીર્ઘપૂર્વં તુરીયસ્ય પઞ્ચમં શક્તિમાદિશેત્ ॥ ૪૫॥

વામદેવો નામ ઋષિઃ પઙ્ક્તિશ્છન્દ ઉદાહૃતમ્ ।
દેવતા શિવ એવાહં મન્ત્રસ્યાસ્ય વરાનને ॥ ૪૬॥

ગૌતમોઽત્રિર્વરારોહે વિશ્વામિત્રસ્તથાઙ્ગિરાઃ ।
ભરદ્વાજશ્ચ વર્ણાનાં ક્રમશશ્ચર્ષયઃ સ્મૃતાઃ ॥ ૪૭॥

ગાયત્ર્યનુષ્ટુપ્ ત્રિષ્ટુપ્ ચ છન્દાંસિ બૃહતી વિરાટ્ ।
ઇન્દ્રો રુદ્રો હરિર્બ્રહ્મા સ્કન્દસ્તેષાં ચ દેવતાઃ ॥ ૪૮॥

મમ પઞ્ચમુખાન્યાહુઃ સ્થાને તેષાં વરાનને ।
પૂર્વાદિશ્ચોર્ધ્વપર્યન્તં નકારાદિ યથાક્રમમ્ ॥ ૪૯॥

ઉદાત્તઃ પ્રથમો વર્ણશ્ચતુર્થશ્ચ દ્વિતીયકઃ ।
પઞ્ચમઃ સ્વરિતશ્ચૈવ તૃતીયો નિહિતઃ સ્મૃતઃ ॥ ૫૦॥

મૂલવિદ્યા શિવં શૈવં સૂત્રં પઞ્ચાક્ષરં તથા ।
નામાન્યસ્ય વિજાનીયાચ્છૈવં મે હૃદયં મહત્ ॥ ૫૧॥

નકારઃ શિર ઉચ્યેત મકારસ્તુ શિખોચ્યતે ।
શિકારઃ કવચં તદ્વદ્વકારો નેત્રમુચ્યતે ॥ ૫૨॥

યકારોઽસ્ત્રં નમઃ સ્વાહા વષટ્ હું વૌષડિત્યપિ ।
ફડિત્યપિ ચ વર્ણાનામન્તેઽઙ્ગત્વં યદા તદા ॥ ૫૩॥

તત્રાપિ મૂલમન્ત્રોઽયં કિઞ્ચિદ્ભેદસમન્વયાત્ ।
તત્રાપિ પઞ્ચમો વર્ણો દ્વાદશસ્વરભૂષિતઃ ॥ ૫૪॥

તસ્માદનેન મન્ત્રેણ મનોવાક્કાયભેદતઃ ।
આવયોરર્ચનં કુર્ય્યાજ્જપહોમાદિકં તથા ॥ ૫૫॥

યથાપ્રજ્ઞં યથાકાલં યથાશાસ્ત્રં યથામતિ ।
યથાશક્તિ યથાસમ્પદ્યથાયોગં યથારતિ ॥ ૫૬॥

યદા કદાપિ વા ભક્ત્યા યત્ર કુત્રાપિ વા કૃતા ।
યેન કેનાપિ વા દેવિ પૂજા મુક્તિં નયિષ્યતિ ॥ ૫૭॥

મય્યાસક્તેન મનસા યત્કૃતં મમ સુન્દરિ ।
મત્પ્રિયં ચ શિવં ચૈવ ક્રમેણાપ્યક્રમેણ વા ॥ ૫૮॥

તથાપિ મમ ભક્તા યે નાત્યન્તવિવશાઃ પુનઃ ।
તેષાં સર્વેષુ શાસ્ત્રેષુ મયૈવ નિયમઃ કૃતઃ ॥ ૫૯॥

તત્રાદૌ સમ્પ્રવક્ષ્યામિ મન્ત્રસઙ્ગ્રહણં શુભમ્ ।
યં વિના નિષ્ફલં જાપ્યં યેન વા સફલં ભવેત્ ॥ ૬૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે પઞ્ચાક્ષરમાહાત્મ્યવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૭.૨.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૪. ચતુર્દશોઽધ્યાયઃ । પઞ્ચાક્ષરમહિમવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
આજ્ઞાહીનં ક્રિયાહીનં શ્રદ્ધાહીનં વરાનને ।
આજ્ઞાર્થં દક્ષિણાહીનં સદા જપ્તં ચ નિષ્ફલમ્ ॥ ૧॥

આજ્ઞાસિદ્ધં ક્રિયાસિદ્ધં શ્રદ્ધાસિદ્ધં મમાત્મકમ્ ।
એવં ચેદ્દક્ષિણાયુક્તં મન્ત્રસિદ્ધિર્મહત્ફલમ્ ॥ ૨॥

ઉપગમ્ય ગુરું વિપ્રમાચાર્યં તત્ત્વવેદિનમ્ ।
જાપિનં સદ્ગુણોપેતં ધ્યાનયોગપરાયણમ્ ॥ ૩॥

તોષયેત્તં પ્રયત્નેન ભાવશુદ્ધિસમન્વિતઃ ।
વાચા ચ મનસા ચૈવ કાયેન દ્રવિણેન ચ ॥ ૪॥

આચાર્યં પૂજયેદ્વિપ્રઃ સર્વદાતિપ્રયત્નતઃ ।
હસ્ત્યશ્વરથરત્નાનિ ક્ષેત્રાણિ ચ ગૃહાણિ ચ ॥ ૫॥

ભૂષણાનિ ચ વાસાંસિ ધાન્યાનિ ચ ધનાનિ ચ ।
એતાનિ ગુરવે દદ્યાદ્ભક્ત્યા ચ વિભવે સતિ ॥ ૬॥

વિત્તશાઠ્યં ન કુર્વીત યદીચ્છેત્સિદ્ધિમાત્મનઃ ।
પશ્ચાન્નિવેદ્ય સ્વાત્માનં ગુરવે સપરિચ્છદમ્ ॥ ૭॥

એવં સમ્પૂજ્ય વિધિવદ્યથાશક્તિ ત્વવઞ્ચયન્ ।
આદદીત ગુરોર્મન્ત્રં જ્ઞાનં ચૈવ ક્રમેણ તુ ॥ ૮॥

એવં તુષ્ટો ગુરુઃ શિષ્યં પૂજકં વત્સરોષિતમ્ ।
શુશ્રૂષુમનહઙ્કારં સ્નાતં શુચિમુપોષિતમ્ ॥ ૯॥

સ્નાપયિત્વા વિશુદ્ધ્યર્થં પૂર્ણકુમ્ભઘૃતેન વૈ ।
જલેન મન્ત્રશુદ્ધેન પુણ્યદ્રવ્યયુતેન ચ ॥ ૧૦॥

અલઙ્કૃત્ય સુવેષં ચ ગન્ધસ્રગ્વસ્ત્રભૂષણૈઃ ।
પુણ્યાહં વાચયિત્વા ચ બ્રાહ્મણાનભિપૂજ્ય ચ ॥ ૧૧॥

સમુદ્રતીરે નદ્યાં ચ ગોષ્ઠે દેવાલયેઽપિ વા ।
શુચૌ દેશે ગૃહે વાપિ કાલે સિદ્ધિકરે તિથૌ ॥ ૧૨॥

નક્ષત્રે શુભયોગે ચ સર્વદોષવિવર્જિતે ।
અનુગૃહ્ય તતો દદ્યાજ્જ્ઞાનં મમ યથાવિધિ ॥ ૧૩॥

સ્વરેણોચ્ચારયેત્સમ્યગેકાન્તેઽતિપ્રસન્નધીઃ ।
ઉચ્ચાર્યોચ્ચારયિત્વા તમાવયોર્મન્ત્રમુત્તમમ્ ॥ ૧૪॥

શિવં ચાસ્તુ શુભં ચાસ્તુ શોભનોઽસ્તુ પ્રિયોઽસ્ત્વિતિ ।
એવં દદ્યાદ્ ગુરુર્મન્ત્રમાજ્ઞાં ચૈવ તતઃ પરમ્ ॥ ૧૫॥

એવં લબ્ધ્વા ગુરોર્મન્ત્રમાજ્ઞાં ચૈવ સમાહિતઃ ।
સઙ્કલ્પ્ય ચ જપેન્નિત્યં પુરશ્ચરણપૂર્વકમ્ ॥ ૧૬॥

યાવજ્જીવં જપેન્નિત્યમષ્ટોત્તરસહસ્રકમ્ ।
અનન્યસ્તત્પરો ભૂત્વા સ યાતિ પરમાં ગતિમ્ ॥ ૧૭॥

જપેદક્ષરલક્ષં વૈ ચતુર્ગુણિતમાદરાત્ ।
નક્તાશી સંયમી યઃ સ પૌરશ્ચરણિકઃ સ્મૃતઃ ॥ ૧૮॥

યઃ પુરશ્ચરણં કૃત્વા નિત્યજાપી ભવેત્પુનઃ ।
તસ્ય નાસ્તિ સમો લોકે સ સિદ્ધઃ સિદ્ધિદો ભવેત્ ॥ ૧૯॥

સ્નાનં કૃત્વા શુચૌ દેશે બદ્ધ્વા રુચિરમાસનમ્ ।
ત્વયા માં હૃદિ સઞ્ચિન્ત્ય સઞ્ચિન્ત્ય સ્વગુરું તતઃ ॥ ૨૦॥

ઉદઙ્મુખઃ પ્રાઙ્મુખો વા મૌની ચૈકાગ્રમાનસઃ ।
વિશોધ્ય પઞ્ચતત્ત્વાનિ દહનપ્લાવનાદિભિઃ ॥ ૨૧॥

મન્ત્રન્યાસાદિકં કૃત્વા સકલીકૃતવિગ્રહઃ ।
આવયોર્વિગ્રહૌ ધ્યાયન્પ્રાણાપાનૌ નિયમ્ય ચ ॥ ૨૨॥

વિદ્યાસ્થાનં સ્વકં રૂપં ઋષિં છન્દોઽધિદૈવતમ્ ।
બીજં શક્તિં તથા વાક્યં સ્મૃત્વા પઞ્ચાક્ષરીં જપેત્ ॥ ૨૩॥

ઉત્તમં માનસં જાપ્યમુપાંશું ચૈવ મધ્યમમ્ ।
અધમં વાચિકં પ્રાહુરાગમાર્થવિશારદાઃ ॥ ૨૪॥

ઉત્તમં રુદ્રદૈવત્યં મધ્યમં વિષ્ણુદૈવતમ્ ।
અધમં બ્રહ્મદૈવત્યમિત્યાહુરનુપૂર્વશઃ ॥ ૨૫॥

યદુચ્ચનીચસ્વરિતૈઃ સ્પષ્ટાસ્પષ્ટપદાક્ષરૈઃ ।
મન્ત્રમુચ્ચારયેદ્વાચા વાચિકોઽયં જપઃ સ્મૃતઃ ॥ ૨૬॥

જિહ્વામાત્રપરિસ્પન્દાદીષદુચ્ચારિતોઽપિ વા ।
અપરૈરશ્રુતઃ કિઞ્ચિચ્છ્રુતો વોપાંશુરુચ્યતે ॥ ૨૭॥

ધિયા યદક્ષરશ્રેણ્યા વર્ણાદ્વર્ણં પદાત્પદમ્ ।
શબ્દાર્થચિન્તનં ભૂયઃ કથ્યતે માનસો જપઃ ॥ ૨૮॥

વાચિકસ્ત્વેક એવ સ્યાદુપાંશુઃ શતમુચ્યતે ।
સાહસ્રં માનસઃ પ્રોક્તઃ સગર્ભસ્તુ શતાધિકઃ ॥ ૨૯॥

પ્રાણાયામસમાયુક્તઃ સગર્ભો જપ ઉચ્યતે ।
આદ્યન્તયોરગર્ભોઽપિ પ્રાણાયામઃ પ્રશસ્યતે ॥ ૩૦॥

ચત્વારિંશત્સમાવૃત્તીઃ પ્રાણાનાયમ્ય સંસ્મરેત્ ।
મન્ત્રં મન્ત્રાર્થવિદ્ધીમાનશક્તઃ શક્તિતો જપેત્ ॥ ૩૧॥

પઞ્ચકં ત્રિકમેકં વા પ્રાણાયામં સમાચરેત્ ।
અગર્ભં વા સગર્ભં વા સગર્ભસ્તત્ર શસ્યતે ॥ ૩૨॥

સગર્ભાદપિ સાહસ્રં સધ્યાનો જપ ઉચ્યતે ।
એષુ પઞ્ચવિધેષ્વેકઃ કર્ત્તવ્યઃ શક્તિતો જપઃ ॥ ૩૩॥

અઙ્ગુલ્યા જપસઙ્ખ્યાનમેકમેવમુદાહૃતમ્ ।

રેખયાષ્ટગુણં વિદ્યાત્પુત્રજીવૈર્દશાધિકમ્ ॥ ૩૪॥

શતં સ્યાચ્છઙ્ખમણિભિઃ પ્રવાલૈસ્તુ સહસ્રકમ્ ।
સ્ફટિકૈર્દશસાહસ્રં મૌક્તિકૈર્લક્ષમુચ્યતે ॥ ૩૫॥

પદ્માક્ષૈર્દશલક્ષં તુ સૌવર્ણૈઃ કોટિરુચ્યતે ।
કુશગ્રન્થ્યા ચ રુદ્રાક્ષૈરનન્તગુણિતં ભવેત્ ॥ ૩૬॥

ત્રિંશદક્ષૈઃ કૃતા માલા ધનદા જપકર્મણિ ।
સપ્તવિંશતિસઙ્ખ્યાતૈરક્ષૈઃ પુષ્ટિપ્રદા ભવેત્ ॥ ૩૭॥

પઞ્ચવિંશતિસઙ્ખ્યાતૈઃ કૃતા મુક્તિં પ્રયચ્છતિ ।
અક્ષૈસ્તુ પઞ્ચદશભિરભિચારફલપ્રદા ॥ ૩૮॥

અઙ્ગુષ્ઠં મોક્ષદં વિદ્યાત્તર્જનીં શત્રુનાશિનીમ્ ।
મધ્યમાં ધનદાં શાન્તિં કરોત્યેષા હ્યનામિકા ॥ ૩૯॥

અષ્ટોત્તરશતં માલા તત્ર સ્યાદુત્તમોત્તમા ।
શતસઙ્ખ્યોત્તમા માલા પઞ્ચાશદ્ભિસ્તુ મધ્યમા ॥ ૪૦॥

ચતુઃપઞ્ચાશદક્ષૈસ્તુ હૃચ્છ્રેષ્ઠા હિ પ્રકીર્તિતા ।
ઇત્યેવં માલયા કુર્યાજ્જપં કસ્મૈ ન દર્શયેત્ ॥ ૪૧॥

કનિષ્ઠા ક્ષરિણી પ્રોક્તા જપકર્મણિ શોભના ।
અઙ્ગુષ્ઠેન જપેજ્જપ્યમન્યૈરઙ્ગુલિભિઃ સહ ॥ ૪૨॥

અઙ્ગુષ્ઠેન વિના જપ્યં કૃતં તદફલં યતઃ ।
ગૃહે જપં સમં વિદ્યાદ્ ગોષ્ઠે શતગુણં વિદુઃ ॥ ૪૩॥

પુણ્યારણ્યે તથારામે સહસ્રગુણમુચ્યતે ।
અયુતં પર્વતે પુણ્યે નદ્યાં લક્ષમુદાહૃતમ્ ॥ ૪૪॥

કોટિં દેવાલયે પ્રાહુરનન્તં મમ સન્નિધૌ ।
સૂર્યસ્યાગ્નેર્ગુરોરિન્દોર્દીપસ્ય ચ જલસ્ય ચ ॥ ૪૫॥

વિપ્રાણાં ચ ગવાં ચૈવ સન્નિધૌ શસ્યતે જપઃ ।
તત્પૂર્વાભિમુખં વશ્યં દક્ષિણં ચાભિચારિકમ્ ॥ ૪૬॥

પશ્ચિમં ધનદં વિદ્યાદૌત્તરં શાન્તિદં ભવેત્ ।
સૂર્યાગ્નિવિપ્રદેવાનાં ગુરૂણામપિ સન્નિધૌ ॥ ૪૭॥

અન્યેષાં ચ પ્રસક્તાનાં મન્ત્રં ન વિમુખો જપેત્ ।
ઉષ્ણીષી કઞ્ચુકી નગ્નો મુક્તકેશો ગલાવૃતઃ ॥ ૪૮॥

અપવિત્રકરોઽશુદ્ધો વિલપન્ન જપેત્ ક્વચિત્ ।
ક્રોધં મદં ક્ષુતં ત્રીણિ નિષ્ઠીવનવિજૃમ્ભણે ॥ ૪૯॥

દર્શનં ચ શ્વનીચાનાં વર્જયેજ્જપકર્મણિ ।
આચમેત્સમ્ભવે તેષાં સ્મરેદ્વા માં ત્વયા સહ ॥ ૫૦॥

જ્યોતીંષિ ચ પ્રપશ્યેદ્વા કુર્યાદ્ વા પ્રાણસંયમમ્ ।
અનાસનઃ શયાનો વા ગચ્છન્નુત્થિત એવ વા ॥ ૫૧॥

રથ્યાયામશિવે સ્થાને ન જપેત્તિમિરાન્તરે ।
પ્રસાર્ય્ય ન જપેત્પાદૌ કુક્કુટાસન એવ વા ॥ ૫૨॥

યાનશય્યાધિરૂઢો વા ચિન્તાવ્યાકુલિતોઽથવા ।
શક્તશ્ચેત્સર્વમેવૈતદશક્તઃ શક્તિતો જપેત્ ॥ ૫૩॥

કિમત્ર બહુનોક્તેન સમાસેન વચઃ શ ૃણુ ।
સદાચારો જપન્ શુદ્ધં ધ્યાયન્ભદ્રં સમશ્નુતે ॥ ૫૪॥

આચારઃ પરમો ધર્મ આચારઃ પરમં ધનમ્ ।
આચારઃ પરમા વિદ્યા આચારઃ પરમા ગતિઃ ॥ ૫૫॥

આચારહીનઃ પુરુષો લોકે ભવતિ નિન્દિતઃ ।
પરત્ર ચ સુખી ન સ્યાત્તસ્માદાચારવાન્ભવેત્ ॥ ૫૬॥

યસ્ય યદ્વિહિતં કર્મ વેદે શાસ્ત્રે ચ વૈદિકૈઃ ।
તસ્ય તેન સમાચારઃ સદાચારો ન ચેતરઃ ॥ ૫૭॥

સદ્ભિરાચરિતત્વાચ્ચ સદાચારઃ સ ઉચ્યતે ।
સદાચારસ્ય તસ્યાહુરાસ્તિક્યં મૂલકારણમ્ ॥ ૫૮॥

આસ્તિકશ્ચેત્પ્રમાદાદ્યૈઃ સદાચારાદવિચ્યુતઃ ।
ન દુષ્યતિ નરો નિત્યં તસ્માદાસ્તિકતાં વ્રજેત્ ॥ ૫૯॥

યથેહાસ્તિ સુખં દુઃખં સુકૃતૈર્દુષ્કૃતૈરપિ ।
તથા પરત્ર ચાસ્તીતિ મતિરાસ્તિક્યમુચ્યતે ॥ ૬૦॥

રહસ્યમન્યદ્વક્ષ્યામિ ગોપનીયમિદં પ્રિયે ।
ન વાચ્યં યસ્ય કસ્યાપિ નાસ્તિકસ્યાથ વા પશોઃ ॥ ૬૧॥

સદાચારવિહીનસ્ય પતિતસ્યાન્ત્યજસ્ય ચ ।
પઞ્ચાક્ષરાત્પરં નાસ્તિ પરિત્રાણં કલૌ યુગે ॥ ૬૨॥

ગચ્છતસ્તિષ્ઠતો વાપિ સ્વેચ્છયા કર્મ કુર્વતઃ ।
અશુચેર્વા શુચેર્વાપિ મન્ત્રોઽયં ન ચ નિષ્ફલઃ ॥ ૬૩॥

અનાચારવતાં પુંસામવિશુદ્ધષડધ્વનામ્ ।
અનાદિષ્ટોઽપિ ગુરુણા મન્ત્રોઽયં ન ચ નિષ્ફલઃ ॥ ૬૪॥

અન્ત્યજસ્યાપિ મૂર્ખસ્ય મૂઢસ્ય પતિતસ્ય ચ ।
નિર્મર્યાદસ્ય નીચસ્ય મન્ત્રોઽયં ન ચ નિષ્ફલઃ ॥ ૬૫॥

સર્વાવસ્થાં ગતસ્યાપિ મયિ ભક્તિમતઃ પરમ્ ।
સિધ્યત્યેવ ન સન્દેહો નાપરસ્ય તુ કસ્યચિત્ ॥ ૬૬॥

ન લગ્નતિથિનક્ષત્રવારયોગાદયઃ પ્રિયે ।
અસ્યાત્યન્તમવેક્ષ્યાઃ સ્યુર્નૈષ સપ્તઃ સદોદિતઃ ॥ ૬૭॥

ન કદાચિન્ન કસ્યાપિ રિપુરેષ મહામનુઃ ।
સુસિદ્ધો વાપિ સિદ્ધો વા સાધ્યો વાપિ ભવિષ્યતિ ॥ ૬૮॥

સિદ્ધેન ગુરુણાદિષ્ટઃ સુસિદ્ધ ઇતિ કથ્યતે ।
અસિદ્ધેનાપિ વા દત્તઃ સિદ્ધસાધ્યસ્તુ કેવલઃ ॥ ૬૯॥

અસાધિતઃ સાધિતો વા સિધ્યત્વેન ન સંશયઃ ।
શ્રદ્ધાતિશયયુક્તસ્ય મયિ મન્ત્રે તથા ગુરૌ ॥ ૭૦॥

તસ્માન્મન્ત્રાન્તરાંસ્ત્યક્ત્વા સાપાયાનધિકારતઃ ।
આશ્રયેત્પરમાં વિદ્યાં સાક્ષાત્પઞ્ચાક્ષરીં બુધઃ ॥ ૭૧॥

મન્ત્રાન્તરેષુ સિદ્ધેષુ મન્ત્ર એષ ન સિધ્યતિ ।
સિદ્ધે ત્વસ્મિન્મહામન્ત્રે તે ચ સિદ્ધા ભવન્ત્યુત ॥ ૭૨॥

યથા દેવેષ્વલબ્ધોઽસ્મિ લબ્ધેષ્વપિ મહેશ્વરિ ।
મયિ લબ્ધે તુ તે લબ્ધા મન્ત્રેષ્વેષુ સમો વિધિઃ ॥ ૭૩॥

યે દોષાઃ સર્વમન્ત્રાણાં ન તેઽસ્મિન્ સમ્ભવન્ત્યપિ ।
અસ્ય મન્ત્રસ્ય જાત્યાદીનનપેક્ષ્ય પ્રવર્તનાત્ ॥ ૭૪॥

તથાપિ નૈવ ક્ષુદ્રેષુ ફલેષુ પ્રતિયોગિષુ ।

સહસા વિનિયુઞ્જીત તસ્માદેષ મહાબલઃ ॥ ૭૫॥

ઉપમન્યુરુવાચ ।
એવં સાક્ષાન્મહાદેવ્યૈ મહાદેવેન શૂલિના ।
હિતાય જગતામુક્તઃ પઞ્ચાક્ષરવિધિર્યથા ॥ ૭૬॥

ય ઇદં કીર્તયેદ્ભક્ત્યા શ‍ૃણુયાદ્વા સમાહિતઃ ।
સર્વપાપવિનિર્મુક્તઃ પ્રયાતિ પરમાં ગતિમ્ ॥ ૭૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે પઞ્ચાક્ષરમહિમવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૭.૨.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૫. પઞ્ચદશોઽધ્યાયઃ । દીક્ષાવિધાને ગુરુમાહાત્મ્યવર્ણનમ્ ।

શ્રીકૃષ્ણ ઉવાચ ।
ભગવન્મન્ત્રમાહાત્મ્યં ભવતા કથિતં પ્રભો ।
તત્પ્રયોગવિધાનં ચ સાક્ષાચ્છ્રુતિસમં યથા ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ શિવસંસ્કારમુત્તમમ્ ।
મન્ત્રસઙ્ગ્રહણે કિઞ્ચિત્સૂચિતં ન તુ વિસ્મૃતમ્ ॥ ૨॥

ઉપમન્યુરુવાચ ।
હન્ત તે કથયિષ્યામિ સર્વપાપવિશોધનમ્ ।
સંસ્કારં પરમં પુણ્યં શિવેન પતિભાષિતમ્ ॥ ૩॥

સમ્યક્ કૃતાધિકારઃ સ્યાત્પૂજાદિષુ નરો યતઃ ।
સંસ્કારઃ કથ્યતે તેન ષડધ્વપરિશોધનમ્ ॥ ૪॥

દીયતે યેન વિજ્ઞાનં ક્ષીયતે પાશબન્ધનમ્ ।
તસ્માત્સંસ્કાર એવાયં દીક્ષેત્યપિ ચ કથ્યતે ॥ ૫॥

શામ્ભવી ચૈવ શાક્તી ચ માન્ત્રી ચૈવ શિવાગમે ।
દીક્ષોપદિશ્યતે ત્રેધા શિવેન પરમાત્મના ॥ ૬॥

ગુરોરાલોકમાત્રેણ સ્પર્શાત્સમ્ભાષણાદપિ ।

સદ્યઃ સંજ્ઞા ભવેજ્જન્તોઃ પાશોપક્ષયકારિણી ॥ ૭॥

સા દીક્ષા શામ્ભવી પ્રોક્તા સા પુનર્ભિદ્યતે દ્વિધા ।
તીવ્રા તીવ્રતરા ચેતિ પાશોપક્ષયભેદતઃ ॥ ૮॥

યયા સ્યાન્નિર્વૃતિઃ સદ્યઃ સૈવ તીવ્રતરા મતા ।
તીવ્રા તુ જીવતોઽત્યન્તં પુંસઃ પાપવિશોધિકા ॥ ૯॥

શાક્તી જ્ઞાનવતી દીક્ષા શિષ્યદેહં પ્રવિશ્ય તુ ।
ગુરુણા યોગમાર્ગેણ ક્રિયતે જ્ઞાનચક્ષુષા ॥ ૧૦॥

માન્ત્રી ક્રિયાવતી દીક્ષા કુણ્ડમણ્ડલપૂર્વિકા ।
મન્દમન્દતરોદ્દેશાત્કર્તવ્યા ગુરુણા બહિઃ ॥ ૧૧॥

શક્તિપાતાનુસારેણ શિષ્યોઽનુગ્રહમર્હતિ ।
શૈવધર્માનુસારસ્ય તન્મૂલત્વાત્સમાસતઃ ॥ ૧૨॥

યત્ર શક્તિર્ન પતિતા તત્ર શુદ્ધિર્ન જાયતે ।
ન વિદ્યા ન શિવાચારો ન મુક્તિર્ન ચ સિદ્ધયઃ ॥ ૧૩॥

તસ્માત્ લિઙ્ગાનિ સંવીક્ષ્ય શક્તિપાતસ્ય ભૂયસઃ ।
જ્ઞાનેન ક્રિયયા વાથ ગુરુઃ શિષ્યં વિશોધયેત્ ॥ ૧૪॥

યોઽન્યથા કુરુતે મોહાત્ સ વિનશ્યતિ દુર્મતિઃ ।
તસ્માત્સર્વપ્રકારેણ ગુરુઃ શિષ્યં પરીક્ષયેત્ ॥ ૧૫॥

લક્ષણં શક્તિપાતસ્ય પ્રબોધાનન્દસમ્ભવઃ ।
સા યસ્માત્પરમા શક્તિઃ પ્રબોધાનન્દરૂપિણી ॥ ૧૬॥

આનન્દબોધયોર્લિઙ્ગમન્તઃકરણવિક્રિયાઃ ।
યથા સ્યાત્કમ્પરોમાઞ્ચસ્વરનેત્રાઙ્ગવિક્રિયાઃ ॥ ૧૭॥

શિષ્યોઽપિ લક્ષણૈરેભિઃ કુર્યાદ્ગુરુપરીક્ષણમ્ ।
તત્સમ્પર્કૈઃ શિવાર્ચાદૌ સઙ્ગતૈર્વાથ તદ્ગતૈઃ ॥ ૧૮॥

શિષ્યસ્તુ શિક્ષણીયત્વાદ્ગુરોર્ગૌરવકારણાત્ ।
તસ્માત્ સર્વપ્રયત્નેન ગુરોર્ગૌરવમાચરેત્ ॥ ૧૯॥

યો ગુરુઃ સ શિવઃ પ્રોક્તો યઃ શિવઃ સ ગુરુઃ સ્મૃતઃ ।
ગુરુર્વા શિવ એવાથ વિદ્યાકારેણ સંસ્થિતઃ ॥ ૨૦॥

યથા શિવસ્તથા વિદ્યા યથા વિદ્યા તથા ગુરુઃ ।
શિવવિદ્યા ગુરૂણાં ચ પૂજયા સદૃશં ફલમ્ ॥ ૨૧॥

સર્વદેવાત્મકશ્ચાસૌ સર્વમન્ત્રમયો ગુરુઃ ।
તસ્માત્સર્વપ્રયત્નેન યસ્યાજ્ઞાં શિરસા વહેત્ ॥ ૨૨॥

શ્રેયોઽર્થી યદિ ગુર્વાજ્ઞાં મનસાપિ ન લઙ્ઘયેત્ ।
ગુર્વાજ્ઞાપાલકો યસ્માત્ જ્ઞાનસમ્પત્તિમશ્નુતે ॥ ૨૩॥

ગચ્છંસ્તિષ્ઠન્ સ્વપન્ ભુઞ્જન્નાન્યત્કર્મ સમાચરેત્ ।
સમક્ષં યદિ કુર્વીત સર્વં ચાનુજ્ઞયા ગુરોઃ ॥ ૨૪॥

ગુરોર્ગૃહે સમક્ષં વા ન યથેષ્ટાસનો ભવેત્ ।
ગુરુર્દેવો યતઃ સાક્ષાત્તદ્ગૃહં દેવમન્દિરમ્ ॥ ૨૫॥

પાપિનાં ચ યથા સઙ્ગાત્તત્પાપાત્પતિતો ભવેત્ ।
યથેહ વહ્નિસમ્પર્કાત્ મલં ત્યજતિ કાઞ્ચનમ્ ।
તથૈવ ગુરુસમ્પર્કાત્ પાપં ત્યજતિ માનવઃ ॥ ૨૬॥

યથા વહ્નિસમીપસ્થો ઘૃતકુમ્ભો વિલીયતે
તથા પાપં વિલીયેત હ્યાચાર્યસ્ય સમીપતઃ ॥ ૨૭॥

યથા પ્રજ્વલિતો વહ્નિઃ શુષ્કમાર્દ્રં ચ નિર્દહેત્ ।
તથાયમપિ સન્તુષ્ટો ગુરુઃ પાપં ક્ષણાદ્દહેત્ ॥ ૨૮॥

મનસા કર્મણા વાચા ગુરોઃ ક્રોધં ન કારયેત્ ॥ ૨૯॥

તસ્ય ક્રોધેન દહ્યન્તે હ્યાયુઃ શ્રીજ્ઞાનસત્ક્રિયાઃ ।
તત્ક્રોધકારિણો યે સ્યુસ્તેષાં યજ્ઞાશ્ચ નિષ્ફલાઃ ॥ ૩૦॥

યમશ્ચ નિયમાશ્ચૈવ નાત્ર કાર્યા વિચારણા ।
ગુરોર્વિરુદ્ધં યદ્વાક્યં ન વદેજ્જાતુચિન્નરઃ ॥ ૩૧॥

વદેદ્યદિ મહામોહાદ્રૌરવં નરકં વ્રજેત્ ।
મનસા કર્મણા વાચા ગુરુમુદ્દિશ્ય યત્નતઃ ॥ ૩૨॥

શ્રેયોઽર્થી ચેન્નરો ધીમાન્ન મિથ્યાચારમાચરેત્ ।
ગુરોર્હિતં પ્રિયં કુર્યાદાદિષ્ટો વા ન વા સદા ॥ ૩૩॥

અસમક્ષં સમક્ષં વા તસ્ય કાર્યં સમાચરેત્ ।
ઇત્થમાચારવાન્ભક્તો નિત્યમુદ્યુક્તમાનસઃ ॥ ૩૪॥

ગુરુપ્રિયકરઃ શિષ્યઃ શૈવધર્માંસ્તતોઽર્હતિ ।
ગુરુશ્ચેદ્ગુણવાન્ પ્રાજ્ઞઃ પરમાનન્દભાસકઃ ॥ ૩૫॥

તત્ત્વવિચ્છિવસંસક્તો મુક્તિદો ન તુ ચાપરઃ ।
સંવિત્સઞ્જનનં તત્ત્વં પરમાનન્દસમ્ભવમ્ ॥ ૩૬॥

તત્તત્ત્વં વિદિતં યેન સ એવાનન્દદર્શકઃ ।
ન પુનર્નામમાત્રેણ સંવિદારહિતસ્તુ યઃ ॥ ૩૭॥

અન્યોઽન્યં તારયેન્નૌકા કિં શિલા તારયેચ્છિલામ્ ।
એતસ્ય નામમાત્રેણ મુક્તિર્વૈ નામમાત્રિકા ॥ ૩૮॥

યૈઃ પુનર્વિદિતં તત્ત્વં તે મુક્તા મોચયન્ત્યપિ ।
તત્ત્વહીને કુતો બોધઃ કુતો હ્યાત્મપરિગ્રહઃ ॥ ૩૯॥

પરિગ્રહવિનિર્મુક્તઃ પશુરિત્યભિધીયતે ।
પશુભિઃ પ્રેરિતશ્ચાપિ પશુત્વં નાતિવર્તતે ॥ ૪૦॥

તસ્માત્તત્ત્વવિદેવેહ મુક્તો મોચક ઇષ્યતે ।
સર્વલક્ષણસંયુક્તઃ સર્વશાસ્ત્રવિદપ્યયમ્ ॥ ૪૧॥

સર્વોપાયવિધિજ્ઞોઽપિ તત્ત્વહીનસ્તુ નિષ્ફલઃ ।
યસ્યાનુભવપર્યન્તા બુદ્ધિસ્તત્ત્વે પ્રવર્તતે ॥ ૪૨॥

તસ્યાવલોકનાદ્યૈશ્ચ પરાનન્દોઽભિજાયતે ।
તસ્માદ્યસ્યૈવ સમ્પર્કાત્પ્રબોધાનન્દસમ્ભવઃ ॥ ૪૩॥

ગુરું તમેવ વૃણુયાન્નાપરં મતિમાન્નરઃ ।
સ શિષ્યૈર્વિનયાચારચતુરૈરુચિતો ગુરુઃ ॥ ૪૪॥

યાવદ્વિજ્ઞાયતે તાવત્સેવનીયો મુમુક્ષુભિઃ ।
જ્ઞાતે તસ્મિન્સ્થિરા ભક્તિર્યાવત્તત્ત્વં સમાશ્રયેત્ ॥ ૪૫॥

ન તુ તત્ત્વં ત્યજેજ્જાતુ નોપેક્ષેત કથઞ્ચન ।
યત્રાનન્દઃ પ્રબોધો વા નાલ્પમપ્યુપલભ્યતે ॥ ૪૬॥

વત્સરાદપિ શિષ્યેણ સોઽન્યં ગુરુમુપાશ્રયેત્ ।
ગુરુમન્યં પ્રપન્નેઽપિ નાવમન્યેત પૌર્વિકમ્ ।
ગુરોર્ભ્રાતૄંસ્તથા પુત્રાન્ બોધકાન્ પ્રેરકાનપિ ॥ ૪૭॥

તત્રાદાવુપસઙ્ગમ્ય બ્રાહ્મણં વેદપારગમ્ ।
ગુરુમારાધયેત્પ્રાજ્ઞં શુભગં પ્રિયદર્શનમ્ ॥ ૪૮॥

સર્વાભયપ્રદાતારં કરુણાક્રાન્તમાનસમ્ ।
તોષયેત્તં પ્રયત્નેન મનસા કર્મણા ગિરા ॥ ૪૯॥

તાવદારાધયેચ્છિષ્યઃ પ્રસન્નોઽસૌ ભવેદ્યથા ।
તસ્મિન્ પ્રસન્ને શિષ્યસ્ય સદ્યઃ પાપક્ષયો ભવેત્ ॥ ૫૦॥

તસ્માદ્ધનાનિ રત્નાનિ ક્ષેત્રાણિ ચ ગૃહાણિ ચ ।
ભૂષણાનિ ચ વાસાંસિ યાનશય્યાસનાનિ ચ ॥ ૫૧॥

એતાનિ ગુરવે દદ્યાદ્ભક્ત્યા વિત્તાનુસારતઃ ।
વિત્તશાઠ્યં ન કુર્વીત યદીચ્છેત્પરમાં ગતિમ્ ॥ ૫૨॥

સ એવ જનકો માતા ભર્તા બન્ધુર્ધનં સુખમ્ ।
સખા મિત્રં ચ યત્તસ્માત્સર્વં તસ્મૈ નિવેદયેત્ ॥ ૫૩॥

નિવેદ્ય પશ્ચાત્સ્વાત્માનં સાન્વયં સપરિગ્રહમ્ ।
સમર્પ્ય સોદકં તસ્મૈ નિત્યં તદ્વશગો ભવેત્ ॥ ૫૪॥

યદા શિવાય સ્વાત્માનં દત્તવાન્ દેશિકાત્મને ।
તદા શૈવો ભવેદ્દેહી ન તતોઽસ્તિ પુનર્ભવઃ ॥ ૫૫॥

ગુરુશ્ચ સ્વાશ્રિતં શિષ્યં વર્ષમેકં પરીક્ષયેત્ ।
બ્રાહ્મણં ક્ષત્રિયં વૈશ્યં દ્વિવર્ષં ચ ત્રિવર્ષકમ્ ॥ ૫૬॥

પ્રાણદ્રવ્યપ્રદાનાદ્યૈરાદેશૈશ્ચ સમાસમૈઃ ।
ઉત્તમાંશ્ચાધમે કૃત્વા નીચાનુત્તમકર્મણિ ॥ ૫૭॥

આક્રુષ્ટાસ્તાડિતા વાપિ યે વિષાદં ન યાન્ત્યપિ ।
તે યોગ્યાઃ સંયતાઃ શુદ્ધાઃ શિવસંસ્કારકર્મણિ ॥ ૫૮॥

અહિંસકા દયાવન્તો નિત્યમુદ્યુક્તચેતસઃ ।
અમાનિનો બુદ્ધિમન્તઃ ત્યક્તસ્પર્દ્ધાઃ પ્રિયંવદાઃ ॥ ૫૯॥

ઋજવો મૃદવઃ સ્વચ્છા વિનીતાઃ સ્થિરચેતસઃ ।
શૌચાચારસમાયુક્તાઃ શિવભક્તા દ્વિજાતયઃ ॥ ૬૦॥

એવં વૃત્તસમોપેતા વાઙ્મનઃકાયકર્મભિઃ ।
શોધ્યા બોધ્યા યથાન્યાયમિતિ શાસ્ત્રેષુ નિશ્ચયઃ ॥ ૬૧॥

નાધિકારઃ સ્વતો નાર્યાઃ શિવસંસ્કારકર્મણિ ।
નિયોગાદ્ભર્તુરસ્ત્યેવ ભક્તિયુક્તા યદીશ્વરે ॥ ૬૨॥

તથૈવ ભર્તૃહીનાયા પુત્રાદેરભ્યનુજ્ઞયા ।
અધિકારો ભવત્યેવ કન્યાયાઃ પિતુરાજ્ઞયા ।
શૂદ્રાણાં મર્ત્યજાતીનાં પતિતાનાં વિશેષતઃ ॥ ૬૩॥

તથા સઙ્કરજાતીનાં નાધ્વશુદ્ધિર્વિધીયતે ।
તૈઽપ્યકૃત્રિમભાવાશ્ચેચ્છિવે પરમકારણે ॥ ૬૪॥

પાદોદકપ્રદાનાદ્યૈઃ કુર્યુઃ પાપવિશોધનમ્ ।
અત્રાનુલોમજાતા યે યુક્તા એવ દ્વિજાતિષુ ॥ ૬૫॥

તેષામધ્વવિશુદ્ધ્યાદિ કુર્યાન્માતૃકુલોચિતમ્ ।
યા તુ કન્યા સ્વપિત્રાદ્યૈઃ શિવધર્મે નિયોજિતા ॥ ૬૬॥

સા ભક્તાય પ્રદાતવ્યા નાપરાય વિરોધિને ।
દત્તા ચેત્પ્રતિકૂલાય પ્રમાદાદ્બોધયેત્પતિમ્ ॥ ૬૭॥

અશક્તા તં પરિત્યજ્ય મનસા ધર્મમાચરેત્ ।
યથા મુનિવરં ત્યક્ત્વા પતિમત્રિં પતિવ્રતા ॥ ૬૮॥

કૃતકૃત્યાભવત્પૂર્વં તપસારાધ્ય શઙ્કરમ્ ।
યથા નારાયણં દેવં તપસારાધ્ય પાણ્ડવાઃ ॥ ૬૯॥

પતતીઁલ્લબ્ધવતી ધર્મે ગુરુભિર્ન નિયોજિતા ।
અસ્વાતન્ત્ર્યકૃતો દોષો નેહાસ્તિ પરમાર્થતઃ ॥ ૭૦॥

શિવધર્મે નિયુક્તાયાઃ શિવશાસનગૌરવાત્ ।
બહુનાત્ર કિમુક્તેન યોઽપિ કોઽપિ શિવાશ્રયઃ ॥ ૭૧॥

સંસ્કાર્યો ગુર્વધીનશ્ચેત્સંસ્ક્રિયા ન પ્રભિદ્યતે ।
ગુરોરાલોકનાદેવ સ્પર્શાત્સમ્ભાષણાદપિ ॥ ૭૨॥

યસ્ય સઞ્જાયતે પ્રજ્ઞા તસ્ય નાસ્તિ પરાજયઃ ।
મનસા યસ્તુ સંસ્કારઃ ક્રિયતે યોગવર્ત્મના ॥ ૭૩॥

સ નેહ કથિતો ગુહ્યો ગુરુવક્ત્રૈકગોચરઃ ।
ક્રિયાવાન્ યસ્તુ સંસ્કારઃ કુણ્ડમણ્ડપપૂર્વકઃ ।

સ વક્ષ્યતે સમાસેન તસ્ય શક્યો ન વિસ્તરઃ ॥ ૭૪॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે દીક્ષાવિધાને ગુરુમાહાત્મ્યવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૭.૨.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૬. ષોડશોઽધ્યાયઃ । શિષ્યસંસ્કારવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
પુણ્યેઽહનિ શુચૌ દેશે બહુદોષવિવર્જિતે ।
દેશિકઃ પ્રથમં કુર્યાત્સંસ્કારં સમયાહ્વયમ્ ॥ ૧॥

પરીક્ષ્ય ભૂમિં વિધિવદ્ ગન્ધવર્ણરસાદિભિઃ ।
શિલ્પિશાસ્ત્રોક્તમાર્ગેણ મણ્ડપં તત્ર કલ્પયેત્ ॥ ૨॥

કૃત્વા વેદિં ચ તન્મધ્યે કુણ્ડાનિ પરિકલ્પયેત્ ।
અષ્ટદિક્ષુ તથા દિક્ષુ તત્રૈશાન્યાં પુનઃ ક્રમાત્ ॥ ૩॥

પ્રધાનકુણ્ડં કુર્વીત યદ્વા પશ્ચિમભાગતઃ ।
પ્રધાનમેકમેવાથ કૃત્વા શોભાં પ્રકલ્પયેત્ ॥ ૪॥

વિતાનધ્વજમાલાભિર્વિવિધાભિરનેકશઃ ।
વેદિમધ્યે તતઃ કુર્યાન્મણ્ડલં શુભલક્ષણમ્ ॥ ૫॥

રક્તહેમાદિભિશ્ચૂર્ણૈરીશ્વરાવાહનોચિતમ્ ।
સિન્દૂરશાલિનીવારચૂર્ણૈરેવાથ નિર્ધનઃ ॥ ૬॥

એકહસ્તં દ્વિહસ્તં વા સિતં વા રક્તમેવ વા ।
એકહસ્તસ્ય પદ્મસ્ય કર્ણિકાષ્ટાઙ્ગુલા મતા ॥ ૭॥

કેસરાણિ તદર્ધાનિ શેષં ચાષ્ટદલાદિકમ્ ।
દ્વિહસ્તસ્ય તુ પદ્મસ્ય દ્વિગુણં કર્ણિકાદિકમ્ ॥ ૮॥

કૃત્વા શોભોપશોભાઢ્ય મૈશાન્યાં તસ્ય કલ્પયેત્ ।
એકહસ્તં તદર્દ્ધં વા પુનર્વેદ્યાં તુ મણ્ડલમ્ ॥ ૯॥

વ્રીહિતન્દુલસિદ્ધાર્થતિલપુષ્પકુશાસ્તૃતે ।

તત્ર લક્ષણસંયુક્તં શિવકુમ્ભં પ્રસાધયેત્ ॥ ૧૦॥

સૌવર્ણં રાજતં વાપિ તામ્રજં મૃન્મયં તુ વા ।
ગન્ધપુષ્પાક્ષતાકીર્ણં કુશદૂર્વાઙ્કુરાચિતમ્ ॥ ૧૧॥

સિતસૂત્રાવૃતં કણ્ઠે નવવસ્ત્રયુગાવૃતમ્ ।
શુદ્ધામ્બુપૂર્ણમુત્કૂર્ચં સદ્રવ્યં સપિધાનકમ્ ॥ ૧૨॥

ભૃઙ્ગારં વર્ધનીં ચાપિ શઙ્ખં ચ ચક્રમેવ વા ।
વિના સૂત્રાદિકં સર્વં પદ્મપત્રમથાપિ વા ॥ ૧૩॥

તસ્યાસનારવિન્દસ્ય કલ્પયેદુત્તરે દલે ।
અગ્રતશ્ચન્દનામ્ભોભિરસ્ત્રરાજસ્ય વર્ધનીમ્ ॥ ૧૪॥

મણ્ડલસ્ય તતઃ પ્રાચ્યાં મન્ત્રકુમ્ભે ચ પૂર્વવત્ ।
કૃત્વા વિધિવદીશસ્ય મહાપૂજાં સમાચરેત્ ॥ ૧૫॥

અથાર્ણવસ્ય તીરે વા નદ્યાં ગોષ્ઠેઽપિ વા ગિરૌ ।
દેવાગરે ગૃહે વાપિ દેશેઽન્યસ્મિન્મનોહરે ॥ ૧૬॥

કૃત્વા પૂર્વોદિતં સર્વં વિના વા મણ્ડપાદિકમ્ ।
મણ્ડલં પૂર્વવત્કૃત્વા સ્થણ્ડિલં ચ વિભાવસોઃ ॥ ૧૭॥

પ્રવિશ્ય પૂજાભવનં પ્રહૃષ્ટવદનો ગુરુઃ ।
સર્વમઙ્ગલસંયુક્તઃ સમાચરિતનૈત્યકઃ ॥ ૧૮॥

મહાપૂજાં મહેશસ્ય કૃત્વા મણ્ડલમધ્યતઃ ।
શિવકુમ્ભે તથા ભૂયઃ શિવમાવાહ્ય પૂજયેત્ ॥ ૧૯॥

પશ્ચિમાભિમુખં ધ્યાત્વા યજ્ઞરક્ષકમીશ્વરમ્ ।
અર્ચયેદસ્ત્રવર્દ્ધન્યામસ્ત્રમીશસ્ય દક્ષિણે ॥ ૨૦॥

મન્ત્રકુમ્ભે ચ વિન્યસ્ય મન્ત્રં મન્ત્રવિશારદઃ ।
કૃત્વા મુદ્રાદિકં સર્વં મન્ત્રયાગં સમાચરેત્ ॥ ૨૧॥

તતઃ શિવાનલે હોમં કુર્યાદ્દેશિકસત્તમઃ ।
પ્રધાનકુણ્ડે પરિતો જુહુયુશ્ચાપરે દ્વિજાઃ ॥ ૨૨॥

આચાર્યાત્પાદમર્દ્ધં વા હોમસ્તેષાં વિધીયતે ।
પ્રધાનકુણ્ડ એવાથ જુહુયાદ્દેશિકોત્તમઃ ॥ ૨૩॥

સ્વાધ્યાયમપરે કુર્યુઃ સ્તોત્રં મઙ્ગલવાચનમ્ ।
જપં ચ વિધિવચ્ચાન્યે શિવભક્તિપરાયણાઃ ॥ ૨૪॥

નૃત્યં ગીતં ચ વાદ્યં ચ મઙ્ગલાન્યપરાણિ ચ ।
પૂજનં ચ સદસ્યાનાં કૃત્વા સમ્યગ્વિધાનતઃ ॥ ૨૫॥

પુણ્યાહં કારયિત્વાથ પુનઃ સમ્પૂજ્ય શઙ્કરમ્ ।
પ્રાર્થયેદ્દેશિકો દેવં શિષ્યાનુગ્રહકામ્યયા ॥ ૨૬॥

પ્રસીદ દેવદેવેશ દેહમાવિશ્ય મામકમ્ ।
વિમોચયૈનં વિશ્વેશ ઘૃણયા ચ ઘૃણાનિધે ॥ ૨૭॥

અથ ચૈવં કરોમીતિ લબ્ધાનુજ્ઞસ્તુ દેશિકઃ ।
આનીયોપોષિતં શિષ્યં હવિષ્યાશિનમેવ વા ॥ ૨૮॥

એકાશનં વા વિરતં સ્નાતં પ્રાતઃકૃતક્રિયમ્ ।
જપન્તં પ્રણવં દેવં ધ્યાયન્તં કૃતમઙ્ગલમ્ ॥ ૨૯॥

દ્વારસ્ય પશ્ચિમસ્યાગ્રમણ્ડલે દક્ષિણસ્ય વા ।
દર્ભાસને સમાસીનં વિધાયોદઙ્મુખં શિશુમ્ ॥ ૩૦॥

સ્વયં પ્રાગ્વદનસ્તિષ્ઠન્નૂર્ધ્વકાયં કૃતાઞ્જલિમ્ ।
સમ્પ્રોક્ષ્ય પ્રોક્ષણીતોયૈર્મૂર્દ્ધન્યસ્ત્રેણ મુદ્રયા ॥ ૩૧॥

પુષ્પક્ષેપેણ સન્તાડ્ય બધ્નીયાલ્લોચનં ગુરુઃ ।
દુકૂલાર્દ્ધેન વસ્ત્રેણ મન્ત્રિતેન નવેન ચ ॥ ૩૨॥

તતઃ પ્રવેશયેચ્છિષ્યં ગુરુર્દ્વારેણ મણ્ડલમ્ ।
સોઽપિ તેનેરિતઃ શમ્ભોરાચરેત્ ત્રિઃપ્રદક્ષિણમ્ ॥ ૩૩॥

તતઃ સુવર્ણસમ્મિશ્રં દત્ત્વા પુષ્પાઞ્જલિં પ્રભોઃ ।
પ્રાઙ્મુખશ્ચોદઙ્મુખો વા પ્રણમેદ્દણ્ડવત્ક્ષિતૌ ॥ ૩૪॥

તતઃ સમ્પ્રોક્ષ્ય મૂલેન શિરસ્યસ્ત્રેણ પૂર્વવત્ ।
સન્તાડ્ય દેશિકસ્તસ્ય મોચયેન્નેત્રબન્ધનમ્ ॥ ૩૫॥

સ દૃષ્ટ્વા મણ્ડલં ભૂયઃ પ્રણમેત્સાઞ્જલિઃ પ્રભુમ્ ।
અથાસીનં શિવાચાર્યો મણ્ડલસ્ય તુ દક્ષિણે ॥ ૩૬॥

ઉપવેશ્યાત્મનઃ સવ્યે શિષ્યં દર્ભાસને ગુરુઃ ।
આરાધ્ય ચ મહાદેવં શિવહસ્તં પ્રવિન્યસેત્ ॥ ૩૭॥

શિવતેજોમયં પાણિં શિવમન્ત્રમુદીરયેત્ ।
શિવાભિમાનસમ્પન્નો ન્યસેચ્છિષ્યસ્ય મસ્તકે ॥ ૩૮॥

સર્વાઙ્ગાલમ્બનં ચૈવ કુર્યાત્તેનૈવ દેશિકઃ ।
શિષ્યોઽપિ પ્રણમેદ્ભૂમૌ દેશિકાકૃતિમીશ્વરમ્ ॥ ૩૯॥

તતઃ શિવાનલે દેવં સમભ્યર્ચ્ય યથાવિધિ ।
હુતાહુતિત્રયં શિષ્યમુપવેશ્ય યથા પુરા ॥ ૪૦॥

દર્ભાગ્રૈઃ સંસ્પૃશંસ્તં ચ વિદ્યયાત્માનમાવિશેત્ ।
નમસ્કૃત્ય મહાદેવં નાડીસન્ધાનમાચરેત્ ॥ ૪૧॥

શિવશાસ્ત્રોક્તમાર્ગેણ કૃત્વા પ્રાણસ્ય નિર્ગમમ્ ।
શિષ્યદેહપ્રવેશં ચ સ્મૃત્વા મન્ત્રાંસ્તુ તર્પયેત્ ॥ ૪૨॥

સન્તર્પણાય મૂલસ્ય તેનૈવાહુતયો દશ ।
દેયાસ્તિસ્રસ્તથાઙ્ગાનામઙ્ગૈરેવ યથાક્રમમ્ ॥ ૪૩॥

તતઃ પૂર્ણાહુતિં દત્ત્વા પ્રાયશ્ચિત્તાય દેશિકઃ ।
પુનર્દશાહુતીઃ કુર્યાન્મૂલમન્ત્રેણ મન્ત્રવિત્ ॥ ૪૪॥

પુનઃ સમ્પૂજ્ય દેવેશં સમ્યગાચમ્ય દેશિકઃ ।
હુત્વા ચૈવ યથાન્યાયં સ્વજાત્યા વૈશ્યમુદ્ધરેત્ ॥ ૪૫॥

તસ્યૈવં જનયેત્ક્ષાત્રમુદ્ધારં ચ તતઃ પુનઃ ।
કૃત્વા તથૈવ વિપ્રત્વં જનયેદસ્ય દેશિકઃ ॥ ૪૬॥

રાજન્યં ચૈવમુદ્ધૃત્ય કૃત્વા વિપ્રં પુનસ્તયોઃ ।
રુદ્રત્વં જનયેદ્વિપ્રે રુદ્રનામૈવ સાધયેત્ ॥ ૪૭॥

પ્રોક્ષણં તાડનં કૃત્વા શિશોઃ સ્વાત્માનમાત્મનિ ।
શિવાત્મકમનુસ્મૃત્ય સ્ફુરન્તં વિસ્ફુલિઙ્ગવત્ ॥ ૪૮॥

નાડ્યા યથોક્તયા વાયું રેચયેન્મન્ત્રતો ગુરુઃ ।
નિર્ગમ્ય પ્રવિશેન્નાડ્યાં શિષ્યસ્ય હૃદયં તથા ॥ ૪૯॥

પ્રવિશ્ય તસ્ય ચૈતન્યં નીલબિન્દુનિભં સ્મરન્ ।
સ્વતેજસાપાસ્તમલં જ્વલન્તમનુચિન્તયેત્ ॥ ૫૦॥

તમાદાય તયા નાડ્યા મન્ત્રી સંહારમુદ્રયા ।

ન પૂરકેણ નિવેશ્યૈનમેકીભાવાર્થમાત્મનઃ ॥ ૫૧॥

કુમ્ભકેન તથા નાડ્યા રેચકેન યથા પુરા ।
તસ્માદાદાય શિષ્યસ્ય હૃદયે તં નિવેશયેત્ ॥ ૫૨॥

તમાલભ્ય શિવાલ્લબ્ધં તસ્મૈ દત્ત્વોપવીતકમ્ ।
હુત્વાઽઽહુતિત્રયં પશ્ચાદ્દદ્યાત્પૂર્ણાહુતિં તતઃ ॥ ૫૩॥

દેવસ્ય દક્ષિણે શિષ્યમુપવેશ્ય વરાસને ।
કુશપુષ્પપરિસ્તીર્ણે બદ્ધાઞ્જલિરુદઙ્મુખમ્ ॥ ૫૪॥

સ્વસ્તિકાસનમારૂઢં વિધાય પ્રાઙ્મુખઃ સ્વયમ્ ।
વરાસનસ્થિતો મન્ત્રૈર્મહામઙ્ગલનિઃસ્વનૈઃ ॥ ૫૫॥

સમાદાય ઘટં પૂર્ણં પૂર્ણમેવ પ્રસાધિતમ્ ।
ધ્યાયમાનઃ શિવં શિષ્યમભિષિઞ્ચેત દેશિકઃ ॥ ૫૬॥

અથાપનુદ્ય સ્નાનામ્બુ પરિધાય સિતામ્બરમ્ ।
આચાન્તોઽલઙ્કૃતઃ શિષ્યઃ પ્રાઞ્જલિર્મણ્ડપં વ્રજેત્ ॥ ૫૭॥

ઉપવેશ્ય યથાપૂર્વં તં ગુરુર્દર્ભવિષ્ટરે ।
સમ્પૂજ્ય મણ્ડલે દેવં કરન્યાસં સમાચરેત્ ॥ ૫૮॥

તતસ્તુ ભસ્મના દેવં ધ્યાયેન્મનસિ દેશિકઃ ।
સમાલભેત પાણિભ્યાં શિશું શિવમુદીરયેત્ ॥ ૫૯॥

અથ તસ્ય શિવાચાર્યો દહનપ્લાવનાદિકમ્ ।
સકલીકરણં કૃત્વા માતૃકાન્યાસવર્ત્મના ॥ ૬૦॥

તતઃ શિવાસનં ધ્યાત્વા શિષ્યમૂર્દ્ધનિ દેશિકઃ ।
તત્રાવાહ્ય યથાન્યાયમર્ચયેન્મનસા શિવમ્ ॥ ૬૧॥

પ્રાર્થયેત્પ્રાઞ્જલિર્દેવં નિત્યમત્ર સ્થિતો ભવ ।
ઇતિ વિજ્ઞાપ્ય તં શમ્ભોસ્તેજસા ભાસુરં સ્મરેત્ ॥ ૬૨॥

સમ્પૂજ્યાથ શિવં શૈવીમાજ્ઞાં પ્રાપ્ય શિવાત્મિકામ્ ।
કર્ણે શિષ્યસ્ય શનકૈઃ શિવમન્ત્રમુદીરયેત્ ॥ ૬૩॥

સ તુ બદ્ધાઞ્જલિઃ શ્રુત્વા મન્ત્રં તદ્ગતમાનસઃ ।
શનૈસ્તં વ્યાહરેચ્છિષ્યઃ શિવાચાર્યસ્ય શાસનાત્ ॥ ૬૪॥

તતઃ શાક્તં ચ સન્દિશ્ય મન્ત્રં મન્ત્રવિચક્ષણઃ ।
ઉચ્ચારયિત્વા ચ સુખં તસ્મૈ મઙ્ગલમાદિશેત્ ॥ ૬૫॥

તતઃ સમાસાન્મન્ત્રાર્થં વાચ્યવાચકયોગતઃ ।
સમાદિશ્યેશ્વરં રૂપં યોગમાસનમાદિશેત્ ॥ ૬૬॥

અથ ગુર્વાજ્ઞયા શિષ્યઃ શિવાગ્નિગુરુસન્નિધૌ ।
ભક્ત્યૈવમભિસન્ધાય દીક્ષાવાક્યમુદીરયેત્ ॥ ૬૭॥

વરં પ્રાણપરિત્યાગશ્છેદનં શિરસોઽપિ વા ।
ન ત્વનભ્યર્ચ્ય ભુઞ્જીય ભગવન્તં ત્રિલોચનમ્ ॥ ૬૮॥

સ એવ દદ્યાન્નિયતો યાવન્મોહવિપર્યયઃ ।
તાવદારાધયેદ્દેવં તન્નિષ્ઠસ્તત્પરાયણઃ ॥ ૬૯॥

તતઃ સ સમયો નામ ભવિષ્યતિ શિવાશ્રમે ।
લબ્ધાધિકારો ગુર્વાજ્ઞાપાલકસ્તદ્વશો ભવેત્ ॥ ૭૦॥

અતઃ પરં ન્યસ્તકરો ભસ્માદાય સ્વહસ્તતઃ ।
દદ્યાચ્છિષ્યાય મૂલેન રુદ્રાક્ષં ચાભિમન્ત્રિતમ્ ॥ ૭૧॥

પ્રતિમા વાપિ દેવસ્ય ગૂઢદેહમથાપિ વા ।
પૂજાહોમજપધ્યાનસાધનાનિ ચ સમ્ભવે ॥ ૭૨॥

સોઽપિ શિષ્યઃ શિવાચાર્યાલ્લબ્ધાનિ બહુમાનતઃ ।
આદદીતાજ્ઞયા તસ્ય દેશિકસ્ય ન ચાન્યથા ॥ ૭૩॥

આચાર્યાદાપ્તમખિલં શિરસ્યાધાય ભક્તિતઃ ।
રક્ષયેત્પૂજયેચ્છમ્ભું મઠે વા ગૃહ એવ વા ॥ ૭૪॥

અતઃ પરં શિવાચારમાદિશેદસ્ય દેશિકઃ ।
ભક્તિશ્રદ્ધાનુસારેણ પ્રજ્ઞાયાશ્ચાનુસારતઃ ॥ ૭૫॥

યદુક્તં યત્સમાજ્ઞાતં યચ્ચૈવાન્યત્પ્રકીર્તિતમ્ ।
શિવાચાર્યેણ સમયે તત્સર્વં શિરસા વહેત્ ॥ ૭૬॥

શિવાગમસ્ય ગ્રહણં વાચનં શ્રવણં તથા ।
દેશિકદેશતઃ કુર્યાન્ન સ્વેચ્છાતો ન ચાન્યતઃ ॥ ૭૭॥

ઇતિ સઙ્ક્ષેપતઃ પ્રોક્તઃ સંસ્કારઃ સમયાહ્વયઃ ।
સાક્ષાચ્છિવપુરપ્રાપ્તૌ નૃણાં પરમસાધનમ્ ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિષ્યસંસ્કારવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૭.૨.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૭. સપ્તદશોઽધ્યાયઃ । શિવદીક્ષાવિધાનવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
અતઃ પરં સમાવેક્ષ્ય ગુરુઃ શિષ્યસ્ય યોગ્યતામ્ ।
ષડધ્વશુદ્ધિં કુર્વીત સર્વબન્ધવિમુક્તયે ॥ ૧॥

કલાં તત્ત્વં ચ ભુવનં વર્ણં પદમતઃ પરમ્ ।
મન્ત્રશ્ચેતિ સમાસેન ષડધ્વા પરિપઠ્યતે ॥ ૨॥

નિવૃત્ત્યાદ્યાઃ કલાઃ પઞ્ચ કલાધ્વા કથ્યતે બુધૈઃ ।
વ્યાપ્તાઃ કલાભિરિતરે ત્વધ્વાનઃ પઞ્ચ પઞ્ચભિઃ ॥ ૩॥

શિવતત્ત્વાદિભૂમ્યન્તં તત્ત્વાધ્વા સમુદાહૃતઃ ।
ષડ્વિંશત્સઙ્ખ્યયોપેતઃ શુદ્ધાશુદ્ધોભયાત્મકઃ ॥ ૪॥

આધારાદ્યુન્મનાન્તશ્ચ ભુવનાધ્વા પ્રકીર્તિતઃ ।
વિના ભેદોપભેદાભ્યાં ષષ્ટિસઙ્ખ્યાસમન્વિતઃ ॥ ૫॥

પઞ્ચાશદ્ રુદ્રરૂપાસ્તુ વર્ણા વર્ણાધ્વસંજ્ઞિતાઃ ।
અનેકભેદસમ્પન્નઃ પદાધ્વા સમુદાહૃતઃ ॥ ૬॥

સર્વોપમન્ત્રૈર્મન્ત્રાધ્વા વ્યાપ્તઃ પરમવિદ્યયા ।
યથા શિવો ન તત્ત્વેષુ ગણ્યતે તત્ત્વનાયકઃ ॥ ૭॥

મન્ત્રાધ્વનિ ન ગણ્યેત તથાસૌ મન્ત્રનાયકઃ ।
કલાધ્વનો વ્યાપકત્વં વ્યાપ્યત્વં ચેતરાધ્વનામ્ ॥ ૮॥

ન વેત્તિ તત્ત્વતો યઃ સ નૈવાર્હત્યધ્વશોધનમ્ ।
ષડ્વિધસ્યાધ્વનો રૂપં ન યેન વિદિતં ભવેત્ ॥ ૯॥

વ્યાપ્યવ્યાપકતા તેન જ્ઞાતુમેવ ન શક્યતે ।

તસ્માદધ્વસ્વરૂપં ચ વ્યાપ્યવ્યાપકતાં તથા ॥ ૧૦॥

યથાવદવગમ્યૈવ કુર્યાદધ્વવિશોધનમ્ ।
કુણ્ડમણ્ડલપર્યન્તં તત્ર કૃત્વા યથા પુરા ॥ ૧૧॥

દ્વિહસ્તમાનં કુર્વીત પ્રાચ્યાં કલશમણ્ડલમ્ ।
તતઃ સ્નાતઃ શિવાચાર્યઃ સશિષ્યઃ કૃતનૈત્યકઃ ॥ ૧૨॥

પ્રવિશ્ય મણ્ડલં શમ્ભોઃ પૂજાં પૂર્વવદાચરેત્ ।
તત્રાઢકાવરૈઃ સિદ્ધં તન્દુલૈઃ પાયસં પ્રભોઃ ॥ ૧૩॥

અર્દ્ધં નિવેદ્ય હોમાર્થં શેષં સમુપકલ્પયેત્ ।
પુરતઃ કલ્પિતે વાથ મણ્ડલે વર્ણિમણ્ડિતે ॥ ૧૪॥

સ્થાપયેત્પઞ્ચકલશાન્દિક્ષુ મધ્યે ચ દેશિકઃ ।
તેષુ બ્રહ્માણિ મૂલાર્ણૈર્બિન્દુનાદસમન્વિતૈઃ ॥ ૧૫॥

નમ આદ્યૈર્યકરાન્તૈઃ કલ્પયેત્કલ્પવિત્તમઃ ।
ઈશાનં મધ્યમે કુમ્ભે પુરુષં પુરતઃ સ્થિતે ॥ ૧૬॥

અઘોરં દક્ષિણે વામે વામં સદ્યં ચ પશ્ચિમે ।
રક્ષાં વિધાય મુદ્રાં ચ બદ્ધ્વા કુમ્ભાભિમન્ત્રણમ્ ॥ ૧૭॥

કૃત્વા શિવાનલૈર્હોમં પ્રારભેત યથા પુરા ।
યદર્દ્ધં પાયસં પૂર્વં હોમાર્થં પરિકલ્પિતમ્ ॥ ૧૮॥

હુત્વા શિષ્યસ્ય તચ્છેષં ભોક્તું સમુપકલ્પયેત્ ।
તર્પણાન્તં ચ મન્ત્રાણાં કૃત્વા કર્મ યથા પુરા ॥ ૧૯॥

હુત્વા પૂર્ણાહુતિં તેષાં તતઃ કુર્યાત્પ્રદીપનમ્ ।
ૐ કારાદનુ હુઙ્કારં તતો મૂલં ફડન્તકમ્ ॥ ૨૦॥

સ્વાહાન્તં દીપને પ્રાહુરઙ્ગાનિ ચ યથાક્રમમ્ ।
તેષામાહુતયસ્તિસ્રો દેયા દીપનકર્મણિ ॥ ૨૧॥

મન્ત્રૈરેકૈકશસ્તૈસ્તુ વિચિન્ત્યા દીપ્તમૂર્તયઃ ।
ત્રિગુણં ત્રિગુણીકૃત્ય દ્વિજકન્યાકૃતં સિતમ્ ॥ ૨૨॥

સૂત્રં સૂત્રેણ સમ્મન્ત્ર્ય શિખાગ્રે બન્ધયેચ્છિશોઃ ।
ચરણાઙ્ગુષ્ઠપર્યન્તમૂર્ધ્વકાયસ્ય તિષ્ઠતઃ ॥ ૨૩॥

લમ્બયિત્વા તુ તત્સૂત્રં સુષુમ્ણાં તત્ર યોજયેત્ ।
શાન્તયા મુદ્રયાદાય મૂલમન્ત્રેણ મન્ત્રવિત્ ॥ ૨૪॥

હુત્વાહુતિત્રયં તસ્યાઃ સાન્નિધ્યમુપકલ્પયેત્ ।
હૃદિ સન્તાડ્ય શિષ્યસ્ય પુષ્પક્ષેપેણ પૂર્વવત્ ॥ ૨૫॥

ચૈતન્યં સમુપાદાય દ્વાદશાન્તે નિવેદ્ય ચ ।
સૂત્રં સૂત્રેણ સંયોજ્ય સંરક્ષ્યાસ્ત્રેણ વર્મણા ॥ ૨૬॥

અવગુણ્ઠ્યાથ તત્સૂત્રં શિષ્યદેહં વિચિન્તયેત્ ।
મૂલત્રયમયં પાશં ભોગભોગ્યત્વલક્ષણમ્ ॥ ૨૭॥

વિષયેન્દ્રિયદેહાદિજનકં તસ્ય ભાવયેત્ ।
વ્યોમાદિભૂતરૂપિણ્યઃ શાન્ત્યતીતાદયઃ કલાઃ ॥ ૨૮॥

સૂત્રે સ્વનામભિર્યોજ્યઃ પૂજ્યશ્ચૈવ નમોયુતૈઃ ।
અથવા બીજભૂતૈસ્તત્કૃત્વા પૂર્વોદિતં ક્રમાત્ ॥ ૨૯॥

તતો મલાદેસ્તત્ત્વાદૌ વ્યાપ્તિં સમવલોકયેત્ ।
કલાવ્યાપ્તિં મલાદૌ ચ હુત્વા સન્દીપયેત્કલાઃ ॥ ૩૦॥

શિષ્યં શિરસિ સન્તાડ્ય સૂત્રં દેહે યથાક્રમમ્ ।
શાન્ત્યતીતપદે સૂત્રં લાઞ્છયેન્મન્ત્રમુચ્ચરન્ ॥ ૩૧॥

એવં કૃત્વા નિવૃત્ત્યન્તં શાન્ત્યતીતમનુક્રમાત્ ।
હુત્વાહુતિત્રયં પશ્ચાન્મણ્ડલે ચ શિવં યજેત્ ॥ ૩૨॥

દેવસ્ય દક્ષિણે શિષ્યમુપવેશ્યોત્તરામુખમ્ ।
સદર્ભે મણ્ડલે દદ્યાદ્ધોમશિષ્ટં ચરું ગુરુઃ ॥ ૩૩॥

શિષ્યસ્તદ્ગુરુણા દત્તં સત્કૃત્ય શિવપૂર્વકમ્ ।
ભુક્ત્વા પશ્ચાદ્ દ્વિરાચમ્ય શિવમન્ત્રમુદીરયેત્ ॥ ૩૪॥

અપરે મણ્ડલે દદ્યાત્ પઞ્ચગવ્યં તથા ગુરુઃ ।
સોઽપિ તચ્છક્તિતઃ પીત્વા દ્વિરાચમ્ય શિવં સ્મરેત્ ॥ ૩૫॥

તૃતીયે મણ્ડલે શિષ્યમુપવેશ્ય યથા પુરા ।
પ્રદદ્યાદ્દન્તપવનં યથાશાસ્ત્રોક્તલક્ષણમ્ ॥ ૩૬॥

અગ્રેણ તસ્ય મૃદુના પ્રાઙ્મુખો વાપ્યુદઙ્મુખઃ ।
વાચં નિયમ્ય ચાસીનઃ શિષ્યો દન્તાન્વિશોધયેત્ ॥ ૩૭॥

પ્રક્ષાલ્ય દન્તપવનં ત્યક્ત્વાચમ્ય શિવં સ્મરેત્ ।
પ્રવિશેદ્દેશિકાદિષ્ટઃ પ્રાઞ્જલિઃ શિવમણ્ડલમ્ ॥ ૩૮॥

ત્યક્તં તદ્દન્તપવનં દૃશ્યતે ગુરુણા યદિ ।
પ્રાગુદક્પશ્ચિમે વાગ્રે શિવમન્યચ્છિવેતરમ્ ॥ ૩૯॥

અશસ્તાશામુખે તસ્મિન્ ગુરુસ્તદ્દોષશાન્તયે ।
શતમર્દ્ધં તદર્દ્ધં વા જુહુયાન્મૂલમન્ત્રતઃ ॥ ૪૦॥

તતઃ શિષ્યં સમાલભ્ય જપિત્વા કર્ણયોઃ શિવમ્ ।
દેવસ્ય દક્ષિણે ભાગે તં શિષ્યમધિવાસયેત્ ॥ ૪૧॥

અહતાસ્તરણાસ્તીર્ણે સ દર્ભશયને શુચિઃ ।
મન્ત્રિતેઽન્તઃ શિવં ધ્યાયન્ શયીત પ્રાક્ શિરા નિશિ ॥ ૪૨॥

શિખાયાં બદ્ધસૂત્રસ્ય શિખયા તચ્છિખાં ગુરુઃ ।
આબધ્યાહતવસ્ત્રેણ તમાચ્છાદ્ય ચ વર્મણા ॥ ૪૩॥

રેખાત્રયં ચ પરિતો ભસ્મના તિલસર્ષપૈઃ ।
કૃત્વાસ્ત્રજપ્તૈસ્તદ્ બાહ્યે દિગીશાનાં બલિં હરેત્ ॥ ૪૪॥

શિષ્યોઽપિ પરતોઽનશ્નન્કૃત્વૈવમધિવાસનમ્ ।
પ્રબુધ્યોત્થાય ગુરવે સ્વપ્નં દૃષ્ટં નિવેદયેત્ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવદીક્ષાવિધાનવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૭.૨.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૮. અષ્ટાદશોઽધ્યાયઃ । ષડધ્વશુદ્ધ્યાદિકથનમ્ ।

ઉપમન્યુરુવાચ ।
તતઃ સ્નાનાદિકં સર્વં સમાપ્યાચાર્યચોદિતઃ ।
ગચ્છેદ્બદ્ધાઞ્જલિર્ધ્યાયન્ શિવમણ્ડલપાર્શ્વતઃ ॥ ૧॥

અથ પૂજાં વિના સર્વં કૃત્વા પૂર્વદિને યથા ।

નેત્રબન્ધનપર્યન્તં દર્શયેત્ મણ્ડલં ગુરુઃ ॥ ૨॥

બદ્ધનેત્રેણ શિષ્યેણ પુષ્પાવકિરણે કૃતે ।
યત્રાપતન્તિ પુષ્પાણિ તસ્ય નામાઽસ્ય સન્દિશેત્ ॥ ૩॥

તં ચોપનીય નિર્માલ્યમણ્ડલેઽસ્મિન્યથા પુરા ।
પૂજયેદ્દેવમીશાનં જુહુયાચ્ચ શિવાનલે ॥ ૪॥

શિષ્યેણ યદિ દુઃસ્વપ્નો દૃષ્ટસ્તદ્દોષશાન્તયે ।
શતમર્દ્ધં તદર્દ્ધં વા જુહુયાન્મૂલવિદ્યયા ॥ ૫॥

તતઃ સૂત્રં શિખાબદ્ધં લમ્બયિત્વા યથા પુરા ।
આધારપૂજાપ્રભૃતિ યન્નિવૃત્તિકલાશ્રયમ્ ॥ ૬॥

વાગીશ્વરીપૂજનાન્તં કુર્યાદ્ધોમપુરઃસરમ્ ।
અથ પ્રણમ્ય વાગીશં નિવૃત્તેર્વ્યાપિકાં સતીમ્ ॥ ૭॥

મણ્ડલે દેવમભ્યર્ચ્ય હુત્વા ચૈવાહુતિત્રયમ્ ।
પ્રાપયેચ્ચ શિશોઃ પ્રાપ્તિં યુગપત્સર્વયોનિષુ ॥ ૮॥

સૂત્રદેહેઽથ શિષ્યસ્ય તાડનપ્રોક્ષણાદિકમ્ ।
કૃત્વાત્માનં સમાદાય દ્વાદશાન્તે નિવેદ્ય ચ ॥ ૯॥

તતોઽપ્યાદાય મૂલેન મુદ્રયા શાસ્ત્રદૃષ્ટયા ।
યોજયેન્મનસાચાર્યો યુગપત્સર્વયોનિષુ ॥ ૧૦॥

દેવાનાં જાતયશ્ચાષ્ટૌ તિરશ્ચાં પઞ્ચ જાતયઃ ।
જાત્યૈકયા ચ માનુષ્યા યોનયશ્ચ ચતુર્દશ ॥ ૧૧॥

તાસુ સર્વાસુ યુગપત્પ્રવેશાય શિશોર્દ્ધિયા ।
વાગીશાન્યાં યથાન્યાયં શિષ્યાત્માનં નિવેશયેત્ ॥ ૧૨॥

ગર્ભનિષ્પત્તયે દેવં સમ્પૂજ્ય પ્રણિપત્ય ચ ।
હુત્વા ચૈવ યથાન્યાયં નિષ્પન્નં તદનુસ્મરેત્ ॥ ૧૩॥

નિષ્પન્નસ્યૈવમુત્પત્તિમનુવૃત્તિં ચ કર્મણા ।
આર્જવં ભોગનિષ્પત્તિઃ કુર્યાત્ પ્રીતિં પરાં તથા ॥ ૧૪॥

નિષ્કૃત્યર્થં ચ જાત્યાયુર્ભોગસંસ્કારસિદ્ધયે ।
હુત્વાહુતિત્રયં દેવં પ્રાર્થયેદ્દેશિકોત્તમઃ ॥ ૧૫॥

ભોક્તૃત્વવિષયાસઙ્ગમલં તત્કાયશોધનમ્ ।
કૃત્વૈવમેવ શિષ્યસ્ય છિન્દ્યાત્પાશત્રયં તતઃ ॥ ૧૬॥

નિકૃત્યા પરિબદ્ધસ્ય પાશસ્યાત્યન્તભેદતઃ ।
કૃત્વા શિષ્યસ્ય ચૈતન્યં સ્વચ્છં મન્યેત કેવલમ્ ॥ ૧૭॥

હુત્વા પૂર્ણાહુતિં વહ્નૌ બ્રહ્માણં પૂજયેત્તતઃ ।
હુત્વાહુતિત્રયં તસ્મૈ શિવાજ્ઞામનુસન્દિશેત્ ॥ ૧૮॥

પિતામહ ત્વયા નાસ્ય યાતુઃ શૈવં પરં પદમ્ ।
પ્રતિબન્ધો વિધાતવ્યઃ શૈવાજ્ઞૈષા ગરીયસી ॥ ૧૯॥

ઇત્યાદિશ્ય તમભ્યર્ચ્ય વિસૃજ ચ વિધાનતઃ ।
સમભ્યર્ચ્ય મહાદેવં જુહુયાદાહુતિત્રયમ્ ॥ ૨૦॥

નિવૃત્ત્યા શુદ્ધમુદ્ધૃત્ય શિષ્યાત્માનં યથા પુરા ।
નિવેશ્યાત્મનિ સૂત્રે ચ વાગીશં પૂજયેત્તતઃ ॥ ૨૧॥

હુત્વાહુતિત્રયં તસ્મૈ પ્રણમ્ય ચ વિસૃજ્ય તામ્ ।
કુર્યાન્નિવૃત્તઃ સન્ધાનં પ્રતિષ્ઠાં કલયા સહ ॥ ૨૨॥

સન્ધાને યુગપત્પૂજાં કૃત્વા હુત્વાહુતિત્રયમ્ ।
શિષ્યાત્મનઃ પ્રતિષ્ઠાયાં પ્રવેશં ત્વથ ભાવયેત્ ॥ ૨૩॥

તતઃ પ્રતિષ્ઠામાવાહ્ય કૃત્વાશેષં પુરોદિતમ્ ।
તદ્વ્યાપ્તિં વ્યાપિકાં તસ્ય વાગીશાનીં ચ ભાવયેત્ ॥ ૨૪॥

પૂર્ણેન્દુમણ્ડલપ્રખ્યાં કૃત્વા શેષં ચ પૂર્વવત્ ।
વિષ્ણવે સંવિશેદાજ્ઞાં શિવસ્ય પરમાત્મનઃ ॥ ૨૫॥

વિષ્ણોર્વિસર્જનાદ્યં ચ કૃત્વા શેષં ચ વિદ્યયા ।
પ્રતિષ્ઠામનુસન્ધાય તસ્યાં ચાપિ યથા પુરા ॥ ૨૬॥

કૃત્વાનુચિન્ત્ય તદ્વ્યાપ્તિં વાગીશાં ચ યથાક્રમમ્ ।
દીપ્તાગ્નૌ પૂર્ણહોમાન્તં કૃત્વા શેષં ચ પૂર્વવત્ ॥ ૨૭॥

નીલરુદ્રમુપસ્થાપ્ય તસ્મૈ પૂજાદિકં તથા ।
કૃત્વા કર્મ શિવાજ્ઞાં ચ દદ્યાત્પૂર્વોક્તવર્ત્મના ॥ ૨૮॥

તપસ્તમપિ ચોદ્વાસ્ય કૃત્વા તસ્યાથ શાન્તયે ।
વિદ્યાકલાં સમાધાય તદ્વ્યાપ્તિં ચાવલોકયેત્ ॥ ૨૯॥

સ્વાત્મનો વ્યાપિકાં તદ્વદ્વાગીશીં ચ યથા પુરા ।
બાલાર્કસદૃશાકારાં ભાસયન્તીં દિશો દશ ॥ ૩૦॥

તતઃ શેષં યથાપૂર્વં કૃત્વા દેવં મહેશ્વરમ્ ।
આવાહ્યારાધ્ય હુત્વાસ્મૈ શિવાજ્ઞાં મનસા દિશેત્ ॥ ૩૧॥

મહેશ્વરં તથોત્સૃજ્ય કૃત્વાન્યાં ચ કલામિમામ્ ।
શાન્ત્યતીતાં કલાં નીત્વા તદ્વ્યાપ્તિમવલોકયેત્ ॥ ૩૨॥

સ્વાત્મનો વ્યાપિકાં તદ્વદ્વાગીશીં ચ વિચિન્તયેત્ ।
નભોમણ્ડલસઙ્કાશાં પૂર્ણાન્તં ચાપિ પૂર્વવત્ ॥ ૩૩॥

કૃત્વા શેષવિધાનેન સમભ્યર્ચ્ય સદાશિવમ્ ।
તસ્મૈ સમાદિશેદાજ્ઞાં શમ્ભોરમિતકર્મણઃ ॥ ૩૪॥

તત્રાપિ ચ યથાપૂર્વં શિવં શિરસિ પૂર્વવત્ ।
સમભ્યર્ચ્ય ચ વાગીશં પ્રણમ્ય ચ વિસર્જયેત્ ॥ ૩૫॥

તતઃ શિવેન સમ્પ્રોક્ષ્ય શિષ્યં શિરસિ પૂર્વવત્ ।
વિલયં શાન્ત્યતીતાયાઃ શક્તિતત્ત્વેઽથ ચિન્તયેત્ ॥ ૩૬॥

ષડધ્વનઃ પરે પારે સર્વાધ્વવ્યાપિનીં પરામ્ ।
કોટિસૂર્યપ્રતીકાશાં શૈવીં શક્તિં ચ ચિન્તયેત્ ॥ ૩૭॥

તદગ્રે શિષ્યમાનીય શુદ્ધસ્ફટિકનિર્મલમ્ ।
પ્રક્ષાલ્ય કર્ત્તરીં પશ્ચાત્ શિવશાસ્ત્રોક્તમાર્ગતઃ ॥ ૩૮॥

કુર્યાત્તસ્ય શિખાચ્છેદં સહ સૂત્રેણ દેશિકઃ ।
તતસ્તાં ગોમયે ન્યસ્ય શિવાગ્નૌ જુહુયાચ્છિખામ્ ॥ ૩૯॥

વૌષડન્તેન મૂલેન પુનઃ પ્રક્ષાલ્ય કર્તરીમ્ ।
હસ્તે શિષ્યસ્ય ચૈતન્યં તદ્દેહે વિનિવર્તયેત્ ॥ ૪૦॥

તતઃ સ્નાતં સમાચાન્તં કૃતસ્વસ્ત્યયનં શિશુમ્ ।
પ્રવેશ્ય મણ્ડલાભ્યાસં પ્રણિપત્ય ચ દણ્ડવત્ ॥ ૪૧॥

પૂજાં કૃત્વા યથાન્યાયં ક્રિયાવૈકલ્યશુદ્ધયે ।
વાચકેનૈવ મન્ત્રેણ જુહુયાદાહુતિત્રયમ્ ॥ ૪૨॥

ઉપાંશૂચ્ચારયોગેન જુહુયાદાહુતિત્રયમ્ ।

પુનઃ સમ્પૂજ્ય દેવેશં મન્ત્રવૈકલ્યશુદ્ધયે ॥ ૪૩॥

માનસોચ્ચારયોગેન જુહુયાદાહુતિત્રયમ્ ।
તત્ર શમ્ભું સમારાધ્ય મણ્ડલસ્થં સહામ્બયા ।
હુત્વાહુતિત્રયં પશ્ચાત્પ્રાર્થયેત્પ્રાઞ્જલિર્ગુરુઃ ॥ ૪૪॥

ભગવંસ્ત્વત્પ્રસાદેન શુદ્ધિરસ્ય ષડધ્વનઃ ।
કૃતા તસ્માત્પરં ધામ ગમયૈનં તવાવ્યયમ્ ॥ ૪૫॥

ઇતિ વિજ્ઞાપ્ય દેવાય નાડીસન્ધાનપૂર્વકમ્ ।
પૂર્ણાન્તં પૂર્વવત્કૃત્વા તતો ભૂતાનિ શોધયેત્ ॥ ૪૬॥

સ્થિરાસ્થિરે તતઃ શુદ્ધ્યૈ શીતોષ્ણે ચ તતઃ પદે ।
ધ્યાયેદ્વ્યાપ્યૈકતાકારે ભૂતશોધનકર્મણિ ॥ ૪૭॥

ભૂતાનાં ગ્રન્થિવિચ્છેદં કૃત્વા ત્યક્ત્વા સહાધિપૈઃ ।
ભૂતાનિ સ્થિતિયોગેન યો જપેત્પરમે શિવે ॥ ૪૮॥

વિશોધ્યાસ્યં તનું દગ્ધ્વા પ્લાવયિત્વા સુધાકણૈઃ ।
સ્થાપ્યાત્માનં તતઃ કુર્યાદ્વિશુદ્ધાધ્વમયં વપુઃ ॥ ૪૯॥

તત્રાદૌ શાન્ત્યતીતાં તુ વ્યાપિકાં સ્વાધ્વનઃ કલામ્ ।
શુદ્ધામેવ શિશોર્મૂર્ધ્નિ ન્યસેચ્છાન્તિમુખે તથા ॥ ૫૦॥

વિદ્યાં ગલાદિનાભ્યન્તં પ્રતિષ્ઠાં તદધઃ ક્રમાત્ ।
જાન્વન્તં તદધો ન્યસ્યેન્નિવૃત્તિં ચાનુચિન્તયેત્ ॥ ૫૧॥

સ્વબીજૈઃ સૂત્રમન્ત્રં ચ ન્યસ્યાઙ્ગૈસ્તં શિવાત્મકમ્ ।
બુદ્ધ્વા તં હૃદયામ્ભોજે દેવમાવાહ્ય પૂજયેત્ ॥ ૫૨॥

આશાસ્ય નિત્યસાન્નિધ્યં શિવસ્વાત્મ્યં શિશૌ ગુરુઃ ।
શિવતેજોમયસ્યાસ્ય શિશોરાપાદયેદ્ગુણાન્ ॥ ૫૩॥

અણિમાદીન્પ્રસીદેતિ પ્રદદ્યાદાહુતિત્રયમ્ ।
તથૈવ તુ ગુણાનેવ પુનરસ્યોપપાદયેત્ ॥ ૫૪॥

સર્વજ્ઞતાં તથા તૃપ્તિં બોધં ચાદ્યન્તવર્જિતમ્ ।
અલુપ્તશક્તિં સ્વાતન્ત્ર્યમનન્તાં શક્તિમેવ ચ ॥ ૫૫॥

તતો દેવમનુજ્ઞાપ્ય સદ્યાદિકલશૈસ્તુ તમ્ ।
અભિષિઞ્ચેત દેવેશં ધ્યાયન્હૃદિ યથાક્રમમ્ ॥ ૫૬॥

અથોપવેશ્ય તં શિષ્યં શિવમભ્યર્ચ્ય પૂર્વવત્ ।
લબ્ધાનુજ્ઞઃ શિવાચ્છૈવીં વિદ્યામસ્મૈ સમાદિશેત્ ॥ ૫૭॥

ઓઙ્કારપૂર્વિકાં તત્ર સમ્પુટાં તુ નમોઽન્તગામ્ ।
શિવશક્તિયુતાઞ્ચૈવ શક્તિવિદ્યાં ચ તાદૃશીમ્ ॥ ૫૮॥

ઋષિં છન્દશ્ચ દેવં ચ શિવતાં શિવયોસ્તથા ।
પૂજાં સાવરણાં શમ્ભોરાસનાનિ ચ સન્દિશેત્ ॥ ૫૯॥

પુનઃ સમ્પૂજ્ય દેવેશં યન્મયા સમનુષ્ઠિતમ્ ।
સુકૃતં કુરુ તત્સર્વમિતિ વિજ્ઞાપયેત્ શિવમ્ ॥ ૬૦॥

સહશિષ્યો ગુરુર્દેવં દણ્ડવત્ક્ષિતિમણ્ડલે ।
પ્રણમ્યોદ્વાસયેત્તસ્માત્ મણ્ડલાત્પાવકાદપિ ॥ ૬૧॥

તતઃ સદસિકાઃ સર્વે પૂજ્યાઃ પૂજાર્હકાઃ ક્રમાત્ ॥ ૬૨॥

સેવ્યા વિત્તાનુસારેણ સદસ્યાશ્ચ સહર્ત્વિજઃ ।
વિત્તશાઠ્યં ન કુર્વીત યદીચ્છેત્ શિવમાત્મનઃ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે ષડધ્વશુદ્ધ્યાદિકથનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૭.૨.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૯. એકોનવિંશોઽધ્યાયઃ । સાધકસંસ્કારમન્ત્રમાહાત્મ્યમ્ ।

ઉપમન્યુરુવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ સાધકં નામ નામતઃ ।
સંસ્કારમન્ત્રમાહાત્મ્યં કથને સૂચિતં મયા ॥ ૧॥

સમ્પૂજ્ય મણ્ડલે દેવં સ્થાપ્ય કુમ્ભે ચ પૂર્વવત્ ।
હુત્વા શિષ્યમનુષ્ણીષં પ્રાપયેદ્ભુવિ મણ્ડલે ॥ ૨॥

પૂર્ણાન્તં પૂર્વવત્કૃત્વા હુત્વાઽઽહુતિશતં તથા ।
સન્તર્પ્ય મૂલમન્ત્રેણ કલશૈર્દેશિકોત્તમઃ ॥ ૩॥

સન્દીપ્ય ચ યથાપૂર્વં કૃત્વા પૂર્વોદિતં ક્રમાત્ ।
અભિષિચ્ય યથાપૂર્વં પ્રદદ્યાન્મન્ત્રમુત્તમમ્ ॥ ૪॥

તત્ર વિદ્યોપદેશાન્તં કૃત્વા વિસ્તરશઃ ક્રમાત્ ।
પુષ્પામ્બુના શિશોઃ પાણૌ વિદ્યાં શૈવીં સમર્પયેત્ ॥ ૫॥

તવૈહિકામુષ્મિકયોઃ સર્વસિદ્ધિફલપ્રદઃ ।
ભવત્યેવ મહામન્ત્રઃ પ્રસાદાત્પરમેષ્ઠિનઃ ॥ ૬॥

ઇત્યુત્વા દેવમભ્યર્ચ્ય લબ્ધાનુજ્ઞઃ શિવાદ્ગુરુઃ ।
સાધનં શિવયોગં ચ સાધકાય સમાદિશેત્ ॥ ૭॥

તચ્છ્રુત્વા ગુરુસન્દેશં ક્રમશો મન્ત્રસાધકઃ ।
પુરતો વિનિયોગસ્ય મન્ત્રસાધનમાચરેત્ ॥ ૮॥

સાધનં મૂલમન્ત્રસ્ય પુરશ્ચરણમુચ્યતે ।
પુરતશ્ચરણીયત્વાદ્વિનિયોગાખ્યકર્મણઃ ॥ ૯॥

નાત્યન્તં કરણીયં તુ મુમુક્ષોર્મન્ત્રસાધનમ્ ।
કૃતં તુ તદિહાન્યત્ર તસ્યાપિ શુભદં ભવેત્ ॥ ૧૦॥

શુભેઽહનિ શુભે દેશે કાલે વા દોષવર્જિતે ।
શુક્લદન્તનખઃ સ્નાતઃ કૃતપૂર્વાહ્નિકક્રિયઃ ॥ ૧૧॥

અલઙ્કૃત્ય યથા લબ્ધૈર્ગન્ધમાલ્યવિભૂષણૈઃ ।
સોષ્ણીષઃ સોત્તરાસઙ્ગઃ સર્વશુક્લસમાહિતઃ ॥ ૧૨॥

દેવાલયે ગૃહેઽન્યસ્મિન્ દેશે વા સુમનોહરે ।
સુખેનાભ્યસ્તપૂર્વેણ ત્વાસનેન કૃતાસનઃ ॥ ૧૩॥

તનું કૃત્વાત્મનઃ શૈવીં શિવશાસ્ત્રોક્તવર્ત્મના ।
સમ્પૂજ્ય દેવદેવેશં નકુલીશ્વરમીશ્વરમ્ ॥ ૧૪॥

નિવેદ્ય પાયસં તસ્મૈ સમાપ્યારાધનં ક્રમાત્ ।
પ્રણિપત્ય ચ તં દેવં પ્રાપ્તાનુજ્ઞાશ્ચ તન્મુખાત્ ॥ ૧૫॥

કોટિવારં તદર્દ્ધં વા તદર્દ્ધં વા જપેત્ શિવમ્ ।
લક્ષવિંશતિકં વાપિ દશલક્ષમથાપિ વા ॥ ૧૬॥

તતશ્ચ પાયસાક્ષારલવણૈકમિતાશનઃ ।
અહિંસકઃ ક્ષમી શાન્તો દાન્તશ્ચૈવ સદા ભવેત્ ॥ ૧૭॥

અલાભે પાયસસ્યાશ્નન્ફલમૂલાદિકાનિ વા ।
વિહિતાનિ શિવેનૈવ વિશિષ્ટાન્યુત્તરોત્તરમ્ ॥ ૧૮॥

ચરું ભક્ષ્યમથો સક્તુકણાન્યાવકમેવ ચ ।
શાકં પયો દધિ ઘૃતં મૂલં ફલમથોદકમ્ ॥ ૧૯॥

અભિમન્ત્ર્ય ચ મન્ત્રેણ ભક્ષ્યભોજ્યાદિકાનિ ચ ।
સાધનેઽસ્મિન્ વિશેષેણ નિત્યં ભુઞ્જીત વાગ્યતઃ ॥ ૨૦॥

મન્ત્રાષ્ટશતપૂતેન જલેન શુચિના વ્રતી ।
સ્નાયાન્નદીનદોત્થેન પ્રોક્ષયેદ્વાથ શક્તિતઃ ॥ ૨૧॥

તર્પયેચ્ચ તથા નિત્યં જુહુયાચ્ચ શિવાનલે ।
સપ્તભિઃ પઞ્ચભિર્દ્રવ્યૈસ્ત્રિભિર્વાથ ઘૃતેન વા ॥ ૨૨॥

ઇત્થં ભક્ત્યા શિવં શૈવો યઃ સાધયતિ સાધકઃ ।
તસ્યેહામુત્ર દુષ્પ્રાપં ન કિઞ્ચિદપિ વિદ્યતે ॥ ૨૩॥

અથવાહરહર્મન્ત્રં જપેદેકાગ્રમાનસઃ ।
અનશ્નન્નેવ સાહસ્રં વિના મન્ત્રસ્ય સાધનમ્ ॥ ૨૪॥

ન તસ્ય દુર્લભં કિઞ્ચિન્ન તસ્યાસ્ત્યશુભં ક્વચિત્ ।
ઇહ વિદ્યાં શ્રિયં સૌખ્યં લબ્ધ્વા મુક્તિં ચ વિન્દતિ ॥ ૨૫॥

સાધને વિનિયોગે ચ નિત્યે નૈમિત્તિકે તથા ।
જપેજ્જલૈર્ભસ્મના ચ સ્નાત્વા મન્ત્રેણ ચ ક્રમાત્ ॥ ૨૬॥

શુચિર્બદ્ધશિખઃ સૂત્રી સપવિત્રકરસ્તથા ।
ધૃતત્રિપુણ્ડ્રરુદ્રાક્ષો વિદ્યાં પઞ્ચાક્ષરીં જપેત્ ॥ ૨૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે સાધકસંસ્કારમન્ત્રમાહાત્મ્યં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૭.૨.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૦. વિંશોઽધ્યાયઃ । વિશેષાદિસંસ્કૃતિઃ ।

ઉપમન્યુરુવાચ ।
અથૈવં સંસ્કૃતં શિષ્યં કૃતપાશુપતવ્રતમ્ ।
આચાર્યત્વેઽભિષિઞ્ચેત તદ્યોગત્વેન ચાન્યથા ॥ ૧॥

મણ્ડલં પૂર્વવત્કૃત્વા સમ્પૂજ્ય પરમેશ્વરમ્ ।
સ્થાપયત્પઞ્ચકલશાન્દિક્ષુ મધ્યે ચ પૂર્વવત્ ॥ ૨॥

નિવૃત્તિં પુરતો ન્યસ્ય પ્રતિષ્ઠાં પશ્ચિમે ઘટે ।
વિદ્યાં દક્ષિણતઃ શાન્તિમુત્તરે મધ્યતઃ પરામ્ ॥ ૩॥

કૃત્વા રક્ષાદિકં તત્ર બદ્ધ્વા મુદ્રાં ચ ધૈનવીમ્ ।
અભિમન્ત્ર્ય ઘટાન્હુત્વા પૂર્ણાન્તં ચ યથા પુરા ॥ ૪॥

પ્રવેશ્ય મણ્ડલે શિષ્યમનુષ્ણીષં ચ દેશિકઃ ।
તર્પણાદ્યં તુ મન્ત્રાણાં કુર્યાત્પૂર્વાવસાનકમ્ ॥ ૫॥

તતઃ સમ્પૂજ્ય દેવેશમનુજ્ઞાપ્ય ચ પૂર્વવત્ ।
અભિષેકાય તં શિષ્યમાસનં ત્વધિરોહયેત્ ॥ ૬॥

સકલીકૃત્ય તં પશ્ચાત્કલાપઞ્ચકરૂપિણમ્ ।
ન્યસ્તમન્ત્રતનું બદ્ધ્વા શિવં શિષ્યં સમર્પયેત્ ॥ ૭॥

તતો નિવૃત્તિકુમ્ભાદિઘટાનુદ્ધૃત્ય વૈ ક્રમાત્ ।
મધ્યમાન્તાચ્છિવેનૈવ શિષ્યં તમભિષેચયત્ ॥ ૮॥

શિવહસ્તં સમર્પ્યાથ શિશોઃ શિરસિ દેશિકઃ ।
શિવભાવસમાપન્નઃ શિવાચાર્યં તમાદિશેત્ ॥ ૯॥

અથાલઙ્કૃત્ય તં દેવમારાધ્ય શિવમણ્ડલે ।
શતમષ્ટોત્તરં હુત્વા દદ્યાત્પૂર્ણાહુતિં તતઃ ॥ ૧૦॥

પુનઃ સમ્પૂજ્ય દેવેશં પ્રણમ્ય ભુવિ દણ્ડવત્ ।
શિરસ્યઞ્જલિમાધાય શિવં વિજ્ઞાપયેદ્ગુરુઃ ॥ ૧૧॥

ભગવંસ્ત્વત્પ્રસાદેન દેશિકોઽયં મયા કૃતઃ ।
અનુગૃહ્ય ત્વયા દેવ દિવ્યાજ્ઞાસ્મૈ પ્રદીયતામ્ ॥ ૧૨॥

એવં વિજ્ઞાપ્ય શિષ્યેણ સહ ભૂયઃ પ્રણમ્ય ચ ।
શિવં શિવાગમં દિવ્યં પૂજયેત્ શિવવદ્ગુરુઃ ॥ ૧૩॥

પુનઃ શિવમનુજ્ઞાપ્ય શિવજ્ઞાનસ્ય પુસ્તકમ્ ।
ઉભાભ્યામથ પાણિભ્યાં દદ્યાચ્છિષ્યાય દેશિકઃ ॥ ૧૪॥

સ તાં મૂર્ધ્નિ સમાધાય વિદ્યાં વિદ્યાસનોપરિ ।
અધિરોપ્ય યથાન્યાયમભિવન્દ્ય સમર્ચયેત્ ॥ ૧૫॥

અથ તસ્મૈ ગુરુર્દદ્યાદ્રાજોપકરણાન્યપિ ।
આચાર્યપદવીં પ્રાપ્તો રાજ્યં ચાપિ યતોઽર્હતિ ॥ ૧૬॥

અથાનુશાસનં કુર્યાત્પૂર્વૈરાચરિતં યથા ।
યથા ચ શિવશાસ્ત્રોક્તં યથા લોકેષુ પૂજ્યતે ॥ ૧૭॥

શિષ્યાન્ પરીક્ષ્ય યત્નેન શિવશાસ્ત્રોક્તલક્ષણૈઃ ।
સંસ્કૃત્ય ચ શિવજ્ઞાનં તેભ્યો દદ્યાચ્ચ દેશિકઃ ॥ ૧૮॥

એવં સર્વમનાયાસં શૌચં ક્ષાન્તિં દયાં તથા ।
અસ્પૃહામપ્યસૂયાં ચ યત્નેન ચ વિભાવયેત્ ॥ ૧૯॥

ઇત્થમાદિશ્ય તં શિષ્યં શિવમુદ્વાસ્ય મણ્ડલાત્ ।
શિવકુમ્ભાનલાદીંશ્ચ સદસ્યાનપિ પૂજયેત્ ॥ ૨૦॥

યુગપદ્વાથ સંસ્કારાન્ કુર્વીત સગણો ગુરુઃ ।
તત્ર ત્રયં દ્વયં વાપિ પ્રયોગસ્યોપદિશ્યતે ॥ ૨૧॥

તદાદાવેવ કલશાન્કલ્પયેદધ્વશુદ્ધિવત્ ।
કૃત્વા સમયસંસ્કારમભિષેકં વિનાઽખિલમ્ ॥ ૨૨॥

સમભ્યર્ચ્ય શિવં ભૂયઃ કૃત્વા ચાધ્વવિશોધનમ્ ।
તસ્મિન્ પરિસમાપ્તે તુ પુનર્દેવં પ્રપૂજયેત્ ॥ ૨૩॥

હુત્વા મન્ત્રં તુ સન્તર્પ્ય સન્દીપ્યાશાસ્ય ચેશ્વરમ્ ।
સમર્પ્ય મન્ત્રં શિષ્યસ્ય પાણૌ શેષં સમાપયેત્ ॥ ૨૪॥

અથવા મન્ત્રસંસ્કારમનુચિન્ત્યાખિલં ક્રમાત્ ।
અધ્વશુદ્ધિં ગુરુઃ કુર્યાદભિષેકાવસાનિકમ્ ॥ ૨૫॥

તત્ર યઃ શાન્ત્યતીતાદિકલાસુ વિહિતો વિધિઃ ।
સ સર્વોઽપિ વિધાતવ્યસ્તત્ત્વત્રયવિશોધને ॥ ૨૬॥

શિવવિદ્યાત્મતત્ત્વાખ્યં તત્ત્વત્રયમુદાહૃતમ્ ।

શક્તૌ શિવસ્તતો વિદ્યાત્તસ્યાસ્ત્વાત્મા સમુદ્ભવૌ ॥ ૨૭॥

શિવેન શાન્ત્યતીતાધ્વા વ્યાપ્તસ્તદપરઃ પરઃ ।
વિદ્યયા પરિશિષ્ટોઽધ્વા હ્યાત્મના નિખિલઃ ક્રમાત્ ॥ ૨૮॥

દુર્લભં શામ્ભવં મત્વા મન્ત્રમૂલં મનીષિણઃ ।
શાક્તં શંસીત સંસ્કારં શિવશાસ્ત્રાર્થપારગાઃ ॥ ૨૯॥

ઇતિ તે સર્વમાખ્યાતં સંસ્કારાખ્યસ્ય કર્મણઃ ।
ચાતુર્વિધ્યમિદં કૃષ્ણ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૩૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે વિશેષાદિસંસ્કૃતિર્નામ વિંશોઽધ્યાયઃ ॥ ૭.૨.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૧. એકવિંશોઽધ્યાયઃ । નિત્યનૈમિત્તિકકર્મવર્ણનમ્ ।

કૃષ્ણ ઉવાચ ।
ભગવન્ શ્રોતુમિચ્છામિ શિવાશ્રમનિષેવિણામ્ ।
શિવશાસ્ત્રોદિતં કર્મ નિત્યનૈમિત્તિકં તથા ॥ ૧॥

ઉપમન્યુરુવાચ ।
પ્રાતરુત્થાય શયનાદ્ધ્યાત્વા દેવં સહામ્બયા ।
વિચાર્ય કાર્યં નિર્ગચ્છેદ્ ગૃહાદભ્યુદિતેઽરુણે ॥ ૨॥

અબાધે વિજને દેશે કુર્યાદાવશ્યકં તતઃ ।
કૃત્વા શૌચં વિધાનેન દન્તધાવનમાચરેત્ ॥ ૩॥

અલાભે દન્તકાષ્ઠાનામષ્ટમ્યાદિદિનેષુ ચ ।
અપાં દ્વાદશગણ્ડૂષૈઃ કુર્યાદાસ્યવિશોધનમ્ ॥ ૪॥

આચમ્ય વિધિવત્પશ્ચાદ્વારુણં સ્નાનમાચરેત્ ।
નદ્યાં વા દેવખાતે વા હ્રદે વાથ ગૃહેઽપિ વા ॥ ૫॥

સ્નાનદ્રવ્યાણિ તત્તીરે સ્થાપયિત્વા બહિર્મલમ્ ।
વ્યાપોહ્ય મૃદમાલિપ્ય સ્નાત્વા ગોમયમાલિપેત્ ॥ ૬॥

સ્નાત્વા પુનઃ પુનર્વસ્ત્રં ત્યક્ત્વા વાથ વિશોધ્ય ચ ।

સુસ્નાતો નૃપવદ્ભૂયઃ શુદ્ધં વાસો વસીત ચ ॥ ૭॥

મલસ્નાનં સુગન્ધાદ્યૈઃ સ્નાનં દન્તવિશોધનમ્ ।
ન કુર્યાદ્ બ્રહ્મચારી ચ તપસ્વી વિધવા તથા ॥ ૮॥

સોપવીતઃ શિખાં બદ્ધ્વા પ્રવિશ્ય ચ જલાન્તરમ્ ।
અવગાહ્ય સમાચાન્તો જલે ન્યસ્યેત્ ત્રિમણ્ડલમ્ ॥ ૯॥

તોયે મગ્નઃ પુનર્મન્ત્રં જપેચ્છક્ત્યા શિવં સ્મરેત્ ।
ઉત્થાયાચમ્ય તેનૈવ સ્વાત્માનમભિષેચયેત્ ॥ ૧૦॥

ગોશૃઙ્ગેણ સદર્ભેણ પાલાશેન દલેન વા ।
પાદ્મેન વાથ પાણિભ્યાં પઞ્ચકૃત્વસ્ત્રિરેવ વા ॥ ૧૧॥

ઉદ્યાનાદૌ ગૃહે ચૈવ વર્દ્ધન્યા કલશેન વા ।
અવગાહનકાલેઽદ્ભિર્મન્ત્રિતૈરભિષેચયેત્ ॥ ૧૨॥

અથ ચેદ્વારુણં કર્તુમશક્તઃ શુદ્ધવાસસા ।
આર્દ્રેણ શોધયેદ્દેહમાપાદતલમસ્તકમ્ ॥ ૧૩॥

આગ્નેયં વાથ વા માન્ત્રં કુર્યાત્ સ્નાનં શિવેન વા ।
શિવચિન્તાપરં સ્નાનં યુક્તસ્યાત્મીયમુચ્યતે ॥ ૧૪॥

સ્વસૂત્રોક્તવિધાનેન મન્ત્રાચમનપૂર્વકમ્ ।
આચરેદ્ બ્રહ્મયજ્ઞાન્તં કૃત્વા દેવાદિતર્પણમ્ ॥ ૧૫॥

મણ્ડલસ્થં મહાદેવં ધ્યાત્વાભ્યર્ચ્ય યથાવિધિ ।
દદ્યાદર્ઘ્યં તતસ્તસ્મૈ શિવાયાદિત્યરૂપિણે ॥ ૧૬॥

અથવૈતત્સ્વસૂત્રોક્તં કૃત્વા હસ્તૌ વિશોધયેત્ ।
કરન્યાસં તતઃ કૃત્વા સકલીકૃતવિગ્રહઃ ॥ ૧૭॥

વામહસ્તગતામ્ભોભિર્ગન્ધસિદ્ધાર્થકાન્વિતૈઃ ।
કુશપુઞ્જેન વાઽભ્યુક્ષ્ય મૂલમન્ત્રસમન્વિતૈઃ ॥ ૧૮॥

આપોહિષ્ઠાદિભિર્મન્ત્રૈઃ શેષમાઘ્રાય વૈ જલમ્ ।
વામનાસાપુટેનૈવ દેવં સમ્ભાવયેત્સિતમ્ ॥ ૧૯॥

અર્ઘમાદાય દેહસ્થં સવ્યનાસાપુટેન ચ ।
કૃષ્ણવર્ણેન બાહ્યસ્થં ભાવયેચ્ચ શિલાગતમ્ ॥ ૨૦॥

તર્પયેદથ દેવેભ્ય ઋષિભ્યશ્ચ વિશેષતઃ ।
ભૂતેભ્યશ્ચ પિતૃભ્યશ્ચ દદ્યાદર્ઘ્યં યથાવિધિ ॥ ૨૧॥

રક્તચન્દનતોયેન હસ્તમાત્રેણ મણ્ડલમ્ ।
સુવૃત્તં કલ્પયેદ્ભૂમૌ રક્તચૂર્ણાદ્યલઙ્કૃતમ્ ॥ ૨૨॥

તત્ર સમ્પૂજયેદ્ભાનું સ્વકીયાવરણૈઃ સહ ।
ખખોલ્કાયેતિ મન્ત્રેણ સાઙ્ગતઃ સુખસિદ્ધયે ॥ ૨૩॥

પુનશ્ચ મણ્ડલં કૃત્વા તદઙ્ગૈઃ પરિપૂજ્ય ચ ।
તત્ર સ્થાપ્ય હેમપાત્રં માગધપ્રસ્થસમ્મિતમ્ ॥ ૨૪॥

પૂરયેત્ ગન્ધતોયેન રક્તચન્દનયોગિના ।
રક્તપુષ્પૈસ્તિલૈશ્ચૈવ કુશાક્ષતસમન્વિતૈઃ ॥ ૨૫॥

દૂર્વાપામાર્ગગવ્યૈશ્ચ કેવલેન જલેન વા ।
જાનુભ્યાં ધરણીં ગત્વા નત્વા દેવં ચ મણ્ડલે ॥ ૨૬॥

કૃત્વા શિરસિ તત્પાત્રં દદ્યાદર્ઘ્યં શિવાય તત્ ।
અથવાઞ્જલિના તોયં સદર્ભં મૂલવિદ્યયા ॥ ૨૭॥

ઉત્ક્ષિપેદમ્બરસ્થાય શિવાયાદિત્યમૂર્તયે ।
કૃત્વા પુનઃ કરન્યાસં કરશોધનપૂર્વકમ્ ॥ ૨૮॥

બુદ્ધ્વેશાનાદિ સદ્યાન્તં પઞ્ચબ્રહ્મમયં શિવમ્ ।
ગૃહીત્વા ભસિતં મન્ત્રૈર્વિમૃજ્યાઙ્ગાનિ સંસ્પૃશેત્ ॥ ૨૯॥

આપાદાન્તૈઃ શિરોવક્ત્રહૃદ્ગુહ્યચરણાન્ ક્રમાત્ ।
તતો મૂલેન સર્વાઙ્ગમાલભ્ય વસનાન્તરમ્ ॥ ૩૦॥

પરિધાય દ્વિરાચમ્ય પ્રોક્ષ્યૈકાદશમન્ત્રિતૈઃ ।
જલૈરાચ્છાદ્ય વાસોઽયદ્ દ્વિરાચમ્ય શિવં સ્મરેત્ ॥ ૩૧॥

પુનર્ન્યસ્તકરો મન્ત્રી ત્રિપુણ્ડ્રં ભસ્મના લિખેત્ ।
અવક્રમાય તં વ્યક્તં લલાટે ગન્ધવારિણા ॥ ૩૨॥

વૃત્તં વા ચતુરસ્રં વા બિન્દુમર્દ્ધેન્દુમેવ વા ।
લલાટે યાદૃશં પુણ્ડ્રં લિખિતં ભસ્મના પુનઃ ॥ ૩૩॥

તાદૃશં ભુજયોર્મૂર્ધ્નિ સ્તનયોરન્તરે લિખેત્ ।
સર્વાઙ્ગોદ્ધૂલનં ચૈવ ન સમાનં ત્રિપુણ્ડ્રકૈઃ ॥ ૩૪॥

તસ્માત્ ત્રિપુણ્ડ્રમેવૈકં લિખેદુદ્ધૂલનં વિના ।
રુદ્રાક્ષાન્ધારયેન્મૂર્ધ્નિ કણ્ઠે શ્રોતે કરે તથા ॥ ૩૫॥

સુવર્ણવર્ણમચ્છિન્નં શુભં નાન્યૈર્ધૃતં શુભમ્ ।
વિપ્રાદીનાં ક્રમાત્ શ્રેષ્ઠં પીતં રક્તમથાસિતમ્ ॥ ૩૬॥

તદલાભે યથાલાભં ધારણીયમદૂષિતમ્ ।
તત્રાપિ નોત્તરં નીચૈર્ધાર્યં નીચમથોત્તરૈઃ ॥ ૩૭॥

નાશુચિર્ધારયેદક્ષં સદા કાલેષુ ધારયેત્ ।
ઇત્થં ત્રિસન્ધ્યમથવા દ્વિસન્ધ્યં સકૃદેવ વા ॥ ૩૮॥

કૃત્વા સ્નાનાદિકં શક્ત્યા પૂજયેત્પરમેશ્વરમ્ ।
પૂજાસ્થાનં સમાસાદ્ય બદ્ધ્વા રુચિરમાસનમ્ ॥ ૩૯॥

ધ્યાયેદ્દેવં ચ દેવીં ચ પ્રાઙ્મુખો વાપ્યુદઙ્મુખઃ ।
શ્વેતાદીન્નકુલીશાન્તાંસ્તચ્છિષ્યાન્પ્રણમેદ્ગુરુમ્ ॥ ૪૦॥

પુનર્દેવં શિવં નત્વા તતો નામાષ્ટકં જપેત્ ।
શિવો મહેશ્વરશ્ચૈવ રુદ્રો વિષ્ણુઃ પિતામહઃ ॥ ૪૧॥

સંસારવૈદ્યઃ સર્વજ્ઞઃ પરમાત્મેતિ ચાષ્ટકમ્ ।
અથવા શિવમેવૈકં જપિત્વૈકાદશાધિકમ્ ॥ ૪૨॥

જિહ્વાગ્રે તેજસો રાશિં ધ્યાત્વા વ્યાધ્યાદિશાન્તયે ।
પ્રક્ષાલ્ય ચરણૌ કૃત્વા કરૌ ચન્દનચર્ચિતૌ ।
પ્રકુર્વીત કરન્યાસં કરશોધનપૂર્વકમ્ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે નિત્યનૈમિત્તિકકર્મવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૭.૨.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૨. દ્વાવિંશોઽધ્યાયઃ । શિવશાસ્ત્રોક્તનિત્યનૈમિત્તિકકર્મવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।

ન્યાસસ્તુ ત્રિવિધઃ પ્રોક્તઃ સ્થિત્યુત્પત્તિલયક્રમાત્ ।
સ્થિતિર્ન્યાસો ગૃહસ્થાનામુત્પત્તિર્બ્રહ્મચારિણામ્ ॥ ૧॥

યતીનાં સંહૃતિન્યાસો વનસ્થાનાં તથૈવ ચ ।
સ એવ ભર્તૃહીનાયાઃ કુટુમ્બિન્યાઃ સ્થિતિર્ભવેત્ ॥ ૨॥

કન્યાયાઃ પુનરુત્પત્તિં વક્ષ્યે ન્યાસસ્ય લક્ષણમ્ ।
અઙ્ગુષ્ઠાદિકનિષ્ઠાન્તં સ્થિતિન્યાસ ઉદાહૃતઃ ॥ ૩॥

દક્ષિણાઙ્ગુષ્ઠમારભ્ય વામાઙ્ગુષ્ઠાન્તમેવ ચ ।
ઉત્પત્તિન્યાસ આખ્યાતો વિપરીતસ્તુ સંહૃતિઃ ॥ ૪॥

સબિન્દુકાન્નકારાદીન્ વર્ણાન્ ન્યસ્યેદનુક્રમાત્ ।
અઙ્ગુલીષુ શિવં ન્યસ્યેત્ તલયોરપ્યનામયોઃ ॥ ૫॥

અસ્ત્રન્યાસં તતઃ કૃત્વા દશદિક્ષ્વસ્ત્રમન્ત્રતઃ ।
નિવૃત્ત્યાદિકલાઃ પઞ્ચ પઞ્ચભૂતસ્વરૂપિણીઃ ॥ ૬॥

પઞ્ચભૂતાધિપૈઃ સાર્દ્ધં તત્તચ્ચિહ્નસમન્વિતાઃ ।
હૃત્કણ્ઠતાલુભ્રૂમધ્યબ્રહ્મરન્ધ્રસમાશ્રયાઃ ॥ ૭॥

તત્તદ્બીજેન સઙ્ગ્રન્થીંસ્તત્તદ્બીજેષુ ભાવયેત્ ।
તાસાં વિશોધનાર્થાય વિદ્યાં પઞ્ચાક્ષરીં જપેત્ ॥ ૮॥

નિરુદ્ધ્વા પ્રાણવાયું ચ ગુણસઙ્ખ્યાનુસારતઃ ।
ભૂતગ્રન્થિં તતઃ છિન્દ્યાદસ્ત્રેણૈવાસ્ત્રમુદ્રયા ॥ ૯॥

નાડ્યાઃ સુષુમ્ણયાત્માનં પ્રેરિતં પ્રાણવાયુના ।
નિર્ગતં બ્રહ્મરન્ધ્રેણ યોજયેત્ શિવતેજસા ॥ ૧૦॥

વિશોષ્ય વાયુના પશ્ચાદ્દેહં કાલાગ્નિના દહેત્ ।
તતશ્ચોપરિભાવેન કલાઃ સંહૃત્ય વાયુના ॥ ૧૧॥

દેહં સંહૃત્ય વૈ દગ્ધં કલાઃ સ્પૃષ્ટ્વા સહાધિપમ્ ।
પ્લાવયિત્વામૃતૈર્દેહં યથાસ્થાનં નિવેશયેત્ ॥ ૧૨॥

અથ સંહૃત્ય વૈ દગ્ધઃ કલાસર્ગં વિનૈવ તુ ।
અમૃતપ્લાવનં કુર્યાદ્ ભસ્મીભૂતસ્ય વૈ તતઃ ॥ ૧૩॥

તતો વિદ્યામયે તસ્મિન્ દેહે દીપશિખાકૃતિમ્ ।
શિવાન્નિર્ગતમાત્માનં બ્રહ્મરન્ધ્રેણ યોજયેત્ ॥ ૧૪॥

દેહસ્યાન્તઃ પ્રવિષ્ટં તં ધ્યાત્વા હૃદયપઙ્કજે ।
પુનશ્ચામૃતવર્ષેણ સિઞ્ચેદ્ વિદ્યામયં વપુઃ ॥ ૧૫॥

તતઃ કુર્યાત્ કરન્યાસં કરશોધનપૂર્વકમ્ ।
દેહન્યાસં તતઃ પશ્ચાન્મહત્યા મુદ્રયા ચરેત્ ॥ ૧૬॥

અઙ્ગન્યાસં તતઃ કૃત્વા શિવોક્તેન તુ વર્ત્મના ।
વર્ણન્યાસં તતઃ કુર્યાદ્ધસ્તપાદાદિસન્ધિષુ ॥ ૧૭॥

ષડઙ્ગાનિ તતો ન્યસ્ય જાતિષટ્કયુતાનિ ચ ।
દિગ્બન્ધમાચરેત્પશ્ચાદાગ્નેયાદિ યથાક્રમમ્ ॥ ૧૮॥

યદ્વા મૂર્દ્ધાદિપઞ્ચાઙ્ગં ન્યાસમેવ સમાચરેત્ ।
તથા ષડઙ્ગન્યાસં ચ ભૂતશુદ્ધ્યાદિકં વિના ॥ ૧૯॥

એવં સમાસરૂપેણ કૃત્વા દેહાત્મશોધનમ્ ।
શિવભાવમુપાગમ્ય પૂજયેત્પરમેશ્વરમ્ ॥ ૨૦॥

અથ યસ્યાસ્ત્યવસરો નાસ્તિ વા મતિવિભ્રમઃ ।
સ વિસ્તીર્ણેન કલ્પેન ન્યાસકર્મ સમાચરેત્ ॥ ૨૧॥

તત્રાદ્યો માતૃકાન્યાસો બ્રહ્મન્યાસસ્તતઃ પરઃ ।
તૃતીયઃ પ્રણવન્યાસો હંસન્યાસસ્તદુત્તરઃ ॥ ૨૨॥

પઞ્ચમઃ કથ્યતે સદ્ભિર્ન્યાસઃ પઞ્ચાક્ષરાત્મકઃ ।
એતેષ્વેકમનેકં વા કુર્યાત્ પૂજાદિકર્મસુ ॥ ૨૩॥

અકારં મૂર્ધ્નિ વિન્યસ્ય આકારં ચ લલાટકે ।
ઇં ઈં ચ નેત્રયોસ્તદ્વત્ ઉં ઊં શ્રવણયોસ્તથા ॥ ૨૪॥

ઋ ૠ કપોલયોશ્ચૈવ લૃં લૄં નાસાપુટદ્વયે ।
એમૈમ્મોષ્ઠદ્વયોરોમૌં દન્તપઙ્ક્તિદ્વયોઃ ક્રમાત્ ॥ ૨૫॥

અં જિહ્વાયામથો તાલુન્યઃ પ્રયોજ્યો યથાક્રમમ્ ।
કવર્ગં દક્ષિણે હસ્તે ન્યસેત્પઞ્ચસુ સન્ધિષુ ॥ ૨૬॥

ચવર્ગં ચ તથા વામહસ્તસન્ધિષુ વિન્યસેત્ ।
ટવર્ગં ચ તવર્ગં ચ પાદયોરુભયોરપિ ॥ ૨૭॥

પફૌ તુ પાર્શ્વયોઃ પૃષ્ઠે નાભૌ ચાપિ બભૌ તતઃ ।

ન્યસેન્મકારં હૃદયે ત્વગાદિષુ યથાક્રમમ્ ॥ ૨૮॥

યકારાદિસકારાન્તાન્ ન્યસેત્સપ્તસુ ધાતુષુ ।
હઙ્કારં હૃદયસ્યાન્તઃ ક્ષકારં ભ્રૂયુગાન્તરે ॥ ૨૯॥

એવં વર્ણાન્ પ્રવિન્યસ્ય પઞ્ચાશત્ રુદ્રવર્ત્મના ।
અઙ્ગવક્ત્રકલાભેદાત્ પઞ્ચ બ્રહ્માણિ વિન્યસેત્ ॥ ૩૦॥

કરન્યાસાદ્યમપિ તૈઃ કૃત્વા વાથ ન વા ક્રમાત્ ।
શિરોવદનહૃદ્ગુહ્યપાદેષ્વેતાનિ કલ્પયેત્ ॥ ૩૧॥

તતશ્ચોર્ધ્વાદિવક્ત્રાણિ પશ્ચિમાન્તાનિ કલ્પયેત્ ।
ઈશાનસ્ય કલાઃ પઞ્ચ પઞ્ચસ્વેતેષુ ચ ક્રમાત્ ॥ ૩૨॥

તતશ્ચતુર્ષુ વક્ત્રેષુ પુરુષસ્ય કલા અપિ ।
ચતસ્રઃ પ્રણિધાતવ્યાઃ પૂર્વાદિક્રમયોગતઃ ॥ ૩૩॥

હૃત્કણ્ઠાંસેષુ નાભૌ ચ કુક્ષૌ પૃષ્ઠે ચ વક્ષસિ ।
અઘોરસ્ય કલાશ્ચાષ્ટૌ પાદયોરપિ હસ્તયોઃ ॥ ૩૪॥

પશ્ચાત્ ત્રયોદશકલાઃ પાયુમેઢ્રોરુજાનુષુ ।
જઙ્ઘાસ્ફિક્કટિપાર્શ્વેષુ વામદેવસ્ય ભાવયેત્ ॥ ૩૫॥

સદ્યસ્યાઽપિ કલાશ્ચાષ્ટૌ પાદયોરપિ હસ્તયોઃ ।
ઘ્રાણે શિરસિ બાહ્વોશ્ચ કલ્પયેત્કલ્પવિત્તમઃ ।
અષ્ટત્રિંશત્કલાન્યાસમેવં કૃત્વાનુપૂર્વશઃ ॥ ૩૬॥

પશ્ચાત્ પ્રણવવિદ્ધીમાન્ પ્રણવન્યાસમાચરેત્ ।
બાહુદ્વયે કૂર્પરયોસ્તથા ચ મણિબન્ધયોઃ ॥ ૩૭॥

પાર્શ્વોદરોરુજઙ્ઘેષુ પાદયોઃ પૃષ્ઠતસ્તથા ।
ઇત્થં પ્રણવવિન્યાસં કૃત્વા ન્યાસવિચક્ષણઃ ॥ ૩૮॥

હંસન્યાસં પ્રકુર્વીત શિવશાસ્ત્રે યથોદિતમ્ ।
બીજં વિભજ્ય હંસસ્ય નેત્રયોર્ઘ્રાણયોરપિ ॥ ૩૯॥

વિભજ્ય બાહુનેત્રાસ્યલલાટે કર્ણયોરપિ ।
કક્ષયોઃ સ્કન્ધયોશ્ચૈવ પાર્શ્વયોઃ સ્તનયોસ્તથા ॥ ૪૦॥

કટ્યાં પાણ્યોર્ગુલ્ફયોશ્ચ યદ્વા પઞ્ચાઙ્ગવર્ત્મના ।
હંસન્યાસમિમં કૃત્વા ન્યસેત્ પઞ્ચાક્ષરીં તતઃ ॥ ૪૧॥

યથા પૂર્વોક્તમાર્ગેણ શિવત્વં યેન જાયતે ।
નાશિવઃ શિવમભ્યસ્યેન્નાશિવઃ શિવમર્ચયેત્ ।
નાશિવસ્તુ શિવં ધ્યાયેન્નાશિવઃ પ્રાપ્નુયાત્ શિવમ્ ॥ ૪૨॥

તસ્માત્ શૈવીં તનું કૃત્વા ત્યક્ત્વા ચ પશુભાવનામ્ ।
શિવોઽહમિતિ સઞ્ચિન્ત્ય શૈવં કર્મ સમાચરેત્ ॥ ૪૩॥

કર્મયજ્ઞસ્તપોયજ્ઞો જપયજ્ઞસ્તદુત્તરઃ ।
ધ્યાનયજ્ઞો જ્ઞાનયજ્ઞઃ પઞ્ચ યજ્ઞાઃ પ્રકીર્તિતાઃ ॥ ૪૪॥

કર્મયજ્ઞરતાઃ કેચિત્તપોયજ્ઞરતાઃ પરે ।
જપયજ્ઞરતાશ્ચાન્યે ધ્યાનયજ્ઞરતાસ્તથા ॥ ૪૫॥

જ્ઞાનયજ્ઞરતાશ્ચાન્યે વિશિષ્ટાશ્ચોત્તરોત્તરમ્ ।
કર્મયજ્ઞો દ્વિધા પ્રોક્તઃ કામાકામવિભેદતઃ ॥ ૪૬॥

કામાન્ કામી તતો ભુક્ત્વા કામાસક્તઃ પુનર્ભવેત્ ।
અકામો રુદ્રભવને ભોગાન્ ભુક્ત્વા તતશ્ચ્યુતઃ ॥ ૪૭॥

તપોયજ્ઞરતો ભૂત્વા જાયતે નાત્ર સંશયઃ ।
તપસ્વી ચ પુનસ્તસ્મિન્ ભોગાન્ ભુક્ત્વા તતશ્ચ્યુતઃ ॥ ૪૮॥

જપધ્યાનરતો ભૂત્વા જાયતે ભુવિ માનવઃ ।
જપધ્યાનરતો મર્ત્યસ્તદ્વૈશિષ્ટ્યવશાદિહ ॥ ૪૯॥

જ્ઞાનં લબ્ધ્વાચિરાદેવ શિવસાયુજ્યમાપ્નુયાત્ ।
તસ્માન્મુક્તો શિવાજ્ઞપ્તઃ કર્મયજ્ઞોઽપિ દેહિનામ્ ॥ ૫૦॥

અકામઃ કામસંયુક્તો બન્ધાયૈવ ભવિષ્યતિ ।
તસ્માત્પઞ્ચસુ યજ્ઞેષુ ધ્યાનજ્ઞાનપરો ભવેત્ ॥ ૫૧॥

ધ્યાનં જ્ઞાનં ચ યસ્યાસ્તિ તીર્ણસ્તેન ભવાર્ણવઃ ।
હિંસાદિદોષનિર્મુક્તો વિશુદ્ધશ્ચિત્તસાધનઃ ॥ ૫૨॥

ધ્યાનયજ્ઞઃ પરસ્તસ્માદપવર્ગફલપ્રદઃ ।
બહિઃ કર્મિકરા યદ્વન્નાતીવ ફલભાગિનઃ ॥ ૫૩॥

દૃષ્ટ્વા નરેન્દ્રભવને તદ્વદત્રાપિ કર્મિણઃ ।
ધ્યાનિનાં હિ વપુઃ સૂક્ષ્મં ભવેત્પ્રત્યક્ષમૈશ્વરમ્ ॥ ૫૪॥

યથેહ કર્મિણાં સ્થૂલં મૃત્કાષ્ઠાદ્યૈઃ પ્રકલ્પિતમ્ ।
ધ્યાનયજ્ઞરતાસ્તસ્માદ્દેવાન્પાષાણમૃણ્મયાન્ ॥ ૫૫॥

નાત્યન્તં પ્રતિપદ્યન્તે શિવયાથાત્મ્યવેદનાત્ ।
આત્મસ્થં યઃ શિવં ત્યક્ત્વા બહિરભ્યર્ચયેન્નરઃ ॥ ૫૬॥

હસ્તસ્થં ફલમુત્સૃજ્ય લિહેત્કૂર્પરમાત્મનઃ ।
જ્ઞાનાદ્ધ્યાનં ભવેદ્ધ્યાનાજ્જ્ઞાનં ભૂયઃ પ્રવર્તતે ॥ ૫૭॥

તદુભાભ્યાં ભવેન્મુક્તિસ્તસ્માદ્ધ્યાનરતો ભવેત્ ।
દ્વાદશાન્તે તથા મૂર્ધ્નિ લલાટે ભ્રૂયુગાન્તરે ॥ ૫૮॥

નાસાગ્રે વા તથાસ્યે વા કન્ધરે હૃદયે તથા ।
નાભૌ વા શાશ્વતસ્થાને શ્રદ્ધાવિદ્ધેન ચેતસા ॥ ૫૯॥

બહિર્યાગોપચારેણ દેવં દેવીં ચ પૂજયેત્ ।
અથવા પૂજયેન્નિત્યં લિઙ્ગે વા કૃતકેઽપિ વા ॥ ૬૦॥

વહ્નૌ વા સ્થણ્ડિલે વાથ ભક્ત્યા વિત્તાનુસારતઃ ।
અથવાન્તર્બહિશ્ચૈવ પૂજયેત્પરમેશ્વરમ્ ।
અન્તર્યાગરતઃ પૂજાં બહિઃ કુર્વીત વા ન વા ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવશાસ્ત્રોક્તનિત્યનૈમિત્તિકકર્મવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૭.૨.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૩. ત્રયોવિંશોઽધ્યાયઃ । પૂજાવિધાન વ્યાખ્યાનવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
વ્યાખ્યાં પૂજાવિધાનસ્ય પ્રવદામિ સમાસતઃ ।
શિવશાસ્ત્રે શિવેનૈવ શિવાયૈ કથિતસ્ય તુ ॥ ૧॥

અઙ્ગમભ્યન્તરં યાગમગ્નિકાર્યાવસાનકમ્ ।
વિધાય વા ન વા પશ્ચાદ્ બહિર્યાગં સમાચરેત્ ॥ ૨॥

તત્ર દ્રવ્યાણિ મનસા કલ્પયિત્વા વિશોધ્ય ચ ।

ધ્યાત્વા વિનાયકં દેવં પૂજયિત્વા વિધાનતઃ ॥ ૩॥

દક્ષિણે ચોત્તરે ચૈવ નન્દીશં સુયશાં તથા ।
આરાધ્ય મનસા સમ્યગાસનં કલ્પયેદ્બુધઃ ॥ ૪॥

આરાધનાદિકૈર્યુક્તઃ સિંહયોગાસનાદિકમ્ ।
પદ્માસનં વા વિમલં તત્ત્વત્રયસમન્વિતમ્ ॥ ૫॥

તસ્યોપરિ શિવં ધ્યાયેત્ સામ્બં સર્વમનોહરમ્ ।
સર્વલક્ષણસમ્પન્નં સર્વાવયવશોભનમ્ ॥ ૬॥

સર્વાતિશયસંયુક્તં સર્વાભરણભૂષિતમ્ ।
રક્તાસ્યપાણિચરણં કુન્દચન્દ્રસ્મિતાનનમ્ ॥ ૭॥

શુદ્ધસ્ફટિકસઙ્કાશં ફુલ્લપદ્મત્રિલોચનમ્ ।
ચતુર્ભુજમુદારાઙ્ગં ચારુચન્દ્રકલાધરમ્ ॥ ૮॥

વરદાભયહસ્તં ચ મૃગટઙ્કધરં હરમ્ ।
ભુજઙ્ગહારવલયં ચારુનીલગલાન્તરમ્ ॥ ૯॥

સર્વોપમાનરહિતં સાનુગં સપરિચ્છદમ્ ।
તતઃ સઞ્ચિન્તયેત્તસ્ય વામભાગે મહેશ્વરીમ્ ॥ ૧૦॥

પ્રફુલ્લોત્પલપત્રાભાં વિસ્તીર્ણાયતલોચનામ્ ।
પૂર્ણચન્દ્રાભવદનાં નીલકુઞ્ચિતમૂર્ધજામ્ ॥ ૧૧॥

નીલોત્પલદલપ્રખ્યાં ચન્દ્રાર્દ્ધકૃતશેખરામ્ ।
અતિવૃત્તઘનોત્તુઙ્ગસ્નિગ્ધપીનપયોધરામ્ ॥ ૧૨॥

તનુમધ્યાં પૃથુશ્રોણીં પીતસૂક્ષ્મવરામ્બરામ્ ।
સર્વાભરણસમ્પન્નાં લલાટતિલકોજ્જ્વલામ્ ॥ ૧૩॥

વિચિત્રપુષ્પસઙ્કીર્ણકેશપાશોપશોભિતામ્ ।
સર્વતોઽનુગુણાકારાં કિઞ્ચિલ્લજ્જાનતાનનામ્ ॥ ૧૪॥

હેમારવિન્દં વિલસદ્ધાનાં દક્ષિણે કરે ।
દણ્ડવચ્ચાપરં હસ્તં ન્યસ્યાસીનાં મહાસને ॥ ૧૫॥

પાશવિચ્છેદિકાં સાક્ષાત્સચ્ચિદાનન્દરૂપિણીમ્ ।
એવં દેવં ચ દેવીં ચ ધ્યાત્વાસનવરે શુભે ॥ ૧૬॥

સર્વોપચારવદ્ ભક્ત્યા ભાવપુષ્પૈઃ સમર્ચયેત્ ।
અથવા પરિકલ્પ્યૈવં મૂર્તિમન્યતમાં વિભોઃ ॥ ૧૭॥

શૈવીં સદાશિવાખ્યાં વા તથા માહેશ્વરીં પરામ્ ।
ષડ્વિંશકાભિધાનાં વા શ્રીકણ્ઠાખ્યામથાપિ વા ॥ ૧૮॥

મન્ત્રન્યાસાદિકાંશ્ચાપિ કૃત્વા સ્વસ્યાં તનૌ યથા ।
અસ્યાં મૂર્તૌ મૂર્તિમન્તં શિવં સદસતઃ પરમ્ ॥ ૧૯॥

ધ્યાત્વા બાહ્યક્રમેણૈવ પૂજાં નિર્વર્ત્તયેદ્ધિયા ।
સમિદાજ્યાદિભિઃ પશ્ચાન્નાભૌ હોમં ચ ભાવયેત્ ॥ ૨૦॥

ભ્રૂમધ્યે ચ શિવં ધ્યાયેચ્છુદ્ધદીપશિખાકૃતિમ્ ।
ઇત્થમઙ્ગે સ્વતન્ત્રે વા યોગે ધ્યાનમયે શુભે ॥ ૨૧॥

અગ્નિકાર્યાવસાનં ચ સર્વત્રૈવ સમો વિધિઃ ।
અથ ચિન્તામયં સર્વં સમાપ્યારાધનક્રમમ્ ॥ ૨૨॥

લિઙ્ગે ચ પૂજયેદ્દેવં સ્થણ્ડિલે વાનલેઽપિ વા ॥ ૨૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે પૂજાવિધાન વ્યાખ્યાનવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૭.૨.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૪. ચતુર્વિંશોઽધ્યાયઃ । શાસ્ત્રોક્તશિવપૂજનવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
પ્રોક્ષયેન્મૂલમન્ત્રેણ પૂજાસ્થાનં વિશુદ્ધયે ।
ગન્ધચન્દનતોયેન પુષ્પં તત્ર વિનિક્ષિપેત્ ॥ ૧॥

અસ્ત્રેણોત્સાર્ય વૈ વિઘ્નાનવગુણ્ઠ્ય ચ વર્મણા ।
અસ્ત્રં દિક્ષુ પ્રવિન્યસ્ય કલ્પયેદર્ચનાભુવમ્ ॥ ૨॥

તત્ર દર્ભાન્પરિસ્તીર્ય ક્ષાલયેત્પ્રોક્ષણાદિભિઃ ।
સંશોધ્ય સર્વપાત્રાણિ દ્રવ્યશુદ્ધિં સમાચરેત્ ॥ ૩॥

પ્રોક્ષણીમર્ઘ્યપાત્રં ચ પાદ્યપાત્રમતઃ પરમ્ ।

તથૈવાચમનીયસ્ય પાત્રં ચેતિ ચતુષ્ટયમ્ ॥ ૪॥

પ્રક્ષાલ્ય પ્રોક્ષ્ય વીક્ષ્યાથ ક્ષિપેત્તેષુ જલં શિવમ્ ।
પુણ્યદ્રવ્યાણિ સર્વાણિ યથાલાભં વિનિક્ષિપેત્ ॥ ૫॥

રત્નાનિ રજતં હેમ ગન્ધપુષ્પાક્ષતાદયઃ ।
ફલપલ્લવદર્ભાંશ્ચ પુણ્યદ્રવ્યાણ્યનેકધા ॥ ૬॥

સ્નાનોદકે સુગન્ધાદિ પાનીયે ચ વિશેષતઃ ।
શીતલાનિ મનોજ્ઞાની કુસુમાદીનિ નિક્ષિપેત્ ॥ ૭॥

ઉશીરં ચન્દનં ચૈવ પાદ્યે તુ પરિકલ્પયેત્ ।
જાતિકઙ્કોલકર્પૂરબહુમૂલતમાલકાન્ ॥ ૮॥

ક્ષિપેદાચમનીયે ચ ચૂર્ણયિત્વા વિશેષતઃ ।
એલાં પાત્રેષુ સર્વેષુ કર્પૂરં ચન્દનં તથા ॥ ૯॥

કુશાગ્રાણ્યક્ષતાંશ્ચૈવ યવવ્રીહિતિલાનપિ ।
આજ્યસિદ્ધાર્થપુષ્પાણિ ભસિતં ચાર્ઘ્યપાત્રકે ॥ ૧૦॥

કુશપુષ્પયવવ્રીહિબહુમૂલતમાલકાન્ ।
પ્રક્ષિપેત્ પ્રોક્ષણીપાત્રે ભસિતં ચ યથાક્રમમ્ ॥ ૧૧॥

સર્વત્ર મન્ત્રં વિન્યસ્ય વર્મણાવેષ્ટ્ય બાહ્યતઃ ।
પશ્ચાદસ્ત્રેણ સંરક્ષ્ય ધેનુમુદ્રાં પ્રદર્શયેત્ ॥ ૧૨॥

પૂજાદ્રવ્યાણિ સર્વાણિ પ્રોક્ષણીપાત્રવારિણા ।
સમ્પ્રોક્ષ્ય મૂલમન્ત્રેણ શોધયેદ્વિધિવત્તતઃ ॥ ૧૩॥

પાત્રાણાં પ્રોક્ષણીમેકામલાભે સર્વકર્મસુ ।
સાધયેદર્ઘ્યમદ્ભિસ્તત્સામાન્યં સાધકોત્તમઃ ॥ ૧૪॥

તતો વિનાયકં દેવં ભક્ષ્યભોજ્યાદિભિઃ ક્રમાત્ ।
પૂજયિત્વા વિધાનેન દ્વારપાર્શ્વેઽથ દક્ષિણે ॥ ૧૫॥

અન્તઃપુરાધિપં સાક્ષાન્નન્દિનં સમ્યગર્ચયેત્ ।
ચામીકરાચલપ્રખ્યં સર્વાભરણભૂષિતમ્ ॥ ૧૬॥

બાલેન્દુમુકુટં સૌમ્યં ત્રિનેત્રં ચ ચતુર્ભુજમ્ ।
દીપ્તશૂલમૃગીટઙ્કતિગ્મવેત્રધરં પ્રભુમ્ ॥ ૧૭॥

ચન્દ્રબિમ્બાભવદનં હરિવક્ત્રમથાપિ વા ।
ઉત્તરે દ્વારપાર્શ્વસ્ય ભાર્યાં ચ મરુતાં સુતામ્ ॥ ૧૮॥

સુયશાં સુવ્રતામમ્બાં પાદમણ્ડનતત્પરામ્ ।
પૂજયિત્વા પ્રવિશ્યાન્તર્ભવનં પરમેષ્ઠિનઃ ॥ ૧૯॥

સમ્પૂજ્ય લિઙ્ગં તૈર્દ્રવ્યૈર્નિર્માલ્યમપનોદયેત્ ।
પ્રક્ષાલ્ય પુષ્પં શિરસિ ન્યસેત્તસ્ય વિશુદ્ધયે ॥ ૨૦॥

પુષ્પહસ્તો જપેત્ શક્ત્યા મન્ત્રં મન્ત્રવિશુદ્ધયે ।
ઐશાન્યાં ચણ્ડમારાધ્ય નિર્માલ્યં તસ્ય દાપયેત્ ॥ ૨૧॥

કલ્પયેદાસનં પશ્ચાદાધારાદિ યથાક્રમમ્ ।
આધારશક્તિં કલ્યાણીં શ્યામાં ધ્યાયેદથો ભુવિ ॥ ૨૨॥

તસ્યાઃ પુરસ્તાદુત્કણ્ઠમનન્તં કુણ્ડલાકૃતિમ્ ।
ધવલં પઞ્ચફણિનં લેલિહાનમિવામ્બરમ્ ॥ ૨૩॥

તસ્યોપર્યાસનં ભદ્રં કણ્ઠીરવચતુષ્પદમ્ ।
ધર્મો જ્ઞાનં ચ વૈરાગ્યમૈશ્વર્યં ચ પદાનિ વૈ ॥ ૨૪॥

આગ્નેયાદિશ્વેતરક્તપીતશ્યામાનિ વર્ણતઃ ।
અધર્માદીનિ પૂર્વાદીન્યુત્તરાન્તાન્યનુક્રમાત્ ॥ ૨૫॥

રાજાવર્તમણિપ્રખ્યાન્યસ્ય ગાત્રાણિ ભાવયેત્ ।
અસ્યોર્ધ્વચ્છાદનં પદ્મમાસનં વિમલં સિતમ્ ॥ ૨૬॥

અષ્ટપત્રાણિ તસ્યાહુરણિમાદિગુણાષ્ટકમ્ ।
કેસરાણિ ચ વામાદ્યા રુદ્રા વામાદિશક્તિભિઃ ॥ ૨૭॥

બીજાન્યપિ ચ તા એવ શક્તયોન્તર્મનોન્મનીઃ ।
કર્ણિકાપરવૈરાગ્યં નાલં જ્ઞાનં શિવાત્મકમ્ ॥ ૨૮॥

કન્દશ્ચ શિવધર્માત્મા કર્ણિકાન્તે ત્રિમણ્ડલે ।
ત્રિમણ્ડલોપર્યાત્માદિતત્ત્વત્રિતયમાસનમ્ ॥ ૨૯॥

સર્વાસનોપરિ સુખં વિચિત્રાસ્તરણાસ્તૃતમ્ ।
આસનં કલ્પયેદ્દિવ્યં શુદ્ધવિદ્યાસમુજ્જ્વલમ્ ॥ ૩૦॥

આવાહનં સ્થાપનં ચ સન્નિરોધં નિરીક્ષણમ્ ।
નમસ્કારં ચ કુર્વીત બધ્વા મુદ્રાઃ પૃથક્પૃથક્ ॥ ૩૧॥

પાદ્યમાચમનં ચાર્ઘ્યં ગન્ધં પુષ્પં તતઃ પરમ્ ।
ધૂપં દીપં ચ તામ્બૂલં દત્ત્વાથ સ્નાપયેત્ શિવૌ ॥ ૩૨॥

અથવા પરિકલ્પ્યૈવમાસનં મૂર્તિમેવ ચ ।
સકલીકૃત્ય મૂલેન બ્રહ્મભિશ્ચાપરૈસ્તથા ॥ ૩૩॥

આવાહયેત્તતો દેવ્યા શિવં પરમકારણમ્ ।
શુદ્ધસ્ફટિકસઙ્કાશં દેવં નિશ્ચલમક્ષરમ્ ॥ ૩૪॥

કારણં સર્વલોકાનાં સર્વલોકમયં પરમ્ ।
અન્તર્બહિઃસ્થિતં વ્યાપ્ય હ્યણોરણુ મહત્તરમ્ ॥ ૩૫॥

ભક્તાનામપ્રયત્નેન દૃશ્યમીશ્વરમવ્યયમ્ ।
બ્રહ્મેન્દ્રવિષ્ણુરુદ્રાદ્યૈરપિ દેવૈરગોચરમ્ ॥ ૩૬॥

દેવસારં ચ વિદ્વદ્ભિરગોચરમિતિ શ્રુતમ્ ।
આદિમધ્યાન્તરહિતં ભેષજં ભવરોગિણામ્ ॥ ૩૭॥

શિવતત્ત્વમિતિ ખ્યાતં શિવાર્થં જગતિ સ્થિરમ્ ।
પઞ્ચોપચારવદ્ભક્ત્યા પૂજયેલ્લિઙ્ગમુત્તમમ્ ॥ ૩૮॥

લિઙ્ગમૂર્ત્તિર્મહેશસ્ય શિવસ્ય પરમાત્મનઃ ।
સ્નાનકાલે પ્રકુર્વીત જયશબ્દાદિમઙ્ગલમ્ ॥ ૩૯॥

પઞ્ચગવ્યઘૃતક્ષીરદધિમધ્વાદિપૂર્વકૈઃ ।
મૂલૈઃ ફલાનાં સારૈશ્ચ તિલસર્ષપસક્તુભિઃ ॥ ૪૦॥

બીજૈર્યવાદિભિશ્શસ્તૈશ્ચૂર્ણૈર્માષાદિસમ્ભવૈઃ ।
સંસ્નાપ્યાલિપ્ય પિષ્ટાદ્યૈઃ સ્નાપયેદુષ્ણવારિભિઃ ॥ ૪૧॥

ઘર્ષયેદ્બિલ્વપત્રાદ્યૈર્લેપગન્ધાપનુત્તયે ।
પુનઃ સંસ્નાપ્ય સલિલૈશ્ચક્રવર્ત્ત્યુપચારતઃ ॥ ૪૨॥

સુગન્ધામલકં દદ્યાદ્ હરિદ્રાં ચ યથાક્રમમ્ ।
તતઃ સંશોધ્ય સલિલૈર્લિઙ્ગં બેરમથાપિ વા ॥ ૪૩॥

સ્નાપયેદ્ગન્ધતોયેન કુશપુષ્પોદકેન ચ ।
હિરણ્યરત્નતોયૈશ્ચ મન્ત્રસિદ્ધૈર્યથાક્રમમ્ ॥ ૪૪॥

અસમ્ભવે તુ દ્રવ્યાણાં યથાસમ્ભવસમ્ભૃતૈઃ ।

કેવલૈર્મન્ત્રતોયૈર્વા સ્નાપયેચ્છ્રદ્ધયા શિવમ્ ॥ ૪૫॥

કલશેનાથ શઙ્ખેન વર્દ્ધન્યા પાણિના તથા ।
સકુશેન સપુષ્પેણ સ્નાપયેન્મન્ત્રપૂર્વકમ્ ॥ ૪૬॥

પવમાનેન રુદ્રેણ નીલેન ત્વરિતેન ચ ।
લિઙ્ગસૂક્તાદિસૂક્તૈશ્ચ શિરસાથર્વણેન ચ ॥ ૪૭॥

ઋગ્ભિશ્ચ સામભિઃ શૈવૈર્બ્રહ્મભિશ્ચાપિ પઞ્ચભિઃ ।
સ્નાપયેદ્દેવદેવેશં શિવેન પ્રણવેન ચ ॥ ૪૮॥

યથા દેવસ્ય દેવ્યાશ્ચ કુર્યાત્સ્નાનાદિકં તથા ।
ન તુ કશ્ચિદ્વિશેષોઽસ્તિ તત્ર તૌ સદૃશૌ યતઃ ॥ ૪૯॥

પ્રથમં દેવમુદ્દિશ્ય કૃત્વા સ્નાનાદિકાઃ ક્રિયાઃ ।
દેવ્યૈ પ્રશ્ચાત્પ્રકુર્વીત દેવદેવસ્ય શાસનાત્ ॥ ૫૦॥

અર્દ્ધનારીશ્વરે પૂજ્યે પૌર્વાપર્યં ન વિદ્યતે ।
તત્ર તત્રોપચારાણાં લિઙ્ગે વાન્યત્ર વા ક્વચિત્ ॥ ૫૧॥

કૃત્વાઽભિષેકં લિઙ્ગસ્ય શુચિના ચ સુગન્ધિના ।
સમ્મૃજ્ય વાસસા દદ્યાદમ્બરં ચોપવીતકમ્ ॥ ૫૨॥

પાદ્યમાચમનં ચાર્ઘ્યં ગન્ધં પુષ્પં ચ ભૂષણમ્ ।
ધૂપં દીપં ચ નૈવેદ્યં પાનીયં મુખશોધનમ્ ॥ ૫૩॥

પુનશ્ચાચમનીયં ચ મુખવાસં તતઃ પરમ્ ।
મુકુટં ચ શુભં ભદ્રં સર્વરત્નૈરલઙ્કૃતમ્ ॥ ૫૪॥

ભૂષણાનિ પવિત્રાણિ માલ્યાનિ વિવિધાનિ ચ ।
વ્યજને ચામરે છત્રં તાલવૃન્તં ચ દર્પણમ્ ॥ ૫૫॥

દત્ત્વા નીરાજનં કુર્યાત્સર્વમઙ્ગલનિઃસ્વનૈઃ ।
ગીતનૃત્યાદિભિશ્ચૈવ જયશબ્દસમન્વિતઃ ॥ ૫૬॥

હૈમે ચ રાજતે તામ્રે પાત્રે વા મૃણ્મયે શુભે ।
પદ્મકૈઃ શોભિતૈઃ પુષ્પૈર્બીજૈર્દધ્યક્ષતાદિભિઃ ॥ ૫૭॥

ત્રિશૂલશઙ્ખયુગ્માબ્જનન્દ્યાવર્તૈઃ કરીષજૈઃ ।
શ્રીવત્સસ્વસ્તિકાદર્શવજ્રૈર્વહ્ન્યાદિચિહ્નિતૈઃ ॥ ૫૮॥

અષ્ટૌ પ્રદીપાન્પરિતો વિધાયૈકં તુ મધ્યમે ।
તેષુ વામાદિકાશ્ચિન્ત્યાઃ પૂજ્યાશ્ચ નવ શક્તયઃ ॥ ૫૯॥

કવચેન સમાચ્છાદ્ય સંરક્ષ્યાસ્ત્રેણ સર્વતઃ ।
ધેનુમુદ્રાં ચ સન્દર્શ્ય પાણિભ્યાં પાત્રમુદ્ધરેત્ ॥ ૬૦॥

અથવારોપયેત્પાત્રે પઞ્ચદીપાન્યથાક્રમમ્ ।
વિદિક્ષ્વપિ ચ મધ્યે ચ દીપમેકમથાપિ વા ॥ ૬૧॥

તતસ્તત્પાત્રમુદ્ધૃત્ય લિઙ્ગાદેરુપરિ ક્રમાત્ ।
ત્રિઃપ્રદક્ષિણયોગેન ભ્રામયેન્મૂલવિદ્યયા ॥ ૬૨॥

દદ્યાદર્ઘ્યં તતો મૂર્ધ્નિ ભસિતં ચ સુગન્ધિતમ્ ।
કૃત્વા પુષ્પાઞ્જલિં પશ્ચાદુપહારાન્નિવેદયેત્ ॥ ૬૩॥

પાનીયં ચ તતો દદ્યાદ્દત્ત્વા વાચમનં પુનઃ ।
પઞ્ચ સૌગન્ધિકોપેતં તામ્બૂલં ચ નિવેદયેત્ ॥ ૬૪॥

પ્રોક્ષયેત્પ્રોક્ષણીયાનિ ગાનનાટ્યાનિ કારયેત્ ।
લિઙ્ગાદૌ શિવયોશ્ચિન્તાં કૃત્વા શક્ત્યા જપેત્ શિવમ્ ॥ ૬૫॥

પ્રદક્ષિણં પ્રણામં ચ સ્તવં ચાત્મસમર્પણમ્ ।
વિજ્ઞાપનં ચ કાર્યાણાં કુર્યાદ્વિનયપૂર્વકમ્ ॥ ૬૬॥

અર્ઘ્યં પુષ્પાઞ્જલિં દત્ત્વા બદ્ધ્વા મુદ્રાં યથાવિધિ ।
પશ્ચાત્ક્ષમાપયેદ્દેવમુદ્વાસ્યાત્મનિ ચિન્તયેત્ ॥ ૬૭॥

પાદ્યાદિમુખવાસાન્તમર્ઘ્યાદ્યં ચાતિસઙ્કટે ।
પુષ્પવિક્ષેપમાત્રં વા કુર્યાદ્ભાવપુરઃસરમ્ ॥ ૬૮॥

તાવતૈવ પરો ધર્મો ભાવને સુકૃતો ભવેત્ ।
અસમ્પૂજ્ય ન ભુઞ્જીત શિવમાપ્રાણસઞ્ચરાત્ ॥ ૬૯॥

યદિ પાપસ્તુ ભુઞ્જીત સ્વૈરં તસ્ય ન નિષ્કૃતિઃ ।
પ્રમાદેન તુ ભુઙ્ક્તે ચેત્તદુદ્ગીર્ય પ્રયત્નતઃ ॥ ૭૦॥

સ્નાત્વા દ્વિગુણમભ્યર્ચ્ય દેવં દેવીમુપોષ્ય ચ ।
શિવસ્યાયુતમભ્યસ્યેદ્ બ્રહ્મચર્યપુરઃસરમ્ ॥ ૭૧॥

પરેદ્યુઃ શક્તિતો દત્ત્વા સુવર્ણાદ્યં શિવાય ચ ।
શિવભક્તાય વા કૃત્વા મહાપૂજાં શુચિર્ભવેત્ ॥ ૭૨॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શાસ્ત્રોક્તશિવપૂજનવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૭.૨.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । શિવશાસ્ત્રોક્તપૂજનવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
અનુક્તં ચાત્ર પૂજાયાઃ ક્રમલોપભયાદિવ ।
યત્તદન્યત્પ્રવક્ષ્યામિ સમાસાન્ન તુ વિસ્તરાત્ ॥ ૧॥

હવિર્નિવેદનાત્પૂર્વં દીપદાનાદનન્તરમ્ ।
કુર્યાદાવરણાભ્યર્ચાં પ્રાપ્તે નીરાજનેઽથવા ॥ ૨॥

તત્રેશાનાદિસદ્યાન્તં રુદ્રાદ્યસ્ત્રાન્તમેવ ચ ।
શિવસ્ય વા શિવાયાશ્ચ પ્રથમાવરણે યજેત્ ॥ ૩॥

ઐશાન્યાં પૂર્વભાગે ચ દક્ષિણે ચોત્તરે તથા ।
પશ્ચિમે ચ તથાગ્નેય્યામૈશાન્યાં નૈરૃતે તથા ॥ ૪॥

વાયવ્યાં પુનરૈશાન્યાં ચતુર્દિક્ષુ તતઃ પરમ્ ।
ગર્ભાવરણમાખ્યાતં મન્ત્રસઙ્ઘાતમેવ વા ॥ ૫॥

હૃદયાદ્યસ્ત્રપર્યન્તમથવાપિ સમર્ચયેત્ ।
તદ્બહિઃ પૂર્વતઃ શક્રં યમં દક્ષિણતો યજેત્ ॥ ૬॥

વરુણં વારુણે ભાગે ધનદં ચોત્તરે બુધઃ ।
ઈશમૈશેઽનલં સ્વીયે નૈરૃતે નિરૃતિં યજેત્ ॥ ૭॥

મારુતે મારુતં વિષ્ણું નૈરૃતે વિધિમૈશ્વરે ।
બહિઃપદ્મસ્ય વજ્રાદ્યાન્યાબ્જાન્તાન્યાયુધાન્યપિ ॥ ૮॥

પ્રસિદ્ધરૂપાણ્યાશાસુ લોકેશાનાં ક્રમાદ્યજેત્ ।
દેવં દેવીં ચ સમ્પ્રેક્ષ્ય સર્વાવરણદેવતાઃ ॥ ૯॥

બદ્ધાઞ્જલિપુટા ધ્યેયાઃ સમાસીના યથાસુખમ્ ।

સર્વાવરણદેવાનાં સ્વાભિધાનૈર્નમોયુતૈઃ ॥ ૧૦॥

પુષ્પૈઃ સમ્પૂજનં કુર્યાન્નત્વા સર્વાન્યથાક્રમમ્ ।
ગર્ભાવરણમેવાપિ યજેત્સ્વાવરણેન વા ॥ ૧૧॥

યોગે ધ્યાને જપે હોમે બાહ્યે વાભ્યન્તરેઽપિ વા ।
હવિશ્ચ ષડ્વિધં દેયં શુદ્ધં મુદ્ગાન્નમેવ ચ ॥ ૧૨॥

પાયસં દધિસમ્મિશ્રં ગૌડં ચ મધુનાપ્લુતમ્ ।
એતેષ્વેકમનેકં વા નાનાવ્યઞ્જનસંયુતમ્ ॥ ૧૩॥

ગુડખણ્ડાન્વિતં દધ્યાન્મથિતં દધિ ચોત્તમમ્ ।
ભક્ષ્યાણ્યપૂપમુખ્યાનિ સ્વાદુમન્તિ ફલાનિ ચ ॥ ૧૪॥

રક્તચન્દનપુષ્પાઢ્યં પાનીયં ચાતિશીતલમ્ ।
મૃદુ એલારસાક્તં ચ ખણ્ડં પૂગફલસ્ય ચ ॥ ૧૫॥

દલાનિ નાગવલ્લ્યાશ્ચ યુક્તાનિ ખદિરાદિભિઃ ।
ગૌરાણિ સ્વર્ણવર્ણાનિ વિહિતાનિ શિવાનિ ચ ।
શૈલમેવ સિતં ચૂર્ણં નાતિરૂક્ષં ન દૂષિતમ્ ॥ ૧૬॥

કર્પૂરં ચાથ કઙ્કોલં જાત્યાદિ ચ નવં શુભમ્ ।
આલેપનં ચન્દનં સ્યાન્મૂલકાષ્ઠં રજોમયમ્ ॥ ૧૭॥

કસ્તૂરિકા કુઙ્કુમં ચ રસો મૃગમદાત્મકઃ ।
પુષ્પાણિ સુરભીણ્યેવ પવિત્રાણિ શુભાનિ ચ ॥ ૧૮॥

નિર્ગન્ધાન્યુગ્રગન્ધાનિ દૂષિતાન્યુષિતાનિ ચ ।
સ્વયમેવ વિશીર્ણાનિ ન દેયાનિ શિવાર્ચને ॥ ૧૯॥

વાસાંસિ ચ મૃદૂન્યેવ તપનીયમયાનિ ચ ।
વિદ્યુદ્વલયકલ્પાનિ ભૂષણાનિ વિશેષતઃ ॥ ૨૦॥

સર્વાણ્યેતાનિ કર્પૂરનિર્યાસાગુરુચન્દનૈઃ ।
આધૂપિતાનિ પુષ્પૌઘૈર્વાસિતાનિ સમન્તતઃ ॥ ૨૧॥

ચન્દનાગુરુકર્પૂરકાષ્ઠગુગ્ગુલુચૂર્ણકૈઃ ।
ઘૃતેન મધુના ચૈવ સિદ્ધો ધૂપઃ પ્રશસ્યતે ॥ ૨૨॥

કપિલાસમ્ભવેનૈવ ઘૃતેનાતિસુગન્ધિના ।
નિત્યં પ્રદીપિતા દીપાઃ શસ્તાઃ કર્પૂરસંયુતાઃ ॥ ૨૩॥

પઞ્ચગવ્યં ચ મધુરં પયો દધિ ઘૃતં તથા ।
કપિલાસમ્ભવં શમ્ભોરિષ્ટં સ્નાને ચ પાનકે ॥ ૨૪॥

આસનાનિ ચ ભદ્રાણિ ગજદન્તમયાનિ ચ ।
સુવર્ણરત્નયુક્તાનિ ચિત્રાણ્યાસ્તરણાનિ ચ ॥ ૨૫॥

મૃદૂપધાનયુક્તાનિ સૂક્ષ્મતૂલમયાનિ ચ ।
ઉચ્ચાવચાનિ રમ્યાણિ શયનાનિ સુખાનિ ચ ॥ ૨૬॥

નદ્યઃ સમુદ્રગામિન્યા નદાદ્વામ્ભઃ સમાહૃતમ્ ।
શીતઞ્ચ વસ્ત્રપૂતં તદ્વિશિષ્ટં સ્નાનપાનયોઃ ॥ ૨૭॥

છત્રં શશિનિભં ચારુ મુક્તાદામવિરાજિતમ્ ।
નવરત્નચિતં દિવ્યં હેમદણ્ડમનોહરમ્ ॥ ૨૮॥

ચામરે ચ સિતે સૂક્ષ્મે ચામીકરપરિષ્કૃતે ।
રાજહંસદ્વયાકારે રત્નદણ્ડોપશોભિતે ॥ ૨૯॥

દર્પણં ચાપિ સુસ્નિગ્ધં દિવ્યગન્ધાનુલેપનમ્ ।
સમન્તાદ્રત્નસઞ્છન્નં સ્રગ્વરૈશ્ચાપિ ભૂષિતમ્ ॥ ૩૦॥

ગમ્ભીરનિનદઃ શઙ્ખો હંસકુન્દેન્દુસન્નિભઃ ।
આસ્યપૃષ્ઠાદિદેશેષુ રત્નચામીકરાચિતઃ ॥ ૩૧॥

કાહલાનિ ચ રમ્યાણિ નાનાનાદકરાણિ ચ ।
સુવર્ણનિર્મિતાન્યેવ મૌક્તિકાલઙ્કૃતાનિ ચ ॥ ૩૨॥

ભેરીમૃદઙ્ગમુરજતિમિચ્છપટહાદયઃ ।
સમુદ્રકલ્પસન્નાદાઃ કલ્પનીયાઃ પ્રયત્નતઃ ॥ ૩૩॥

ભાણ્ડાન્યપિ ચ રમ્યાણિ પાત્રાણ્યપિ ચ કૃત્સ્નશઃ ।
તદાધારાણિ સર્વાણિ સૌવર્ણાન્યેવ સાધયેત્ ॥ ૩૪॥

આલયં ચ મહેશસ્ય શિવસ્ય પરમાત્મનઃ ।
રાજાવસથવત્કલ્પ્યં શિલ્પશાસ્ત્રોક્તલક્ષણમ્ ॥ ૩૫॥

ઉચ્ચપ્રાકારસમ્ભિન્નં ભૂધરાકારગોપુરમ્ ।
અનેકરત્નસઞ્છન્નં હેમદ્વારકપાટકમ્ ॥ ૩૬॥

તપ્તજામ્બૂનદમયં રત્નસ્તમ્ભશતાવૃતમ્ ।

મુક્તાદામવિતાનાઢ્યં વિદ્રુમદ્વારતોરણમ્ ॥ ૩૭॥

ચામીકરમયૈર્દિવ્યૈર્મુકુટૈઃ કુમ્ભલક્ષણૈઃ ।
અલઙ્કૃતશિરોભાગમસ્ત્રરાજેન ચિહ્નિતમ્ ॥ ૩૮॥

રાજન્યાર્હનિવાસૈશ્ચ રાજવીથ્યાદિશોભિતૈઃ ।
પ્રોચ્છ્રિતપ્રાંશુશિખરૈઃ પ્રાસાદૈશ્ચ સમન્તતઃ ॥ ૩૯॥

આસ્થાનસ્થાનવર્યૈશ્ચ સ્થિતૈર્દિક્ષુ વિદિક્ષુ ચ ।
અત્યન્તાલઙ્કૃતપ્રાન્તમન્તરાવરણૈરિવ ॥ ૪૦॥

ઉત્તમસ્ત્રીસહસ્રૈશ્ચ નૃત્યગેયવિશારદૈઃ ।
વેણુવીણાવિદગ્ધૈશ્ચ પુરુષૈર્બહુભિર્યુતમ્ ॥ ૪૧॥

રક્ષિતં રક્ષિભિર્વીરૈર્ગજવાજિરથાન્વિતૈઃ ।
અનેકપુષ્પવાટીભિરનેકૈશ્ચ સરોવરૈઃ ॥ ૪૨॥

દીર્ઘિકાભિરનેકાભિર્દિગ્વિદિક્ષુ વિરાજિતમ્ ।
વેદવેદાન્તતત્ત્વજ્ઞૈઃ શિવશાસ્ત્રપરાયણૈઃ ॥ ૪૩॥

શિવાશ્રમરતૈર્ભક્તૈઃ શિવશાસ્ત્રોક્તલક્ષણૈઃ ।
શાન્તૈઃ સ્મિતમુખૈઃ સ્ફીતૈઃ સદાચારપરાયણૈઃ ॥ ૪૪॥

શૈવૈર્માહેશ્વરૈશ્ચૈવ શ્રીમદ્ભિઃ સેવિતં દ્વિજૈઃ ।
એવમન્તર્બહિર્વાથ યથાશક્તિવિનિર્મિતૈઃ ॥ ૪૫॥

સ્થાને શિલામયે દાન્તે દારવે ચેષ્ટકામયે ।
કેવલં મૃણ્મયે વાપિ પુણ્યારણ્યેઽથવા ગિરૌ ॥ ૪૬॥

નદ્યાં દેવાલયેઽન્યત્ર દેશે વાથ ગૃહે શુભે ।
આઢ્યો વાથ દરિદ્રો વા સ્વકાં શક્તિમવઞ્ચયન્ ।
દ્રવ્યૈર્ન્યાયાર્જિતૈરેવ ભક્ત્યા દેવં સમર્ચ્ચયેત્ ॥ ૪૭॥

અથાન્યાયાર્જિતૈશ્ચાપિ ભક્ત્યા ચેચ્છિવમર્ચ્ચયેત્ ।
ન તસ્ય પ્રત્યવાયોઽસ્તિ ભાવવશ્યો યતઃ પ્રભુઃ ॥ ૪૮॥

ન્યાયાર્જિતૈરપિ દ્રવ્યૈરભક્ત્યા પૂજયેદ્યદિ ।
ન તત્ફલમવાપ્નોતિ ભક્તિરેવાત્ર કારણમ્ ॥ ૪૯॥

ભક્ત્યા વિત્તાનુસારેણ શિવમુદ્દિશ્ય યત્કૃતમ્ ।
અલ્પે મહતિ વા તુલ્યં ફલમાઢ્યદરિદ્રયોઃ ॥ ૫૦॥

ભક્ત્યા પ્રચોદિતઃ કુર્યાદલ્પવિત્તોઽપિ માનવઃ ।
મહાવિભવસારોઽપિ ન કુર્યાદ્ ભક્તિવર્જિતઃ ॥ ૫૧॥

સર્વસ્વમપિ યો દદ્યાચ્છિવે ભક્તિવિવર્જિતઃ ।
ન તેન ફલભાક્ સ સ્યાદ્ ભક્તિરેવાત્ર કારણમ્ ॥ ૫૨॥

ન તત્તપોભિરત્યુગ્રૈર્ન ચ સર્વૈર્મહામખૈઃ ।
ગચ્છેચ્છિવપુરં દિવ્યં મુક્ત્વા ભક્તિં શિવાત્મિકામ્ ॥ ૫૩॥

ગુહ્યાદ્ગુહ્યતરં કૃષ્ણ સર્વત્ર પરમેશ્વરે ।
શિવે ભક્તિર્ન સન્દેહસ્તયા યુક્તો વિમુચ્યતે ॥ ૫૪॥

શિવમન્ત્રજપો ધ્યાનં હોમો યજ્ઞસ્તપઃશ્રુતમ્ ।
દાનમધ્યયનં સર્વં ભાવાર્થં નાત્ર સંશયઃ ॥ ૫૫॥

ભાવહીનો નરઃ સર્વં કૃત્વાપિ ન વિમુચ્યતે ।
ભાવયુક્તઃ પુનઃ સર્વમકૃત્વાપિ વિમુચ્યતે ॥ ૫૬॥

ચાન્દ્રાયણસહસ્રૈશ્ચ પ્રાજાપત્યશતૈસ્તથા ।
માસોપવાસૈશ્ચાન્યૈશ્ચ શિવભક્તસ્ય કિં પુનઃ ॥ ૫૭॥

અભક્તા માનવાશ્ચાસ્મિંલ્લોકે ગિરિગુહાસુ ચ ।
તપન્તિ ચાલ્પભોગાર્થં ભક્તો ભાવેન મુચ્યતે ॥ ૫૮॥

સાત્ત્વિકં મુક્તિદં કર્મ સત્ત્વે વૈ યોગિનઃ સ્થિતાઃ ।
રાજસં સિદ્ધિદં કુર્યુઃ કર્મિણો રજસાવૃતાઃ ॥ ૫૯॥

અસુરા રાક્ષસાશ્ચૈવ તમોગુણસમન્વિતાઃ ।
ઐહિકાર્થં યજન્તીશં નરાશ્ચાન્યેઽપિ તાદૃશાઃ ॥ ૬૦॥

તામસં રાજસં વાપિ સાત્ત્વિકં ભાવમેવ ચ ।
આશ્રિત્ય ભક્ત્યા પૂજાદ્યં કુર્વન્ ભદ્રં સમશ્નુતે ॥ ૬૧॥

યતઃ પાપાર્ણવાત્ ત્રાતું ભક્તિર્નૌરિવ નિર્મિતા ।
તસ્માદ્ભક્ત્યુપપન્નસ્ય રજસા તમસા ચ કિમ્ ॥ ૬૨॥

અન્ત્યજો વાધમો વાપિ મૂર્ખો વા પતિતોઽપિ વા ।
શિવં પ્રપન્નશ્ચેત્ કૃષ્ણ પૂજ્યઃ સર્વસુરાસુરૈઃ ॥ ૬૩॥

તસ્માત્ સર્વપ્રયત્નેન ભક્ત્યૈવ શિવમર્ચયેત્ ।

અભુક્તાનાં ક્વચિદપિ ફલં નાસ્તિ યતસ્તતઃ ॥ ૬૪॥

વક્ષ્યામ્યતિરહસ્યં તે શૃણુ કૃષ્ણ વચો મમ ।
વેદૈઃ શાસ્ત્રૈર્વેદવિદ્ભિર્વિચાર્ય સુવિનિશ્ચિતમ્ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવશાસ્ત્રોક્તપૂજનવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૭.૨.૨૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૧૬. ષડ્વિંશોઽધ્યાયઃ । સાઙ્ગોપાઙ્ગપૂજાવિધાનવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
બ્રહ્મઘ્નો વા સુરાપો વા સ્તેયી વા ગુરુતલ્પગઃ ।
માતૃહા પિતૃહા વાપિ વીરહા ભ્રૂણહાપિ વા ॥ ૧॥

સમ્પૂજ્યામન્ત્રકં ભક્ત્યા શિવં પરમકારણમ્ ।
તૈસ્તૈઃ પાપૈઃ પ્રમુચ્યેત વર્ષૈર્દ્વાદશભિઃ ક્રમાત્ ॥ ૨॥

તસ્માત્ સર્વપ્રયત્નેન પતિતોઽપિ યજેત્ શિવમ્ ।
ભક્તશ્ચેન્નાપરઃ કશ્ચિદ્ભિક્ષાહારો જિતેદ્રિયઃ ॥ ૩॥

કૃત્વાપિ સુમહત્પાપં ભક્ત્યા પઞ્ચાક્ષરેણ તુ ।
પૂજયેદ્યદિ દેવેશં તસ્માત્પાપાત્પ્રમુચ્યતે ॥ ૪॥

અબ્ભક્ષા વાયુભક્ષાશ્ચ યે ચાન્યે વ્રતકર્શિતાઃ ।
તેષામેતૈર્વ્રતૈર્નાસ્તિ શિવલોકસમાગમઃ ॥ ૫॥

ભક્ત્યા પઞ્ચાક્ષરેણૈવ યઃ શિવં સકૃદર્ચયેત્ ।
સોઽપિ ગચ્છેચ્છિવસ્થાનં શિવમન્ત્રસ્ય ગૌરવાત્ ॥ ૬॥

તસ્માત્તપાંસિ યજ્ઞાશ્ચ સર્વે સર્વસ્વદક્ષિણાઃ ।
શિવમૂર્ત્યર્ચનસ્યૈતે કોટ્યંશેનાપિ નો સમાઃ ॥ ૭॥

બદ્ધો વાપ્યથ મુક્તો વા પાશાત્પઞ્ચાક્ષરેણ ચેત્ ।
પૂજયન્મુચ્યતે ભક્તો નાત્ર કાર્યા વિચારણા ॥ ૮॥

અરુદ્રો વા સરુદ્રો વા સૂક્તેન શિવમર્ચયેત્ ।

યઃ સકૃત્પતિતો વાપિ મૂઢો વા મુચ્યતે નરઃ ॥ ૯॥

ષડક્ષરેણ વા દેવં સૂક્તમન્ત્રેણ પૂજયેત્ ।
શિવભક્તો જિતક્રોધો હ્યલબ્ધો લબ્ધ એવ ચ ॥ ૧૦॥

અલબ્ધાલ્લબ્ધ એવાત્ર વિશિષ્ટો નાત્ર સંશયઃ ।
સબ્રહ્માઙ્ગેન વા તેન સહંસેન વિમુચ્યતે ॥ ૧૧॥

તસ્માન્નિત્યં શિવં ભક્ત્યા સૂક્તમન્ત્રેણ પૂજયેત્ ।
એકકાલં દ્વિકાલં વા ત્રિકાલં નિત્યમેવ વા ॥ ૧૨॥

યેઽર્ચયન્તિ મહાદેવં વિજ્ઞેયાસ્તે મહેશ્વરાઃ ।
જ્ઞાનેનાત્મસહાયેન નાર્ચિતો ભગવાન્ શિવઃ ॥ ૧૩॥

સ ચિરં સંસરત્યસ્મિન્ સંસારે દુઃખસાગરે ।
દુર્લભં પ્રાપ્ય માનુષ્યં મૂઢો નાર્ચયતે શિવમ્ ॥ ૧૪॥

નિષ્ફલં તસ્ય તજ્જન્મ મોક્ષાય ન ભવેદ્યતઃ ।
દુર્લભં પ્રાપ્ય માનુષ્યં યેઽર્ચયન્તિ પિનાકિનમ્ ॥ ૧૫॥

તેષાં હિ સફલં જન્મ કૃતાર્થાસ્તે નરોત્તમાઃ ।
ભવભક્તિપરા યે ચ ભવપ્રણતચેતસઃ ॥ ૧૬॥

ભવસંસ્મરણોદ્યુક્તા ન તે દુઃખસ્ય ભાગિનઃ ।
ભવનાનિ મનોજ્ઞાનિ વિભ્રમાભરણાઃ સ્ત્રિયઃ ॥ ૧૭॥

ધનં ચાતૃપ્તિપર્યન્તં શિવપૂજાવિધેઃ ફલમ્ ।
યે વાઞ્છન્તિ મહાભોગાન્ રાજ્યં ચ ત્રિદશાલયે ॥ ૧૮॥

તે વાઞ્છન્તિ સદાકાલં હરસ્ય ચરણામ્બુજમ્ ।
સૌભાગ્યં કાન્તિમદ્રૂપં સત્ત્વં ત્યાગાર્દ્રભાવતા ॥ ૧૯॥

શૌર્યં વૈ જગતિ ખ્યાતિઃ શિવમર્ચયતો ભવેત્ ।
તસ્માત્ સર્વં પરિત્યજ્ય શિવૈકાહિતમાનસઃ ॥ ૨૦॥

શિવપૂજાવિધિં કુર્યાદ્યદીચ્છેત્ શિવમાત્મનઃ ।
ત્વરિતં જીવિતં યાતિ ત્વરિતં યાતિ યૌવનમ્ ॥ ૨૧॥

ત્વરિતં વ્યાધિરભ્યેતિ તસ્માત્ પૂજ્યઃ પિનાકધૃક્ ।
યાવન્નાયાતિ મરણં યાવન્નાક્રમતે જરા ॥ ૨૨॥

યાવન્નેન્દ્રિયવૈકલ્યં તાવત્પૂજય શઙ્કરમ્ ।
ન શિવાર્ચનતુલ્યોઽસ્તિ ધર્મોઽન્યો ભુવનત્રયે ॥ ૨૩॥

ઇતિ વિજ્ઞાય યત્નેન પૂજનીયઃ સદાશિવઃ ।
દ્વારયાગં જ વનિકાં પરિવારબલિક્રિયામ્ ॥ ૨૪॥

નિત્યોત્સવં ચ કુર્વીત પ્રાસાદે યદિ પૂજયેત્ ।
હવિર્નિવેદનાદૂર્ધ્વં સ્વયં ચાનુચરોઽપિ વા ॥ ૨૫॥

પ્રાસાદપરિવારેભ્યો બલિં દદ્યાદ્યથાક્રમમ્ ।
નિર્ગમ્ય સહ વાદિત્રૈસ્તદાશાભિમુખઃ સ્થિતઃ ॥ ૨૬॥

પુષ્પં ધૂપં ચ દીપં ચ દદ્યાદન્નં જલૈઃ સહ ।
તતો દદ્યાત્ મહાપીઠે તિષ્ઠન્ બલિમુદઙ્મુખઃ ॥ ૨૭॥

તતો નિવેદિતં દેવે યત્તદન્નાદિકં પુરા ।
તત્સર્વં સાવશેષં વા ચણ્ડાય વિનિવેદયેત્ ॥ ૨૮॥

હુત્વા ચ વિધિવત્પશ્ચાત્પૂજાશેષં સમાપયેત્ ।
કૃત્વા પ્રયોગં વિધિવદ્યાવન્મન્ત્રં જપં તતઃ ॥ ૨૯॥

નિત્યોત્સવં પ્રકુર્વીત યથોક્તં શિવશાસને ।
વિપુલે તૈજસે પાત્રે રક્તપદ્મોપશોભિતે ॥ ૩૦॥

અસ્ત્રં પાશુપતં દિવ્યં તત્રાવાહ્ય સમર્ચયેત્ ।
શિરસ્યારોપ્ય તત્પાત્રં દ્વિજસ્યાલઙ્કૃતસ્ય ચ ॥ ૩૧॥

ન્યસ્તાસ્ત્રવપુષા તેન દીપ્તયષ્ટિધરસ્ય ચ ।
પ્રાસાદપરિવારેભ્યો બહિર્મઙ્ગલનિઃસ્વનૈઃ ॥ ૩૨॥

નૃત્યગેયાદિભિશ્ચૈવ સહ દીપધ્વજાદિભિઃ ।
પ્રદક્ષિણત્રયં કૃત્વા ન દ્રુતં ચાવિલમ્બિતમ્ ॥ ૩૩॥

મહાપીઠં સમાવૃત્ય ત્રિઃપ્રદક્ષિણયોગતઃ ।
પુનઃ પ્રવિષ્ટો દ્વારસ્થો યજમાનઃ કૃતાઞ્જલિઃ ।
આદાયાભ્યન્તરં નીત્વા હ્યસ્ત્રમુદ્વાસયેત્તતઃ ॥ ૩૪॥

પ્રદક્ષિણાદિકં કૃત્વા યથાપૂર્વોદિતં ક્રમાત્ ।
આદાય ચાષ્ટપુષ્પાણિ પૂજામથ સમાપયેત્ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે સાઙ્ગોપાઙ્ગપૂજાવિધાનવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૭.૨.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૭. સપ્તવિંશોઽધ્યાયઃ । અગ્નિકાર્યવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
અથાગ્નિકાર્યં વક્ષ્યામિ કુણ્ડે વા સ્થણ્ડિલેઽપિ વા ।
વેદ્યાં વા હ્યાયસે પાત્રે મૃણ્મયે વા નવે શુભે ॥ ૧॥

આધાયાગ્નિં વિધાનેન સંસ્કૃત્ય ચ તતઃ પરમ્ ।
તત્રારાધ્ય મહાદેવં હોમકર્મસમાચરેત્ ॥ ૨॥

કુણ્ડં દ્વિહસ્તમાનં વા હસ્તમાત્રમથાપિ વા ।
વૃત્તં વા ચતુરસ્રં વા કુર્યાદ્વેદિં ચ મણ્ડલમ્ ॥ ૩॥

કુણ્ડં વિસ્તારવન્નિમ્નં તન્મધ્યેઽષ્ટદલામ્બુજમ્ ।
ચતુરઙ્ગુલમુત્સેધં તસ્ય દ્વ્યઙ્ગુલમેવ વા ॥ ૪॥

વિતસ્તિદ્વિગુણોન્નત્યા નાભિમન્તઃ પ્રચક્ષતે ।
મધ્યે ચ મધ્યમાઙ્ગુલ્યા મધ્યમોત્તમપર્વણોઃ ॥ ૫॥

અઙ્ગુલૈઃ કથ્યતે સદ્ભિશ્ચતુર્વિંશતિભિઃ કરઃ ।
મેખલાનાં ત્રયં વાપિ દ્વયમેકમથાપિ વા ॥ ૬॥

યથાશોભં પ્રકુર્વીત શ્લક્ષ્ણમિષ્ટં મૃદા સ્થિરમ્ ।
અશ્વત્થપત્રવદ્યોનિં ગજાધરવદેવ વા ॥ ૭॥

ઝમેખલામધ્યતઃ કુર્યાત્ પશ્ચિમે દક્ષિણેઽપિ વા ।
શોભનામગ્રતઃ કિઞ્ચિન્નિમ્નામુન્મીલિકાં શનૈઃ ॥ ૮॥

અગ્રેણ કુણ્ડાભિમુખીં કિઞ્ચિદુત્સૃજ્ય મેખલામ્ ।
નોત્સેધનિયમો વેદ્યાઃ સા માર્દી વાથ સૈકતી ॥ ૯॥

મણ્ડલં ગોશકૃત્તોયૈર્માનં પાત્રસ્ય નોદિતમ્ ।
કુણ્ડં ચ મૃણ્મયં વેદિમાલિમ્પેદ્ ગોમયામ્બુના ॥ ૧૦॥

પ્રક્ષાલ્ય તાપયેત્પાત્રં પ્રોક્ષયેદન્યદમ્ભસા ।
સ્વસૂત્રોક્તપ્રકારેણ કુણ્ડાદૌ વિલિખેત્તતઃ ॥ ૧૧॥

સમ્પ્રોક્ષ્ય કલ્પયેદ્દર્ભૈઃ પુષ્પૈર્વા વહ્નિવિષ્ટરમ્ ।
અર્ચનાર્થં ચ હોમાર્થં સર્વદ્રવ્યાણિ સાધયેત્ ॥ ૧૨॥

પ્રક્ષાલ્ય ક્ષાલનીયાનિ પ્રોક્ષણ્યા પ્રોક્ષ્ય શોધયેત્ ।
મણિજં કાષ્ઠજં વાથ શ્રોત્રિયાગારસમ્ભવમ્ ॥ ૧૩॥

અન્યં વાભ્યર્હિતં વહ્નિં તતઃ સાધારમાનયેત્ ।
ત્રિઃપ્રદક્ષિણમાવૃત્ય કુણ્ડાદેરુપરિ ક્રમાત્ ॥ ૧૪॥

બહ્નિબીજં સમુચ્ચાર્ય ત્વાદધીતાગ્નિમાસને ।
યોનિમાર્ગેણ વા તદ્વદાત્મનઃ સમ્મુખેન વા ॥ ૧૫॥

યોનિપ્રદેશગઃ સર્વં કુણ્ડં કુર્યાદ્વિચક્ષણઃ ।
સ્વનાભ્યન્તઃસ્થિતં વહ્નિં તદ્રન્ધ્રાદ્વિસ્ફુલિઙ્ગવત્ ॥ ૧૬॥

નિર્ગમ્ય પાવકે બાહ્યે લીનં બિમ્બાકૃતિં સ્મરેત્ ।
આજ્યસંસ્કારપર્યન્તમન્વાધાનપુરઃસરમ્ ॥ ૧૭॥

સ્વસૂત્રોક્તક્રમાત્કુર્યાત્ મૂલમન્ત્રેણ મન્ત્રવિત્ ।
શિવમૂર્તિં સમભ્યર્ચ્ય તતો દક્ષિણપાર્શ્વતઃ ॥ ૧૮॥

ન્યસ્ય મન્ત્રં ધૃતે મુદ્રાં દર્શયેદ્ધેનુસંજ્ઞિતામ્ ।
સ્રુક્સ્રુવૌ તૈજસૌ ગ્રાહ્યૌ ન કાંસ્યાયસસૈસકૌ ॥ ૧૯॥

યજ્ઞદારુમયૌ વાપિ સ્માર્તૌ વા શિલ્પસમ્મતૌ ।
પર્ણે વા બ્રહ્મવૃક્ષાદેરચ્છિદ્રે મધ્ય ઉત્થિતે ॥ ૨૦॥

સમ્મૃજ્ય દર્ભૈસ્તૌ વહ્નૌ સન્તાપ્ય પ્રોક્ષયેત્પુનઃ ।
પરિષિચ્ય સ્વસૂત્રોક્તક્રમેણ શિવપૂર્વકૈઃ ॥ ૨૧॥

જુહુયાદષ્ટભિર્બીજૈરગ્નિસંસ્કારસિદ્ધયે ।
ભ્રું સ્તું બ્રું શ્રું ક્રમેણૈવ પું ડ્રું દ્રું ઇત્યતઃ પરમ્ ॥ ૨૨॥

બીજાનિ સપ્ત સપ્તાનાં જિહ્વાનામનુપૂર્વશઃ ।
ત્રિશિખા મધ્યમા જિહ્વા બહુરૂપસમાહ્વયા ॥ ૨૩॥

તસ્યાઃ શિખા દક્ષિણતો જ્વલન્તી વામતઃ પરા ।
હિરણ્યા પ્રાગુદગ્જિહ્વા કનકા પૂર્વતઃ સ્થિતા ॥ ૨૪॥

રક્તાગ્નેયી નૈરૃતી ચ કૃષ્ણાન્યા સુપ્રભા મતા ।
અતિરિક્તા મરુજ્જિહ્વા સ્વનામાનુગુણપ્રભા ॥ ૨૫॥

સ્વબીજાનન્તરં વાચ્યા સ્વાહાન્તઞ્ચ યથાક્રમમ્ ।
જિહ્વામન્ત્રૈસ્તુ હુત્વાજ્યં જિહ્વાસ્ત્વૈકૈકશઃ ક્રમાત્ ॥ ૨૬॥

રં વહ્નયેતિ સ્વાહેતિ મધ્યે હુત્વાહુતિત્રયમ્ ।
સર્પિષા વા સમિદ્ભિર્વા પરિષેચનમાચરેત્ ॥ ૨૭॥

એવં કૃતે શિવાગ્નિઃ સ્યાત્સ્મરેત્તત્ર શિવાસનમ્ ।
તત્રાવાહ્ય યજેદ્દેવમર્ધનારીશ્વરં શિવમ્ ।
દીપાન્તં પરિષિચ્યાથ સમિદ્ધોમં સમાચરેત્ ॥ ૨૮॥

તાઃ પાલાશ્યઃ પરા વાપિ યજ્ઞિયા દ્વાદશાઙ્ગુલાઃ ।
અવક્રા ન સ્વયં શુષ્કાઃ સત્વચો નિર્વ્રણાઃ સમાઃ ॥ ૨૯॥

દશાઙ્ગુલા વા વિહિતાઃ કનિષ્ઠાઙ્ગુલિસમ્મિતાઃ ।
પ્રાદેશમાત્રા વાલાભે હોતવ્યાઃ સકલા અપિ ॥ ૩૦॥

દૂર્વાપત્રસમાકારાં ચતુરઙ્ગુલમાયતામ્ ।
દદ્યાદાજ્યાહુતિં પશ્ચાદન્નમક્ષપ્રમાણતઃ ॥ ૩૧॥

લાજાંસ્તથા સર્ષપાંશ્ચ યવાંશ્ચૈવ તિલાંસ્તથા ।
સર્પિષાક્તાનિ ભક્ષ્યાણિ લેહ્યચોષ્યાણિ સમ્ભવે ॥ ૩૨॥

દશૈવાહુતયસ્તત્ર પઞ્ચ વા ત્રિતયં ચ વા ।
હોતવ્યાઃ શક્તિતો દદ્યાદેકમેવાથ વાહુતિમ્ ॥ ૩૩॥

સ્રુવેણાજ્યં સમિત્યાદ્યાસ્રુચા શેષાત્કરેણ વા ।
તત્ર દિવ્યેન હોતવ્યં તીર્થેનાર્ષેણ વા તથા ॥ ૩૪॥

દ્રવ્યેણૈકેન વાલાભે જુહુયાત્ શ્રદ્ધયા પુનઃ ।
પ્રાયશ્ચિત્તાય જુહુયાન્મન્ત્રયિત્વાહુતિત્રયમ્ ॥ ૩૫॥

તતો હોમાવશિષ્ટેન ઘૃતેનાપૂર્ય વૈ સ્રુચમ્ ।
નિધાય પુષ્પં તસ્યાગ્રે સ્રુવેણાધોમુખેન તામ્ ॥ ૩૬॥

સદર્ભેન સમાચ્છાદ્ય મૂલેનાઞ્જલિનોત્થિતઃ ।
વૌષડન્તેન જુહુયાદ્ધારાં તુ યવસમ્મિતામ્ ॥ ૩૭॥

ઇત્થં પૂર્ણાહુતિં કૃત્વા પરિષિઞ્ચેચ્ચ પૂર્વવત્ ।
તત ઉદ્વાસ્ય દેવેશં ગોપયેત્તુ હુતાશનમ્ ॥ ૩૮॥

તમપ્યુદ્વાસ્ય વા નાભૌ યજેત્સન્ધાય નિત્યશઃ ।
અથવા વહ્નિમાનીય શિવશાસ્ત્રોક્તવર્ત્મના ॥ ૩૯॥

વાગીશીગર્ભસમ્ભૂતં સંસ્કૃત્ય વિધિવદ્યજેત્ ।
અન્વાધાનં પુનઃ કૃત્વા પરિધીન્ પરિધાય ચ ॥ ૪૦॥

પાત્રાણિ દ્વન્દ્વરૂપેણ નિક્ષિપ્યેષ્ટ્વા શિવં તતઃ ।
સંશોધ્ય પ્રોક્ષણીપાત્રં પ્રોક્ષ્ય તાનિ તદમ્ભસા ॥ ૪૧॥

પ્રણીતાપાત્રમૈશાન્યાં વિન્યસ્યાપૂરિતં જલૈઃ ।
આજ્યસંસ્કારપર્યન્તં કૃત્વા સંશોધ્ય સ્રુક્સ્રુવૌ ॥ ૪૨॥

ગર્ભાધાનં પુંસવનં સીમન્તોન્નયનં તતઃ ।
કૃત્વા પૃથક્ પૃથગ્ઘુત્વા જાતમગ્નિં વિચિન્તયેત્ ॥ ૪૩॥

ત્રિપાદં સપ્તહસ્તં ચ ચતુઃશ‌ૃઙ્ગં દ્વિશીર્ષકમ્ ।
મધુપિઙ્ગં ત્રિનયનં સકપર્દેન્દુશેખરમ્ ॥ ૪૪॥

રક્તં રક્તામ્બરાલેપં માલ્યભૂષનભૂષિતમ્ ।
સર્વલક્ષણસમ્પન્નં સોપવીતં ત્રિમેખલમ્ ॥ ૪૫॥

શક્તિમન્તં સ્રુક્સ્રુવૌ ચ દધાનં દક્ષિણે કરે ।
તોમરં તાલવૃન્તં ચ ઘૃતપાત્રં તથેતરૈઃ ॥ ૪૬॥

જાતં ધ્યાત્વૈવમાકારં જાતકર્મ સમાચરેત્ ।
નાલાપનયનં કૃત્વા તતઃ સંશોધ્ય સૂતકમ્ ॥ ૪૭॥

શિવાગ્નિરુચિનામાસ્ય કૃત્વાહુતિપુરઃસરમ્ ।
પિત્રોર્વિસર્જનં કૃત્વા ચૌલોપનયનાદિકમ્ ॥ ૪૮॥

આપ્તોર્યામાવસાનાન્તં કૃત્વા સંસ્કારમસ્ય તુ ।
આજ્યધારાદિહોમં ચ કૃત્વા સ્વિષ્ટકૃતં તતઃ ॥ ૪૯॥

રમિત્યનેન બીજેન પરિષિઞ્ચેત્તતઃ પરમ્ ।
બ્રહ્મવિષ્ણુશિવેશાનાં લોકેશાનાં તથૈવ ચ ॥ ૫૦॥

તદસ્ત્રાણાં ચ પરિતઃ કૃત્વા પૂજાં યથાક્રમમ્ ।
ધૂપદીપાદિસિદ્ધ્યર્થં વહ્નિમુદ્ધૃત્ય કૃત્યવિત્ ॥ ૫૧॥

સાધયિત્વાજ્યપૂર્વાણિ દ્રવ્યાણિ પુનરેવ ચ ।
કલ્પયિત્વાસનં વહ્નૌ તત્રાવાહ્ય યથાપુરા ॥ ૫૨॥

સમ્પૂજ્ય દેવં દેવીં ચ તતઃ પૂર્ણાન્તમાચરેત્ ।
અથવા સ્વાશ્રમોક્તં તુ વહ્નિકર્મ શિવાર્પણમ્ ॥ ૫૩॥

બુદ્ધ્વા શિવાશ્રમી કુર્યાન્ન ચ તત્રાપરો વિધિઃ ।
શિવાગ્નેર્ભસ્મ સઙ્ગ્રાહ્યમગ્નિહોત્રોદ્ભવં તુ વા ॥ ૫૪॥

વૈવાહાગ્નિભવં વાપિ પક્વં શુચિ સુગન્ધિ ચ ।
કપિલાયાઃ શકૃચ્છસ્તં ગૃહીતં ગગને પતત્ ॥ ૫૫॥

ન ક્લિન્નં નાતિકઠિનં ન દુર્ગન્ધં ન શોષિતમ્ ।
ઉપર્યધઃ પરિત્યજ્ય ગૃહ્ણીયાત્પતિતં યદિ ॥ ૫૬॥

પિણ્ડીકૃત્ય શિવાગ્ન્યાદૌ તત્ક્ષિપેન્મૂલમન્ત્રતઃ ।
અપક્વમતિપક્વં ચ સન્ત્યજ્ય ભસિતં સિતમ્ ॥ ૫૭॥

આદાય વા સમાલોડ્ય ભસ્માધારે વિનિઃક્ષિપેત્ ।
તૈજસં દારવં વાપિ મૃણ્મયં શૈલમેવ ચ ॥ ૫૮॥

અન્યદ્વા શોભનં શુદ્ધં ભસ્માધારં પ્રકલ્પયેત્ ।
સમે દેશે શુભે શુદ્ધે ધનવદ્ભસ્મ નિઃક્ષિપેત્ ॥ ૫૯॥

પ્રસ્થિતો ભસ્મ ગૃહ્ણીયાત્ સ્વયં ચાનુચરોઽપિ વા ।
ન ચાયુક્તકરે દદ્યાન્નૈવાશુચિતલે ક્ષિપેત્ ।
ન સંસ્પૃશેચ્ચ નીચાઙ્ગૈર્નોપેક્ષેત ન લઙ્ઘયેત્ ॥ ૬૦॥

તસ્માદ્ભસિતમાદાય વિનિયુઞ્જીત મન્ત્રતઃ ।
કાલેષૂક્તેષુ નાન્યત્ર નાયોગ્યેભ્યઃ પ્રદાપયેત્ ॥ ૬૧॥

ભસ્મસઙ્ગ્રહણં કુર્યાદ્દેવેઽનુદ્વાસિતે સતિ ।
ઉદ્વાસને કૃતે યસ્માચ્ચણ્ડભસ્મ પ્રજાયતે ॥ ૬૨॥

અગ્નિકાર્યે કૃતે પશ્ચાત્ શિવશાસ્ત્રોક્તમાર્ગતઃ ।
સ્વસૂત્રોક્તપ્રકારાદ્વા બલિકર્મ સમાચરેત્ ॥ ૬૩॥

અથ વિદ્યાસનં ન્યસ્ય સુપ્રલિપ્તે તુ મણ્ડલે ।
વિદ્યાકોશં પ્રતિષ્ઠાપ્ય યજેત્પુષ્પાદિભિઃ ક્રમાત્ ॥ ૬૪॥

વિદ્યાયાઃ પુરતઃ કૃત્વા ગુરોરપિ ચ મણ્ડલમ્ ।
તત્રાસનવરં કૃત્વા પુષ્પાદ્યૈર્ગુરુમર્ચયેત્ ॥ ૬૫॥

તતોऽનુપૂજયેત્ પૂજ્યાન્ ભોજયેચ્ચ બુભુક્ષિતાન્ ।
તતઃ સ્વયં ચ ભુઞ્જીત શુદ્ધમન્નં યથાસુખમ્ ॥ ૬૬॥

નિવેદિતં ચ વા દેવે તચ્છેષં ચાત્મશુદ્ધયે ।
શ્રદ્ધાનો ન લોભેન ન ચણ્ડાય સમર્પિતમ્ ॥ ૬૭॥

ગન્ધમાલ્યાદિ યચ્ચાન્યત્તત્રાપ્યેષ સમો વિધિઃ ।
ન તુ તત્ર શિવોऽસ્મીતિ બુદ્ધિં કુર્યાદ્વિચક્ષણઃ ॥ ૬૮॥

ભુક્ત્વાચમ્ય શિવં ધ્યાત્વા હૃદયે મૂલમુચ્ચરેત્ ।
કાલશેષં નયેદ્યોગ્યૈઃ શિવશાસ્ત્રકથાદિભિઃ ॥ ૬૯॥

રાત્રૌ વ્યતીતે પૂર્વાંશે કૃત્વા પૂજાં મનોહરામ્ ।
શિવયોઃ શયનં ત્વેકં કલ્પયેદતિશોભનમ્ ॥ ૭૦॥

ભક્ષ્યભોજ્યામ્બરાલેપપુષ્પમાલાદિકં તથા ।
મનસા કર્મણા વાપિ કૃત્વા સર્વં મનોહરમ્ ॥ ૭૧॥

તતો દેવસ્ય દેવ્યાશ્ચ પાદમૂલે શુચિઃ સ્વપેત્ ।
ગૃહસ્થો ભાર્યયા સાર્દ્ધં તદન્યેऽપિ તુ કેવલાઃ ॥ ૭૨॥

પ્રત્યૂષસમયં બુદ્ધ્વા મન્ત્રમાદ્યમુદીરયેત્ ।
પ્રણમ્ય મનસા દેવં સામ્બં સગણમવ્યયમ્ ॥ ૭૩॥

દેશકાલોચિતં કૃત્વા શૌચાદ્યમપિ શક્તિતઃ ।
શઙ્ખાદિનિનદૈર્દિવ્યૈર્દેવં દેવીં ચ બોધયેત્ ॥ ૭૪॥

તતસ્તત્સમયોન્નિદ્રૈઃ પુષ્પૈરતિસુગન્ધિભિઃ ।
નિર્વર્ત્ય શિવયોઃ પૂજાં પ્રારભેત પુરોદિતમ્ ॥ ૭૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે અગ્નિકાર્યવર્ણનં નામ સપ્તવિંશોऽધ્યાયઃ ॥ ૭.૨.૨૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

# ૭.૨.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । નિત્યનૈમિત્તિકવિધિવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ શિવાશ્રમનિષેવિણામ્ ।
શિવશાસ્ત્રોક્તમાર્ગેણ નૈમિત્તિકવિધિક્રમમ્ ॥ ૧॥

સર્વેષ્વપિ ચ માસેષુ પક્ષયોરુભયોરપિ ।
અષ્ટમ્યાં ચ ચતુર્દશ્યાં તથા પર્વણિ ચ ક્રમાત્ ॥ ૨॥

અયને વિષુવે ચૈવ ગ્રહણેષુ વિશેષતઃ ।
કર્તવ્યા મહતી પૂજા હ્યધિકા વાપિ શક્તિતઃ ॥ ૩॥

માસિ માસિ યથાન્યાયં બ્રહ્મકૂર્ચં પ્રસાધ્ય તુ ।
સ્નાપયિત્વા શિવં તેન પિબેચ્છેષમુપોષિતઃ ॥ ૪॥

બ્રહ્મહત્યાદિદોષાણામતીવ મહતામપિ ।
નિષ્કૃતિર્બ્રહ્મકૂર્ચસ્ય પાનાન્નાન્યા વિશિષ્યતે ॥ ૫॥

પૌષે તુ પુષ્યનક્ષત્રે કુર્યાન્નીરાજનં વિભોઃ ।
માઘે મઘાખ્યે નક્ષત્રે પ્રદદ્યાદ્ ઘૃતકમ્બલમ્ ॥ ૬॥

ફાલ્ગુને ચોત્તરાન્તે વૈ પ્રારભેત મહોત્સવમ્ ।
ચૈત્રે ચિત્રાપૌર્ણમાસ્યાં દોલાં કુર્યાદ્યથાવિધિ ॥ ૭॥

વૈશાખ્યાં તુ વિશાખાયાં કુર્યાત્પુષ્પમહાલયમ્ ।
જ્યેષ્ઠે મૂલાખ્યનક્ષત્રે શીતકુમ્ભં પ્રદાપયેત્ ॥ ૮॥

આષાઢે ચોત્તરાષાઢે પવિત્રારોપણં તથા ।
શ્રાવણે પ્રાકૃતાન્યાપિ મણ્ડલાનિ પ્રકલ્પયેત્ ॥ ૯॥

શ્રવિષ્ઠાખ્યે તુ નક્ષત્રે પ્રૌષ્ઠપદ્યાં તતઃ પરમ્ ।
પ્રોક્ષયેચ્ચ જલક્રીડાં પૂર્વાષાઢાશ્રયે દિને ॥ ૧૦॥

આશ્વયુજ્યાં તતો દદ્યાત્પાયસં ચ નવૌદનમ્ ।
અગ્નિકાર્યં ચ તેનૈવ કુર્યાત્ શતભિષગ્દિને ॥ ૧૧॥

કાર્તિક્યાં કૃતિકાયોગે દદ્યાદ્દીપસહસ્રકમ્ ।
માર્ગશીર્ષે તથાર્દ્રાયાં ઘૃતેન સ્નાપયેત્ શિવમ્ ॥ ૧૨॥

અશક્તસ્તેષુ કાલેષુ કુર્યાદુત્સવમેવ વા ।
આસ્થાનં વા મહાપૂજામધિકં વા સમર્ચનમ્ ॥ ૧૩॥

આવૃત્તેઽપિ ચ કલ્યાણે પ્રશસ્તેષ્વપિ કર્મસુ ।
દૌર્મનસ્યે દુરાચારે દુઃસ્વપ્ને દુષ્ટદર્શને ॥ ૧૪॥

ઉત્પાતે વાશુભેઽન્યસ્મિન્ રોગે વા પ્રબલેઽથવા ।
સ્નાનપૂજાજપધ્યાનહોમદાનાદિકાઃ ક્રિયઃ ॥ ૧૫॥

નિમિત્તાનુગુણાઃ કાર્યાઃ પુરશ્ચરણપૂર્વિકાઃ ।
શિવાનલે ચ વિહતે પુનઃ સન્ધાનમાચરેત્ ॥ ૧૬॥

ય એવં શર્વધર્મિષ્ઠો વર્તતે નિત્યમુદ્યતઃ ।
તસ્યૈકજન્મના મુક્તિં પ્રયચ્છતિ મહેશ્વરઃ ॥ ૧૭॥

એતદ્યથોત્તરં કુર્યાત્ નિત્યનૈમિત્તિકેષુ યઃ ।
દિવ્યં શ્રીકણ્ઠનાથસ્ય સ્થાનમાદ્યં સ ગચ્છતિ ॥ ૧૮॥

તત્ર ભુક્ત્વા મહાભોગાન્ કલ્પકોટિશતં નરઃ ।
કાલાન્તરે ચ્યુતસ્તસ્માદૌમં કૌમારમેવ ચ ॥ ૧૯॥

સમ્પ્રાપ્ય વૈષ્ણવં બ્રાહ્મં રુદ્રલોકં વિશેષતઃ ।
તત્રોષિત્વા ચિરં કાલં ભુક્ત્વા ભોગાન્યથોદિતાન્ ॥ ૨૦॥

પુનશ્ચોર્ધ્વં ગતસ્તસ્માદતીત્ય સ્થાનપઞ્ચકમ્ ।
શ્રીકણ્ઠાજ્જ્ઞાનમાસાદ્ય તસ્માત્ શૈવપુરં વ્રજેત્ ॥ ૨૧॥

અર્દ્ધચર્યારતશ્ચાપિ દ્વિરાવૃત્ત્યૈવમેવ તુ ।
પશ્ચાજ્જ્ઞાનં સમાસાદ્ય શિવસાયુજ્યમાપ્નુયાત્ ॥ ૨૨॥

અર્દ્ધાર્દ્ધચરિતો યસ્તુ દેહી દેહક્ષયાત્પરમ્ ।
અણ્ડાન્તં વોર્ધ્વમવ્યક્તમતીત્ય ભુવનદ્વયમ્ ॥ ૨૩॥

સમ્પ્રાપ્ય પૌરુષં રૌદ્રસ્થાનમદ્રીન્દ્રજાપતેઃ ।
અનેકયુગસાહસ્રં ભુક્ત્વા ભોગાનનેકધા ॥ ૨૪॥

પુણ્યક્ષયે ક્ષિતિં પ્રાપ્ય કુલે મહતિ જાયતે ।
તત્રાપિ પૂર્વસંસ્કારવશેન સ મહાદ્યુતિઃ ॥ ૨૫॥

પશુધર્માન્ પરિત્યજ્ય શિવધર્મરતો ભવેત્ ।
તદ્ધર્મગૌરવાદેવ ધ્યાત્વા શિવપુરં વ્રજેત્ ॥ ૨૬॥

ભોગાંશ્ચ વિવિધાન્ ભુક્ત્વા વિદ્યેશ્વરપદં વ્રજેત્ ।

તત્ર વિદ્યેશ્વરૈઃસાર્દ્ધં ભુક્ત્વા ભોગાન્ બહૂન્ ક્રમાત્ ॥ ૨૭॥

અણ્ડસ્યાન્તર્બહિર્વાથ સકૃદાવર્તતે પુનઃ ।
તતો લબ્ધ્વા શિવજ્ઞાનં પરાં ભક્તિમવાપ્ય ચ ॥ ૨૮॥

શિવસાધર્મ્યમાસાદ્ય ન ભૂયો વિનિવર્તતે ।
યશ્ચાતીવ શિવે ભક્તો વિષયાસક્તચિત્તવત્ ॥ ૨૯॥

શિવધર્માનસૌ કુર્વન્નકુર્વન્ વાપિ મુચ્યતે ।
એકાવૃત્તો દ્વિરાવૃત્તસ્ત્રિરાવૃત્તો નિવર્તકઃ ॥ ૩૦॥

ન પુનશ્ચક્રવર્તી સ્યાત્ શિવધર્માધિકારવાન્ ।
તસ્માત્ શિવાશ્રિતો ભૂત્વા યેન કેનાપિ હેતુના ॥ ૩૧॥

શિવધર્મે મતિં કુર્યાત્ શ્રેયસે ચેત્કૃતોદ્યમઃ ।
નાત્ર નિર્બન્ધયિષ્યામો વયં કઞ્ચન કેનચિત્ ॥ ૩૨॥

નિર્બન્ધેભ્યોઽતિવાદેભ્યઃ પ્રકૃત્યૈતન્ન રોચતે ।
રોચતે વા પરેભ્યસ્તુ પુણ્યસંસ્કારગૌરવાત્ ॥ ૩૩॥

સંસારકારણં યેષાં ન પ્રરોઢુમલં ભવેત્ ।
પ્રકૃત્યનુગુણં તસ્માદ્વિમૃશ્યૈતદશેષતઃ ॥ ૩૪॥

શિવધર્મેઽધિકુર્વીત યદીચ્છેચ્છિવમાત્મનઃ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે નિત્યનૈમિત્તિકવિધિવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૭.૨.૨૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૨૯. એકોનત્રિંશત્તમોઽધ્યાયઃ । કામ્યકર્મવર્ણનમ્ ।

શ્રીકૃષ્ણ ઉવાચ ।
ભગવંસ્ત્વન્મુખાદેવ શ્રુતં શ્રુતિસમં મયા ।
સ્વાશ્રિતાનાં શિવપ્રોક્તં નિત્યનૈમિત્તિકં તથા ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ શિવધર્માધિકારિણામ્ ।
કામ્યમપ્યસ્તિ ચેત્કર્મ વક્તુમર્હસિ સામ્પ્રતમ્ ॥ ૨॥

ઉપમન્યુરુવાચ ।
અસ્ત્યૈહિકફલં કિઞ્ચિદામુષ્મિકફલં તથા ।
ઐહિકામુષ્મિકઞ્ચાપિ તચ્ચ પઞ્ચવિધં પુનઃ ॥ ૩॥

કિઞ્ચિત્ ક્રિયામયં કર્મ કિઞ્ચિત્ કર્મ તપોમયમ્ ॥ ૪॥

જપધ્યાનમયં કિઞ્ચિત્ કિઞ્ચિત્ સર્વમયં તથા ।
ક્રિયામયં તથા ભિન્નં હોમદાનાર્ચનક્રમાત્ ॥ ૫॥

સર્વશક્તિમતામેવ નાન્યેષાં સફલં ભવેત્ ।
શક્તિશ્ચાજ્ઞા મહેશસ્ય શિવસ્ય પરમાત્મનઃ ॥ ૬॥

તસ્માત્ કામ્યાનિ કર્માણિ કુર્યાદાજ્ઞાધરો દ્વિજઃ ।
અથ વક્ષ્યામિ કામ્યં હિ ચેહામુત્ર ફલપ્રદમ્ ॥ ૭॥

શૈવૈર્માહેશ્વરૈશ્ચૈવ કાર્યમન્તર્બહિઃ ક્રમાત્ ।
શિવો મહેશ્વરશ્ચેતિ નાત્યન્તમિહ ભિદ્યતે ॥ ૮॥

યથા તથા ન ભિદ્યન્તે શૈવા માહેશ્વરા અપિ ।
શિવાશ્રિતા હિ તે શૈવા જ્ઞાનયજ્ઞરતા નરાઃ ॥ ૯॥

માહેશ્વરાઃ સમાખ્યાતાઃ કર્મયજ્ઞરતા ભુવિ ।
તસ્માદાભ્યન્તરે કુર્યુઃ શૈવા માહેશ્વરા બહિઃ ॥ ૧૦॥

ન તુ પ્રયોગો ભિદ્યેત વક્ષ્યમાણસ્ય કર્મણઃ ।
પરીક્ષ્ય ભૂમિં વિધિવદ્ ગન્ધવર્ણરસાદિભિઃ ॥ ૧૧॥

મનોઽભિલષિતે તત્ર વિતાનવિતતામ્બરે ।
સુપ્રલિપ્તે મહીપૃષ્ઠે દર્પણોદરસન્નિભે ॥ ૧૨॥

પ્રાચીમુત્પાદયેત્પૂર્વં શાસ્ત્રદૃષ્ટેન વર્ત્મના ।
એકહસ્તં દ્વિહસ્તં વા મણ્ડલં પરિકલ્પયેત્ ॥ ૧૩॥

આલિખેદ્વિમલં પદ્મમષ્ટપત્રં સકર્ણિકમ્ ।
રત્નહેમાદિભિશ્ચૂર્ણૈર્યથાસમ્ભવસમ્ભૃતૈઃ ॥ ૧૪॥

પઞ્ચાવરણસંયુક્તં બહુશોભાસમન્વિતમ્ ।
દલેષુ સિદ્ધયઃ કલ્પ્યાઃ કેસરેષુ સશક્તિકાઃ ॥ ૧૫॥

રુદ્રા વામાદયસ્ત્વષ્ટૌ પૂર્વાદિદલતઃ ક્રમાત્ ।
કર્ણિકાયાં ચ વૈરાગ્યં બીજેષુ નવ શક્તયઃ ॥ ૧૬॥

સ્કન્દે શિવાત્મકો ધર્મો નાલે જ્ઞાનં શિવાશ્રયમ્ ।
કર્ણિકોપરિ ચાગ્નેયં મણ્ડલં સૌરમૈન્દવમ્ ॥ ૧૭॥

શિવવિદ્યાત્મતત્ત્વાખ્યં તત્ત્વત્રયમતઃ પરમ્ ।
સર્વાસનોપરિ સુખં વિચિત્રકુસુમાન્વિતમ્ ॥ ૧૮॥

પઞ્ચાવરણસંયુક્તં પૂજયેદમ્બયા સહ ।
શુદ્ધસ્ફટિકસઙ્કાશં પ્રસન્નં શીતલદ્યુતિમ્ ॥ ૧૯॥

વિદ્યુદ્વલયસઙ્કાશજટામુકુટભૂષિતમ્ ।
શાર્દૂલચર્મવસનં કિઞ્ચિત્સ્મિતમુખામ્બુજમ્ ॥ ૨૦॥

રક્તપદ્મદલપ્રખ્યપાદપાણિતલાધરમ્ ।
સર્વલક્ષણસમ્પન્નં સર્વાભરણભૂષિતમ્ ॥ ૨૧॥

દિવ્યાયુધવરૈર્યુક્તં દિવ્યગન્ધાનુલેપનમ્ ।
પઞ્ચવક્ત્રં દશભુજં ચન્દ્રખણ્ડશિખામણિમ્ ॥ ૨૨॥

અસ્ય પૂર્વમુખં સૌમ્યં બાલાર્કસદૃશપ્રભમ્ ।
ત્રિલોચનારવિન્દાઢ્યં કૃતબાલેન્દુશેખરમ્ ॥ ૨૩॥

દક્ષિણં નીલજીમૂતસમાનરુચિરપ્રભમ્ ।
ભ્રુકુટીકુટિલં ઘોરં રક્તવૃત્તેક્ષણત્રયમ્ ॥ ૨૪॥

દંષ્ટ્રાકરાલં દુર્દ્ધર્ષં સ્ફુરિતાધરપલ્લવમ્ ।
ઉત્તરં વિદ્રુમપ્રખ્યં નીલાલકવિભૂષિતમ્ ॥ ૨૫॥

સવિલાસં ત્રિનયનં ચન્દ્રાભરણશેખરમ્ ।
પશ્ચિમં પૂર્ણચન્દ્રાભં લોચનત્રિતયોજ્જ્વલમ્ ॥ ૨૬॥

ચન્દ્રરેખાધરં સૌમ્યં મન્દસ્મિતમનોહરમ્ ।
પઞ્ચમં સ્ફટિકપ્રખ્યમિન્દુરેખાસમુજ્જ્વલમ્ ॥ ૨૭॥

અતીવ સૌમ્યમુત્ફુલ્લલોચનત્રિતયોજ્જ્વલમ્ ।
દક્ષિણે શૂલપરશુવજ્રખડ્ગાનલોજ્જ્વલમ્ ॥ ૨૮॥

સવ્યે ચ નાગનારાચઘણ્ટાપાશાઙ્કુશોજ્જ્વલમ્ ।
નિવૃત્ત્યા જાનુસમ્બદ્ધમાનાભેશ્ચ પ્રતિષ્ઠયા ॥ ૨૯॥

આકણ્ઠં વિદ્યયા તદ્વદાલલાટં તુ શાન્તયા ।

તદૂર્ધ્વં શાન્ત્યતીતાખ્યકલયા પરયા તથા ॥ ૩૦॥

પઞ્ચાધ્વવ્યાપિનં સાક્ષાત્કલાપઞ્ચકવિગ્રહમ્ ।
ઈશાનમુકુટં દેવં પુરુષાખ્યં પુરાતનમ્ ॥ ૩૧॥

અઘોરહૃદયં તદ્વદ્વામગુહ્યં મહેશ્વરમ્ ।
સદ્યપાદં ચ તન્મૂર્તિમષ્ટત્રિંશત્કલામયમ્ ॥ ૩૨॥

માતૃકામયમીશાનં પઞ્ચબ્રહ્મમયં તથા ।
ૐ કારાખ્યમયં ચૈવ હંસશક્ત્યા સમન્વિતમ્ ॥ ૩૩॥

તથેચ્છાત્મિકયા શક્ત્યા સમારૂઢાઙ્કમણ્ડલમ્ ।
જ્ઞાનાખ્યયા દક્ષિણતો વામતશ્ચ ક્રિયાખ્યયા ॥ ૩૪॥

તત્ત્વત્રયમયં સાક્ષાદ્વિદ્યામૂર્તિં સદાશિવમ્ ।
મૂર્તિં મૂલેન સઙ્કલ્પ્ય સકલીકૃત્ય ચ ક્રમાત્ ॥ ૩૫॥

સમ્પૂજ્ય ચ યથાન્યાયમર્ઘાન્તં મૂલવિદ્યયા ।
મૂર્તિમન્તં શિવં સાક્ષાચ્છક્ત્યા પરમયા સહ ॥ ૩૬॥

તત્રાવાહ્ય મહાદેવં સદસદ્વ્યક્તિવર્જિતમ્ ।
પઞ્ચોપકરણં કૃત્વા પૂજયેત્પરમેશ્વરમ્ ॥ ૩૭॥

બ્રહ્મભિશ્ચ ષડઙ્ગૈશ્ચ તતો માતૃકયા સહ ।
પ્રણવેન શિવેનૈવ શક્તિયુક્તેન ચ ક્રમાત્ ॥ ૩૮॥

શાન્તેન વા તથાન્યૈશ્ચ વેદમન્ત્રૈશ્ચ કૃત્સ્નશઃ ।
પૂજયેત્પરમં દેવં કેવલેન શિવેન વા ॥ ૩૯॥

પાદ્યાદિમુખવાસાન્તં કૃત્વા પ્રસ્થાપનં વિના ।
પઞ્ચાવરણપૂજાં તુ હ્યારભેત યથાક્રમમ્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે કામ્યકર્મવર્ણનં નામૈકોનત્રિંશત્તમોઽધ્યાયઃ ॥ ૭.૨.૨૯॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

# ૭.૨.૩૦. ત્રિંશોઽધ્યાયઃ । શૈવાનાં કામ્યકર્મવર્ણનમ્ ।

તત્રાદૌ શિવયોઃ પાર્શ્વે દક્ષિણે વામતઃ ક્રમાત્ ।
ગન્ધાદ્યૈરર્ચયેત્ પૂર્વં દેવૌ હેરમ્બષણ્મુખૌ ॥ ૧॥

તતો બ્રહ્માણિ પરિત ઈશાનાદિ યથાક્રમમ્ ।
સશક્તિકાનિ સદ્યાન્તં પ્રથમાવરણે યજેત્ ॥ ૨॥

ષડઙ્ગાન્યપિ તત્રૈવ હૃદયાદીન્યનુક્રમાત્ ।
શિવસ્ય ચ શિવાયાશ્ચ વાહ્નેયાદિ સમર્ચયેત્ ॥ ૩॥

તત્ર વામાદિકાન્ રુદ્રાનષ્ટૌ વામાદિશક્તિભિઃ ।
અર્ચયેદ્વા ન વા પશ્ચાત્પૂર્વાદિપરિતઃ ક્રમાત્ ॥ ૪॥

પ્રથમાવરણં પ્રોક્તં મયા તે યદુનન્દન ।
દ્વિતીયાવરણં પ્રીત્યા પ્રોચ્યતે શ્રદ્ધયા શ‍ૃણુ ॥ ૫॥

અનન્તં પૂર્વદિક્પત્રે તચ્છક્તિં તસ્ય વામતઃ ।
સૂક્ષ્મં દક્ષિણદિક્પત્રે સહ શક્ત્યા સમર્ચયેત્ ॥ ૬॥

તતઃ પશ્ચિમદિક્પત્રે સહ શક્ત્યા શિવોત્તમમ્ ।
તથૈવોત્તરદિક્પત્રે ચૈકનેત્રં સમર્ચયેત્ ॥ ૭॥

એકરુદ્રં ચ તચ્છક્તિં પશ્ચાદીશદલેઽર્ચયેત્ ।
ત્રિમૂર્તિં તસ્ય શક્તિં ચ પૂજયેદગ્નિદિગ્દલે ॥ ૮॥

શ્રીકણ્ઠં નૈરૃતે પત્રે તચ્છક્તિં તસ્ય વામતઃ ।
તથૈવ મારુતે પત્રે શિખણ્ડીશં સમર્ચયેત્ ॥ ૯॥

દ્વિતીયાવરણે ચેજ્યાઃ સર્વતશ્ચક્રવર્તિનઃ ।
તૃતીયાવરણે પૂજ્યાઃ શક્તિભિશ્ચાષ્ટમૂર્તયઃ ॥ ૧૦॥

અષ્ટસુ ક્રમશો દિક્ષુ પૂર્વાદિપરિતઃ ક્રમાત્ ।
ભવઃ શર્વસ્તથેશાનો રુદ્રઃ પશુપતિસ્તતઃ ॥ ૧૧॥

ઉગ્રો ભીમો મહાદેવ ઇત્યષ્ટૌ મૂર્તયઃ ક્રમાત્ ।
અનન્તરં તતશ્ચૈવ મહાદેવાદયઃ ક્રમાત્ ।
શક્તિભિઃ સહ સમ્પૂજ્યાસ્તત્રૈકાદશમૂર્તયઃ ॥ ૧૨॥

મહાદેવઃ શિવો રુદ્રઃ શઙ્કરો નીલલોહિતઃ ।
ઈશાનો વિજયો ભીમો દેવદેવો ભવોદ્ભવઃ ॥ ૧૩॥

કપર્દીશશ્ચ કથ્યન્તે તથૈકાદશશક્તયઃ ।
તત્રાષ્ટૌ પ્રથમં પૂજ્યાઃ વાહ્નિયાદિ યથાક્રમમ્ ॥ ૧૪॥

દેવદેવઃ પૂર્વપત્રે ઈશાનં ચાગ્નિગોચરે ।
ભવોદ્ભવસ્તયોર્મધ્યે કપાલીશસ્તતઃ પરમ્ ॥ ૧૫॥

તસ્મિન્નાવરણે ભૂયો વૃષેન્દ્રં પુરતો યજેત્ ।
નન્દિનં દક્ષિણે તસ્ય મહાકાલં તથોત્તરે ॥ ૧૬॥

શાસ્તારં વહ્નિદિક્પત્રે માતૃર્દક્ષિણદિગ્દલે ।
ગજાસ્યં નૈરૃતે પત્રે ષણ્મુખં વારુણે પુનઃ ॥ ૧૭॥

જ્યેષ્ઠાં વાયુદલે ગૌરીમુત્તરે ચણ્ડમૈશ્વરે ।
શાસ્તૃનન્દીશયોર્મધ્યે મુનીન્દ્રં વૃષભં યજેત્ ॥ ૧૮॥

મહાકાલસ્યોત્તરતઃ પિઙ્ગલં તુ સમર્ચયેત્ ।
શાસ્તૃમાતૃસમૂહસ્ય મધ્યે ભૃઙ્ગીશ્વરં તતઃ ॥ ૧૯॥

માતૃવિઘ્નેશમધ્યે તુ વીરભદ્રં સમર્ચયેત્ ।
સ્કન્દવિઘ્નેશયોર્મધ્યે યજેદ્દેવીં સરસ્વતીમ્ ॥ ૨૦॥

જ્યેષ્ઠાકુમારયોર્મધ્યે શ્રિયં શિવપદાર્ચિતામ્ ।
જ્યેષ્ઠાગણામ્બયોર્મધ્યે મહામોટીં સમર્ચયેત્ ॥ ૨૧॥

ગણામ્બાચણ્ડયોર્મધ્યે દેવીં દુર્ગાં પ્રપૂજયેત્ ।
અત્રૈવાવરણે ભૂયઃ શિવાનુચરસંહતિમ્ ॥ ૨૨॥

રુદ્રપ્રથમભૂતાખ્યાં વિવિધાં ચ સશક્તિકામ્ ।
શિવાયાશ્ચ સખીવર્ગં જપેદ્ધ્યાત્વા સમાહિતઃ ॥ ૨૩॥

એવં તૃતીયાવરણં વિતતે પૂજિતે સતિ ।
ચતુર્થાવરણં ધ્યાત્વા બહિસ્તસ્ય સમર્ચયેત્ ॥ ૨૪॥

ભાનુઃ પૂર્વદલે પૂજ્યો દક્ષિણે ચતુરાનનઃ ।
રુદ્રો વરુણદિક્પત્રે વિષ્ણુરુત્તરદિગ્દલે ॥ ૨૫॥

ચતુર્ણામપિ દેવાનાં પૃથગાવરણાન્યથ ।
તસ્યાઙ્ગાનિ ષડેવાદૌ દીપ્તાદ્યાભિશ્ચ શક્તિભિઃ ॥ ૨૬॥

દીપ્તા સૂક્ષ્મા જયા ભદ્રા વિભૂતિર્વિમલા ક્રમાત્ ।

અમોઘા વિદ્યુતા ચૈવ પૂર્વાદિપરિતઃ સ્થિતાઃ ॥ ૨૭॥

દ્વિતીયાવરણે પૂજ્યાશ્ચતસ્રો મૂર્તયઃ ક્રમાત્ ।
પૂર્વાદ્યુત્તરપર્યન્તાઃ શક્તયશ્ચ તતઃ પરમ્ ॥ ૨૮॥

આદિત્યો ભાસ્કરો ભાનૂ રવિશ્ચેત્યનુપૂર્વશઃ ।
અર્કો બ્રહ્મા તથા રુદ્રો વિષ્ણુશ્ચૈતે વિવસ્વતઃ ॥ ૨૯॥

વિસ્તારા પૂર્વદિગ્ભાગે સુતારા દક્ષિણે સ્થિતા ।
બોધની પશ્ચિમે ભાગે આપ્યાયિન્યુત્તરે પુનઃ ॥ ૩૦॥

ઉષાં પ્રભાં તથા પ્રાજ્ઞાં સન્ધ્યામપિ તતઃ પરમ્ ।
ઐશાનાદિષુ વિન્યસ્ય દ્વિતીયાવરણે યજેત્ ॥ ૩૧॥

સોમમઙ્ગારકં ચૈવ બુધં બુદ્ધિમતાં વરમ્ ।
બૃહસ્પતિં બૃહદ્બુદ્ધિં ભાર્ગવં તેજસાં નિધિમ્ ॥ ૩૨॥

શનૈશ્ચરં તથા રાહું કેતું ધૂમ્રં ભયઙ્કરમ્ ।
સમન્તતો યજેદેતાંસ્તૃતીયાવરણે ક્રમાત્ ॥ ૩૩॥

અથવા દ્વાદશાદિત્યાન્ દ્વિતીયાવરણે યજેત્ ।
તૃતીયાવરણે ચૈવ રાશીન્દ્વાદશ પૂજયેત્ ॥ ૩૪॥

સપ્તસપ્ત ગણાંશ્ચૈવ બહિસ્તસ્ય સમન્તતઃ ।
ઋષીન્દેવાંશ્ચ ગન્ધર્વાન્પન્નગાનપ્સરોગણાન્ ॥ ૩૫॥

ગ્રામણ્યશ્ચ તથા યક્ષાન્યાતુધાનાંસ્તથા હયાન્ ।
સપ્તચ્છન્દોમયાંશ્ચૈવ વાલખિલ્યાંશ્ચ પૂજયેત્ ॥ ૩૬॥

એવં તૃતીયાવરણે સમભ્યર્ચ્ય દિવાકરમ્ ।
બ્રહ્માણમર્ચયેત્પશ્ચાત્ ત્રિભિરાવરણૈઃ સહઃ ॥ ૩૭॥

હિરણ્યગર્ભં પૂર્વસ્યાં વિરાજં દક્ષિણે તતઃ ।
કાલં પશ્ચિમદિગ્ભાગે પુરુષં ચોત્તરે યજેત્ ॥ ૩૮॥

હિરણ્યગર્ભઃ પ્રથમો બ્રહ્મા કમલસન્નિભઃ ।
કાલો જાત્યઞ્જનપ્રખ્યઃ પુરુષઃ સ્ફટિકોપમઃ ॥ ૩૯॥

ત્રિગુણો રાજસશ્ચૈવ તામસઃ સાત્ત્વિકસ્તથા ।
ચત્વાર એતે ક્રમશઃ પ્રથમાવરણે સ્થિતાઃ ॥ ૪૦॥

દ્વિતીયાવરણે પૂજ્યાઃ પૂર્વાદિપરિતઃ ક્રમાત્ ।
સનત્કુમારઃ સનકઃ સનન્દશ્ચ સનાતનઃ ॥ ૪૧॥

તૃતીયાવરણે પશ્ચાદર્ચયેચ્ચ પ્રજાપતીન્ ।
અષ્ટૌ પૂર્વાશ્ચ પૂર્વાદૌ ત્રીન્ પ્રાક્પશ્ચાદનુક્રમાત્ ॥ ૪૨॥

દક્ષો રુચિર્ભૃગુશ્ચૈવ મરીચિશ્ચ તથાઙ્ગિરાઃ ।
પુલસ્ત્યઃ પુલહશ્ચૈવ ક્રતુરત્રિશ્ચ કશ્યપઃ ॥ ૪૩॥

વસિષ્ઠશ્ચેતિ વિખ્યાતાઃ પ્રજાનાં પતયસ્ત્વિમે ।
તેષાં ભાર્યાશ્ચ તૈઃ સાર્દ્ધં પૂજનીયા યથાક્રમમ્ ॥ ૪૪॥

પ્રસૂતિશ્ચ તથાઽઽકૂતિઃ ખ્યાતિઃ સમ્ભૂતિરેવ ચ ।
ધૃતિઃ સ્મૃતિઃ ક્ષમા ચૈવ સન્નતિશ્ચાનસૂયકા ॥ ૪૫॥

દેવમાતારુન્ધતી ચ સર્વાઃ ખલુ પતિવ્રતાઃ ।
શિવાર્ચનરતા નિત્યં શ્રીમત્યઃ પ્રિયદર્શનાઃ ॥ ૪૬॥

પ્રથમાવરણે વેદાંશ્ચતુરો વા પ્રપૂજયેત્ ।
ઇતિહાસપુરાણાનિ દ્વિતીયાવરણે પુનઃ ॥ ૪૭॥

તૃતીયાવરણે પશ્ચાદ્ધર્મશાસ્ત્રપુરઃસરાઃ ।
વૈદિક્યો નિખિલા વિદ્યાઃ પૂજ્યા એવ સમન્તતઃ ॥ ૪૮॥

પૂર્વાદિપુરતો વેદાસ્તદન્યે તુ યથારુચિ ।
અષ્ટધા વા ચતુર્ધા વા કૃત્વા પૂજાં સમન્તતઃ ॥ ૪૯॥

એવં બ્રહ્માણમભ્યર્ચ્ય ત્રિભિરાવરણૈર્યુતમ્ ।
દક્ષિણે પશ્ચિમે પશ્ચાદ્ રુદ્રં સાવરણં યજેત્ ॥ ૫૦॥

તસ્ય બ્રહ્મષડઙ્ગાનિ પ્રથમાવરણં સ્મૃતમ્ ।
દ્વિતીયાવરણં ચૈવ વિદ્યેશ્વરમયં તથા ॥ ૫૧॥

તૃતીયાવરણે ભેદો વિદ્યતે સ તુ કથ્યતે ।
ચતસ્રો મૂર્તયસ્તસ્ય પૂજ્યાઃ પૂર્વાદિતઃ ક્રમાત્ ॥ ૫૨॥

ત્રિગુણાઃ સકલો દેવઃ પુરસ્તાચ્છિવસંજ્ઞકઃ ।
રાજસો દક્ષિણે બ્રહ્મા સૃષ્ટિકૃત્પૂજ્યતે ભવઃ ॥ ૫૩॥

તામસઃ પશ્ચિમે ચાગ્નિઃ પૂજ્યઃ સંહારકો હરઃ ।
સાત્ત્વિકઃ સુખકૃત્સૌમ્યે વિષ્ણુર્વિશ્વપતિર્મૃડઃ ॥ ૫૪॥

એવં પશ્ચિમદિગ્ભાગે શમ્ભોઃ ષડ્વિંશકં શિવમ્ ।
સમભ્યર્ચ્યોત્તરે પાર્શ્વે તતો વૈકુણ્ઠમર્ચયેત્ ॥ ૫૫॥

વાસુદેવં પુરસ્કૃત્વા પ્રથમાવરણે યજેત્ ।
અનિરુદ્ધં દક્ષિણતઃ પ્રદ્યુમ્નં પશ્ચિમે તતઃ ॥ ૫૬॥

સૌમ્યે સઙ્કર્ષણં પશ્ચાદ્ વ્યત્યસ્તૌ વા યજેદિમૌ ।
પ્રથમાવરણં પ્રોક્તં દ્વિતીયાવરણં શુભમ્ ॥ ૫૭॥

મત્સ્યઃ કૂર્મો વરાહશ્ચ નરસિંહોઽથ વામનઃ ।
રામશ્ચાન્યતમઃ કૃષ્ણો ભવાનશ્વમુખોઽપિ ચ ॥ ૫૮॥

તૃતીયાવરણે ચક્રં પૂર્વભાગે સમર્ચયેત્ ।
નારાયણાખ્યાં યામ્યેઽસ્ત્રં ક્વચિદવ્યાહતં યજેત્ ॥ ૫૯॥

પશ્ચિમે પાઞ્ચજન્યં ચ શાર્ઙ્ગં ધનુરથોત્તરે ।
એવં ત્ર્યાવરણૈઃ સાક્ષાદ્વિશ્વાખ્યાં પરમં હરિમ્ ॥ ૬૦॥

મહાવિષ્ણું સદાવિષ્ણું મૂર્ત્તીકૃત્ય સમર્ચયેત્ ।
ઇત્થં વિષ્ણોશ્ચતુર્વ્યૂહક્રમાન્મૂર્તિચતુષ્ટયમ્ ।
પૂજયિત્વા ચ તચ્છક્તીશ્ચતસ્રઃ પુજયેત્ક્રમાત્ ॥ ૬૧॥

પ્રભામાગ્નેયદિગ્ભાગે નૈરૃતે તુ સરસ્વતીમ્ ।
ગણામ્બિકાં ચ વાયવ્યે લક્ષ્મીં રૌદ્રે સમર્ચયેત્ ॥ ૬૨॥

એવં ભાન્વાદિમૂર્ત્તીનાં તચ્છક્તીનામનન્તરમ્ ।
પૂજાં વિધાય લોકેશાંસ્તત્રૈવાવરણે યજેત્ ॥ ૬૩॥

ઇન્દ્રમગ્નિં યમં ચૈવ નિરૃતિં વરુણં તથા ।
વાયું સોમં કુબેરં ચ પશ્ચાદીશાનમર્ચયેત્ ॥ ૬૪॥

એવં ચતુર્થાવરણં પૂજયિત્વા વિધાનતઃ ।
આયુધાનિ મહેશસ્ય પશ્ચાદ્ બ્રાહ્યે સમર્ચયેત્ ॥ ૬૫॥

શ્રીમત્ ત્રિશૂલમૈશાને વજ્રં માહેન્દ્રદિઙ્મુખે ।
પરશું વહ્નિદિગ્ભાગે યામ્યે સાયકમર્ચયેત્ ॥ ૬૬॥

નૈરૃતે તુ યજેત્ખડ્ગં પાશં વારુણગોચરે ।
અઙ્કુશં મારુતે ભાગે પિનાકં ચોત્તરે યજેત્ ॥ ૬૭॥

પશ્ચિમાભિમુખં રૌદ્રં ક્ષેત્રપાલં સમર્ચયેત્ ।
પઞ્ચમાવરણં ચૈવ સમ્પૂજ્યાનન્તરં બહિઃ ॥ ૬૮॥

સર્વાવરણદેવાનાં બહિર્વા પઞ્ચમેઽથવા ।
પઞ્ચમે માતૃભિઃ સાર્દ્ધં મહોક્ષં પુરતો યજેત્ ॥ ૬૯॥

તતઃ સમન્તતઃ પૂજ્યાઃ સર્વા વૈ દેવયોનયઃ ।
ખેચરા ઋષયઃ સિદ્ધા દૈત્યા યક્ષાશ્ચ રાક્ષસાઃ ॥ ૭૦॥

અનન્તાદ્યાશ્ચ નાગેન્દ્રા નાગૈસ્તત્તત્કુલોદ્ભવૈઃ ।
ડાકિની ભૂતવેતાલપ્રેતભૈરવનાયકાઃ ॥ ૭૧॥

પાતાલવાસિનશ્ચાન્યે નાનાયોનિસમુદ્ભવાઃ ।
નદ્યઃ સમુદ્રા ગિરયઃ કાનનાનિ સરાંસિ ચ ॥ ૭૨॥

પશવઃ પક્ષિણો વૃક્ષાઃ કીટાદ્યાઃ ક્ષુદ્રયોનયઃ ।
નરાશ્ચ વિવિધાકારા મૃગાશ્ચ ક્ષુદ્રયોનયઃ ॥ ૭૩॥

ભુવનાન્યન્તરણ્ડસ્ય તતો બ્રહ્માણ્ડકોટયઃ ।
બહિરણ્ડાન્યસઙ્ખ્યાનિ ભુવનાનિ સહાધિપૈઃ ॥ ૭૪॥

બ્રહ્માણ્ડાધારકા રુદ્રા દશદિક્ષુ વ્યવસ્થિતાઃ ।
યદ્ગૌણં યચ્ચ મામેયં યદ્વા શાક્તં તતઃ પરમ્ ॥ ૭૫॥

યત્કિઞ્ચિદસ્તિ શબ્દસ્ય વાચ્યં ચિદચિદાત્મકમ્ ।
તત્સર્વં શિવયોઃ પાર્શ્વે બુદ્ધ્વા સામાન્યતો યજેત્ ॥ ૭૬॥

કૃતાઞ્જલિપુટાઃ સર્વેઽચિન્ત્યાઃ સ્મિતમુખાસ્તથા ।
પ્રીત્યા સમ્પ્રેક્ષમાણાશ્ચ દેવં દેવીં ચ સર્વદા ॥ ૭૭॥

ઇત્થમાવરણાભ્યર્ચાં કૃત્વા વિક્ષેપશાન્તયે ।
પુનરભ્યર્ચ્ય દેવેશં પઞ્ચાક્ષરમુદીરયેત્ ॥ ૭૮॥

નિવેદયેત્તતઃ પશ્ચાચ્છિવયોરમૃતોપમમ્ ।
સુવ્યઞ્જનસમાયુક્તં શુદ્ધં ચારુ મહાચરુમ્ ॥ ૭૯॥

દ્વાત્રિંશદાઢકૈર્મુખ્યમધમં ત્વાઢકાવરમ્ ।
સાધયિત્વા યથાસમ્પચ્છ્રદ્ધયા વિનિવેદયેત્ ॥ ૮૦॥

તતો નિવેદ્ય પાનીયં તામ્બૂલં ચોપદંશકૈઃ ।
નીરાજનાદિકં કૃત્વા પૂજાશેષં સમાપયેત્ ॥ ૮૧॥

ભોગોપયોગ્યદ્રવ્યાણિ વિશિષ્ટાન્યેવ સાધયેત્ ।
વિત્તશાઠ્યં ન કુર્વીત ભક્તિમાન્વિભવે સતિ ॥ ૮૨॥

શઠસ્યોપેક્ષકસ્યાપિ વ્યઙ્ગં ચૈવાનુતિષ્ઠતઃ ।
ન ફલન્ત્યેવ કર્માણિ કામ્યાનીતિ સતાં કથા ॥ ૮૩॥

તસ્માત્સમ્યગુપેક્ષાં ચ ત્યક્ત્વા સર્વાઙ્ગયોગતઃ ।
કુર્યાત્કામ્યાનિ કર્માણિ ફલસિદ્ધિં યદીચ્છતિ ॥ ૮૪॥

ઇત્થં પૂજાં સમાપ્યાથ દેવં દેવીં પ્રણમ્ય ચ ।
ભક્ત્યા મનઃ સમાધાય પશ્ચાત્સ્તોત્રમુદીરયેત્ ॥ ૮૫॥

તતઃ સ્તોત્રમુપાસ્યાન્તે ત્વષ્ટોત્તરશતાવરામ્ ।
જપેત્પઞ્ચાક્ષરીં વિદ્યાં સહસ્રોત્તરમુત્સુકઃ ॥ ૮૬॥

વિદ્યાપૂજાં ગુરોઃ પૂજાં કૃત્વા પશ્ચાદ્યથાક્રમમ્ ।
યથોદયં યથાશ્રદ્ધં સદસ્યાનપિ પૂજયેત્ ॥ ૮૭॥

તત ઉદ્વાસ્ય દેવેશં સર્વૈરાવરણૈઃ સહ ।
મણ્ડલં ગુરવે દદ્યાદ્યાગોપકરણૈઃ સહ ॥ ૮૮॥

શિવાશ્રિતેભ્યો વા દદ્યાત્સર્વમેવાનુપૂર્વશઃ ।
અથવા તચ્છિવાયૈવ શિવક્ષેત્રે સમર્પયેત્ ॥ ૮૯॥

શિવાગ્નૌ વા યજેદ્દેવં હોમદ્રવ્યૈશ્ચ સપ્તભિઃ ।
સમભ્યર્ચ્ય યથાન્યાયં સર્વાવરણદેવતાઃ ॥ ૯૦॥

એષ યોગેશ્વરો નામ ત્રિષુ લોકેષુ વિશ્રુતઃ ।
ન તસ્માદધિકઃ કશ્ચિદ્યાગોઽસ્તિ ભુવને ક્વચિત્ ॥ ૯૧॥

ન તદસ્તિ જગત્યસ્મિન્નસાધ્યં યદનેન તુ ।
ઐહિકં વા ફલં કિઞ્ચિદામુષ્મિકફલં તુ વા ॥ ૯૨॥

ઇદમસ્ય ફલં નેદમિતિ નૈવ નિયમ્યતે ।
શ્રેયોરૂપસ્ય કૃત્સ્નસ્ય તદિદં શ્રેષ્ટસાધનમ્ ॥ ૯૩॥

ઇદં ન શક્યતે વક્તું પુરુષેણ યદર્ચ્યતે ।
ચિન્તામણેરિવૈતસ્માત્તત્તેન પ્રાપ્યતે ફલમ્ ॥ ૯૪॥

તથાપિ ક્ષુદ્રમુદ્દિશ્ય ફલં નૈતત્પ્રયોજયેત્ ।

લઘ્વર્થી મહતો યસ્માત્સ્વયં લઘુતરો ભવેત્ ॥ ૯૫॥

મહદ્વા ફલમલ્પં વા કૃતં ચેત્કર્મ સિધ્યતિ ।
મહાદેવં સમુદ્દિશ્ય કૃતં કર્મ પ્રયુજ્યતામ્ ॥ ૯૬॥

તસ્માદનન્યલભ્યેષુ શત્રુમૃત્યુઞ્જયાદિષુ ।
ફલેષુ દૃષ્ટાદૃષ્ટેષુ કુર્યાદિતદ્વિચક્ષણઃ ॥ ૯૭॥

મહત્સ્વપિ ચ પાપેષુ મહારોગભયાદિષુ ।
દુર્ભિક્ષાદિષુ શાન્ત્યર્થં શાન્તિં કુર્યાદનેન તુ ॥ ૯૮॥

બહુના કિં પ્રલાપેન મહાવ્યાપન્નિવારકમ્ ।
આત્મીયમસ્ત્રં શૈવાનામિદમાહ મહેશ્વરઃ ॥ ૯૯॥

તસ્માદિતઃ પરં નાસ્તિ પરિત્રાણમિહાત્મનઃ ।
ઇતિ મત્વા પ્રયુઞ્જાનઃ કર્મેદં શુભમશ્નુતે ॥ ૧૦૦॥

સ્તોત્રમાત્રં શુચિર્ભૂત્વા યઃ પઠેત્સુસમાહિતઃ ।
સોઽપ્યભીષ્ટતમાદર્થાદષ્ટાંશફલમાપ્નુયાત્ ॥ ૧૦૧॥

અર્થં તસ્યાનુસન્ધાય પર્વણ્યનશનઃ પઠેત્ ।
અષ્ટામ્યાં વા ચતુર્દશ્યાં ફલમર્દ્ધં સમાપ્નુયાત્ ॥ ૧૦૨॥

યસ્ત્વર્થમનુસન્ધાય પર્વાદિષુ તથા વ્રતી ।
માસમેકં જપેત્સ્તોત્રં સ કૃત્સ્નં ફલમાપ્નુયાત્ ॥ ૧૦૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શૈવાનાં કામ્યકર્મવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૧. એકત્રિંશોઽધ્યાયઃ । શિવમહાસ્તોત્રવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
સ્તોત્રં વક્ષ્યામિ તે કૃષ્ણ પઞ્ચાવરણમાર્ગતઃ ।
યોગેશ્વરમિદં પુણ્યં કર્મ યેન સમાપ્યતે ॥ ૧॥

જય જય જગદેકનાથ શમ્ભો, પ્રકૃતિમનોહર નિત્યચિત્સ્વભાવ ।

અતિગતકલુષપ્રપઞ્ચવાચામપિ મનસાં પદવીમતીતતત્ત્વમ્ ॥ ૨॥

સ્વભાવનિર્મલાભોગ જય સુન્દરચેષ્ટિત ।
સ્વાત્મતુલ્યમહાશક્તે જય શુદ્ધગુણાર્ણવ ॥ ૩॥

અનન્તકાન્તિસમ્પન્ન જયાસદૃશવિગ્રહ ।
અતર્ક્યમહિમાધાર જયાનાકુલમઙ્ગલ ॥ ૪॥

નિરઞ્જન નિરાધાર જય નિષ્કારણોદય ।
નિરન્તરપરાનન્દ જય નિર્વૃતિકારણ ॥ ૫॥

જયાતિપરમૈશ્વર્ય જયાતિકરુણાસ્પદ ।
જય સ્વતન્ત્રસર્વસ્વ જયાસદૃશવૈભવ ॥ ૬॥

જયાવૃતમહાવિશ્વ જયાનાવૃત કેનચિત્ ।
જયોત્તર સમસ્તસ્ય જયાત્યન્તનિરુત્તર ॥ ૭॥

જયાદ્ભુત જયાક્ષુદ્ર જયાક્ષત જયાવ્યય ।
જયામેય જયામાય જયાભાવ જયામલ ॥ ૮॥

મહાભુજ મહાસાર મહાગુણ મહાકથ ।
મહાબલ મહામાય મહારસ મહારથ ॥ ૯॥

નમઃ પરમદેવાય નમઃ પરમહેતવે ।
નમઃ શિવાય શાન્તાય નમઃ શિવતરાય તે ॥ ૧૦॥

ત્વદધીનમિદં કૃત્સ્નં જગદ્ધિ સસુરાસુરમ્ ॥ ૧૧॥

અતસ્ત્વદ્વિહિતામાજ્ઞાં ક્ષમતે કોऽતિવર્તિતુમ્ ॥ ૧૨॥

અયં પુનર્જનો નિત્યં ભવદેકસમાશ્રયઃ ।
ભવાનતોऽનુગૃહ્યાસ્મૈ પ્રાર્થિતં સમ્પ્રયચ્છતુ ॥ ૧૩॥

જયામ્બિકે જગન્માતર્જય સર્વજગન્મયિ ।
જયાનવધિકૈશ્વર્યે જયાનુપમવિગ્રહે ॥ ૧૪॥

જય વાઙ્મનસાતીતે જયાચિદ્ધ્વાન્તભઞ્જિકે ।
જય જન્મજરાહીને જય કાલોત્તરોત્તરે ॥ ૧૫॥

જયાનેકવિધાનસ્થે જય વિશ્વેશ્વરપ્રિયે ।
જય વિશ્વસુરારાધ્યે જય વિશ્વવિજૃમ્ભિણિ ॥ ૧૬॥

જય મઙ્ગલદિવ્યાઙ્ગિ જય મઙ્ગલદીપિકે ।
જય મઙ્ગલચારિત્રે જય મઙ્ગલદાયિનિ ॥ ૧૭॥

નમઃ પરમકલ્યાણગુણસઞ્ચયમૂર્તયે ।
ત્વત્તઃ ખલુ સમુત્પન્નં જગત્ત્વય્યેવ લીયતે ॥ ૧૮॥

ત્વદ્વિનાતઃ ફલં દાતુમીશ્વરોઽપિ ન શક્નુયાત્ ।
જન્મપ્રભૃતિ દેવેશિ જનોઽયં ત્વદુપાશ્રિતઃ ॥ ૧૯॥

અતોઽસ્ય તવ ભક્તસ્ય નિર્વર્તય મનોરથમ્ ।
પઞ્ચવક્ત્રો દશભુજઃ શુદ્ધસ્ફટિકસન્નિભઃ ॥ ૨૦॥

વર્ણબ્રહ્મકલાદેહો દેવઃ સકલનિષ્કલઃ ।
શિવમૂર્તિસમારૂઢઃ શાન્ત્યતીતઃ સદાશિવઃ ।
ભક્ત્યા મયાર્ચિતો મહ્યં પ્રાર્થિતં શં પ્રયચ્છતુ ॥ ૨૧॥

સદાશિવાઙ્કમારૂઢા શક્તિરિચ્છા શિવાહ્વયા ।
જનની સર્વલોકાનાં પ્રયચ્છતુ મનોરથમ્ ॥ ૨૨॥

શિવયોર્દયિતૌ પુત્રૌ દેવૌ હેરમ્બષણ્મુખૌ ।
શિવાનુભાવૌ સર્વજ્ઞૌ શિવજ્ઞાનામૃતાશિનૌ ॥ ૨૩॥

તૃપ્તૌ પરસ્પરં સ્નિગ્ધૌ શિવાભ્યાં નિત્યસત્કૃતૌ ।
સત્કૃતૌ ચ સદા દેવૌ બ્રહ્માદ્યૈસ્ત્રિદશૈરપિ ॥ ૨૪॥

સર્વલોકપરિત્રાણં કર્તુમભ્યુદિતૌ સદા ।
સ્વેચ્છાવતારં કુર્વન્તૌ સ્વાંશભેદૈરનેકશઃ ॥ ૨૫॥

તાવિમૌ શિવયોઃ પાર્શ્વે નિત્યમિત્થં મયાર્ચિતૌ ।
તયોરાજ્ઞાં પુરસ્કૃત્ય પ્રાર્થિતં મે પ્રયચ્છતામ્ ॥ ૨૬॥

શુદ્ધસ્ફટિકસઙ્કાશમીશાનાખ્યં સદાશિવમ્ ।
મૂર્ધાભિમાનિની મૂર્તિઃ શિવસ્ય પરમાત્મનઃ ॥ ૨૭॥

શિવાર્ચનરતં શાન્તં શાન્ત્યતીતં ખમાસ્થિતમ્ ।
પઞ્ચાક્ષરાન્તિમં બીજં કલાભિઃ પઞ્ચભિર્યુતમ્ ॥ ૨૮॥

પ્રથમાવરણે પૂર્વં શક્ત્યા સહ સમર્ચિતમ્ ।
પવિત્રં પરમં બ્રહ્મ પ્રાર્થિતં મે પ્રયચ્છતુ ॥ ૨૯॥

બાલસૂર્યપ્રતીકાશં પુરુષાખ્યં પુરાતનમ્ ।

પૂર્વવક્ત્રાભિમાનં ચ શિવસ્ય પરમેષ્ઠિનઃ ॥ ૩૦॥

શાન્ત્યાત્મકં મરુત્સંસ્થં શમ્ભોઃ પાદાર્ચને રતમ્ ।
પ્રથમં શિવબીજેષુ કલાસુ ચ ચતુષ્કલમ્ ॥ ૩૧॥

પૂર્વભાગે મયા ભક્ત્યા શક્ત્યા સહ સમર્ચિતમ્ ।
પવિત્રં પરમં બ્રહ્મ પ્રાર્થિતં મે પ્રયચ્છતુ ॥ ૩૨॥

અઞ્જનાદિપ્રતીકાશમઘોરં ઘોરવિગ્રહમ્ ।
દેવસ્ય દક્ષિણં વક્ત્રં દેવદેવપદાર્ચકમ્ ॥ ૩૩॥

વિદ્યાપાદં સમારૂઢં વહ્નિમણ્ડલમધ્યગમ્ ।
દ્વિતીયં શિવબીજેષુ કલાસ્વષ્ટકલાન્વિતમ્ ॥ ૩૪॥

શમ્ભોર્દક્ષિણદિગ્ભાગે શક્ત્યા સહ સમર્ચિતમ્ ।
પવિત્રં પરમં બ્રહ્મ પ્રાર્થિતં મે પ્રયચ્છતુ ॥ ૩૫॥

કુઙ્કુમક્ષોદસઙ્કાશં વામાખ્યં વરવેષધૃક્ ।
વક્ત્રમુત્તરમીશસ્ય પ્રતિષ્ઠાયાં પ્રતિષ્ઠિતમ્ ॥ ૩૬॥

વારિમણ્ડલમધ્યસ્થં મહાદેવાર્ચને રતમ્ ।
તુરીયં શિવબીજેષુ ત્રયોદશકલાન્વિતમ્ ॥ ૩૭॥

દેવસ્યોત્તરદિગ્ભાગે શક્ત્યા સહ સમર્ચિતમ્ ।
પવિત્રં પરમં બ્રહ્મ પ્રાર્થિતં મે પ્રયચ્છતુ ॥ ૩૮॥

શઙ્ખકુન્દેન્દુધવલં સદ્યાખ્યં સૌમ્યલક્ષણમ્ ।
શિવસ્ય પશ્ચિમં વક્ત્રં શિવપાદાર્ચને રતમ્ ॥ ૩૯॥

નિવૃત્તિપદનિષ્ઠં ચ પૃથિવ્યાં સમવસ્થિતમ્ ।
તૃતીયં શિવબીજેષુ કલાભિશ્ચાષ્ટભિર્યુતમ્ ॥ ૪૦॥

દેવસ્ય પશ્ચિમે ભાગે શક્ત્યા સહ સમર્ચિતમ્ ।
પવિત્રં પરમં બ્રહ્મ પ્રાર્થિતં મે પ્રયચ્છતુ ॥ ૪૧॥

શિવસ્ય તુ શિવાયાશ્ચ હૃન્મૂર્ત્તી શિવભાવિતે ।
તયોરાજ્ઞાં પુરસ્કૃત્ય તે મે કામં પ્રયચ્છતામ્ ॥ ૪૨॥

શિવસ્ય ચ શિવાયાશ્ચ શિવામૂર્ત્તી શિવાશ્રિતે ।
સત્કૃત્ય શિવયોરાજ્ઞાં તે મે કામં પ્રયચ્છતામ્ ॥ ૪૩॥

શિવસ્ય ચ શિવાયાશ્ચ વર્મણી શિવભાવિતે ।
સત્કૃત્ય શિવયોરાજ્ઞાં તે મે કામં પ્રયચ્છતામ્ ॥ ૪૪॥

શિવસ્ય ચ શિવાયાશ્ચ નેત્રમૂર્ત્તી શિવાશ્રિતે ।
સત્કૃત્ય શિવયોરાજ્ઞાં તે મે કામં પ્રયચ્છતામ્ ॥ ૪૫॥

અસ્ત્રમૂર્તી ચ શિવયોર્નિત્યમર્ચનતત્પરે ।
સત્કૃત્ય શિવયોરાજ્ઞાં તે મે કામં પ્રયચ્છતામ્ ॥ ૪૬॥

વામો જ્યેષ્ઠસ્તથા રુદ્રઃ કાલો વિકરણસ્તથા ।
બલો વિકરણશ્ચૈવ બલપ્રમથનઃ પરઃ ॥ ૪૭॥

સર્વભૂતસ્ય દમનસ્તાદૃશાશ્ચાષ્ટશક્તયઃ ।
પ્રાર્થિતં મે પ્રયચ્છન્તુ શિવયોરેવ શાસનાત્ ॥ ૪૮॥

અથાનન્તશ્ચ સૂક્ષ્મશ્ચ શિવશ્ચાપ્યેકનેત્રકઃ ।
એકરુદ્રસ્ત્રિમૂર્તિશ્ચ શ્રીકણ્ઠશ્ચ શિખણ્ડિકઃ ॥ ૪૯॥

તથાષ્ટૌ શક્તયસ્તેષાં દ્વિતીયાવરણેઽર્ચિતાઃ ।
તે મે કામં પ્રયચ્છન્તુ શિવયોરેવ શાસનાત્ ॥ ૫૦॥

ભવાદ્યા મૂર્તયશ્ચાષ્ટૌ તાસામપિ ચ શક્તયઃ ।
મહાદેવાદયશ્ચાન્યે તથૈકાદશમૂર્તયઃ ॥ ૫૧॥

શક્તિભિઃ સહિતાઃ સર્વે તૃતીયાવરણે સ્થિતાઃ ।
સત્કૃત્ય શિવયોરાજ્ઞાં દિશન્તુ ફલમીપ્સિતમ્ ॥ ૫૨॥

વૃષરાજો મહાતેજા મહામેઘસમસ્વનઃ ।
મેરુમન્દરકૈલાસહિમાદ્રિશિખરોપમઃ ॥ ૫૩॥

સિતાભ્રશિખરાકારઃ કકુદા પરિશોભિતઃ ।
મહાભોગીન્દ્રકલ્પેન વાલેન ચ વિરાજિતઃ ॥ ૫૪॥

રક્તાસ્યશૃઙ્ગચરણો રક્તપ્રાયવિલોચનઃ ।
પીવરોન્નતસર્વાઙ્ગઃ સુચારુગમનોજ્જ્વલઃ ॥ ૫૫॥

પ્રશસ્તલક્ષણઃ શ્રીમાન્ પ્રજ્વલન્મણિભૂષણઃ ।
શિવપ્રિયઃ શિવાસક્તઃ શિવયોર્ધ્વજવાહનઃ ॥ ૫૬॥

તથા તચ્ચરણન્યાસપાવિતાપરવિગ્રહઃ ।
ગોરાજપુરુષઃ શ્રીમાન્ શ્રીમચ્છૂલવરાયુધઃ ।

તયોરાજ્ઞાં પુરસ્કૃત્ય સ મે કામં પ્રયચ્છતુ ॥ ૫૭॥

નન્દીશ્વરો મહાતેજા નગેન્દ્રતનયાત્મજઃ ।
સનારાયણકૈર્દેવૈર્નિત્યમભ્યર્ચ્ય વન્દિતઃ ॥ ૫૮॥

શર્વસ્યાન્તઃપુરદ્વારિ સાર્ધં પરિજનૈઃ સ્થિતઃ ।
સર્વેશ્વરસમપ્રખ્યઃ સર્વાસુરવિમર્દનઃ ॥ ૫૯॥

સર્વેષાં શિવધર્માણામધ્યક્ષત્વેઽભિષેચિતઃ ।
શિવપ્રિયઃ શિવાસક્તઃ શ્રીમચ્છૂલવરાયુધઃ ॥ ૬૦॥

શિવાશ્રિતેષુ સંસક્તસ્ત્વનુરક્તશ્ચ તૈરપિ ।
સત્કૃત્ય શિવયોરાજ્ઞાં સ મે કામં પ્રયચ્છતુ ॥ ૬૧॥

મહાકાલો મહાબાહુર્મહાદેવ ઇવાપરઃ ।
મહાદેવાશ્રિતાનાં તુ નિત્યમેવાભિરક્ષતુ ॥ ૬૨॥

શિવપ્રિયઃ શિવાસક્તઃ શિવયોરર્ચકઃ સદા ।
સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૬૩॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞઃ શાસ્તા વિષ્ણોઃ પરા તનુઃ ।
મહામોહાત્મતનયો મધુમાંસાસવપ્રિયઃ ।
તયોરાજ્ઞાં પુરસ્કૃત્ય સ મે કામં પ્રયચ્છતુ ॥ ૬૪॥

બ્રહ્માણી ચૈવ માહેશી કૌમારી વૈષ્ણવી તથા ।
વારાહી ચૈવ માહેન્દ્રી ચામુણ્ડા ચણ્ડવિક્રમા ॥ ૬૫॥

એતા વૈ માતરઃ સપ્ત સર્વલોકસ્ય માતરઃ ।
પ્રાર્થિતં મે પ્રયચ્છન્તુ પરમેશ્વરશાસનાત્ ॥ ૬૬॥

મત્તમાતઙ્ગવદનો ગઙ્ગોમાશઙ્કરાત્મજઃ ।
આકાશદેહો દિગ્બાહુઃ સોમસૂર્યાગ્નિલોચનઃ ॥ ૬૭॥

ઐરાવતાદિભિર્દિવ્યૈર્દિગ્ગજૈર્નિત્યમર્ચિતઃ ।
શિવજ્ઞાનમદોદ્ભિન્નસ્ત્રિદશાનામવિઘ્નકૃત્ ॥ ૬૮॥

વિઘ્નકૃચ્ચાસુરાદીનાં વિઘ્નેશઃ શિવભાવિતઃ ।
સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૬૯॥

ષણ્મુખઃ શિવસમ્ભૂતઃ શક્તિવજ્રધરઃ પ્રભુઃ ।
અગ્નેશ્ચ તનયો દેવો હ્યપર્ણાતનયઃ પુનઃ ॥ ૭૦॥

ગઙ્ગાયાશ્ચ ગણામ્બાયાઃ કૃત્તિકાનાં તથૈવ ચ ।
વિશાખેન ચ શાખેન નૈગમેયેન ચાવૃતઃ ॥ ૭૧॥

ઇન્દ્રજિચ્ચન્દ્રસેનાનીસ્તારકાસુરજિત્તથા ।
શૈલાનાં મેરુમુખ્યાનાં વેધકશ્ચ સ્વતેજસા ॥ ૭૨॥

તપ્તચામીકરપ્રખ્યઃ શતપત્રદલેક્ષણઃ ।
કુમારઃ સુકુમારાણાં રૂપોદાહરણં મહત્ ॥ ૭૩॥

શિવપ્રિયઃ શિવાસક્તઃ શિવપદાર્ચકઃ સદા ।
સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૭૪॥

જ્યેષ્ઠા વરિષ્ઠા વરદા શિવયોર્યજને રતા ।
તયોરાજ્ઞાં પુરસ્કૃત્ય સા મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૭૫॥

ત્રૈલોક્યવન્દિતા સાક્ષાદુલ્કાકારા ગણામ્બિકા ।
જગત્સૃષ્ટિવિવૃદ્ધ્યર્થં બ્રહ્મણાભ્યર્થિતા શિવાત્ ॥ ૭૬॥

શિવાયાઃ પ્રવિભક્તાયા ભ્રુવોરન્તરનિઃસૃતાઃ ।
દાક્ષાયણી સતી મેના તથા હૈમવતી હ્યુમા ॥ ૭૭॥

કૌશિક્યાશ્ચૈવ જનની ભદ્રકાલ્યાસ્તથૈવ ચ ।
અપર્ણાયાશ્ચ જનની પાટલાયાસ્તથૈવ ચ ॥ ૭૮॥

શિવાર્ચનરતા નિત્યં રુદ્રાણી રુદ્રવલ્લભા ।
સત્કૃત્ય શિવયોરાજ્ઞાં સા મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૭૯॥

ચણ્ડઃ સર્વગણેશાનઃ શમ્ભોર્વદનસમ્ભવઃ ।
સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૮૦॥

પિઙ્ગલો ગણપઃ શ્રીમાન્ શિવાસક્તઃ શિવપ્રિયઃ ।
આજ્ઞયા શિવયોરેવ સ મે કામં પ્રયચ્છતુ ॥ ૮૧॥

ભૃઙ્ગીશો નામ ગણપઃ શિવરાધનતત્પરઃ ।
પ્રયચ્છતુ સ મે કામં પત્યુરાજ્ઞાપુરઃસરમ્ ॥ ૮૨॥

વીરભદ્રો મહાતેજા હિમકુન્દેન્દુસન્નિભઃ ।
ભદ્રકાલીપ્રિયો નિત્યં માતૃણાં ચાભિરક્ષિતા ॥ ૮૩॥

યજ્ઞસ્ય ચ શિરોહર્તા દક્ષસ્ય ચ દુરાત્મનઃ ।

ઉપેન્દ્રેન્દ્રયમાદીનાં દેવાનામઙ્ગતક્ષકઃ ॥ ૮૪॥

શિવસ્યાનુચરઃ શ્રીમાન્ શિવશાસનપાલકઃ ।
શિવયોઃ શાસનાદેવ સ મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૮૫॥

સરસ્વતી મહેશસ્ય વાક્સરોજસમુદ્ભવા ।
શિવયોઃ પૂજને સક્તા સ મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૮૬॥

વિષ્ણોર્વક્ષઃસ્થિતા લક્ષ્મીઃ શિવયોઃ પૂજને રતા ।
શિવયોઃ શાસનાદેવ સા મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૮૭॥

મહામોટી મહાદેવ્યાઃ પાદપૂજાપરાયણા ।
તસ્યા એવ નિયોગેન સા મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૮૮॥

કૌશિકી સિંહમારૂઢા પાર્વત્યાઃ પરમા સુતા ।
વિષ્ણોર્નિદ્રા મહામાયા મહામહિષમર્દિની ॥ ૮૯॥

નિશમ્ભશુમ્ભસંહર્ત્રી મધુમાંસાસવપ્રિયા ।
સત્કૃત્ય શાસનં માતુઃ સા મે દિશતુ કાઙ્ક્ષિતમ્ ॥ ૯૦॥

રુદ્રા રુદ્રસમપ્રખ્યાઃ પ્રમથાઃ પ્રથિતૌજસઃ ।
ભૂતાખ્યાશ્ચ મહાવીર્યા મહાદેવસમપ્રભાઃ ॥ ૯૧॥

નિત્યમુક્તા નિરુપમા નિર્દ્વન્દ્વા નિરુપપ્લવાઃ ।
સશક્તયઃ સાનુચરાઃ સર્વલોકનમસ્કૃતાઃ ॥ ૯૨॥

સર્વેષામેવ લોકાનાં સૃષ્ટિસંહરણક્ષમાઃ ।
પરસ્પરાનુરક્તાશ્ચ પરસ્પરમનુવ્રતાઃ ॥ ૯૩॥

પરસ્પરમતિસ્નિગ્ધાઃ પરસ્પરનમસ્કૃતાઃ ।
શિવપ્રિયતમા નિત્યં શિવલક્ષણલક્ષિતાઃ ॥ ૯૪॥

સૌમ્યા ઘોરાસ્તથા મિશ્રાશ્ચાન્તરાલદ્વયાત્મિકાઃ ।
વિરૂપાશ્ચ સુરૂપાશ્ચ નાનારૂપધરાસ્તથા ॥ ૯૫॥

સત્કૃત્ય શિવયોરાજ્ઞાં તે મે કામં દિશન્તુ વૈ ।
દેવ્યા પ્રિયસખીવર્ગો દેવીલક્ષણલક્ષિતઃ ॥ ૯૬॥

સહિતો રુદ્રકન્યાભિઃ શક્તિભિશ્ચાપ્યનેકશઃ ।
તૃતીયાવરણે શમ્ભોર્ભક્ત્યા નિત્યં સમર્ચિતઃ ॥ ૯૭॥

સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ મઙ્ગલમ્ ।
દિવાકરો મહેશસ્ય મૂર્તિર્દીપ્તિસુમણ્ડલઃ ॥ ૯૮॥

નિર્ગુણો ગુણસઙ્કીર્ણસ્તથૈવ ગુણકેવલઃ ।
અવિકારાત્મકશ્ચાદ્ય એકઃ સામાન્યવિક્રિયઃ ॥ ૯૯॥

અસાધારણકર્મા ચ સૃષ્ટિસ્થિતિલયક્રમાત્ ।
એવં ત્રિધા ચતુર્ધા ચ વિભક્તાઃ પઞ્ચધા પુનઃ ॥ ૧૦૦॥

ચતુર્થાવરણે શમ્ભોઃ પૂજિતશ્ચાનુગૈઃ સહ ।
શિવપ્રિયઃ શિવાસક્તઃ શિવપાદાર્ચને રતઃ ॥ ૧૦૧॥

સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ મઙ્ગલમ્ ।
દિવાકરષડઙ્ગાનિ દીપ્તાદ્યાશ્ચાષ્ટશક્તયઃ ॥ ૧૦૨॥

આદિત્યો ભાસ્કરો ભાનૂ રવિશ્ચેત્યનુપૂર્વશઃ ।
અર્કો બ્રહ્મા તથા રુદ્રો વિષ્ણુશ્ચાદિત્યમૂર્તયઃ ॥ ૧૦૩॥

વિસ્તરા સુતરા બોધિન્યાપ્યાયિન્યપરાઃ પુનઃ ।
ઉષા પ્રભા તથા પ્રાજ્ઞા સન્ધ્યા ચેત્યપિ શક્તયઃ ॥ ૧૦૪॥

સોમાદિકેતુપર્યન્તા ગ્રહાશ્ચ શિવભાવિતાઃ ।
શિવયોરાજ્ઞયા નુન્ના મઙ્ગલં પ્રદિશન્તુ મે ॥ ૧૦૫॥

અથવા દ્વાદશાદિત્યાસ્તથા દ્વાદશ શક્તયઃ ।
ઋષયો દેવગન્ધર્વાઃ પન્નગાપ્સરસાં ગણાઃ ॥ ૧૦૬॥

ગ્રામણ્યશ્ચ તથા યક્ષા રાક્ષસાશ્ચ સુરાસ્તથા ।
સપ્ત સપ્તગણાશ્ચૈતે સપ્તચ્છન્દોમયા હયાઃ ॥ ૧૦૭॥

વાલખિલ્યાદયશ્ચૈવ સર્વે શિવપદાર્ચકાઃ ।
સત્કૃત્ય શિવયોરાજ્ઞાં મઙ્ગલં પ્રદિશન્તુ મે ॥ ૧૦૮॥

બ્રહ્માથ દેવદેવસ્ય મૂર્તિર્ભૂમણ્ડલાધિપઃ ।
ચતુઃષષ્ટિગુણૈશ્વર્યો બુદ્ધિતત્ત્વે પ્રતિષ્ઠિતઃ ॥ ૧૦૯॥

નિર્ગુણો ગુણસઙ્કીર્ણસ્તથૈવ ગુણકેવલઃ ।
અવિકારાત્મકો દેવસ્તતઃ સાધારણઃ પુરઃ ॥ ૧૧૦॥

અસાધારણકર્મા ચ સૃષ્ટિસ્થિતિલયક્રમાત્ ।
એવં ત્રિધા ચતુર્ધા ચ વિભક્તઃ પઞ્ચધા પુનઃ ॥ ૧૧૧॥

ચતુર્થાવરણે શમ્ભોઃ પૂજિતશ્ચ સહાનુગૈઃ ।
શિવપ્રિયઃ શિવાસક્તઃ શિવપાદાર્ચને રતઃ ॥ ૧૧૨॥

સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ મઙ્ગલમ્ ।
હિરણ્યગર્ભો લોકેશો વિરાટ્ કાલશ્ચ પૂરુષઃ ॥ ૧૧૩॥

સનત્કુમારઃ સનકઃ સનન્દશ્ચ સનાતનઃ ।
પ્રજાનાં પતયશ્ચૈવ દક્ષાદ્યા બ્રહ્મસૂનવઃ ॥ ૧૧૪॥

એકાદશ સપત્નીકા ધર્મઃ સઙ્કલ્પ એવ ચ ।
શિવાર્ચનરતાશ્ચૈતે શિવભક્તિપરાયણાઃ ॥ ૧૧૫॥

શિવાજ્ઞાવશગાઃ સર્વે દિશન્તુ મમ મઙ્ગલમ્ ।
ચત્વારશ્ચ તથા વેદાઃ સેતિહાસપુરાણકાઃ ॥ ૧૧૬॥

ધર્મશાસ્ત્રાણિ વિદ્યાભિર્વૈદિકીભિઃ સમન્વિતાઃ ।
પરસ્પરાવિરુદ્ધાર્થાઃ શિવપ્રકૃતિપાદકાઃ ॥ ૧૧૭॥

સત્કૃત્ય શિવયોરાજ્ઞાં મઙ્ગલં પ્રદિશન્તુ મે ।
અથ રુદ્રો મહાદેવઃ શમ્ભોર્મૂર્તિર્ગરીયસી ॥ ૧૧૮॥

વાહ્નેયમણ્ડલાધીશઃ પૌરુષૈશ્વર્યવાન્ પ્રભુઃ ।
શિવાભિમાનસમ્પન્નો નિર્ગુણસ્ત્રિગુણાત્મકઃ ॥ ૧૧૯॥

કેવલં સાત્ત્વિકશ્ચાપિ રાજસશ્ચૈવ તામસઃ ।
અવિકારરતઃ પૂર્વં તતસ્તુ સમવિક્રિયઃ ॥ ૧૨૦॥

અસાધારણકર્મા ચ સૃષ્ટ્યાદિકરણાત્પૃથક્ ।
બ્રહ્મણોઽપિ શિરશ્છેત્તા જનકસ્તસ્ય તત્સુતઃ ॥ ૧૨૧॥

જનકસ્તનયશ્ચાપિ વિષ્ણોરપિ નિયામકઃ ।
બોધકશ્ચ તયોર્નિત્યમનુગ્રહકરઃ પ્રભુઃ ॥ ૧૨૨॥

અણ્ડસ્યાન્તર્બહિર્વર્તી રુદ્રો લોકદ્વયાધિપઃ ।
શિવપ્રિયઃ શિવાસક્તઃ શિવપાદાર્ચને રતઃ ॥ ૧૨૩॥

શિવસ્યાજ્ઞાં પુરસ્કૃત્ય સ મે દિશતુ મઙ્ગલમ્ ।
તસ્ય બ્રહ્મ ષડઙ્ગાનિ વિદ્યેશાનાં તથાષ્ટકમ્ ॥ ૧૨૪॥

ચત્વારો મૂર્તિભેદાશ્ચ શિવપૂર્વાઃ શિવાર્ચકાઃ ।

શિવો ભવો હરશ્ચૈવ મૃડશ્ચૈવ તથાપરઃ ।
શિવસ્યાજ્ઞાં પુરસ્કૃત્ય મઙ્ગલં પ્રદિશન્તુ મે ॥ ૧૨૫॥

અથ વિષ્ણુર્મહેશસ્ય શિવસ્યૈવ પરા તનુઃ ।
વારિતત્ત્વાધિપઃ સાક્ષાદવ્યક્તપદસંસ્થિતઃ ॥ ૧૨૬॥

નિર્ગુણઃ સત્ત્વબહુલસ્તથૈવ ગુણકેવલઃ ।
અવિકારાભિમાની ચ ત્રિસાધારણવિક્રિયઃ ॥ ૧૨૭॥

અસાધારણકર્મા ચ સૃષ્ટ્યાદિકરણાત્પૃથક્ ।
દક્ષિણાઙ્ગભવેનાપિ સ્પર્ધમાનઃ સ્વયમ્ભુવા ॥ ૧૨૮॥

આદ્યેન બ્રહ્મણા સાક્ષાત્સૃષ્ટઃ સ્રષ્ટા ચ તસ્ય તુ ।
અણ્ડસ્યાન્તર્બહિર્વર્તી વિષ્ણુર્લોકદ્વયાધિપઃ ॥ ૧૨૯॥

અસુરાન્તકરશ્ચક્રી શક્રસ્યાપિ તથાનુજઃ ।
પ્રાદુર્ભૂતશ્ચ દશધા ભૃગુશાપચ્છલાદિહ ॥ ૧૩૦॥

ભૂભારનિગ્રહાર્થાય સ્વેચ્છયાવાતરત્ ક્ષિતૌ ।
અપ્રમેયબલો માયી માયયા મોહયન્ જગત્ ॥ ૧૩૧॥

મૂર્તિં કૃત્વા મહાવિષ્ણું સદાશિષ્ણુમથાપિ વા ।
વૈષ્ણવૈઃ પૂજિતો નિત્યં મૂર્તિત્રયમયાસને ॥ ૧૩૨॥

શિવપ્રિયઃ શિવાસક્તઃ શિવપાદાર્ચને રતઃ ।
શિવસ્યાજ્ઞાં પુરસ્કૃત્ય સ મે દિશતુ મઙ્ગલમ્ ॥ ૧૩૩॥

વાસુદેવોઽનિરુદ્ધશ્ચ પ્રદ્યુમ્નશ્ચ તતઃ પરઃ ।
સઙ્કર્ષણઃ સમાખ્યાતાશ્ચતસ્રો મૂર્તયો હરેઃ ॥ ૧૩૪॥

મત્સ્યઃ કૂર્મો વરાહશ્ચ નારસિંહોઽથ વામનઃ ।
રામત્રયં તથા કૃષ્ણો વિષ્ણુસ્તુરગવક્ત્રકઃ ॥ ૧૩૫॥

ચક્રં નારાયણસ્યાસ્ત્રં પાઞ્ચજન્યં ચ શાર્ઙ્ગકમ્ ।
સત્કૃત્ય શિવયોરાજ્ઞાં મઙ્ગલં પ્રદિશન્તુ મે ॥ ૧૩૬॥

પ્રભા સરસ્વતી ગૌરી લક્ષ્મીશ્ચ શિવભાવિતા ।
શિવયોઃ શાસનાદેતા મઙ્ગલં પ્રદિશન્તુ મે ॥ ૧૩૭॥

ઇન્દ્રોઽગ્નિશ્ચ યમશ્ચૈવ નિરૃતિર્વરુણસ્તથા ।
વાયુઃ સોમઃ કુબેરશ્ચ તથેશાનસ્ત્રિશૂલધૃક્ ॥ ૧૩૮॥

સર્વે શિવાર્ચનરતાઃ શિવસદ્ભાવભાવિતાઃ ।
સત્કૃત્ય શિવયોરાજ્ઞાં મઙ્ગલં પ્રદિશન્તુ મે ॥ ૧૩૯॥

ત્રિશૂલમથ વજ્રં ચ તથા પરશુસાયકૌ ।
ખડ્ગપાશાઙ્કુશાશ્ચૈવ પિનાકશ્ચાયુધોત્તમઃ ॥ ૧૪૦॥

દિવ્યાયુધાનિ દેવસ્ય દેવ્યાશ્ચૈતાનિ નિત્યશઃ ।
સત્કૃત્ય શિવયોરાજ્ઞાં રક્ષાં કુર્વન્તુ મે સદા ॥ ૧૪૧॥

વૃષરૂપધરો દેવઃ સૌરભેયો મહાબલઃ ।
વડવાખ્યાનલસ્પર્દ્ધી પઞ્ચગોમાતૃભિર્વૃતઃ ॥ ૧૪૨॥

વાહનત્વમનુપ્રાપ્તસ્તપસા પરમેશયોઃ ।
તયોરાજ્ઞાં પુરસ્કૃત્ય સ મે કામં પ્રયચ્છતુ ॥ ૧૪૩॥

નન્દા સુનન્દા સુરભિઃ સુશીલા સુમનાસ્તથા ।
પઞ્ચ ગોમાતરસ્ત્વેતાઃ શિવલોકે વ્યવસ્થિતાઃ ॥ ૧૪૪॥

શિવભક્તિપરા નિત્યં શિવાર્ચનપરાયણાઃ ।
શિવયોઃ શાસનાદેવ દિશન્તુ મમ વાઞ્છિતમ્ ॥ ૧૪૫॥

ક્ષેત્રપાલો મહાતેજા નીલજીમૂતસન્નિભઃ ।
દંષ્ટ્રાકરાલવદનઃ સ્ફુરદ્રક્તાધરોજ્જ્વલઃ ॥ ૧૪૬॥

રક્તોર્ધ્વમૂર્ધજઃ શ્રીમાન્ ભૃકુટીકુટિલેક્ષણઃ ।
રક્તવૃત્તત્રિનયનઃ શશિપન્નગભૂષણઃ ॥ ૧૪૭॥

નગ્નસ્ત્રિશૂલપાશાસિકપાલોદ્યતપાણિકઃ ।
ભૈરવો ભૈરવૈઃ સિદ્ધૈર્યોગિનીભિશ્ચ સંવૃતઃ ॥ ૧૪૮॥

ક્ષેત્રે ક્ષેત્રે સમાસીનઃ સ્થિતો યો રક્ષકઃ સતામ્ ।
શિવપ્રણામપરમઃ શિવસદ્ભાવભાવિતઃ ॥ ૧૪૯॥

શિવાશ્રિતાન્ વિશેષેણ રક્ષન્ પુત્રાનિવૌરસાન્ ।
સત્કૃત્ય શિવયોરાજ્ઞાં સ મે દિશતુ મઙ્ગલમ્ ॥ ૧૫૦॥

તાલજઙ્ઘાદયસ્તસ્ય પ્રથમાવરણેઽર્ચિતાઃ ।
સત્કૃત્ય શિવયોરાજ્ઞાં ચત્વારઃ સમવન્તુ મામ્ ॥ ૧૫૧॥

ભૈરવાદ્યાશ્ચ યે ચાન્યે સમન્તાત્તસ્ય વેષ્ટિતાઃ ।

તેઽપિ મામનુગૃહ્ણન્તુ શિવશાસનગૌરવાત્ ॥ ૧૫૨॥

નારદાદ્યાશ્ચ મુનયો દિવ્યા દેવૈશ્ચ પૂજિતાઃ ।
સાધ્યા નાગાશ્ચ યે દેવા જનલોકનિવાસિનઃ ॥ ૧૫૩॥

વિનિવૃત્તાધિકારાશ્ચ મહર્લોકનિવાસિનઃ ।
સપ્તર્ષયસ્તથાન્યે વૈ વૈમાનિકગુણૈઃ સહ ॥ ૧૫૪॥

સર્વે શિવાર્ચનરતાઃ શિવાજ્ઞાવશવર્તિનઃ ।
શિવયોરાજ્ઞયા મહ્યં દિશન્તુ સમકાઙ્ક્ષિતમ્ ॥ ૧૫૫॥

ગન્ધર્વાદ્યાઃ પિશાચાન્તાશ્ચતસ્રો દેવયોનયઃ ।
સિદ્ધા વિદ્યાધરાદ્યાશ્ચ યેઽપિ ચાન્યે નભશ્ચરાઃ ॥ ૧૫૬॥

અસુરા રાક્ષસાશ્ચૈવ પાતાલતલવાસિનઃ ।
અનન્તાદ્યાશ્ચ નાગેન્દ્રા વૈનતેયાદયો દ્વિજાઃ ॥ ૧૫૭॥

કૂષ્માણ્ડાઃ પ્રેતવેતાલા ગ્રહા ભૂતગણાઃ પરે ।
ડાકિન્યશ્ચાપિ યોગિન્યઃ શાકિન્યશ્ચાપિ તાદૃશાઃ ॥ ૧૫૮॥

ક્ષેત્રારામગૃહાદીનિ તીર્થાન્યાયતનાનિ ચ ।
દ્વીપાઃ સમુદ્રા નદ્યશ્ચ નદાશ્ચાન્યે સરાંસિ ચ ॥ ૧૫૯॥

ગિરયશ્ચ સુમેર્વાદ્યાઃ કાનનાનિ સમન્તતઃ ।
પશવઃ પક્ષિણો વૃક્ષાઃ કૃમિકીટાદયો મૃગાઃ ॥ ૧૬૦॥

ભુવનાન્યપિ સર્વાણિ ભુવનાનામધીશ્વરાઃ ।
અણ્ડાન્યાવરણૈઃ સાર્ધમાસાશ્ચ દશ દિગ્ગજાઃ ॥ ૧૬૧॥

વર્ણાઃ પદાનિ મન્ત્રાશ્ચ તત્ત્વાન્યપિ સહાધિપૈઃ ।
બ્રહ્માણ્ડધારકા રુદ્રા રુદ્રાશ્ચાન્યે સશક્તિકાઃ ॥ ૧૬૨॥

યચ્ચ કિઞ્ચિજ્જગત્યસ્મિન્દૃષ્ટં ચાનુમિતં શ્રુતમ્ ।
સર્વે કામં પ્રયચ્છન્તુ શિવયોરેવ શાસનાત્ ॥ ૧૬૩॥

અથ વિદ્યા પરા શૈવી પશુપાશવિમોચિની ।
પઞ્ચાર્થસંજ્ઞિતા દિવ્યા પશુવિદ્યાબહિષ્કૃતા ॥ ૧૬૪॥

શાસ્ત્રં ચ શિવધર્માખ્યં ધર્માખ્યં ચ તદુત્તરમ્ ।
શૈવાખ્યં શિવધર્માખ્યં પુરાણં શ્રુતિસમ્મિતમ્ ॥ ૧૬૫॥

શૈવાગમાશ્ચ યે ચાન્યે કામિકાદ્યાશ્ચતુર્વિધાઃ ।
શિવાભ્યામવિશેષેણ સત્કૃત્યેહ સમર્ચિતાઃ ॥ ૧૬૬॥

તાભ્યામેવ સમાજ્ઞાતા મમાભિપ્રેતસિદ્ધયે ।
કર્મેદમનુમન્યન્તાં સફલં સાધ્વનુષ્ઠિતમ્ ॥ ૧૬૭॥

શ્વેતાદ્યા નકુલીશાન્તાઃ સશિષ્યાશ્ચાપિ દેશિકાઃ ।
તત્સન્તતીયા ગુરવો વિશેષાદ્ ગુરવો મમ ॥ ૧૬૮॥

શૈવા માહેશ્વરાશ્ચૈવ જ્ઞાનકર્મપરાયણાઃ ।
કર્મેદમનુમન્યન્તાં સફલં સાધ્વનુષ્ઠિતમ્ ॥ ૧૬૯॥

લૌકિકા બ્રાહ્મણાઃ સર્વે ક્ષત્રિયાશ્ચ વિશઃ ક્રમાત્ ।
વેદવેદાઙ્ગતત્ત્વજ્ઞાઃ સર્વશાસ્ત્રવિશારદાઃ ॥ ૧૭૦॥

સાઙ્ખ્યા વૈશેષિકાશ્ચૈવ યૌગા નૈયાયિકા નરાઃ ।
સૌરા બ્રહ્માસ્તથા રૌદ્રા વૈષ્ણવાશ્ચાપરે નરાઃ ॥ ૧૭૧॥

શિષ્ટાઃ સર્વે વિશિષ્ટાશ્ચ શિવશાસનયન્ત્રિતાઃ ।
કર્મેદમનુમન્યન્તાં મમાભિપ્રેતસાધકમ્ ॥ ૧૭૨॥

શૈવાઃ સિદ્ધાન્તમાર્ગસ્થાઃ શૈવાઃ પાશુપતાસ્તથા ।
શૈવા મહાવ્રતધરાઃ શૈવાઃ કાપાલિકાઃ પરે ॥ ૧૭૩॥

શિવાજ્ઞાપાલકાઃ પૂજ્યા મમાપિ શિવશાસનાત્ ।
સર્વે મમાનુગૃહ્ણન્તુ શંસન્તુ સફલક્રિયામ્ ॥ ૧૭૪॥

દક્ષિણજ્ઞાનનિષ્ઠાશ્ચ દક્ષિણોત્તરમાર્ગગાઃ ।
અવિરોધેન વર્તન્તાં મન્ત્રં શ્રેયોઽર્થિનો મમ ॥ ૧૭૫॥

નાસ્તિકાશ્ચ શઠાશ્ચૈવ કૃતઘ્નાશ્ચૈવ તામસાઃ ।
પાષણ્ડાશ્ચાતિપાપાશ્ચ વર્તન્તાં દૂરતો મમ ॥ ૧૭૬॥

બહુભિઃ કિં સ્તુતૈરત્ર યેઽપિ કેઽપિ ચિદાસ્તિકાઃ ।
સર્વે મામનુગૃહ્ણન્તુ સન્તઃ શંસન્તુ મઙ્ગલમ્ ॥ ૧૭૭॥

નમઃ શિવાય સામ્બાય સસુતાયાદિહેતવે ।
પઞ્ચાવરણરૂપેણ પ્રપઞ્ચેનાવૃતાય તે ॥ ૧૭૮॥

ઇત્યુક્ત્વા દણ્ડવદ્ ભૂમૌ પ્રણિપત્ય શિવં શિવામ્ ।
જપેત્પઞ્ચાક્ષરીં વિદ્યામષ્ટોત્તરશતાવરામ્ ॥ ૧૭૯॥

તથૈવ શક્તિવિદ્યાં ચ જપિત્વા તત્સમર્પણમ્ ।
કૃત્વા તં ક્ષમયિત્વેશં પૂજાશેષં સમાપયેત્ ॥ ૧૮૦॥

એતત્પુણ્યતમં સ્તોત્રં શિવયોર્હૃદયઙ્ગમમ્ ।
સર્વાભીષ્ટપ્રદં સાક્ષાદ્ભુક્તિમુક્ત્યૈકસાધનમ્ ॥ ૧૮૧॥

ય ઇદં કીર્તયેન્નિત્યં શ‍ૃણુયાદ્વા સમાહિતઃ ।
સ વિધૂયાશુ પાપાનિ શિવસાયુજ્યમાપ્નુયાત્ ॥ ૧૮૨॥

ગોઘ્નશ્ચૈવ કૃતઘ્નશ્ચ વીરહા ભ્રૂણહાપિ વા ।
શરણાગતઘાતી ચ મિત્રવિશ્રમ્ભઘાતકઃ ॥ ૧૮૩॥

દુષ્ટપાપસમાચારો માતૃહા પિતૃહાપિ વા ।
સ્તવેનાનેન જપ્તેન તત્તત્પાપાત્ પ્રમુચ્યતે ॥ ૧૮૪॥

દુઃસ્વપ્નાદિમહાનર્થસૂચકેષુ ભયેષુ ચ ।
યદિ સઙ્કીર્તયેદેતન્ન તતોઽનર્થભાગ્ભવેત્ ॥ ૧૮૫॥

આયુરારોગ્યમૈશ્વર્યં યચ્ચાન્યદપિ વાઞ્છિતમ્ ।
સ્તોત્રસ્યાસ્ય જપે તિષ્ઠંસ્તત્સર્વં લભતે નરઃ ॥ ૧૮૬॥

અસમ્પૂજ્ય શિવસ્તોત્રં જપાત્ફલમુદાહૃતમ્ ।
સમ્પૂજ્ય ચ જપે તસ્ય ફલં વક્તું ન શક્યતે ॥ ૧૮૭॥

આસ્તામિયં ફલાવાપ્તિરસ્મિન્ સઙ્કીર્તિતે સતિ ।
સાર્ધમમ્બિકયા દેવઃ શ્રુત્યૈવં દિવિ તિષ્ઠતિ ॥ ૧૮૮॥

તસ્માન્નભસિ સમ્પૂજ્ય દેવદેવં સહોમયા ।
કૃતાઞ્જલિપુટસ્તિષ્ઠન્ સ્તોત્રમેતદુદીરયેત્ ॥ ૧૮૯॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શિવમહાસ્તોત્રવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૨. દ્વાત્રિંશોઽધ્યાયઃ । ઐહિકસિદ્ધિકર્મવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
એતત્તે કથિતં કૃષ્ણ કર્મેહામુત્ર સિદ્ધિદમ્ ।
ક્રિયાતપોજપધ્યાનસમુચ્ચયમયં પરમ્ ॥ ૧॥

અથ વક્ષ્યામિ શૈવાનામિહૈવ ફલદં નૃણામ્ ।
પૂજાહોમજપધ્યાનતપોદાનમયં મહત્ ॥ ૨॥

તત્ર સંસાધયેત્પૂર્વં મન્ત્રં મન્ત્રાર્થવિત્તમઃ ।
દૃષ્ટસિદ્ધિકરં કર્મ નાન્યથા ફલદં યતઃ ॥ ૩॥

સિદ્ધમન્ત્રોઽપ્યદૃષ્ટેન પ્રબલેન તુ કેનચિત્ ।
પ્રતિબન્ધફલં કર્મ ન કુર્યાત્સહસા બુધઃ ॥ ૪॥

તસ્ય તુ પ્રતિબન્ધસ્ય કર્તું શક્યેહ નિષ્કૃતિઃ ।
પરીક્ષ્ય શકુનાદ્યૈસ્તદાદૌ નિષ્કૃતિમાચરેત્ ॥ ૫॥

યોઽન્યથા કુરુતે મોહાત્કર્મૈહિકફલં નરઃ ।
ન તેન ફલભાક્સ સ્યાત્પ્રાપ્નુયાચ્ચોપહાસ્યતામ્ ॥ ૬॥

અવિસ્રબ્ધો ન કુર્વીત કર્મ દૃષ્ટફલં ક્વચિત્ ।
સ ખલ્વશ્રદ્ધધાનઃ સ્યાન્નાશ્રદ્ધઃ ફલમૃચ્છતિ ॥ ૭॥

નાપરાધોઽસ્તિ દેવસ્ય કર્મણ્યપિ તુ નિષ્ફલે ।
યથોક્તકારિણાં પુંસામિહૈવ ફલદર્શનાત્ ॥ ૮॥

સાધકઃ સિદ્ધમન્ત્રશ્ચ નિરસ્તપ્રતિબન્ધકઃ ।
વિશ્વસ્તઃ શ્રદ્ધધાનશ્ચ કુર્વન્નાપ્નોતિ તત્ફલમ્ ॥ ૯॥

અથવા તત્ફલાવાપ્ત્યૈ બ્રહ્મચર્યરતો ભવેત્ ।
રાત્રૌ હવિષ્યમશ્નીયાત્પાયસં વા ફલાનિ વા ॥ ૧૦॥

હિંસાદિ યન્નિષિદ્ધં સ્યાન્ન કુર્યાન્મનસાપિ તત્ ।
સદા ભસ્માનુલિપ્તાઙ્ગઃ સુવેષશ્ચ શુચિર્ભવેત્ ॥ ૧૧॥

ઇત્થમાચારવાન્ભૂત્વા સ્વાનુકૂલે શુભેઽહનિ ।
પૂર્વોક્તલક્ષણે દેશે પુષ્પદામાદ્યલઙ્કૃતે ॥ ૧૨॥

આલિપ્ય શકૃતા ભૂમિં હસ્તમાનાવરાં યથા ।
વિલિખેત્કમલે ભદ્રે દીપ્યમાનં સ્વતેજસા ॥ ૧૩॥

તસ્મજામ્બૂનદમયમષ્ટપત્રં સકેસરમ્ ।
મધ્યે કર્ણિકયા યુક્તં સર્વરત્નૈરલઙ્કૃતમ્ ॥ ૧૪॥

સ્વાકારસદૃશેનૈવ નાલેન ચ સમન્વિતમ્ ।
તાદૃશે સ્વર્ણનિર્માણે કન્દે સમ્યગ્વિધાનતઃ ॥ ૧૫॥

તત્રાણિમાદિકં સર્વં સઙ્કલ્પ્ય મનસા પુનઃ ।
રત્નજં વાથ સૌવર્ણં સ્ફટિકં વા સલક્ષણમ્ ।
લિઙ્ગં સવેદિકં ચૈવ સ્થાપયિત્વા વિધાનતઃ ॥ ૧૬॥

તત્રાવાહ્ય યજેદ્દેવં સામ્બં સગણમવ્યયમ્ ।
તત્ર માહેશ્વરી કલ્પ્યા મૂર્તિર્મૂર્તિમતઃ પ્રભોઃ ॥ ૧૭॥

ચતુર્ભુજા ચતુર્વક્ત્રા સર્વાભરણભૂષિતા ।
શાર્દૂલચર્મવસના કિઞ્ચિદ્વિહસિતાનના ॥ ૧૮॥

વરદાભયહસ્તા ચ મૃગટઙ્કધરા તથા ।
અથવાષ્ટભુજા ચિન્ત્યા ચિન્તકસ્ય યથારુચિ ॥ ૧૯॥

તદા ત્રિશૂલપરશુખડ્ગવજ્રાણિ દક્ષિણે ।
વામે પાશાઙ્કુશૌ તદ્વત્ખેટં નાગં ચ બિભ્રતી ॥ ૨૦॥

બાલાર્કસદૃશપ્રખ્યા પ્રતિવક્ત્રં ત્રિલોચના ।
તસ્યાઃ પૂર્વમુખં સૌમ્યં સ્વાકારસદૃશપ્રભમ્ ॥ ૨૧॥

દક્ષિણં નીલજીમૂતસદૃશં ઘોરદર્શનમ્ ।
ઉત્તરં વિદ્રુમપ્રખ્યં નીલાલકવિભૂષિતમ્ ॥ ૨૨॥

પશ્ચિમં પૂર્ણચન્દ્રાભં સૌમ્યમિન્દુકલાધરમ્ ।
તદઙ્કમણ્ડલારૂઢા શક્તિર્માહેશ્વરી પરા ॥ ૨૩॥

મહાલક્ષ્મીરિતિ ખ્યાતા શ્યામા સર્વમનોહરા ।
મૂર્તિં કૃત્વૈવમાકારાં સકલીકૃત્ય ચ ક્રમાત્ ॥ ૨૪॥

મૂર્તિમન્તમથાવાહ્ય યજેત્પરમકારણમ્ ।
સ્નાનાર્થે કલ્પયેત્તત્ર પઞ્ચગવ્યં તુ કાપિલમ્ ॥ ૨૫॥

પઞ્ચામૃતં ચ પૂર્ણાનિ બીજાનિ ચ વિશેષતઃ ।
પુરસ્તાન્મણ્ડલં કૃત્વા રત્નચૂર્ણાદ્યલઙ્કૃતમ્ ॥ ૨૬॥

કર્ણિકાયાં પ્રવિન્યસ્યેદીશાનકલશં પુનઃ ।
સદ્યાદિકલશાન્પશ્ચાત્પરિતસ્તસ્ય કલ્પયેત્ ॥ ૨૭॥

તતો વિદ્યેશકલશાનષ્ટૌ પૂર્વાદિવત્ક્રમાત્ ।
તીર્થામ્બુપૂરિતાન્કૃત્વા સૂત્રેણાવેષ્ટ્ય પૂર્વવત્ ॥ ૨૮॥

પુણ્યદ્રવ્યાણિ નિક્ષિપ્ય સમન્ત્રં સવિધાનકમ્ ।
દુકૂલાદ્યેન વસ્ત્રેણ સમાચ્છાદ્ય સમન્તતઃ ॥ ૨૯॥

સર્વત્ર મન્ત્રં વિન્યસ્ય તત્તન્મન્ત્રપુરઃ સરમ્ ।
સ્નાનકાલે તુ સમ્પ્રાપ્તે સર્વમઙ્ગલનિઃસ્વનૈઃ ॥ ૩૦॥

પઞ્ચગવ્યાદિભિશ્ચૈવ સ્નાપયેત્પરમેશ્વરમ્ ।
તતઃ કુશોદકાદ્યાનિ સ્વર્ણરત્નોદકાન્યપિ ॥ ૩૧॥

ગન્ધપુષ્પાદિસિદ્ધાનિ મન્ત્રસિદ્ધાનિ ચ ક્રમાત્ ।
ઉદ્ધૃત્યોદ્ધૃત્ય મન્ત્રેણ તૈસ્તૈઃ સ્નાપ્ય મહેશ્વરમ્ ॥ ૩૨॥

ગન્ધપુષ્પાદિદીપાંશ્ચ પૂજાકર્મ સમાચરેત્ ।
પલાવરઃ સ્યાદાલેપ એકાદશપલોત્તરઃ ॥ ૩૩॥

સુવર્ણરત્નપુષ્પાણિ શુભાનિ સુરભીણિ ચ ।
નીલોત્પલાદ્યુત્પલાનિ બિલ્વપત્રાણ્યનેકશઃ ॥ ૩૪॥

કમલાનિ ચ રક્તાનિ શ્વેતાન્યપિ ચ શમ્ભવે ।
કૃષ્ણાગુરૂદ્ભવો ધૂપઃ સકર્પૂરાજ્યગુગ્ગુલઃ ॥ ૩૫॥

કપિલાઘૃતસંસિદ્ધા દીપાઃ કર્પૂરવર્તિજાઃ ।
પઞ્ચ બ્રહ્મષડઙ્ગાનિ પૂજ્યાન્યાવરણાનિ ચ ॥ ૩૬॥

નૈવેદ્યઃ પયસા સિદ્ધઃ સ ગુડાજ્યો મહાચરુઃ ।
પાટલોત્પલપદ્માદ્યૈઃ પાનીયં ચ સુગન્ધિતમ્ ॥ ૩૭॥

પઞ્ચસૌગન્ધિકોપેતં તામ્બૂલં ચ સુસંસ્કૃતમ્ ।
સુવર્ણરત્નસિદ્ધાનિ ભૂષણાનિ વિશેષતઃ ॥ ૩૮॥

વાસાંસિ ચ વિચિત્રાણિ સૂક્ષ્માણિ ચ નવાનિ ચ ।
દર્શનીયાનિ દેયાનિ ગાનવાદ્યાદિભિઃ સહ ॥ ૩૯॥

જપશ્ચ મૂલમન્ત્રસ્ય લક્ષઃ પરમસઙ્ખ્યયા ।
એકાવરા ત્ર્યુત્તરા ચ પૂજા ફલવશાદિહ ॥ ૪૦॥

દશસઙ્ખ્યાવરો હોમઃ પ્રતિદ્રવ્યં શતોત્તરઃ ।
ઘોરરૂપશ્શિવશ્ચિન્ત્યો મારણોચ્ચાટનાદિષુ ॥ ૪૧॥

શિવલિઙ્ગે શિવાગ્નૌ ચ હ્યન્યાસુ પ્રતિમાસુ ચ ।
ચિન્ત્યઃ સૌમ્યતનુઃ શમ્ભુઃ કાર્યે શાન્તિકપૌષ્ટિકે ॥ ૪૨॥

આયસૌ સ્રુક્સ્રુવૌ કાર્યૌ મારણાદિસુ કર્મસુ ।
તદન્યત્ર તુ સૌવર્ણૌ શાન્તિકાદ્યેષુ કૃત્સ્નશઃ ॥ ૪૩॥

દૂર્વયા ઘૃતગોક્ષીરમિશ્રયા મધુના તથા ।
ચરુણા સઘૃતેનૈવ કેવલં પયસાપિ વા ॥ ૪૪॥

જુહુયાન્મૃત્યુવિજયે તિલૈ રોગોપશાન્તયે ।
ઘૃતેન પયસા ચૈવ કમલૈર્વાથ કેવલૈઃ ॥ ૪૫॥

સમૃદ્ધિકામો જુહુયાન્મહાદારિદ્ર્યશાન્તયે ।
જાતીપુષ્પેણ વશ્યાર્થી જુહુયાત્સઘૃતેન તુ ॥ ૪૬॥

ઘૃતેન કરવીરૈશ્ચ કુર્યાદાકર્ષણં દ્વિજઃ ।
તૈલેનોચ્ચાટનં કુર્યાત્સ્તમ્ભનં મધુના પુનઃ ॥ ૪૭॥

સ્તમ્ભનં સર્ષપેણાપિ લશુનેન તુ પાતનમ્ ।
તાડનં રુધિરેણ સ્યાત્ખરસ્યોષ્ટ્રસ્ય ચોભયોઃ ॥ ૪૮॥

મારણોચ્ચાટને કુર્યાદ્રોહિબીજૈસ્તિલાન્વિતૈઃ ।
વિદ્વેષણં ચ તૈલેન કુર્યાલ્લાઙ્ગલકસ્ય તુ ॥ ૪૯॥

બન્ધનં રોહિબીજેન સેનાસ્તમ્ભનમેવ ચ ।
રક્તસર્ષપસમ્મિશ્રૈર્હોમદ્રવ્યૈરશેષતઃ ॥ ૫૦॥

હસ્તયન્ત્રોદ્ભવૈસ્તૈલૈર્જુહુયાદાભિચારિકે ।
કટુકીતુષસંયુક્તૈઃ કાર્પાસાસ્થિભિરેવ ચ ॥ ૫૧॥

સર્ષપૈસ્તૈલસમ્મિશ્રૈર્જુહુયાદાભિચારિકે ।
જ્વરોપશાન્તિદં ક્ષીરં સૌભાગ્યફલદં તથા ॥ ૫૨॥

સર્વસિદ્ધિકરો હોમઃ ક્ષૌદ્રાજ્યદધિભિર્યુતૈઃ ।
ક્ષીરેણ તન્દુલૈશ્ચૈવ ચરુણા કેવલેન વા ॥ ૫૩॥

શાન્તિકં પૌષ્ટિકં વાપિ સપ્તભિઃ સમિદાદિભિઃ ।

દ્રવ્યૈર્વિશેષતો હોમે વશ્યમાકર્ષણં તથા ॥ ૫૪॥

વશ્યમાકર્ષણં ચૈવ શ્રીપદં ચ વિશેષતઃ ।
બિલ્વપત્રૈસ્તુ હવનં શત્રોર્વિજયદં તથા ॥ ૫૫॥

સમિધઃ શાન્તિકાર્યેષુ પાલાશખદિરાદિકાઃ ।
કરવીરાર્કજાઃ ક્રૌર્યે કણ્ટકિન્યશ્ચ વિગ્રહે ॥ ૫૬॥

પ્રશાન્તઃ શાન્તિકં કુર્યાત્પૌષ્ટિકં ચ વિશેષતઃ ।
નિર્ઘૃણઃ ક્રુદ્ધચિત્તસ્તુ પ્રકુર્યાદાભિચારિકમ્ ॥ ૫૭॥

અતીવ દુરવસ્થાયાં પ્રતીકારાન્તરં ન ચેત્ ।
આતતાયિનમુદ્દિશ્ય પ્રકુર્યાદાભિચારિકમ્ ॥ ૫૮॥

સ્વરાષ્ટ્રપતિમુદ્દિશ્ય ન કુર્યાદાભિચારિકમ્ ।
યદ્યાસ્તિકઃ સુધર્મિષ્ઠો માન્યો વા યોઽપિ કોઽપિ વા ॥ ૫૯॥

તમુદ્દિશ્યાપિ નો કુર્યાદાતતાયિનમપ્યુત ।
મનસા કર્મણા વાચા યોઽપિ કોઽપિ શિવાશ્રિતઃ ॥ ૬૦॥

સ્વરાષ્ટ્રપતિમુદ્દિશ્ય શિવા શ્રિતમથાપિ વા ।
કૃત્વાભિચારિકં કર્મ સદ્યો વિનિપતેન્નરઃ ॥ ૬૧॥

સ્વરાષ્ટ્રપાલકં તસ્માચ્છિવભક્તં ચ કઞ્ચન ।
ન હિંસ્યાદભિચારાદ્યૈર્યદીચ્છેત્સુખમાત્મનઃ ॥ ૬૨॥

અન્યં કમપિ ચોદ્દિશ્ય કૃત્વા વૈ મારણાદિકમ્ ।
પશ્ચાત્તાપેન સંયુક્તઃ પ્રાયશ્ચિત્તં સમાચરેત્ ॥ ૬૩॥

બાણલિઙ્ગેઽપિ વા કુર્યાન્નિર્ધનો ધનવાનપિ ।
સ્વયમ્ભૂતેઽથ વા લિઙ્ગે આર્ષકે વૈદિકેઽપિ વા ॥ ૬૪॥

અભાવે હેમરત્નાનામશક્તૌ ચ તદર્જને ।
મનસૈવાચરેદેતદ્ દ્રવ્યૈર્વા પ્રતિરૂપકૈઃ ॥ ૬૫॥

ક્વચિદંશે તુ યઃ શક્તસ્ત્વશક્તઃ ક્વચિદંશકે ।
સોઽપિ શક્ત્યનુસારેણ કુર્વંશ્ચેત્ફલમૃચ્છતિ ॥ ૬૬॥

કર્મણ્યનુષ્ઠિતેઽપ્યસ્મિન્ફલં યત્ર ન દૃશ્યતે ।
દ્વિસ્ત્રિર્વાવર્તયેત્તત્ર સર્વથા દૃશ્યતે ફલમ્ ॥ ૬૭॥

પૂજોપયુક્તં યદ્ દ્રવ્યં હેમરત્નાદ્યનુત્તમમ્ ।
તત્સર્વં ગુરવે દદ્યાદ્ દક્ષિણાં ચ તતઃ પૃથક્ ॥ ૬૮॥

સ ચેન્નેચ્છતિ તત્સર્વં શિવાય વિનિવેદયેત્ ।
અથવા શિવભક્તેભ્યો નાન્યેભ્યસ્તુ પ્રદીયતે ॥ ૬૯॥

યઃ સ્વયં સાધયેચ્છક્ત્યા ગુર્વાદિનિરપેક્ષયા ।
સોઽપ્યેવમાચરેદત્ર ન ગૃહ્ણીયાત્સ્વયં પુનઃ ॥ ૭૦॥

સ્વયં ગૃહ્ણાતિ યો લોભાત્પૂજાઙ્ગદ્રવ્યમુત્તમમ્ ।
કાઙ્ક્ષિતં ન લભેન્મૂઢો નાત્ર કાર્યા વિચારણા ॥ ૭૧॥

અર્ચિતં યત્તુ તલ્લિઙ્ગં ગૃહ્ણીયાદ્વા ન વા સ્વયમ્ ।
ગૃહ્ણીયાદ્યદિ તન્નિત્યં સ્વયં વાન્યોઽપિ વાર્ચયેત્ ॥ ૭૨॥

યથોક્તમેવ કર્મૈતદાચરેદ્યોઽનપાયતઃ ।
ફલં વ્યભિચરેન્નૈવમિત્યતઃ કિં પ્રરોચકમ્ ॥ ૭૩॥

તથાપ્યુદ્દેશતો વક્ષ્યે કર્મણઃ સિદ્ધિમુત્તમામ્ ।
અપિ શત્રુભિરાક્રાન્તો વ્યાધિભિર્વાપ્યનેકશઃ ॥ ૭૪॥

મૃત્યોરાસ્યગતશ્ચાપિ મુચ્યતે નિરપાયતઃ ।
પૂજાયતેઽતિકૃપણો રિક્તો વૈશ્રવણાયતે ॥ ૭૫॥

કામાયતે વિરૂપોઽપિ વૃદ્ધોઽપિ તરુણાયતે ।
શત્રુર્મિત્રાયતે સદ્યો વિરોધી કિઙ્કરાયતે ॥ ૭૬॥

વિષાયતે યદમૃતં વિષમપ્યમૃતાયતે ।
સ્થલાયતે સમુદ્રોઽપિ સ્થલમપ્યર્ણવાયતે ॥ ૭૭॥

મહીધરાયતે શ્વભ્રં સ ચ શ્વભ્રાયતે ગિરિઃ ।
પદ્માકરાયતે વહ્નિઃ સરો વૈશ્વાનરાયતે ॥ ૭૮॥

વનાયતે યદુદ્યાનં તદુદ્યાનાયતે વનમ્ ।
સિંહાયતે મૃગઃ ક્ષુદ્રઃ સિંહઃ ક્રીડામૃગાયતે ॥ ૭૯॥

સ્ત્રિયોઽભિસારિકાયન્તે લક્ષ્મીઃ સુચરિતાયતે ।
સ્વૈરપ્રેષ્યાયતે વાણી કીર્તિસ્તુ ગણિકાયતે ॥ ૮૦॥

સ્વૈરાચારાયતે મેધા વજ્રસૂચીયતે મનઃ ।
મહાવાતાયતે શક્તિર્બલં મત્તગજાયતે ॥ ૮૧॥

સ્તમ્ભાયતે સમુદ્યોગૈઃ શત્રુપક્ષે સ્થિતા ક્રિયા ।
શત્રુપક્ષાયતેऽરીણાં સર્વ એવ સુહૃજ્જનઃ ॥ ૮૨॥

શત્રવઃ કુણપાયન્તે જીવન્તોऽપિ સબાન્ધવાઃ ।
આપન્નોऽપિ ગતારિષ્ટઃ સ્વયં ખલ્વમૃતાયતે ॥ ૮૩॥

રસાયનાયતે નિત્યમપથ્યમપિ સેવિતમ્ ।
અનિશં ક્રિયમાણાપિ રતિસ્ત્વભિનવાયતે ॥ ૮૪॥

અનાગતાદિકં સર્વં કરસ્થામલકાયતે ।
યાદૃચ્છિકફલાયન્તે સિદ્ધયોऽપ્યણિમાદયઃ ॥ ૮૫॥

બહુનાત્ર કિમુક્તેન સર્વકામાર્થસિદ્ધિષુ ।
અસ્મિન્કર્મણિ નિર્વૃત્તે ત્વનવાપ્યં ન વિદ્યતે ॥ ૮૬॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે ઐહિકસિદ્ધિકર્મવર્ણનં નામ દ્વાત્રિંશોऽધ્યાયઃ ॥ ૭.૨.૩૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૩. ત્રયસ્ત્રિંશોऽધ્યાયઃ । આમુષ્મિકકર્મવિધિવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ કેવલામુષ્મિકં વિધિમ્ ।
નૈતેન સદૃશં કિઞ્ચિત્કર્માસ્તિ ભુવનત્રયે ॥ ૧॥

પુણ્યાતિશયસંયુક્તઃ સર્વૈર્દેવૈરનુષ્ઠિતઃ ।
બ્રહ્મણા વિષ્ણુના ચૈવ રુદ્રેણ ચ વિશેષતઃ ॥ ૨॥

ઇન્દ્રાદિલોકપારૈશ્ચ સૂર્યાદ્યૈર્નવભિર્ગ્રહૈઃ ।
વિશ્વામિત્રવસિષ્ઠાદ્યૈર્બ્રહ્મવિદ્ભિર્મહર્ષિભિઃ ॥ ૩॥

શ્વેતાગસ્ત્યદધીચાદ્યૈરસ્માભિશ્ચ શિવાશ્રિતૈઃ ।
નન્દીશ્વરમહાકાલભૃઙ્ગીશાદ્યૈર્ગણેશ્વરૈઃ ॥ ૪॥

પાતાલવાસિભિર્દૈત્યૈઃ શેષાદ્યૈશ્ચ મહોરગૈઃ ।

સિદ્ધૈર્યક્ષૈશ્ચ ગન્ધર્વૈ રક્ષોભૂતપિશાચકૈઃ ॥ ૫॥

સ્વં સ્વં પદમનુપ્રાપ્તં સર્વૈરયમનુષ્ઠિતઃ ।
અનેન વિધિના સર્વે દેવા દેવત્વમાગતાઃ ॥ ૬॥

બ્રહ્મા બ્રહ્મત્વમાપન્નો વિષ્ણુર્વિષ્ણુત્વમાગતઃ ।
રુદ્રો રુદ્રત્વમાપન્ન ઇન્દ્રશ્ચેન્દ્રત્વમાગતઃ ॥ ૭॥

ગણેશશ્ચ ગણેશત્વમનેન વિધિના ગતઃ ।
સિતચન્દનતોયેન લિઙ્ગં સ્નાપ્ય શિવં શિવામ્ ।
શ્વેતૈર્વિકસિતૈઃ પદ્મૈઃ સમ્પૂજ્ય પ્રણિપત્ય ચ ॥ ૮॥

તત્ર પદ્માસનં રમ્યં કૃત્વા લક્ષણસંયુતમ્ ।
વિભવે સતિ હેમાદ્યૈ રત્નાદ્યૈર્વા સ્વશક્તિતઃ ॥ ૯॥

મધ્યે કેસરજાલાસ્ય સ્થાપ્ય લિઙ્ગં કનીયસમ્ ।
અઙ્ગુષ્ઠપ્રતિમં રમ્યં સર્વગન્ધમયં શુભમ્ ॥ ૧૦॥

દક્ષિણે સ્થાપયિત્વા તુ બિલ્વપત્રૈઃ સમર્ચયેત્ ।
અગુરું દક્ષિણે પાર્શ્વે પશ્ચિમે તુ મનઃશિલામ્ ॥ ૧૧॥

ઉત્તરે ચન્દનં દદ્યાદ્ધરિતાલં તુ પૂર્વતઃ ।
સુગન્ધૈઃ કુસુમૈ રમ્યૈર્વિચિત્રૈશ્ચાપિ પૂજયેત્ ॥ ૧૨॥

ધૂપં કૃષ્ણાગુરું દદ્યાત્સર્વતશ્ચ સગુગ્ગુલમ્ ।
વાસાંસિ ચાતિસૂક્ષ્માણિ વિકાશાનિ નિવેદયેત્ ॥ ૧૩॥

પાયસં ઘૃતસમ્મિશ્રં ઘૃતદીપાંશ્ચ દાપયેત્ ।
સર્વં નિવેદ્ય મન્ત્રેણ તતો ગચ્છેત્પ્રદક્ષિણામ્ ॥ ૧૪॥

પ્રણમ્ય ભક્ત્યા દેવેશં સ્તુત્વા ચાન્તે ક્ષમાપયેત્ ।
સર્વોપહારસમ્મિશ્રં તતો લિઙ્ગં નિવેદયેત્ ॥ ૧૫॥

શિવાય શિવમન્ત્રેણ દક્ષિણામૂર્તિમાશ્રિતઃ ।
એવં યોઽર્ચયતે નિત્યં પઞ્ચગન્ધમયં શુભમ્ ॥ ૧૬॥

સર્વપાપવિનિર્મુક્તઃ શિવલોકે મહીયતે ।
એતદ્ વ્રતોત્તમં ગુહ્યં શિવલિઙ્ગમહાવ્રતમ્ ॥ ૧૭॥

ભક્તસ્ય તે સમાખ્યાતં ન દેયં યસ્ય કસ્યચિત્ ।
દેયં ચ શિવભક્તેભ્યઃ શિવેન કથિતં પુરા ॥ ૧૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે આમુષ્મિકકર્મવિધિવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૪. ચતુસ્ત્રિંશોઽધ્યાયઃ । હરિવિધિમોહવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
નિત્યનૈમિત્તિકાત્કામ્યાદ્યા સિદ્ધિરિહ કીર્તિતા ।
સા સર્વા લભ્યેત સદ્યો લિઙ્ગબેરપ્રતિષ્ઠયા ॥ ૧॥

સર્વો લિઙ્ગમયો લોકઃ સર્વં લિઙ્ગે પ્રતિષ્ઠિતમ્ ।
તસ્માત્પ્રતિષ્ઠિતે લિઙ્ગે ભવેત્સર્વં પતિષ્ઠિતમ્ ॥ ૨॥

બ્રહ્મણા વિષ્ણુના વાપિ રુદ્રેણાન્યેન કેન વા ।
લિઙ્ગપ્રતિષ્ઠામુત્સૃજ્ય ક્રિયતે સ્વપદસ્થિતિઃ ॥ ૩॥

કિમન્યદિહ વક્તવ્યં પ્રતિષ્ઠાં પ્રતિ કારણમ્ ।
પર્તિષ્ઠિતં શિવેનાપિ લિઙ્ગં વૈશ્વેશ્વરં યતઃ ॥ ૪॥

તસ્માત્સર્વપ્રયત્નેન પરત્રેહ ચ શર્મણે ।
સ્થાપયેત્પરમેશસ્ય લિઙ્ગં બેરમથાપિ વા ॥ ૫॥

શ્રીકૃષ્ણ ઉવાચ ।
કિમિદં લિઙ્ગમાખ્યાતં કથં લિઙ્ગી મહેશ્વરઃ ।
કથં ચ લિઙ્ગભાવોઽસ્ય કસ્માદસ્મિઞ્છિવોઽર્ચ્યતે ॥ ૬॥

ઉપમન્યુરુવાચ ।
અવ્યક્તં લિઙ્ગમાખ્યાતં ત્રિગુણપ્રભવાપ્યયમ્ ।
અનાદ્યનન્તં વિશ્વસ્ય યદુપાદાનકારણમ્ ॥ ૭॥

તદેવ મૂલપ્રકૃતિર્માયા ચ ગગનાત્મિકા ।
તત એવ સમુત્પન્નં જગદેતચ્ચરાચરમ્ ॥ ૮॥

અશુદ્ધં ચૈવ શુદ્ધં યચ્છુદ્ધાશુદ્ધં ચ તત્ત્રિધા ।

તતઃ શિવો મહેશશ્ચ રુદ્રો વિષ્ણુઃ પિતામહઃ ॥ ૯॥

ભૂતાનિ ચેન્દ્રિયૈર્જાતા લીયન્તેઽત્ર શિવાજ્ઞયા ।
અત એવ શિવો લિઙ્ગો લિઙ્ગમાજ્ઞાપયેદ્યતઃ ॥ ૧૦॥

યતો ન તદનાજ્ઞાતં કાર્યાય પ્રભવેત્સ્વતઃ ।
તતો જાતસ્ય વિશ્વસ્ય તત્રૈવ વિલયો યતઃ ॥ ૧૧॥

અનેન લિઙ્ગતા તસ્ય ભવેન્નાન્યેન કેનચિત્ ।
લિઙ્ગં ચ શિવયોર્દેહસ્તાભ્યાં યસ્માદધિષ્ઠિતમ્ ॥ ૧૨॥

અતસ્તત્ર શિવઃ સામ્બો નિત્યમેવ સમર્ચયેત્ ।
લિઙ્ગવેદી મહાદેવી લિઙ્ગં સાક્ષાન્મહેશ્વરઃ ॥ ૧૩॥

તયોઃ સમ્પૂજનાદેવ સ ચ સા ચ સમર્ચિતૌ ।
ન તયોર્લિઙ્ગદેહત્વં વિદ્યતે પરમાર્થતઃ ॥ ૧૪॥

યતસ્ત્વેતૌ વિશુદ્ધૌ તૌ દેહસ્તદુપચારતઃ ।
તદેવ પરમા શક્તિઃ શિવસ્ય પરમાત્મનઃ ॥ ૧૫॥

શક્તિરાજ્ઞાં યદાદત્તે પ્રસૂતે તચ્ચરાચરમ્ ।
ન તસ્ય મહિમા શક્યો વક્તું વર્ષશતૈરપિ ॥ ૧૬॥

યેનાદૌ મોહિતૌ સ્યાતાં બ્રહ્મનારાયણાવપિ ।
પુરા ત્રિભુવનસ્યાસ્ય પ્રલયે સમુપસ્થિતે ॥ ૧૭॥

વારિશય્યાગતો વિષ્ણુઃ સુષ્વાપાનાકુલઃ સુખમ્ ।
યદૃચ્છયા ગતસ્તત્ર બ્રહ્મા લોકપિતામહઃ ॥ ૧૮॥

દદર્શ પુણ્ડરીકાક્ષં સ્વપન્તં તમનાકુલમ્ ।
માયયા મોહિતઃ શમ્ભોર્વિષ્ણુમાહ પિતામહઃ ॥ ૧૯॥

કસ્ત્વં વદેત્યમર્ષેણ પ્રહૃત્યોત્થાપ્ય માધવમ્ ।
સ તુ હસ્તપ્રહારેણ તીવ્રેણાભિહતઃ ક્ષણાત્ ॥ ૨૦॥

પ્રબુદ્ધોત્થાય શયનાદ્દદર્શ પરમેષ્ઠિનમ્ ।
તમાહ ચાન્તઃ સઙ્કુદ્ધઃ સ્વયમક્રુદ્ધવદ્ધરિઃ ॥ ૨૧॥

કુતસ્ત્વમાગતો વત્સ કસ્માત્ત્વં વ્યાકુલો વદ ।
ઇતિ વિષ્ણુવચઃ શ્રુત્વા પ્રભુત્વગુણસૂચકમ્ ॥ ૨૨॥

રજસા બદ્ધવૈરસ્તં બ્રહ્મા પુનરભાષત ।
વત્સેતિ માં કુતો બ્રૂષે ગુરુઃ શિષ્યમિવાત્મનઃ ॥ ૨૩॥

માં ન જાનાસિ કિં નાથં પ્રપઞ્ચો યસ્ય મે કૃતિઃ ।
ત્રિધાત્માનં વિભજ્યેદં સૃષ્ટ્વાથ પરિપાલ્યતે ॥ ૨૪॥

સંહરામિ નમે કશ્ચિત્સ્રષ્ટા જગતિ વિદ્યતે ।
ઇત્યુક્તે સતિ સોઽપ્યાહ બ્રહ્માણં વિષ્ણુરવ્યયઃ ॥ ૨૫॥

અહમેવાદિકર્તાસ્ય હર્તા ચ પરિપાલકઃ ।
ભવાનપિ મમૈવાઙ્ગાદવતીર્ણઃ પુરાવ્યયાત્ ॥ ૨૬॥

મન્નિયોગાત્ત્વમાત્માનં ત્રિધા કૃત્વા જગત્ત્રયમ્ ।
સૃજસ્યવસિ ચાન્તે તત્પુનઃ પ્રતિસૃજસ્યપિ ॥ ૨૭॥

વિસ્મૃતોઽસિ જગન્નાથં નારાયણમનામયમ્ ।
તવાપિ જનકં સાક્ષાન્મામેવમવમન્યસે ॥ ૨૮॥

તવાપરાધો નાસ્ત્યત્ર ભ્રાન્તોઽસિ મમ માયયા ।
મત્પ્રસાદાદિયં ભ્રાન્તિરપૈષ્યતિ તવાચિરાત્ ॥ ૨૯॥

શ‍ૃણુ સત્યં ચતુર્વક્ત્ર સર્વદેવેશ્વરો હ્યહમ્ ।
કર્તા ભર્તા ચ હર્તા ચ ન મયાસ્તિ સમો વિભુઃ ॥ ૩૦॥

એવમેવ વિવાદોઽભૂદ્ બ્રહ્મવિષ્ણ્વોઃ પરસ્પરમ્ ।
અભવચ્ચ મહાયુદ્ધં ભૈરવં રોમહર્ષણમ્ ॥ ૩૧॥

મુષ્ટિભિર્નિઘ્નતોસ્તીવ્રં રજસા બદ્ધવૈરયોઃ ।
તયોર્દર્પાપહારાય પ્રબોધાય ચ દેવયોઃ ॥ ૩૨॥

મધ્યે સમાવિરભવલ્લિઙ્ગમૈશ્વરમદ્ભુતમ્ ।
જ્વાલામાલાસહસ્રાઢ્યમપ્રમેયમનૌપમમ્ ॥ ૩૩॥

ક્ષયવૃદ્ધિવિનિર્મુક્તમાદિમધ્યાન્તવર્જિતમ્ ।
તસ્ય જ્વાલાસહસ્રેણ બ્રહ્મવિષ્ણૂ વિમોહિતૌ ॥ ૩૪॥

વિસૃજ્ય યુદ્ધં કિં ત્વેતદિત્યચિન્તયતાં તદા ।
ન તયોસ્તસ્ય યાથાત્મ્યં પ્રબુદ્ધમભવદ્યદા ॥ ૩૫॥

તદા સમુદ્યતૌ સ્યાતાં તસ્યાદ્યન્તં પરીક્ષિતુમ્ ॥ ૩૬॥

તત્ર હંસાકૃતિર્બ્રહ્મા વિશ્વતઃ પક્ષસંયુતઃ ।
મનોઽનિલજવો ભૂત્વા ગતસ્તૂર્ધ્વં પ્રયત્નતઃ ॥ ૩૭॥

નારાયણોઽપિ વિશ્વાત્મા નીલાઞ્જનચયોપમમ્ ।
વારાહમમિતં રૂપમાસ્થાય ગતવાનધઃ ॥ ૩૮॥

એવં વર્ષસહસ્રં તુ ત્વરન્ વિષ્ણુરધોગતઃ ।
નાપશ્યદલ્પમપ્યસ્ય મૂલં લિઙ્ગસ્ય સૂકરઃ ॥ ૩૯॥

તાવત્કાલં ગતશ્ચોર્ધ્વં તસ્યાન્તં જ્ઞાતુમિચ્છયા ।
શ્રાન્તોઽત્યન્તમદૃષ્ટ્વાન્તં પાપતાધઃ પિતામહઃ ॥ ૪૦॥

તથૈવ ભગવાન્ વિષ્ણુઃ શ્રાન્તઃ સંવિગ્નલોચનઃ ।
ક્લેશેન મહતા તૂર્ણમધસ્તાદુત્થિતોઽભવત્ ॥ ૪૧॥

સમાગતાવથાન્યોન્યં વિસ્મયસ્મેરવીક્ષણૌ ।
માયયા મોહિતૌ શમ્ભોઃ કૃત્યાકૃત્યં ન જગ્મતુઃ ॥ ૪૨॥

પૃષ્ઠતઃ પાર્શ્વતસ્તસ્ય ચાગ્રતશ્ચ સ્થિતાવુભૌ ।
પ્રણિપત્ય કિમાત્મેદમિત્યચિન્તયતાં તદા ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે હરિવિધિમોહવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । હરિવિધિમોહનિવારણમ્ ।

ઉપમન્યુરુવાચ ।
અથાવિરભવત્તત્ર સનાદં શબ્દલક્ષણમ્ ।
ઓમિત્યેકાક્ષરં બ્રહ્મ બ્રહ્મણઃ પ્રતિપાદકમ્ ॥ ૧॥

તદપ્યવિદિતં તાવદ્ બ્રહ્મણા વિષ્ણુના તથા ।
રજસા તમસા ચિત્તં તયોર્યસ્માત્તિરસ્કૃતમ્ ॥ ૨॥

તદા વિભક્તમભવચ્ચતુર્દ્ધૈકં તદક્ષરમ્ ।
અ ઉ મેતિ ત્રિમાત્રાભિઃ પરસ્તાચ્ચાર્દ્ધમાત્રયા ॥ ૩॥

તત્રાકારઃ શ્રિતો ભાગે જ્વલલ્લિઙ્ગસ્ય દક્ષિણે ।
ઉકારશ્ચોત્તરે તદ્વન્મકારસ્તસ્ય મધ્યતઃ ॥ ૪॥

અર્ધમાત્રાત્મકો નાદઃ શ્રૂયતે લિઙ્ગમૂર્ધનિ ।
વિભક્તેઽપિ તદા તસ્મિન્ પ્રણવે પરમાક્ષરે ॥ ૫॥

વિભાવાર્થં ચ તૌ દેવૌ ન કિઞ્ચિદવજગ્મતુઃ ।
વેદાત્મના તદાવ્યક્તઃ પ્રણવો વિકૃતિં ગતઃ ॥ ૬॥

તત્રાકારો ઋગભવદુકારો યજુરવ્યયઃ ।
મકારઃ સામ સઞ્જાતો નાદસ્ત્વાથર્વણી શ્રુતિઃ ॥ ૭॥

ઋગયં સ્થાપયામાસ સમાસાત્ત્વર્થમાત્મનઃ ।
રજોગુણેષુ બ્રહ્માણં મૂર્તિષ્વાદ્યં ક્રિયાસ્વપિ ॥ ૮॥

સૃષ્ટિં લોકેષુ પૃથિવીં તત્ત્વેષ્વાત્માનમવ્યયમ્ ।
કલાધ્વનિ નિવૃત્તિં ચ સદ્યં બ્રહ્મસુ પઞ્ચસુ ॥ ૯॥

લિઙ્ગભાગેષ્વધોભાગં બીજાખ્યં કારણત્રયે ।
ચતુઃષષ્ટિગુણૈશ્વર્યં બૌદ્ધં યદણિમાદિષુ ॥ ૧૦॥

તદિત્થમર્થૈર્દશભિર્વ્યાપ્ય વિશ્વમૃચા જગત્ ।
અથોપસ્થાપયામાસ સ્વાર્થં દશવિધં યજુઃ ॥ ૧૧॥

સત્ત્વં ગુણેષુ વિષ્ણું ચ મૂર્તિષ્વાદ્યં ક્રિયાસ્વપિ ।
સ્થિતિં લોકેષ્વન્તરિક્ષં વિદ્યાં તત્ત્વેષુ ચ ત્રિષુ ॥ ૧૨॥

કલાધ્વસુ પ્રતિષ્ઠાં ચ વામં બ્રહ્મસુ પઞ્ચસુ ।
મધ્યં તુ લિઙ્ગભાગેષુ યોનિં ચ ત્રિષુ હેતુષુ ॥ ૧૩॥

પ્રાકૃતં ચ યથૈશ્વર્યં તસ્માદ્વિશ્વં યજુર્મયમ્ ।
તતોપસ્થાપયામાસ સામાર્થં દશધાત્મનઃ ॥ ૧૪॥

તમોગુણેષ્વથો રુદ્રં મૂર્તિષ્વાદ્યં ક્રિયાસુ ચ ।
સંહૃતિં ત્રિષુ લોકેષુ તત્ત્વેષુ શિવમુત્તમમ્ ॥ ૧૫॥

વિદ્યાકલાસ્વઘોરં ચ તથા બ્રહ્મસુ પઞ્ચસુ ।
લિઙ્ગભાગેષુ પીઠોર્દ્ધ્વં બીજિનં કારણત્રયે ॥ ૧૬॥

પૌરુષં ચ તથૈશ્વર્યમિત્થં સામ્ના તતં જગત્ ।
અથાથર્વાહ નૈર્ગુણ્યમર્થં પ્રથમમાત્મનઃ ॥ ૧૭॥

તતો મહેશ્વરં સાક્ષાત્ મૂર્તિષ્વપિ સદાશિવમ્ ।
ક્રિયાસુ નિષ્ક્રિયસ્યાપિ શિવસ્ય પરમાત્મનઃ ॥ ૧૮॥

ભૂતાનુગ્રહણં ચૈવ મુચ્યન્તે યેન જન્તવઃ ।
લોકેષ્વપિ યતો વાચો નિવૃત્તા મનસા સહ ॥ ૧૯॥

તદૂર્ધ્વમુન્મનાલોકાત્ સોમલોકમલૌકિકમ્ ।
સોમઃ સહોમયા યત્ર નિત્યં નિવસતીશ્વરઃ ॥ ૨૦॥

તદૂર્ધ્વમુન્મનાલોકાદ્યં પ્રાપ્તો ન નિવર્તતે ।
શાન્તિં ચ શાન્ત્યતીતાં ચ વ્યાપિકાં ચૈ કલાસ્વપિ ॥ ૨૧॥

તત્પૂરુષં તથેશાનં બ્રહ્મ બ્રહ્મસુ પઞ્ચસુ ।
મૂર્ધ્નાનમપિ લિઙ્ગસ્ય નાદભાગેષ્વનુત્તમમ્ ॥ ૨૨॥

યત્રાવાહ્ય સમારાધ્યઃ કેવલો નિષ્કલઃ શિવઃ ।
તત્તેષ્વપિ તદા બિન્દોર્નાદાત્ શક્તેસ્તતઃ પરાત્ ॥ ૨૩॥

તત્ત્વાદપિ પરં તત્ત્વમતત્ત્વં પરમાર્થતઃ ।
કારણેષુ ત્રયાતીતાન્ માયાવિક્ષોભકારણાત્ ॥ ૨૪॥

અનન્તાત્ શુદ્ધવિદ્યાયાઃ પરસ્તાચ્ચ મહેશ્વરાત્ ।
સર્વવિદ્યેશ્વરાધીશાન્ન પરાચ્ચ સદાશિવાત્ ॥ ૨૫॥

સર્વમન્ત્રતનોર્દેવાત્ શક્તિત્રયસમન્વિતાત્ ।
પઞ્ચવક્ત્રાદ્દશભુજાત્ સાક્ષાત્ સકલનિષ્કલાત્ ॥ ૨૬॥

તસ્માદપિ પરાદ્બિન્દોરર્ધેદોશ્ચ તતઃ પરાત્ ।
તતઃ પરાન્નિશાધીશાન્નાદાખ્યાચ્ચ તતઃ પરાત્ ॥ ૨૭॥

તતઃ પરાત્ સુષુમ્નેશાદ્ બ્રહ્મરન્ધ્રેશ્વરાદપિ ।
તતઃ પરસ્માત્ શક્તેશ્ચ પરસ્તાત્ શિવતત્ત્વતઃ ॥ ૨૮॥

પરમં કારણં સાક્ષાત્સ્વયં નિષ્કારણં શિવમ્ ।
કારણાનાં ચ ધાતારં ધ્યાતારં ધ્યેયમવ્યયમ્ ॥ ૨૯॥

પરમાકાશમધ્યસ્થં પરમાત્મોપરિ સ્થિતમ્ ।
સર્વૈશ્વર્યેણ સમ્પન્નં સર્વેશ્વરમનીશ્વરમ્ ॥ ૩૦॥

ઐશ્વર્યાચ્ચાપિ માયેયાદશુદ્ધાન્ માનુષાદિકાત્ ।

અપરાચ્ચ પરાત્ત્યાજ્યાદવિશુદ્ધાધ્વગોચરાત્ ॥ ૩૧॥

તત્પરાત્ શુદ્ધવિદ્યાદ્યાદુન્મનાન્તાત્પરાત્પરાત્ ।
પરમં પરમૈશ્વર્યમુન્મનાદ્યમનાદિ ચ ॥ ૩૨॥

અપારમપરાધીનં નિરસ્તાતિશયં સ્થિરમ્ ।
ઇત્થમર્થૈર્દશવિધૈરિયમાથર્વણી શ્રુતિઃ ॥ ૩૩॥

યસ્માદ્ ગરીયસી તસ્માદ્વિશ્વં વ્યાપ્તમથર્વણા ।
ઋગ્વેદઃ પુનરાહેદં જાગ્રદ્રૂપં મયોચ્યતે ॥ ૩૪॥

યેનાહમાત્મતત્ત્વસ્ય નિત્યમસ્ય્યભિધાયકઃ ।
યજુર્વેદોઽવદત્તદ્વત્સ્વપ્નાવસ્થા મયોચ્યતે ॥ ૩૫॥

ભોગ્યાત્મના પરિણતા વિદ્યા વેદ્યા યતો મયિ ।
સામ ચાહ સુષુપ્ત્યાખ્યમેવં સર્વં મયોચ્યતે ॥ ૩૬॥

મમાર્થેન શિવેનેદં તામસેનાભિધીયતે ।
અથર્વાહ તુરીયાખ્યં તુરીયાતીતમેવ ચ ॥ ૩૭॥

મયાભિધીયતે તસ્માદધ્વાતીતપદોઽસ્મ્યહમ્ ।
અધ્વાત્મકં તુ ત્રિતયં શિવવિદ્યાત્મસંજ્ઞિતમ્ ॥ ૩૮॥

તત્ત્રૈગુણ્યં ત્રયીસાધ્યં સંશોધ્યં ચ પદૈષિણા ।
અધ્વાતીતં તુરીયાખ્યં નિર્વાણં પરમં પદમ્ ॥ ૩૯॥

તદતીતં ચ નૈર્ગુણ્યાદધ્વનોસ્ય વિશોધકમ્ ।
દ્વયોઃ પ્રમાપકો નાદો નાદાન્તશ્ચ મદાત્મકઃ ॥ ૪૦॥

તસ્માત્ મમાર્થસ્વાતન્ત્ર્યાત્ પ્રધાનઃ પરમેશ્વરઃ ।
યદસ્તિ વસ્તુ તત્સર્વં ગુણપ્રાધાન્યયોગતઃ ॥ ૪૧॥

સમસ્તં વ્યસ્તમપિ ચ પ્રણવાર્થં પ્રચક્ષતે ।
સર્વાર્થવાચકં તસ્માદેકં બ્રહ્મૈતદક્ષરમ્ ॥ ૪૨॥

તેનોમિતિ જગત્કૃત્સ્નં કુરુતે પ્રથમં શિવઃ ।
શિવો હિ પ્રણવો હ્યેષ પ્રણવો હિ શિવઃ સ્મૃતઃ ॥ ૪૩॥

વાચ્યવાચકયોર્ભેદો નાત્યન્તં વિદ્યતે યતઃ ।
ચિન્તયા રહિતો રુદ્રો વાચો યન્મનસા સહ ॥ ૪૪॥

અપ્રાપ્ય તન્નિવર્તન્તે વાચ્યસ્ત્વેકાક્ષરેણ સઃ ।
એકાક્ષરાદકારાખ્યાદાત્મા બ્રહ્માભિધીયતે ॥ ૪૫॥

એકાક્ષરાદુકારાખ્યાદ્ વિધા વિષ્ણુરુદીર્યતે ।
એકાક્ષરાન્મકારાખ્યાત્ શિવો રુદ્ર ઉદાહૃતઃ ॥ ૪૬॥

દક્ષિણાઙ્ગાન્ મહેશસ્ય જાતો બ્રહ્માત્મસંજ્ઞકઃ ।
વામાઙ્ગાદભવદ્વિષ્ણુસ્તતો વિધેતિ સંજ્ઞિતઃ ॥ ૪૭॥

હૃદયાન્નીલરુદ્રોઽભૂચ્છિવસ્ય શિવસંજ્ઞકઃ ।
સૃષ્ટેઃ પ્રવર્તકો બ્રહ્મા સ્થિતેર્વિષ્ણુર્વિમોહકઃ ॥ ૪૮॥

સંહારસ્ય તથા રુદ્રસ્તયોર્નિત્યં નિયામકઃ ॥ ૪૯॥

તસ્માત્ત્રયસ્તે કથ્યન્તે જગતઃ કારણાનિ ચ ।
કારણત્રયહેતુશ્ચ શિવઃ પરમકારણમ્ ॥ ૫૦॥

અર્થમેતમવિજ્ઞાય રજસા બદ્ધવૈરયોઃ ।
યુવયોઃ પ્રતિબોધાય મધ્યે લિઙ્ગમુપસ્થિતમ્ ॥ ૫૧॥

એવમોમિતિ માં પ્રાહુર્યદિહોક્તમથર્વણા ।
ઋચો યજૂંષિ સામાનિ શાખાશ્ચાન્યાઃ સહસ્રશઃ ॥ ૫૨॥

વેદેષ્વેવં સ્વયં વક્ત્રૈર્વ્યક્તમિત્થં વદત્સ્વપિ ।
સ્વપ્રાનુભૂતમિવ તત્તાભ્યાં નાધ્યવસીયતે ॥ ૫૩॥

તયોસ્તત્ર પ્રબોધાય તમોપનયનાય ચ ।
લિઙ્ગેઽપિ મુદ્રિતં સર્વં યથા વેદૈરુદાહૃતમ્ ॥ ૫૪॥

તદ્ દૃષ્ટ્વા મુદ્રિતં લિઙ્ગે પ્રસાદાલ્લિઙ્ગિનસ્તદા ।
પ્રશાન્તમનસૌ દેવૌ પ્રબુદ્ધૌ સમ્બભૂવતુઃ ॥ ૫૫॥

ઉત્પત્તિં વિલયં ચૈવ યથાત્મ્યં ચ ષડધ્વનામ્ ।
તતઃ પરતરં ધામ ધામવન્તં ચ પૂરુષમ્ ॥ ૫૬॥

નિરુત્તરતરં બ્રહ્મ નિષ્કલં શિવમીશ્વરમ્ ।
પશુપાશમયસ્યાસ્ય પ્રપઞ્ચસ્ય સદા પતિમ્ ॥ ૫૭॥

અકુતોભયમત્યન્તમવૃદ્ધિક્ષયમવ્યયમ્ ।
વાહ્યમાભ્યન્તરં વ્યાપ્તં બાહ્યાભ્યન્તરવર્જિતમ્ ॥ ૫૮॥

નિરસ્તાતિશયં શશ્વદ્વિશ્વલોકવિલક્ષણમ્ ।
અલક્ષણમનિર્દેશ્યમવાઙ્મનસગોચરમ્ ॥ ૫૯॥

પ્રકાશૈકરસં શાન્તં પ્રસન્નં સતતોદિતમ્ ।
સર્વકલ્યાણનિલયં શક્ત્યા તાદૃશયાન્વિતમ્ ॥ ૬૦॥

જ્ઞાત્વા દેવં વિરૂપાક્ષં બ્રહ્મનારાયણૌ તદા ।
રચયિત્વાઞ્જલિં મૂર્ધ્નિ ભીતૌ તૌ વાચમૂચતુઃ ॥ ૬૧॥

બ્રહ્મોવાચ ।
અજ્ઞો વાહમભિજ્ઞો વા ત્વયાદૌ દેવ નિર્મિતઃ ।
ઈદૃશીં ભ્રાન્તિમાપન્ન ઇતિ કોઽત્રાપરાધ્યતિ ॥ ૬૨॥

આસ્તાં મમેદમજ્ઞાનં ત્વયિ સન્નિહતે પ્રભો ।
નિર્ભયઃ કોઽભિભાષેત કૃત્યં સ્વસ્ય પરસ્ય વા ॥ ૬૩॥

આવયોર્દેવદેવસ્ય વિવાદોઽપિ હિ શોભનઃ ।
પાદપ્રણામફલદો નાથસ્ય ભવતો યતઃ ॥ ૬૪॥

વિષ્ણુરુવાચ ।
સ્તોતું દેવ ન વાગસ્તિ મહિમ્નઃ સદૃશી તવ ।
પ્રભોરગ્રે વિધેયાનાં તૂષ્ણીમ્ભાવો વ્યતિક્રમઃ ॥ ૬૫॥

કિમત્ર સઙ્ઘટેત્કૃત્યમિત્યેવાવસરોચિતમ્ ।
અજાનન્નપિ યત્કિઞ્ચિત્ પ્રલપ્ય ત્વાં નતોઽસ્મ્યહમ્ ॥ ૬૬॥

કારણત્વં ત્વયા દત્તં વિસ્મૃતં તવ માયયા ।
મોહિતોઽહઙ્કૃતશ્ચાપિ પુનરેવાસ્મિ શાસિતઃ ॥ ૬૭॥

વિજ્ઞાપિતૈઃ કિં બહુભિર્ભીતોઽસ્મિ ભૃશમીશ્વર ।
યતોઽહમપરિચ્છેદ્યં ત્વાં પરિચ્છેત્તુમુદ્યતઃ ॥ ૬૮॥

ત્વામુશન્તિ મહાદેવં ભીતાનામાર્તિનાશનમ્ ।
અતો વ્યતિક્રમં મેઽદ્ય ક્ષન્તુમર્હસિ શઙ્કર ॥ ૬૯॥

ઇતિ વિજ્ઞાપિતસ્તાભ્યામીશ્વરાભ્યાં મહેશ્વરઃ ।
પ્રીતોઽનુગૃહ્ય તૌ દેવૌ સ્મિતપૂર્વમભાષત ॥ ૭૦॥

ઈશ્વર ઉવાચ ।
વત્સ વત્સ વિધે વિષ્ણો માયયા મમ મોહિતૌ ।

યુવાં પ્રભુત્વેઽહઙ્કૃત્ય બુદ્ધવૈરૌ પરસ્પરમ્ ॥ ૭૧॥

વિવાદં યુદ્ધપર્યન્તં કૃત્વા નોપરતૌ કિલ ।
તતશ્છિન્ના પ્રજાસૃષ્ટિર્જગત્કારણભૂતયોઃ ॥ ૭૨॥

અજ્ઞાનમાનપ્રભવાદ્વૈમત્યાદ્યુવયોરપિ ।
તન્નિવર્તયિતું યુષ્મદ્દર્પમોહૌ મયૈવ તુ ॥ ૭૩॥

એવં નિવારિતાવદ્યલિઙ્ગાવિર્ભાવલીલયા ।
તસ્માદ્ભૂયો વિવાદં ચ વ્રીડાં ચોત્સૃજ્ય કૃત્સ્નશઃ ॥ ૭૪॥

યથાસ્વં કર્મ કુર્યાતાં ભવન્તૌ વીતમત્સરૌ ।
પુરા મમાજ્ઞયા સાર્દ્ધં સમસ્તજ્ઞાનસંહિતાઃ ॥ ૭૫॥

યુવાભ્યાં હિ મયા દત્તાઃ કારણત્વપ્રસિદ્ધયે ।
મન્ત્રરત્નં ચ સૂત્રાખ્યં પઞ્ચાક્ષરમયં પરમ્ ॥ ૭૬॥

મયોપદિષ્ટં સર્વં તદ્યુવયોરદ્ય વિસ્મૃતમ્ ।
દદામિ ચ પુનઃ સર્વં યથાપૂર્વં મમાજ્ઞયા ॥ ૭૭॥

યતો વિના યુવાં તેન ન ક્ષમૌ સૃષ્ટિરક્ષણે ।
એવમુક્ત્વા મહાદેવો નારાયણપિતામહૌ ॥ ૭૮॥

મન્ત્રરાજં દદૌ તાભ્યાં જ્ઞાનસંહિતયા સહ ।
તૌ લબ્ધ્વા મહતીં દિવ્યામાજ્ઞાં માહેશ્વરીં પરામ્ ॥ ૭૯॥

મહાર્થં મન્ત્રરત્નં ચ તથૈવ સકલાઃ કલાઃ ।
દણ્ડવત્પ્રણતિં કૃત્વા દેવદેવસ્ય પાદયોઃ ॥ ૮૦॥

અતિષ્ઠતાં વીતભયાવાનન્દાસ્તિમિતૌ તદા ।
એતસ્મિન્નન્તરે ચિત્રમિન્દ્રજાલવદૈશ્વરમ્ ॥ ૮૧॥

લિઙ્ગં ક્વાપિ તિરોભૂતં ન તાભ્યામુપલભ્યતે ।
તતો વિલપ્ય હાહેતિ સદ્યઃપ્રણયભઙ્ગતઃ ॥ ૮૨॥

કિમદ્ભુતમિદં વૃત્તમિતિ ચોક્ત્વા પરસ્પરમ્ ।
અચિન્ત્યવૈભવં શમ્ભોર્વિચિન્ત્ય ચ ગતવ્યથૌ ॥ ૮૩॥

અભ્યુપેત્ય પરાં મૈત્રીમાલિઙ્ગ્ય ચ પરસ્પરમ્ ।
જગદ્વ્યાપારમુદ્દિશ્ય જગ્મતુર્દેવપુઙ્ગવૌ ॥ ૮૪॥

તતઃ પ્રભૃતિ શક્રાદ્યાઃ સર્વ એવ સુરાસુરાઃ ।
ઋષયશ્ચ નરા નાગા નાર્યશ્ચાપિ વિધાનતઃ ।
લિઙ્ગપ્રતિષ્ઠાં કુર્વન્તિ લિઙ્ગે તં પૂજયન્તિ ચ ॥ ૮૫॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે હરિવિધિમોહનિવારણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૬. ષટ્ત્રિંશોઽધ્યાયઃ । પ્રતિષ્ઠાવિધિવર્ણનમ્ ।

શ્રીકૃષ્ણ ઉવાચ ।
ભગવન્ શ્રોતુમિચ્છામિ પ્રતિષ્ઠાવિધિમુત્તમમ્ ।
લિઙ્ગસ્યાપિ ચ બેરસ્ય શિવેન વિહિતં યથા ॥ ૧॥

ઉપમન્યુરુવાચ ।
અનાત્મપ્રતિકૂલે તુ દિવસે શુક્લપક્ષકે ।
શિવશાસ્ત્રોક્તમાર્ગેણ કુર્યાલ્લિઙ્ગં પ્રમાણવત્ ॥ ૨॥

સ્વીકૃત્યાથ શુભસ્થાનં ભૂપરીક્ષાં વિધાય ચ ।
દશોપચારાન્કુર્વીત લક્ષણોદ્ધારપૂર્વકાન્ ॥ ૩॥

તેષાં દશોપચારાણાં પૂર્વં પૂજ્ય વિનાયકમ્ ।
સ્થાનશુદ્ધ્યાદિકં કૃત્વા લિઙ્ગં સ્નાનાલયં નયેત્ ॥ ૪॥

શલાકયા કાઞ્ચનયા કુઙ્કુમાદિરસાક્તયા ।
લક્ષિતં લક્ષણં શિલ્પશાસ્ત્રેણ વિલિખેત્તતઃ ॥ ૫॥

અષ્ટમૃત્સલિલૈર્વાથ પઞ્ચમૃત્સલિલૈસ્તથા ।
લિઙ્ગં પિણ્ડિકયા સાર્દ્ધં પઞ્ચગવ્યૈશ્ચ શોધયેત્ ॥ ૬॥

સવેદિકં સમભ્યર્ચ્ય દિવ્યાદ્યં તુ જલાશયમ્ ।
નીત્વાધિવાસયેત્તત્ર લિઙ્ગં પિણ્ડિકયા સહ ॥ ૭॥

અધિવાસાલયે શુદ્ધે સર્વશોભાસમન્વિતે ।
સતોરણે સાવરણે દર્ભમાલાસમાવૃતે ॥ ૮॥

દિગ્ગજાષ્ટકસમ્પન્ને દિક્પાલાષ્ટઘટાન્વિતે ।
અષ્ટમઙ્ગલકૈર્યુક્તે કૃતદિક્પાલકાર્ચિતે ॥ ૯॥

તૈજસં દારવં વાપિ કૃત્વા પદ્માસનાઙ્કિતમ્ ।
વિન્યસેન્મધ્યતસ્તત્ર વિપુલં પીઠકાલયમ્ ॥ ૧૦॥

દ્વારપાલાન્ સમભ્યર્ચ્ય ભદ્રાદીંશ્ચતુરઃક્રમાત્ ।
સુભદ્રશ્ચ વિભદ્રશ્ચ સુનન્દશ્ચ વિનન્દકઃ ॥ ૧૧॥

સ્નાપયિત્વા સમભ્યર્ચ્ય લિઙ્ગં વેદિકયા સહ ।
સકૂર્ચાભ્યાં તુ વસ્ત્રાભ્યાં સમાવેષ્ટ્ય સમન્તતઃ ॥ ૧૨॥

પ્રાપય્ય શનકૈસ્તોયં પીઠિકોપરિ શાયયેત્ ।
પ્રાક્ શિરસ્કમધઃ સૂત્રં પિણ્ડિકાં ચાસ્ય પશ્ચિમે ॥ ૧૩॥

સર્વમઙ્ગલસંયુક્તં લિઙ્ગં તત્રાધિવાસયેત્ ।
પઞ્ચરાત્રં ત્રિરાત્રં વાપ્યેકરાત્રમથાપિ વા ॥ ૧૪॥

વિસૃજ્ય પૂજિતં તત્ર શોધયિત્વા ચ પૂર્વવત્ ।
સમ્પૂજ્યોત્સવમાર્ગેણ શયનાલયમાનયેત્ ॥ ૧૫॥

તત્રાપિ શયનસ્થાનં કુર્યાત્ મણ્ડલમધ્યતઃ ।
શુદ્ધૈર્જલૈઃ સ્નાપયિત્વા લિઙ્ગમભ્યર્ચયેત્ક્રમાત્ ॥ ૧૬॥

ઐશાન્યાં પદ્મમાલિખ્ય શુદ્ધલિપ્તે મહીતલે ।
શિવકુમ્ભં શોધયિત્વા તત્રાવાહ્ય શિવં યજેત્ ॥ ૧૭॥

વેદીમધ્યે સિતં પદ્મં પરિકલ્પ્ય વિધાનતઃ ।
તસ્ય પશ્ચિમતશ્ચાપિ ચણ્ડિકાપદ્મમાલિખેત્ ॥ ૧૮॥

ક્ષૌમાદ્યૈર્વાહતૈર્વસ્ત્રૈઃ પુષ્પૈર્દર્ભૈરથાપિ વા ।
પ્રકલ્પ્ય શયનં તસ્મિન્ હેમપુષ્પં વિનિક્ષિપેત્ ॥ ૧૯॥

તત્ર લિઙ્ગં સમાનીય સર્વમઙ્ગલનિઃસ્વનૈઃ ।
રક્તેન વસ્ત્રયુગ્મેન સકૂર્ચેન સમન્તતઃ ॥ ૨૦॥

સહ પિણ્ડિકયાવેષ્ટ્ય શાયયેચ્ચ યથા પુરા ।
પુરસ્તાત્પદ્મમાલિખ્ય તદ્દલેષુ યથાક્રમમ્ ॥ ૨૧॥

વિદ્યેશકલશાન્ન્યસ્યેન્મધ્યે શૈવીં ચ વર્દ્ધનીમ્ ।
પરીત્ય પદ્મત્રિતયં જુહુયુર્દ્વિજસત્તમાઃ ॥ ૨૨॥

તે ચાષ્ટમૂર્ત્તયઃ કલ્પ્યાઃ પૂર્વાદિપરિતઃ સ્થિતાઃ ।
ચત્વારશ્ચાથ વા દિક્ષુ સ્વધ્યેતારઃ સજાપકાઃ ॥ ૨૩॥

જુહુયુસ્તે વિરઞ્ચ્યાદ્યાશ્ચતસ્રો મૂર્તયઃ સ્મૃતાઃ ।
દેશિકઃ પ્રથમં તેષામૈશાન્યાં પશ્ચિમેઽથ વા ॥ ૨૪॥

પ્રધાનહોમં કુર્વીત સપ્તદ્રવ્યૈર્યથાક્રમમ્ ।
આચાર્યાત્ પાદમર્દ્ધં વા જુહુયુશ્ચાપરે દ્વિજાઃ ॥ ૨૫॥

પ્રધાનમેકમેવાત્ર જુહુયાદથ વા ગુરુઃ ।
પૂર્વં પૂર્ણાહુતિં હુત્વા ઘૃતેનાષ્ટોત્તરં શતમ્ ॥ ૨૬॥

મૂર્ધ્નિ મૂલેન લિઙ્ગસ્ય શિવહસ્તં પ્રવિન્યસેત્ ।
શતમર્દ્ધં તદર્દ્ધં વા ક્રમાદ્ દ્રવ્યૈશ્ચ સપ્તભિઃ ॥ ૨૭॥

હુત્વા હુત્વા સ્પૃશેલ્લિઙ્ગં વેદિકાં ચ પુનઃ પુનઃ ।
પૂર્ણાહુતિં તતો હુત્વા ક્રમાદ્દદ્યાચ્ચ દક્ષિણામ્ ॥ ૨૮॥

આચાર્યાત્ પાદમર્દ્ધં વા હોતૃણાં સ્થપતેરપિ ।
તદર્દ્ધં દેયમન્યેભ્યઃ સદસ્યેભ્યશ્ચ શક્તિતઃ ॥ ૨૯॥

તતઃ શ્વભ્રે વૃષં હૈમં કૂર્મં વાપિ નિવેશ્ય ચ ।
મૃદમ્ભસા પઞ્ચગવ્યૈઃ પુનઃ શુદ્ધજલેન ચ ॥ ૩૦॥

શોધિતાં ચન્દનાલિપ્તાં શ્વભ્રે બ્રહ્મશિલાં ક્ષિપેત્ ।
કરન્યાસં તતઃ કૃત્વા નવભિઃ શક્તિનામભિઃ ॥ ૩૧॥

હરિતાલાદિધાતૂંશ્ચ બીજગન્ધૌષધૈરપિ ।
શિવશાસ્ત્રોક્તવિધિના ક્ષિપેદ્ બ્રહ્મશિલોપરિ ॥ ૩૨॥

પ્રતિલિઙ્ગં તુ સંસ્થાપ્ય ક્ષીરવૃક્ષસમુદ્ભવમ્ ।
સ્થિતં બુદ્ધ્વા તદુત્સૃજ્ય લિઙ્ગં બ્રહ્મશિલાપરિ ॥ ૩૩॥

પ્રાગુદક્પ્રવરાં કિઞ્ચિત્ સ્થાપયેન્મૂલવિદ્યયા ।
પિણ્ડિકાં ચાથ સંયોજ્ય શાક્તં મૂલમનુસ્મરન્ ॥ ૩૪॥

બન્ધનં બન્ધકદ્રવ્યૈઃ કૃત્વા સ્થાનં વિશોધ્ય ચ ।
દત્ત્વા ચાર્ઘ્યં ચ પુષ્પાણિ કુર્યુર્યવનિકાં પુનઃ ॥ ૩૫॥

યથાયોગ્યં નિષેકાદિ લિઙ્ગસ્ય પુરતસ્તદા ।

આનીય શયનસ્થાનાત્કલશાન્વિન્યસેત્ક્રમાત્ ॥ ૩૬॥

મહાપૂજામથારભ્ય સમ્પૂજ્ય કલશાન્દશ ।
શિવમન્ત્રમનુસ્મૃત્ય શિવકુમ્ભજલાન્તરે ॥ ૩૭॥

અઙ્ગુષ્ઠાનામિકાયોગાદાદાય તમુદીરયેત્ ।
ન્યસેદીશાનભાગસ્ય મધ્યે લિઙ્ગસ્ય મન્ત્રવિત્ ॥ ૩૮॥

શક્તિં ન્યસેત્તથા વિદ્યાં વિદ્યેશાંશ્ચ યથાક્રમમ્ ।
લિઙ્ગમૂલે શિવજલૈસ્તતો લિઙ્ગં નિષેચયેત્ ॥ ૩૯॥

વર્દ્ધન્યા પિણ્ડિકાં લિઙ્ગં વિદ્યેશકલશૈઃ પુનઃ ।
અભિષિચ્યાસનં પશ્ચાદાધારાદ્યં પ્રકલ્પયેત્ ॥ ૪૦॥

કૃત્વા પઞ્ચકલાન્યાસં દીપ્તં લિઙ્ગમનુસ્મરેત્ ।
આવાહયેત્ શિવૌ સાક્ષાત્ પ્રાઞ્જલિઃ પ્રાગુદઙ્મુખઃ ॥ ૪૧॥

વૃષાધિરાજમારુહ્ય વિમાનં વા નભસ્તલાત્ ।
અલઙ્કૃતં સહાયાન્તં દેવ્યા દેવમનુસ્મરન્ ।
સર્વાભરણશોભાઢ્યં સર્વમઙ્ગલનિઃસ્વનૈઃ ॥ ૪૨॥

બ્રહ્મવિષ્ણુમહેશાર્કશક્રાદ્યૈર્દેવદાનવૈઃ ।
આનન્દક્લિન્નસર્વાઙ્ગૈર્વિન્યસ્તાઞ્જલિમસ્તકૈઃ ॥ ૪૩॥

સ્તુવદ્ભિરેવ નૃત્યદ્ભિર્નમદ્ભિરભિતો વૃતમ્ ।
તતઃ પઞ્ચોપચારૈશ્ચ કૃત્વા પૂજાં સમાપયેત્ ॥ ૪૪॥

નાતઃ પરતરઃ કશ્ચિદ્વિધિઃ પઞ્ચોપચારકાત્ ।
પ્રતિષ્ઠાં લિઙ્ગવત્કુર્યાત્ પ્રતિમાસ્વપિ સર્વતઃ ॥ ૪૫॥

લક્ષણોદ્ધારસમયે કાર્યં નયનમોચનમ્ ।
જલાધિવાસે શયને શાયયેત્તાંસ્ત્વધોમુખીમ્ ॥ ૪૬॥

કુમ્ભોદશાયિતાં મન્ત્રૈર્હૃદિ તાં સન્નિયોજયેત્ ।
કૃતાલયાં પરામાહુઃ પ્રતિષ્ઠામકૃતાલયાત્ ॥ ૪૭॥

શક્તઃ કૃતાલયઃ પશ્ચાત્ પ્રતિષ્ઠાવિધિમાચરેત્ ।
અશક્તશ્ચેત્પ્રતિષ્ઠાપ્ય લિઙ્ગં બેરમથાપિ વા ॥ ૪૮॥

શક્તેરનુગુણં પશ્ચાત્ પ્રકુર્વીત શિવાલયમ્ ।
ગૃહાર્ચાં ચ પુનર્વક્ષ્યે પ્રતિષ્ઠાવિધિમુત્તમમ્ ॥ ૪૯॥

કૃત્વા કનીયસં બેરં લિઙ્ગં વા લક્ષણાન્વિતમ્ ।
અયને ચોત્તરે પ્રાપ્તે શુક્લપક્ષે શુભે દિને ॥ ૫૦॥

વેદીં કૃત્વા શુભે દેશે તત્રાબ્જં પૂર્વવલ્લિખેત્ ।
વિકીર્ય પત્રપુષ્પાદ્યૈર્મધ્યે કુમ્ભં નિધાય ચ ॥ ૫૧॥

પરિતસ્તસ્ય ચતુરઃ કલશાન્ દિક્ષુ વિન્યસેત્ ।
પઞ્ચ બ્રહ્માણિ તદ્બીજૈસ્તેષુ પઞ્ચસુ પઞ્ચભિઃ ॥ ૫૨॥

ન્યસ્ય સમ્પૂજ્ય મુદ્રાદિ દર્શયિત્વાભિરક્ષ્ય ચ ।
વિશોધ્ય લિઙ્ગં બેરં વા મૃત્તોયાદ્યૈર્યથા પુરા ॥ ૫૩॥

સ્થાપયેત્પુષ્પસઞ્છન્નમુત્તરસ્થે વરાસને ।
નિધાય પુષ્પં શિરસિ પ્રોક્ષયેત્ પ્રોક્ષણીજલૈઃ ॥ ૫૪॥

સમભ્યર્ચ્ય પુનઃ પુષ્પૈર્જયશબ્દાદિપૂર્વકમ્ ।
કુમ્ભૈરીશાનવિદ્યાન્તૈઃ સ્નાપયેન્મૂલવિદ્યયા ॥ ૫૫॥

તતઃ પઞ્ચકલાન્યાસં કૃત્વા પૂજાં ચ પૂર્વવત્ ।
નિત્યમારાધયેત્તત્ર દેવ્યા દેવં ત્રિલોચનમ્ ॥ ૫૬॥

એકમેવાથ વા કુમ્ભં મૂર્તિમન્ત્રસમન્વિતમ્ ।
ન્યસ્ય પદ્માન્તરે સર્વં શેષં પૂર્વવદાચરેત્ ॥ ૫૭॥

અત્યન્તોપહતં લિઙ્ગં વિશોધ્ય સ્થાપયેત્પુનઃ ।
સમ્પ્રોક્ષયેદુપહતં મનાગુપહતં યજેત્ ॥ ૫૮॥

લિઙ્ગાનિ બાણસંજ્ઞાનિ સ્થાપનીયાનિ વા ન વા ।
તાનિ પૂર્વં શિવેનૈવ સંસ્કૃતાનિ યતસ્તતઃ ॥ ૫૯॥

શેષાણિ સ્થાપનીયાનિ યાનિ દૃષ્ટાનિ બાણવત્ ।
સ્વયમુદ્ભૂતલિઙ્ગે ચ દિવ્યે ચાર્ષે તથૈવ ચ ॥ ૬૦॥

અપીઠે પીઠમાવેશ્ય કૃત્વા સમ્પ્રોક્ષણં વિધિમ્ ।
યજેત્તત્ર શિવં તેષાં પ્રતિષ્ઠા ન વિધીયતે ॥ ૬૧॥

દગ્ધં શ્લથં ક્ષતાઙ્ગં ચ ક્ષિપેલ્લિઙ્ગં જલાશયે ।
સન્ધાનયોગ્યં સન્ધાય પ્રતિષ્ઠાવિધિમાચરેત્ ॥ ૬૨॥

બેરાદ્વા વિકલાલ્લિઙ્ગાદ્દેવપૂજાપુરઃસરમ્ ।

ઉદ્વાસ્ય હૃદિ સન્ધાનં ત્યાગં વા યુક્તમાચરેત્ ॥ ૬૩॥

એકાહપૂજાવિહતૌ કુર્યાદ્ દ્વિગુણમર્ચનમ્ ।
દ્વિરાત્રે ચ મહાપૂજાં સમ્પ્રોક્ષણમતઃ પરમ્ ॥ ૬૪॥

માસાદૂર્ધ્વમનેકાહં પૂજા યદિ વિહન્યતે ।
પ્રતિષ્ઠા પ્રોચ્યતે કૈશ્ચિત્કૈશ્ચિત્સમ્પ્રોક્ષણક્રમઃ ॥ ૬૫॥

સમ્પ્રોક્ષણે તુ લિઙ્ગાદેર્દેવમુદ્વાસ્ય પૂર્વવત્ ।
અષ્ટપઞ્ચક્રમેણૈવ સ્નાપયિત્વા મૃદમ્ભસા ॥ ૬૬॥

ગવાં રસૈશ્ચ સંસ્નાપ્ય દર્ભતોયૈર્વિશોધ્ય ચ ।
પ્રોક્ષયેત્પ્રોક્ષણીતોયૈર્મૂલેનાષ્ટોત્તરં શતમ્ ॥ ૬૭॥

સપુષ્પં સકુશં પાણિં ન્યસ્ય લિઙ્ગસ્ય મસ્તકે ।
પઞ્ચવારં જપેન્મૂલમષ્ટોત્તરશતોત્તરમ્ ॥ ૬૮॥

તતો મૂલેન મૂર્દ્ધાદિપીઠાન્તં સંસ્પૃશેદપિ ।
પૂજાં ચ મહતીં કુર્યાદ્દેવમાવાહ્ય પૂર્વવત્ ॥ ૬૯॥

અલબ્ધે સ્થાપિતે લિઙ્ગે શિવસ્થાને જલેઽથ વા ।
વહ્નૌ રવૌ તથા વ્યોમ્નિ ભગવન્તં શિવં યજેત્ ॥ ૭૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે પ્રતિષ્ઠાવિધિવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૭. સપ્તત્રિંશોઽધ્યાયઃ । યોગગતિવર્ણનમ્ ।

શ્રીકૃષ્ણ ઉવાચ ।
જ્ઞાને ક્રિયાયાં ચર્યાયાં સારમુદ્ધૃત્ય સઙ્ગ્રહાત્ ।
ઉક્તં ભગવતા સર્વં શ્રુતં શ્રુતિસમં મયા ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ યોગં પરમદુર્લભમ્ ।
સાધિકારં ચ સાઙ્ગં ચ સવિધિં સપ્રયોજનમ્ ॥ ૨॥

યદ્યસ્તિ મરણં પૂર્વં યોગાદ્યનુપમર્દતઃ ।

સદ્યઃ સાધયિતું શક્યં યેન સ્યાન્નાત્મહા નરઃ ॥ ૩॥

તચ્ચ તત્કારણં ચૈવ તત્કાલકરણાનિ ચ ।
તદ્ભેદતારતમ્યં ચ વક્તુમર્હસિ તત્ત્વતઃ ॥ ૪॥

ઉપમન્યુરુવાચ ।
સ્થાને પૃષ્ટં ત્વયા કૃષ્ણ સર્વપ્રશ્નાર્થવેદિના ।
તતઃ ક્રમેણ તત્સર્વં વક્ષ્યે શ઼ૃણુ સમાહિતઃ ॥ ૫॥

નિરુદ્ધવૃત્ત્યન્તરસ્ય શિવે ચિત્તસ્ય નિશ્ચલા ।
યા વૃત્તિઃ સા સમાસેન યોગઃ સ ખલુ પઞ્ચધા ॥ ૬॥

મન્ત્રયોગઃ સ્પર્શયોગો ભાવયોગસ્તથાપરઃ ।
અભાવયોગઃ સર્વેભ્યો મહાયોગઃ પરો મતઃ ॥ ૭॥

મન્ત્રાભ્યાસવશેનૈવ મન્ત્રવાચ્યાર્થગોચરઃ ।
અવ્યાક્ષેપા મનોવૃત્તિર્મન્ત્રયોગ ઉદાહૃતઃ ॥ ૮॥

પ્રાણાયામમુખા સૈવ સ્પર્શયોગોઽભિધીયતે ।
સ મન્ત્રસ્પર્શનિર્મુક્તો ભાવયોગઃ પ્રકીર્તિતઃ ॥ ૯॥

વિલીનાવયવં વિશ્વં રૂપં સમ્ભાવ્યતે યતઃ ।
અભાવયોગઃ સમ્પ્રોક્તોઽનાભાસાદ્વસ્તુનઃ સતઃ ॥ ૧૦॥

શિવસ્વભાવ એવૈકશ્ચિન્ત્યતે નિરુપાધિકઃ ।
યથા શૈવમનોવૃત્તિર્મહાયોગ ઇહોચ્યતે ॥ ૧૧॥

દૃષ્ટે તથાનુશ્રવિકે વિરક્તં વિષયે મનઃ ।
યસ્ય તસ્યાધિકારોઽસ્તિ યોગે નાન્યસ્ય કસ્યચિત્ ॥ ૧૨॥

વિષયદ્વયદોષાણાં ગુણાનામીશ્વરસ્ય ચ ।
દર્શનાદેવ સતતં વિરક્તં જાયતે મનઃ ॥ ૧૩॥

અષ્ટાઙ્ગો વા ષડઙ્ગો વા સર્વયોગઃ સમાસતઃ ।
યમશ્ચ નિયમશ્ચૈવ સ્વસ્તિકાદ્યં તથાસનમ્ ॥ ૧૪॥

પ્રાણાયામઃ પ્રત્યાહારો ધારણા ધ્યાનમેવ ચ ।
સમાધિરિતિ યોગાઙ્ગાન્યષ્ટાવુક્તાનિ સૂરિભિઃ ॥ ૧૫॥

આસનં પ્રાણસંરોધઃ પ્રત્યાહારોઽથ ધારણા ।
ધ્યાનં સમાધિર્યોગસ્ય ષડઙ્ગાનિ સમાસતઃ ॥ ૧૬॥

પૃથગ્લક્ષણમેતેષાં શિવશાસ્ત્રે સમીરિતમ્ ।
શિવાગમેષુ ચાન્યેષુ વિશેષાત્ કામિકાદિષુ ॥ ૧૭॥

યોગશાસ્ત્રેષ્વપિ તથા પુરાણેષ્વપિ કેષુ ચ ।
અહિંસા સત્યમસ્તેયં બ્રહ્મચર્યાપરિગ્રહઃ ।
યમ ઇત્યુચ્યતે સદ્ભિઃ પઞ્ચાવયવયોગતઃ ॥ ૧૮॥

શૌચં તુષ્ટિસ્તપશ્ચૈવ જપઃ પ્રણિધિરેવ ચ ।
ઇતિ પઞ્ચ પ્રભેદઃ સ્યાન્નિયમઃ સ્વાંશભેદતઃ ॥ ૧૯॥

સ્વસ્તિકં પદ્મમધ્યેન્દું વીરં યોગં પ્રસાધિતમ્ ।
પર્યઙ્કં ચ યથેષ્ટં ચ પ્રોક્તમાસનમષ્ટધા ॥ ૨૦॥

પ્રાણઃ સ્વદેહજો વાયુસ્તસ્યાયામો નિરોધનમ્ ।
તદ્રેચકં પૂરકં ચ કુમ્ભકં ચ ત્રિધોચ્યતે ॥ ૨૧॥

નાસિકાપુટમઙ્ગુલ્યા પીડ્યૈકમપરેણ તુ ।
ઔદરં રેચયેદ્વાયું તથાયં રેચકઃ સ્મૃતઃ ॥ ૨૨॥

બાહ્યેન મરુતા દેહં દૃતિવત્પરિપૂરયેત્ ।
નાસાપુટેનાપરેણ પૂરણાત્પૂરકં મતમ્ ॥ ૨૩॥

ન મુઞ્ચતિ ન ગૃહ્ણાતિ વાયુમન્તર્બહિઃ સ્થિતમ્ ।
સમ્પૂર્ણં કુમ્ભવત્તિષ્ઠેદચલઃ સ તુ કુમ્ભકઃ ॥ ૨૪॥

રેચકાદ્યં ત્રયમિદં ન દ્રુતં ન વિલમ્બિતમ્ ।
તદ્યતઃ ક્રમયોગેન ત્વભ્યસેદ્યોગસાધકઃ ॥ ૨૫॥

રેચકાદિષુ યોઽભ્યાસો નાડીશોધનપૂર્વકઃ ।
સ્વેચ્છોત્ક્રમણપર્યન્તઃ પ્રોક્તો યોગાનુશાસને ॥ ૨૬॥

કન્યકાદિક્રમવશાત્ પ્રાણાયામનિરોધનમ્ ।
તચ્ચતુર્ધોપદિષ્ટં સ્યાન્માત્રાગુણવિભાગતઃ ॥ ૨૭॥

કન્યકસ્તુ ચતુર્ધા સ્યાત્સ ચ દ્વાદશમાત્રકઃ ।
મધ્યમસ્તુ દ્વિરુદ્ધાતશ્ચતુર્વિંશતિમાત્રકઃ ॥ ૨૮॥

ઉત્તમસ્તુ ત્રિરુદ્ધાતઃ ષટ્ત્રિંશન્ માત્રકઃ પરઃ ।
સ્વેદકમ્પાદિજનકઃ પ્રાણાયામસ્તદુત્તરઃ ॥ ૨૯॥

આનન્દોદ્ભવરોમાઞ્ચનેત્રાશ્રૂણાં વિમોચનમ્ ।
જલ્પભ્રમણમૂર્છાદ્યં જાયતે યોગિનઃ પરમ્ ॥ ૩૦॥

જાનું પ્રદક્ષિણીકૃત્ય ન દ્રુતં ન વિલમ્બિતમ્ ।
અઙ્ગુલીસ્ફોટનં કુર્યાત્સા માત્રેતિ પ્રકીર્તિતા ॥ ૩૧॥

માત્રા ક્રમેણ વિજ્ઞેયાશ્ચોદ્ઘાતક્રમયોગતઃ ।
નાડીવિશુદ્ધિપૂર્વં તુ પ્રાણાયામં સમાચરેત્ ॥ ૩૨॥

અગર્ભશ્ચ સગર્ભશ્ચ પ્રાણાયામો દ્વિધા સ્મૃતઃ ।
જપં ધ્યાનં વિનાગર્ભઃ સગર્ભસ્તત્સમન્વયાત્ ॥ ૩૩॥

અગર્ભાદ્ગર્ભસંયુક્તઃ પ્રાણાયામઃ શતાધિકઃ ।
તસ્માત્સગર્ભં કુર્વન્તિ યોગિનઃ પ્રાણસંયમમ્ ॥ ૩૪॥

પ્રાણસ્ય વિજયાદેવ જીયન્તે દેહવાયવઃ ।
પ્રાણોઽપાનઃ સમાનશ્ચ હ્યુદાનો વ્યાન એવ ચ ॥ ૩૫॥

નાગઃ કૂર્મશ્ચ કૃકલો દેવદત્તો ધનઞ્જયઃ ।
પ્રયાણં કુરુતે યસ્માત્તસ્માત્પ્રાણોઽભિધીયતે ॥ ૩૬॥

અવાઙ્નયત્યપાનાખ્યો યદાહારાદિ ભુજ્યતે ।
વ્યાનો વ્યાન શયત્યઙ્ગાન્યશેષાણિ વિવર્ધયન્ ॥ ૩૭॥

ઉદ્વેજયતિ મર્માણીત્યુદાનો વાયુરીરિતઃ ।
સમં નયતિ સર્વાઙ્ગં સમાનસ્તેન ગીયતે ॥ ૩૮॥

ઉદ્ગારે નાગ આખ્યાતઃ કૂર્મ ઉન્મીલને સ્થિતઃ ।
કૃકલઃ ક્ષવથૌ જ્ઞેયો દેવદત્તો વિજૃમ્ભણે ॥ ૩૯॥

ન જહાતિ મૃતં ચાપિ સર્વવ્યાપી ધનઞ્જયઃ ।
ક્રમેણાભ્યસ્યમાનોઽયં પ્રાણાયામઃ પ્રમાણવાન્ ॥ ૪૦॥

નિર્દહત્યખિલં દોષં કર્તુર્દેહં ચ રક્ષતિ ।
પ્રાણે તુ વિજિતે સમ્યક્ તચ્ચિહ્નાન્યુપલક્ષયેત્ ॥ ૪૧॥

વિણ્મૂત્રશ્લેષ્મણાં તાવદલ્પભાવઃ પ્રજાયતે ।
બહુભોજનસામર્થ્યં ચિરાદુચ્છ્વાસનં તથા ॥ ૪૨॥

લઘુત્વં શીઘ્રગામિત્વમુત્સાહઃ સ્વરસૌષ્ઠવમ્ ।
સર્વરોગક્ષયશ્ચૈવ બલં તેજઃ સુરૂપતા ॥ ૪૩॥

ધૃતિર્મેધા યુવત્વં ચ સ્થિરતા ચ પ્રસન્નતા ।
તપાંસિ પાપક્ષયતા યજ્ઞદાનવ્રતાદયઃ ॥ ૪૪॥

પ્રાણાયામસ્ય તસ્યૈતે કલાં નાર્હન્તિ ષોડશીમ્ ।
ઇન્દ્રિયાણિ પ્રસક્તાનિ યથાસ્વં વિષયેષ્વિહ ॥ ૪૫॥

આહત્ય યન્નિગૃહ્ણાતિ સ પ્રત્યાહાર ઉચ્યતે ।
મનઃપૂર્વાણીન્દ્રિયાણિ સ્વર્ગં નરકમેવ ચ ॥ ૪૬॥

નિગૃહીતનિસૃષ્ટાનિ સ્વર્ગાય નરકાય ચ ।
તસ્માત્સુખાર્થી મતિમાન્ જ્ઞાનવૈરાગ્યમાસ્થિતઃ ॥ ૪૭॥

ઇન્દ્રિયાશ્વાન્નિગૃહ્યાશુ સ્વાત્મનાત્માનમુદ્ધરેત્ ।
ધારણા નામ ચિત્તસ્ય સ્થાનબન્ધઃ સમાસતઃ ॥ ૪૮॥

સ્થાનં ચ શિવ એવૈકો નાન્યદ્દોષત્રયં યતઃ ।
કાલં કં ચાવધીકૃત્ય સ્થાનેઽવસ્થાપિતં મનઃ ॥ ૪૯॥

ન તુ પ્રચ્યવતે લક્ષ્યાદ્ધારણા સ્યાન્ન ચાન્યથા ।
મનસઃ પ્રથમં સ્થૈર્યં ધારણાતઃ પ્રજાયતે ॥ ૫૦॥

તસ્માદ્ધીરં મનઃ કુર્યાદ્ધારણાભ્યાસયોગતઃ ।
ધ્યૈ ચિન્તાયાં સ્મૃતો ધાતુઃ શિવચિન્તા મુહુર્મુહુઃ ॥ ૫૧॥

અવ્યાક્ષિપ્તેન મનસા ધ્યાનં નામ તદુચ્યતે ।
ધ્યેયાવસ્થિતચિત્તસ્ય સદૃશઃ પ્રત્યયશ્ચ યઃ ॥ ૫૨॥

પ્રત્યયાન્તરનિર્મુક્તઃ પ્રવાહો ધ્યાનમુચ્યતે ।
સર્વમન્યત્પરિત્યજ્ય શિવ એવ શિવઙ્કરઃ ॥ ૫૩॥

પરો ધ્યેયોઽધિદેવેશઃ સમાપ્તાથર્વણી શ્રુતિઃ ।
તથા શિવા પરા ધ્યેયા સર્વભૂતગતૌ શિવૌ ॥ ૫૪॥

તૌ શ્રુતૌ સ્મૃતિશાસ્ત્રેભ્યઃ સર્વગૌ સર્વદોદિતૌ ।
સર્વજ્ઞૌ સતતં ધ્યેયૌ નાનારૂપવિભેદતઃ ॥ ૫૫॥

વિમુક્તિઃ પ્રત્યયઃ પૂર્વઃ પ્રત્યયશ્ચાણિમાદિકમ્ ।
ઇત્યેતદ્ દ્વિવિધં જ્ઞેયં ધ્યાનસ્યાસ્ય પ્રયોજનમ્ ॥ ૫૬॥

ધ્યાતા ધ્યાનં તથા ધ્યેયં યચ્ચ ધ્યાનપ્રયોજનમ્ ।

એતચ્ચતુષ્ટયં જ્ઞાત્વા યોગં યુઞ્જીત યોગવિત્ ॥ ૫૭॥

જ્ઞાનવૈરાગ્યસમ્પન્નઃ શ્રદ્ધાનઃ ક્ષમાન્વિતઃ ।
નિર્મમશ્ચ સદોત્સાહી ધ્યાતેત્થં પુરુષઃ સ્મૃતઃ ॥ ૫૮॥

જપાચ્છ્રાન્તઃ પુનર્ધ્યાયેદ્ધ્યાનાચ્છ્રાન્તઃ પુનર્જપેત્ ।
જપધ્યનાભિયુક્તસ્ય ક્ષિપ્રં યોગઃ પ્રસિદ્ધ્યતિ ॥ ૫૯॥

ધારણા દ્વાદશાયામા ધ્યાનં દ્વાદશધારણમ્ ।
ધ્યાનદ્વાદશકં યાવત્સમાધિરભિધીયતે ॥ ૬૦॥

સમાધિર્નામ યોગાઙ્ગમન્તિમં પરિકીર્તિતમ્ ।
સમાધિના ચ સર્વત્ર પ્રજ્ઞાલોકઃ પ્રવર્તતે ॥ ૬૧॥

યદર્થમાત્રનિર્ભાસં સ્તિમિતોદધિવત્સ્થિતમ્ ।
સ્વરૂપશૂન્યવદ્ભાનં સમાધિરભિધીયતે ॥ ૬૨॥

ધ્યેયે મનઃ સમાવેશ્ય પશ્યેદપિ ચ સુસ્થિરમ્ ।
નિર્વાણાનલવદ્યોગી સમાધિસ્થઃ પ્રગીયતે ॥ ૬૩॥

ન શ ૃણોતિ ન ચાઘ્રાતિ ન જલ્પતિ ન પશ્યતિ ।
ન ચ સ્પર્શં વિજાનાતિ ન સઙ્કલ્પયતે મનઃ ॥ ૬૪॥

ન વાભિમન્યતે કિઞ્ચિદ્ બધ્યતે ન ચ કાષ્ઠવત્ ।
એવં શિવે વિલીનાત્મા સમાધિસ્થ ઇહોચ્યતે ॥ ૬૫॥

યથા દીપો નિવાતસ્થઃ સ્પન્દતે ન કદાચન ।
તથા સમાધિનિષ્ઠોઽપિ તસ્માન્ન વિચલેત્સુધીઃ ॥ ૬૬॥

એવમભ્યસતશ્ચારં યોગિનો યોગમુત્તમમ્ ।
તદન્તરાયા નશ્યન્તિ વિઘ્નાઃ સર્વે શનૈઃશનૈઃ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયાં વાયુનૈમિષેયર્ષિસંવાદે ઉત્તરખણ્ડે યોગગતિવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૮. અષ્ટત્રિંશોઽધ્યાયઃ । યોગગતૌ વિઘ્નોત્પત્તિવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
આલસ્યં વ્યાધયસ્તીવ્રાઃ પ્રમાદઃ સ્થાનસંશયઃ ।
અનવસ્થિતચિત્તત્વમશ્રદ્ધા ભ્રાન્તિદર્શનમ્ ॥ ૧॥

દુઃખાનિ દૌર્મનસ્યં ચ વિષયેષુ ચ લોલતા ।
દશૈતે યુઞ્જતાં પુંસામન્તરાયાઃ પ્રકીર્તિતાઃ ॥ ૨॥

આલસ્યમલસત્ત્વં તુ યોગિનાં દેહચેતસોઃ ।
ધાતુવૈષમ્યજા દોષા વ્યાધયઃ કર્મદોષજાઃ ॥ ૩॥

પ્રમાદો નામ યોગસ્ય સાધના નામ ભાવના ।
ઇદં વેત્યુભયાક્રાન્તં વિજ્ઞાનં સ્થાનસંશયઃ ॥ ૪॥

અપ્રતિષ્ઠા હિ મનસસ્ત્વનવસ્થિતિરુચ્યતે ।
અશ્રદ્ધા ભાવરહિતા વૃત્તિર્વૈ યોગવર્ત્મનિ ॥ ૫॥

વિપર્યસ્તા મતિર્યા સા ભ્રાન્તિરિત્યભિધીયતે ।
દુઃખમજ્ઞાનજં પુંસાં ચિત્તસ્યાધ્યાત્મિકં વિદુઃ ॥ ૬॥

આધિભૌતિકમઙ્ગોત્થં યચ્ચ દુઃખં પુરા કૃતૈઃ ।
આધિદૈવિકમાખ્યાતમશન્યસ્ત્રવિષાદિકમ્ ॥ ૭॥

ઇચ્છાવિઘાતજં ક્ષોભં દૌર્મનસ્યં પ્રચક્ષતે ।
વિષયેષુ વિચિત્રેષુ વિભ્રમસ્તત્ર લોલતા ॥ ૮॥

શાન્તેષ્વેતેષુ વિઘ્નેષુ યોગાસક્તસ્ય યોગિનઃ ।
ઉપસર્ગાઃ પ્રવર્તન્તે દિવ્યાસ્તે સિદ્ધિસૂચકાઃ ॥ ૯॥

પ્રતિભા શ્રવણં વાર્તા દર્શનાસ્વાદવેદનાઃ ।
ઉપસર્ગાઃ ષડિત્યેતે વ્યયે યોગસ્ય સિદ્ધયઃ ॥ ૧૦॥

સૂક્ષ્મે વ્યવહિતેઽતીતે વિપ્રકૃષ્ટે ત્વનાગતે ।
પ્રતિભા કથ્યતે યોઽર્થે પ્રતિભાસો યથાતથમ્ ॥ ૧૧॥

શ્રવણં સર્વશબ્દાનાં શ્રવણે ચાપ્રયત્નતઃ ।
વાર્ત્તા વાર્ત્તાસુ વિજ્ઞાનં સર્વેષામેવ દેહિનામ્ ॥ ૧૨॥

દર્શનં નામ દિવ્યાનાં દર્શનં ચાપ્રયત્નતઃ ।
તથાસ્વાદશ્ચ દિવ્યેષુ રસેષ્વાસ્વાદ ઉચ્યતે ॥ ૧૩॥

સ્પર્શનાધિગમસ્તદ્વદ્ વેદના નામ વિશ્રુતા ।
ગન્ધાદીનાં ચ દિવ્યાનામાબ્રહ્મભુવનાધિપાઃ ॥ ૧૪॥

સન્તિષ્ઠન્તે ચ રત્નાનિ પ્રયચ્છન્તિ બહૂનિ ચ ।
સ્વચ્છન્દમધુરા વાણી વિવિધા સ્યાત્પ્રવર્તતે ॥ ૧૫॥

રસાયનાનિ સર્વાણિ દિવ્યાશ્ચૌષધયસ્તથા ।
સિધ્યન્તિ પ્રણિપત્યૈનં દિશન્તિ સુરયોષિતઃ ॥ ૧૬॥

યોગસિદ્ધ્યૈકદેશેઽપિ દૃષ્ટે મોક્ષે ભવેન્મતિઃ ।
દૃષ્ટમેતન્મયા યદ્વત્ તદ્વન્મોક્ષો ભવેદિતિ ॥ ૧૭॥

કૃશતા સ્થૂલતા બાલ્યં વાર્દ્ધક્યં ચૈવ યૌવનમ્ ।
નાનાજાતિસ્વરૂપં ચ ચતુર્ણાં દેહધારણમ્ ॥ ૧૮॥

પાર્થિવાંશં વિના નિત્યં સુરભિર્ગન્ધસઙ્ગ્રહઃ ।
એવમષ્ટગુણં પ્રાહુઃ પૈશાચં પાર્થિવં પદમ્ ॥ ૧૯॥

જલે નિવસનં ચૈવ ભૂમ્યામેવં વિનિર્ગમઃ ।
ઇચ્છેચ્છક્તઃ સ્વયં પાતું સમુદ્રમપિ નાતુરઃ ॥ ૨૦॥

યત્રેચ્છતિ જગત્યસ્મિંસ્તત્રૈવ જલદર્શનમ્ ।
વિના કુમ્ભાદિકં પાણૌ જલસઞ્ચયધારણમ્ ॥ ૨૧॥

યદ્વસ્તુ વિરસઞ્ચાપિ ભોક્તુમિચ્છતિ તત્ક્ષણાત્ ।
રસાદિકં ભવેચ્ચાન્યત્ ત્રયાણાં દેહધારણમ્ ॥ ૨૨॥

નિર્વ્રણત્વં શરીરસ્ય પાર્થિવૈશ્ચ સમન્વિતમ્ ।
તદિદં ષોડશગુણમાપ્યમૈશ્વર્યમદ્ભુતમ્ ॥ ૨૩॥

શરીરાદગ્નિનિર્માણં તત્તાપભયવર્જ્જનમ્ ।
શક્તિર્જગદિદં દગ્ધું યદીચ્છેદપ્રયત્નતઃ ॥ ૨૪॥

સ્થાપનં વાનલસ્યાઽપ્સુ પાણૌ પાવકધારણમ્ ।
દગ્ધે સર્ગે યથાપૂર્વં મુખે ચાન્નાદિપાચનમ્ ।
દ્વાભ્યાં દેહવિનિર્માણમાપ્યૈશ્વર્યસમન્વિતમ્ ॥ ૨૫॥

એતચ્ચતુર્વિંશતિધા તૈજસં પરિચક્ષતે ।
મનોજવત્વં ભૂતાનાં ક્ષણાદન્તઃ પ્રવેશનમ્ ॥ ૨૬॥

પર્વતાદિમહાભારધારણં ચાપ્રયત્નતઃ ।
ગુરુત્વં ચ લઘુત્વં ચ પાણાવનિલધારણમ્ ॥ ૨૭॥

અઙ્ગુલ્યગ્રનિપાતાદ્યૈર્ભૂમેરપિ ચ કમ્પનમ્ ।
એકેન દેહનિષ્પત્તિર્યુક્તં ભોગૈશ્ચ તૈજસૈઃ ॥ ૨૮॥

દ્વાત્રિંશદ્ગુણમૈશ્વર્યં મારુતં કવયો વિદુઃ ।
છાયાહીનવિનિષ્પત્તિરિન્દ્રિયાણામદર્શનમ્ ॥ ૨૯॥

ખેચરત્વં યથાકામમિન્દ્રિયાર્થસમન્વયઃ ।
આકાશલઙ્ઘનં ચૈવ સ્વદેહે તન્નિવેશનમ્ ॥ ૩૦॥

આકાશપિણ્ડીકરણમશરીરત્વમેવ ચ ।
અનિલૈશ્વર્યસંયુક્તં ચત્વારિંશદ્ગુણં મહત્ ॥ ૩૧॥

ઐન્દ્રમૈશ્વર્યમાખ્યાતમામ્બરં તત્પ્રચક્ષતે ।
યથાકામોપલબ્ધિશ્ચ યથાકામવિનિર્ગમઃ ॥ ૩૨॥

સર્વસ્યાભિભવશ્ચૈવ સર્વગુહ્યાર્થદર્શનમ્ ।
કર્માનુરૂપનિર્માણં વશિત્વં પ્રિયદર્શનમ્ ॥ ૩૩॥

સંસારદર્શનં ચૈવ ભોગૈરૈન્દ્રૈઃ સમન્વિતમ્ ।
એતચ્ચાન્દ્રમસૈશ્વર્યં માનસં ગુણતોઽધિકમ્ ॥ ૩૪॥

છેદનં તાડનં ચૈવ બન્ધનં મોચનં તથા ।
ગ્રહણં સર્વભૂતાનાં સંસારવશવર્તિનામ્ ॥ ૩૫॥

પ્રસાદશ્ચાપિ સર્વેષાં મૃત્યુકાલજયસ્તથા ।
આભિમાનિકમૈશ્વર્યં પ્રાજાપત્યં પ્રચક્ષતે ॥ ૩૬॥

એતચ્ચાન્દ્રમસૈર્ભોગૈઃ ષટ્પઞ્ચાશદ્ગુણં મહત્ ।
સર્ગઃ સઙ્કલ્પમાત્રેણ ત્રાણં સંહરણં તથા ॥ ૩૭॥

સ્વાધિકારશ્ચ સર્વેષાં ભૂતચિત્તપ્રવર્તનમ્ ।
અસાદૃશ્યં ચ સર્વસ્ય નિર્માણં જગતઃ પૃથક્ ॥ ૩૮॥

શુભાશુભસ્ય કરણં પ્રાજાપત્યૈશ્ચ સંયુતમ્ ।
ચતુઃષષ્ટિગુણં બ્રાહ્મમૈશ્વર્યં ચ પ્રચક્ષતે ॥ ૩૯॥

બૌદ્ધાદસ્માત્પરં ગૌણમૈશ્વર્યં પ્રાકૃતં વિદુઃ ।
વૈષ્ણવં તત્સમાખ્યાતં તસ્યૈવ ભુવનસ્થિતિઃ ।

બ્રહ્મણા તત્પદં સર્વં વક્તુમન્યૈર્ન શક્યતે ॥ ૪૦॥

તત્પૌરુષં ચ ગૌણં ચ ગાણેશં પદમૈશ્વરમ્ ।
વિષ્ણુના તત્પદં કિઞ્ચિજ્જ્ઞાતુમન્યૈર્ન શક્યતે ॥ ૪૧॥

વિજ્ઞાનસિદ્ધયશ્ચૈવ સર્વા એવૌપસર્ગિકાઃ ।
નિરોદ્ધવ્યાઃ પ્રયત્નેન વૈરાગ્યેણ પરેણ તુ ॥ ૪૨॥

પ્રતિભાસેષ્વશુદ્ધેષુ ગુણેષ્વાસક્તચેતસઃ ।
ન સિધ્યેત્પરમૈશ્વર્યમભયં સાર્વકામિકમ્ ॥ ૪૩॥

તસ્માદ્ગુણાંશ્ચ ભોગાંશ્ચ દેવાસુરમહીભૃતામ્ ।
તૃણવદ્યસ્ત્યજેત્તસ્ય યોગસિદ્ધિઃ પરા ભવેત્ ॥ ૪૪॥

અથવાનુગ્રહેચ્છાયાં જગતો વિચરેન્મુનિઃ ।
યથાકામં ગુણાન્ભોગાન્ભુક્ત્વા મુક્તિં પ્રયાસ્યતિ ॥ ૪૫॥

અથ પ્રયોગં યોગસ્ય વક્ષ્યે શ ૃણુ સમાહિતઃ ।
શુભે કાલે શુભે દેશે શિવક્ષેત્રાદિકે પુનઃ ।
વિજને જન્તુરહિતે નિઃશબ્દે બાધવર્જિતે ॥ ૪૬॥

સુપ્રલિપ્તે સ્થલે સૌમ્યે ગન્ધધૂપાદિવાસિતે ।
મુક્તપુષ્પસમાકીર્ણે વિતાનાદિવિચિત્રિતે ॥ ૪૭॥

કુશપુષ્પસમિત્તોયફલમૂલસમન્વિતે ।
નાગ્ન્યભ્યાશે જલાભ્યાશે શુષ્કપર્ણચયેઽપિ વા ॥ ૪૮॥

ન દંશમશકાકીર્ણે સર્પશ્વાપદસઙ્કુલે ।
ન ચ દુષ્ટમૃગાકીર્ણે ન ભયે દુર્જનાવૃતે ॥ ૪૯॥

શ્મશાને ચૈત્યવલ્મીકે જીર્ણાગારે ચતુષ્પથે ।
નદીનદસમુદ્રાણાં તીરે રથ્યાન્તરેઽપિ વા ॥ ૫૦॥

ન જીર્ણોદ્યાનગોષ્ઠાદૌ નાનિષ્ટે ન ચ નિન્દિતે ।
નાજીર્ણામ્લરસોદ્ગારે ન ચ વિણ્મૂત્રદૂષિતે ॥ ૫૧॥

ન ચ્છર્દ્યામાતિસારે વા નાતિભુક્તૌ શ્રમાન્વિતે ।
ન ચાતિચિન્તાકુલિતો ન ચાતિક્ષુત્પિપાસિતઃ ॥ ૫૨॥

નાપિ સ્વગુરુકર્માદૌ પ્રસક્તો યોગમાચરેત્ ।
યુક્તાહારવિહારશ્ચ યુક્તચેષ્ટશ્ચ કર્મસુ ॥ ૫૩॥

યુક્તનિદ્રાપ્રબોધશ્ચ સર્વાયાસવિવર્જિતઃ ।
આસનં મૃદુલં રમ્યં વિપુલં સુસમં શુચિ ॥ ૫૪॥

પદ્મકસ્વસ્તિકાદીનામભ્યસેદાસનેષુ ચ ।
અભિવન્દ્ય સ્વગુર્વન્તાનભિવાદ્યાનનુક્રમાત્ ॥ ૫૫॥

ઋજુગ્રીવશિરોવક્ષા નાતિષ્ઠેચ્છ્લિષ્ટલોચનઃ ।
કિઞ્ચિદુન્નામિતશિરા દન્તૈર્દન્તાન્ન સંસ્પૃશેત્ ॥ ૫૬॥

દન્તાગ્રસંસ્થિતાં જિહ્વામચલાં સન્નિવેશ્ય ચ ।
પાર્ષ્ણિભ્યાં વૃષણૌ રક્ષંસ્તથા પ્રજનનં પુનઃ ॥ ૫૭॥

ઊર્વોરુપરિ સંસ્થાપ્ય બાહૂ તિર્યગયત્નતઃ ।
દક્ષિણં કરપૃષ્ઠં તુ ન્યસ્ય વામતલોપરિ ॥ ૫૮॥

ઉન્નામ્ય શનકૈઃ પૃષ્ઠમુરો વિષ્ટભ્ય ચાગ્રતઃ ।
સમ્પ્રેક્ષ્ય નાસિકાગ્રં સ્વં દિશશ્ચાનવલોકયન્ ॥ ૫૯॥

સમ્ભૃતપ્રાણસઞ્ચારઃ પાષાણ ઇવ નિશ્ચલઃ ।
સ્વદેહાયતનસ્યાન્તર્વિચિન્ત્ય શિવમમ્બયા ॥ ૬૦॥

હૃત્પદ્મપીઠિકામધ્યે ધ્યાનયજ્ઞેન પૂજયેત્ ।
મૂલે નાસાગ્રતો નાભૌ કણ્ઠે વા તાલુરન્ધ્રયોઃ ॥ ૬૧॥

ભ્રૂમધ્યે દ્વારદેશે વા લલાટે મૂર્ધ્નિ વા સ્મરેત્ ।
પરિકલ્પ્ય યથાન્યાયં શિવયોઃ પરમાસનમ્ ॥ ૬૨॥

તત્ર સાવરણં વાપિ નિરાવરણમેવ વા ।
દ્વિદલે ષોડશારે વા દ્વાદશારે યથાવિધિ ॥ ૬૩॥

દશારે વા ષડસ્રે વા ચતુરસ્રે શિવં સ્મરેત્ ।
ભ્રુવોરન્તરતઃ પદ્મં દ્વિદલં તડિદુજ્જ્વલમ્ ॥ ૬૪॥

ભ્રૂમધ્યસ્થારવિન્દસ્ય ક્રમાદ્વૈ દક્ષિણોત્તરે ।
વિદ્યુત્સમાનવર્ણે ચ પર્ણે વર્ણાવસાનકે ॥ ૬૫॥

ષોડશારસ્ય પત્રાણિ સ્વરાઃ ષોડશ તાનિ વૈ ।
પૂર્વાદીનિ ક્રમાદેતત્પદ્મં કન્દસ્ય મૂલતઃ ॥ ૬૬॥

કકારાદિઠકારાન્તા વર્ણાઃ પર્ણાન્યનુક્રમાત્ ।

ભાનુવર્ણસ્ય પદ્મસ્ય ધ્યેયં તદ્ધૃદયાન્તરે ॥ ૬૭॥

વર્ણાઃ પર્ણાનિ પક્ષસ્ય નાભેરુપરિ પૃષ્ઠતઃ ।
ગોક્ષીરધવલસ્યોક્તા ડાદિફાન્તા યથાક્રમમ્ ।
અધો દલસ્યામ્બુજસ્ય એતસ્ય ચ દલાનિ ષટ્ ॥ ૬૮॥

વિધૂમાઙ્ગારવર્ણસ્ય વર્ણા વાદ્યાશ્ચ લાન્તિમાઃ ।
મૂલાધારારવિન્દસ્ય હેમાભસ્ય યથાક્રમમ્ ।
વકારાદિસકારાન્તા વર્ણાઃ પર્ણમયાઃ સ્થિતાઃ ॥ ૬૯॥

એતેષ્વથારવિન્દેષુ યત્રૈવાભિરતં મનઃ ।
તત્રૈવ દેવં દેવીં ચ ચિન્તયેદ્ધીરયા ધિયા ॥ ૭૦॥

અઙ્ગુષ્ઠમાત્રમમલં દીપ્યમાનં સમન્તતઃ ।
શુદ્ધદીપશિખાકારં સ્વશક્ત્યા પૂર્ણમણ્ડિતમ્ ॥ ૭૧॥

ઇન્દુરેખાસમાકારં તારારૂપમથાપિ વા ।
નીવારશૂકસદૃશં બિસસુત્રાભમેવ વા ॥ ૭૨॥

કદમ્બગોલકાકારં તુષારકણિકોપમમ્ ।
ક્ષિત્યાદિતત્ત્વવિજયં ધ્યાતા યદ્યપિ વાઞ્છતિ ॥ ૭૩॥

તત્તત્તત્ત્વાધિપામેવ મૂર્તિં સ્થૂલાં વિચિન્તયેત્ ।
સદાશિવાન્તા બ્રહ્માદ્યા ભવાદ્યાશ્ચાષ્ટમૂર્તયઃ ॥ ૭૪॥

શિવસ્ય મૂર્તયઃ સ્થૂલાઃ શિવશાસ્ત્રે વિનિશ્ચિતાઃ ।
ઘોરા મિશ્રાઃ પ્રશાન્તાશ્ચ મૂર્તયસ્તા મુનીશ્વરૈઃ ॥ ૭૫॥

ફલાભિલાષરહિતૈશ્ચિન્ત્યાશ્ચિન્તાવિશારદૈઃ ।
ઘોરાશ્ચેચ્ચિન્તિતાઃ કુર્યુઃ પાપરોગપરિક્ષયમ્ ॥ ૭૬॥

ચિરેણ મિશ્રે સૌમ્યે તુ ન સદ્યો ન ચિરાદપિ ।
સૌમ્યે મુક્તિર્વિશેષેણ શાન્તિઃ પ્રજ્ઞા પ્રસિધ્યતિ ॥ ૭૭॥

સિધ્યન્તિ સિદ્ધયશ્ચાત્ર ક્રમશો નાત્ર સંશયઃ ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે યોગગતૌ વિઘ્નોત્પત્તિવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૭.૨.૩૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૩૯. એકોનચત્વારિંશોઽધ્યાયઃ । શૈવયોગવર્ણનમ્ ।

ઉપમન્યુરુવાચ ।
શ્રીકણ્ઠનાથં સ્મરતાં સદ્યઃ સર્વાર્થસિદ્ધયઃ ।
પ્રસિધ્યન્તીતિ મત્વૈકે તં વૈ ધ્યાયન્તિ યોગિનઃ ॥ ૧॥

સ્થિત્યર્થં મનસઃ કેચિત્સ્થૂલધ્યાનં પ્રકુર્વતે ।
સ્થૂલે તુ નિશ્ચલં ચેતો ભવેત્સૂક્ષ્મે તુ તત્સ્થિરમ્ ॥ ૨॥

શિવે તુ ચિન્તિતે સાક્ષાત્સર્વાઃ સિધ્યન્તિ સિદ્ધયઃ ।
મૂર્ત્યન્તરેષુ ધ્યાતેષુ શિવરૂપં વિચિન્તયેત્ ॥ ૩॥

લક્ષયેન્મનસઃ સ્થૈર્યં તત્તદ્ધ્યાયેત્પુનઃ પુનઃ ।
ધ્યાનમાદૌ સવિષયં તતો નિર્વિષયં જગુઃ ॥ ૪॥

તત્ર નિર્વિષયં ધ્યાનં નાસ્તીત્યેવ સતાં મતમ્ ।
બુદ્ધેર્હિ સન્તતિઃ કાચિદ્ધ્યાનમિત્યભિધીયતે ॥ ૫॥

તેન નિર્વિષયા બુદ્ધિઃ કેવલેહ પ્રવર્તતે ।
તસ્માત્સવિષયં ધ્યાનં બાલાર્કકિરણાશ્રયમ્ ॥ ૬॥

સૂક્ષ્માશ્રયં નિર્વિષયં નાપરં પરમાર્થતઃ ।
યદ્વા સવિષયં ધ્યાનં તત્સાકારસમાશ્રયમ્ ॥ ૭॥

નિરાકારાત્મસંવિત્તિર્ધ્યાનં નિર્વિષયં મતમ્ ।
નિર્બીજં ચ સબીજં ચ તદેવ ધ્યાનમુચ્યતે ॥ ૮॥

નિરાકારશ્રયત્વેન સાકારાશ્રયતસ્તથા ।
તસ્માત્સવિષયં ધ્યાનમાદૌ કૃત્વા સબીજકમ્ ॥ ૯॥

અન્તે નિર્વિષયં કુર્યાન્નિર્બીજં સર્વસિદ્ધયે ।
પ્રાણાયામેન સિધ્યન્તિ દેવ્યાઃ શાન્ત્યાદયઃ ક્રમાત્ ॥ ૧૦॥

શાન્તિઃ પ્રશાન્તિર્દીપ્તિશ્ચ પ્રસાદશ્ચ તતઃ પરમ્ ।
શમઃ સર્વાપદાં ચૈવ શાન્તિરિત્યભિધીયતે ॥ ૧૧॥

તમસોઽન્તર્બહિર્નાશઃ પ્રશાન્તિઃ પરિગીયતે ।
બહિરન્તઃપ્રકાશો યો દીપ્તિરિત્યભિધીયતે ॥ ૧૨॥

સ્વસ્થતા યા તુ સા બુદ્ધેઃ પ્રસાદઃ પરિકીર્તિતઃ ।
કારણાનિ ચ સર્વાણિ સબાહ્યાભ્યન્તરાણિ ચ ॥ ૧૩॥

બુદ્ધેઃ પ્રસાદતઃ ક્ષિપ્રં પ્રસન્નાનિ ભવન્ત્યુત ।
ધ્યાતા ધ્યાનં તથા ધ્યેયં યદ્ધા ધ્યાનપ્રયોજનમ્ ।
એતચ્ચતુષ્ટયં જ્ઞાત્વા ધ્યાતા ધ્યાનં સમાચરેત્ ॥ ૧૪॥

જ્ઞાનવૈરાગ્યસમ્પન્નો નિત્યમવ્યગ્રમાનસઃ ।
શ્રદ્દધાનઃ પ્રસન્નાત્મા ધ્યાતા સદ્ભિરુદાહૃતઃ ॥ ૧૫॥

ધ્યૈ ચિન્તાયાં સ્મૃતો ધાતુઃ શિવચિન્તા મુહુર્મુહુઃ ॥ ૧૬॥

યોગાભ્યાસસ્તથાલ્પોઽપિ યથા પાપં વિનાશયેત્ ।
ધ્યાયતઃ ક્ષણમાત્રં વા શ્રદ્ધયા પરમેશ્વરમ્ ॥ ૧૭॥

અવ્યાક્ષિપ્તેન મનસા ધ્યાનમિત્યભિધીયતે ॥ ૧૮॥

બુદ્ધિપ્રવાહરૂપસ્ય ધ્યાનસ્યાસ્યાવલમ્બનમ્ ।
ધ્યેયમિત્યુચ્યતે સદ્ભિસ્તચ્ચ સામ્બઃ સ્વયં શિવઃ ॥ ૧૯॥

વિમુક્તિપ્રત્યયં પૂર્ણમૈશ્વર્યં ચાણિમાદિકમ્ ।
શિવધ્યાનસ્ય પૂર્ણસ્ય સાક્ષાદુક્તં પ્રયોજનમ્ ॥ ૨૦॥

યસ્માત્સૌખ્યં ચ મોક્ષં ચ ધ્યાનાદુભયમાપ્નુયાત્ ।
તસ્માત્સર્વં પરિત્યજ્ય ધ્યાનયુક્તો ભવેન્નરઃ ॥ ૨૧॥

નાસ્તિ ધ્યાનં વિના જ્ઞાનં નાસ્તિ ધ્યાનમયોગિનઃ ।
ધ્યાનં જ્ઞાનં ચ યસ્યાસ્તિ તીર્ણસ્તેન ભવાર્ણવઃ ॥ ૨૨॥

જ્ઞાનં પ્રસન્નમેકાગ્રમશેષોપાધિવર્જિતમ્ ।
યોગાભ્યાસેન યુક્તસ્ય યોગિનસ્ત્વેવ સિધ્યતિ ॥ ૨૩॥

પ્રક્ષીણાશેષપાપાનાં જ્ઞાને ધ્યાને ભવેન્મતિઃ ।
પાપોપહતબુદ્ધીનાં તદ્વાર્તાપિ સુદુર્લભા ॥ ૨૪॥

યથા વહ્નિર્મહાદીપ્તઃ શુષ્કમાર્દ્રં ચ નિર્દહેત્ ।
તથા શુભાશુભં કર્મ ધ્યાનાગ્નિર્દહતે ક્ષણાત્ ॥ ૨૫॥

અત્યલ્પોઽપિ યથા દીપઃ સુમહન્નાશયેત્તમઃ ।
યોગાભ્યાસસ્તથાલ્પોઽપિ મહાપાપં વિનાશયેત્ ॥ ૨૬॥

ધ્યાયતઃ ક્ષણમાત્રં વા શ્રદ્ધયા પરમેશ્વરમ્ ।
યદ્ભવેત્ સુમહચ્છ્રેયસ્તસ્યાન્તો નૈવ વિદ્યતે ॥ ૨૭॥

નાસ્તિ ધ્યાનસમં તીર્થં નાસ્તિ ધ્યાનસમં તપઃ ।
નાસ્તિ ધ્યાનસમો યજ્ઞસ્તસ્માદ્ધ્યાનં સમાચરેત્ ॥ ૨૮॥

તીર્થાનિ તોયપૂર્ણાનિ દેવાન્પાષાણમૃણ્મયાન્ ।
યોગિનો ન પ્રપદ્યન્તે સ્વાત્મપ્રત્યયકારણાત્ ॥ ૨૯॥

યોગિનાં ચ વપુઃ સૂક્ષ્મં ભવેત્પ્રત્યક્ષમૈશ્વરમ્ ।
યથા સ્થૂલમયુક્તાનાં મૃત્કાષ્ઠાદ્યૈઃ પ્રકલ્પિતમ્ ॥ ૩૦॥

યથેહાન્તશ્ચરા રાજ્ઞઃ પ્રિયાઃ સ્યુર્ન બહિશ્ચરાઃ ।
તથાન્તર્ધ્યાનનિરતાઃ પ્રિયાશ્શમ્ભોર્ન કર્મિણઃ ॥ ૩૧॥

બહિષ્કરા યથા લોકે નાતીવ ફલભોગિનઃ ।
દૃષ્ટ્વા નરેન્દ્રભવને તદ્વદત્રાપિ કર્મિણઃ ॥ ૩૨॥

યદ્યન્તરા વિપદ્યન્તે જ્ઞાનયોગાર્થમુદ્યતઃ ।
યોગસ્યોદ્યોગમાત્રેણ રુદ્રલોકં ગમિષ્યતિ ॥ ૩૩॥

અનુભૂય સુખં તત્ર સ જાતો યોગિનાં કુલે ।
જ્ઞાનયોગં પુનર્લબ્ધ્વા સંસારમતિવર્તતે ॥ ૩૪॥

જિજ્ઞાસુરપિ યોગસ્ય યાં ગતિં લભતે નરઃ ।
ન તાં ગતિમવાપ્નોતિ સર્વૈરપિ મહામખૈઃ ॥ ૩૫॥

દ્વિજાનાં વેદવિદુષાં કોટિં સમ્પૂજ્ય યત્ફલમ્ ।
ભિક્ષામાત્રપ્રદાનેન તત્ફલં શિવયોગિને ॥ ૩૬॥

યજ્ઞાગ્નિહોત્રદાનેષુ તીર્થહોમેષુ યત્ફલમ્ ।
યોગિનામન્નદાનેન તત્સમસ્તં ફલં લભેત્ ॥ ૩૭॥

યે ચાપવાદં કુર્વન્તિ વિમૂઢાઃ શિવયોગિનામ્ ।
શ્રોતૃભિસ્તે પ્રપદ્યન્તે નરકેષ્વામહીક્ષયાત્ ॥ ૩૮॥

સતિ શ્રોતરિ વક્તા સ્યાદપવાદસ્ય યોગિનામ્ ।
તસ્માચ્છ્રોતા ચ પાપીયાન્દણ્ડ્યઃ સુમહતાં મતઃ ।
યે પુનઃ સતતં ભક્ત્યા ભજન્તિ શવયોગિનઃ ॥ ૩૯॥

તે વિદન્તિ મહાભોગાનન્તે યોગં ચ શાઙ્કરમ્ ।

ભોગાર્થિભિર્નરૈસ્તસ્માત્સમ્પૂજ્યાઃ શિવયોગિનઃ ॥ ૪૦॥

પ્રતિશ્રયાન્નપાનાદ્યૈઃ શય્યાપ્રાવરણાદિભિઃ ।
યોગધર્મઃ સસારત્વાદભેદ્યઃ પાપમુદ્ગરૈઃ ॥ ૪૧॥

વજ્રતન્દુલવજ્જ્ઞેયં તથા પાપેન યોગિનઃ ।
ન લિપ્યન્તે ચ તાપૌઘૈઃ પદ્મપત્રં યથામ્ભસા ॥ ૪૨॥

યસ્મિન્દેશે વસેન્નિત્યં શિવયોગરતો મુનિઃ ।
સોઽપિ દેશો ભવેત્પૂતઃ સ પૂત ઇતિ કિં પુનઃ ॥ ૪૩॥

તસ્માત્સર્વં પરિત્યજ્ય કૃત્યમન્યદ્વિચક્ષણઃ ।
સર્વદુઃખપ્રહાણાય શિવયોગં સમભ્યસેત્ ॥ ૪૪॥

સિદ્ધયોગફલો યોગી લોકાનાં હિતકામ્યયા ।
ભોગાન્ભુક્ત્વા યથાકામં વિહરેદ્વાત્ર વર્તતામ્ ॥ ૪૫॥

અથવા ક્ષુદ્રમિત્યેવ મત્વા વૈષયિકં સુખમ્ ।
ત્યક્ત્વા વિરાગયોગેન સ્વેચ્છયા કર્મ મુચ્યતામ્ ॥ ૪૬॥

યસ્ત્વાસન્નાં મૃતિં મર્ત્યો દૃષ્ટ્વારિષ્ટં ચ ભૂયસા ।
સ યોગારમ્ભનિરતઃ શિવક્ષેત્રં સમાશ્રયેત્ ॥ ૪૭॥

સ તત્ર નિવસન્નેવ યદિ ધીરમના નરઃ ।
પ્રાણાન્ વિનાપિ રોગાદ્યૈઃ સ્વયમેવ પરિત્યજેત્ ॥ ૪૮॥

કૃત્વાપ્યનશનં ચૈવ હુત્વા ચાઙ્ગં શિવાનલે ।
ક્ષિપ્ત્વા વા શિવતીર્થેષુ સ્વદેહમવગાહનાત્ ॥ ૪૯॥

શિવશાસ્ત્રોક્તવિધિવત્પ્રાણાન્યસ્તુ પરિત્યજેત્ ।
સદ્ય એવ વિમુચ્યેત નાત્ર કાર્યા વિચારણા ॥ ૫૦॥

રોગાદ્યૈર્વાથ વિવશઃ શિવક્ષેત્રં સમાશ્રિતઃ ।
મ્રિયતે યદિ સોઽપ્યેવં મુચ્યતે નાત્ર સંશયઃ ॥ ૫૧॥

યથા હિ મરણં શ્રેષ્ઠમુશન્ત્યનશનાદિભિઃ ।
શાસ્ત્રવિશ્રમ્ભધીરેણ મનસા ક્રિયતે યતઃ ॥ ૫૨॥

શિવનિન્દારતં હત્વા પીડિતઃ સ્વયમેવ વા ।
યસ્ત્યજેદ્દુસ્ત્યજાન્પ્રાણાન્ન સ ભૂયઃ પ્રજાયતે ॥ ૫૩॥

શિવનિન્દારતં હન્તુમશક્તો યઃ સ્વયં મૃતઃ ।
સદ્ય એવ પ્રમુચ્યેત ત્રિઃસપ્તકુલસંયુતઃ ॥ ૫૪॥

શિવાર્થે યસ્ત્યજેત્પ્રાણાન્ શિવભક્તાર્થમેવ વા ।
ન તેન સદૃશઃ કશ્ચિન્મુક્તિમાર્ગસ્થિતો નરઃ ॥ ૫૫॥

તસ્માચ્છીઘ્રતરા મુક્તિસ્તસ્ય સંસારમણ્ડલાત્ ।
એતેષ્વન્યતમોપાયં કથમપ્યવલમ્બ્ય વા ॥ ૫૬॥

ષડધ્વશુદ્ધિં વિધિવત્પ્રાપ્તો વા મ્રિયતે યદિ ।
પશૂનામિવ તસ્યેહ ન કુર્યાદૌર્ધ્વદૈહિકમ્ ॥ ૫૭॥

નૈવાશૌચં પ્રપદ્યેત તત્પુત્રાદિર્વિશેષતઃ ।
શિવચારાર્થમથવા શિવવિદ્યાર્થમેવ વા ।
ખનેદ્વા ભુવિ તદ્દેહં દહેદ્વા શુચિનાગ્નિના ॥ ૫૮॥

ક્ષિપેદ્વાપ્સુ શિવાસ્વેવ ત્યજેદ્વા કાષ્ઠલોષ્ટવત્ ।
અથૈનમપિ ચોદ્દિશ્ય કર્મ ચેત્કર્તુમીપ્સિતમ્ ॥ ૫૯॥

કલ્યાણમેવ કુર્વીત શક્ત્યા ભક્તાંશ્ચ તર્પયેત્ ।
ધનં તસ્ય ભજેચ્છૈવઃ શૈવી ચેત્તસ્ય સન્તતિઃ ।
નાસ્તિ ચેત્તચ્છિવે દદ્યાન્નદદ્યાત્પશુસન્તતિઃ ॥ ૬૦॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે શૈવયોગવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૭.૨.૩૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૪૦. ચત્વારિંશોઽધ્યાયઃ । નૈમિષર્ષિયાત્રાવર્ણનમ્ ।

સૂત ઉવાચ ।
ઇતિ સ વિજિતમન્યોર્યાદવેનોપમન્યો-
રધિગતમભિધાય જ્ઞાનયોગં મુનિભ્યઃ ।
પ્રણતિમુપગતેભ્યસ્તેભ્ય ઉદ્ભાવિતાત્મા
સપદિ વિયતિ વાયુઃ સાયમન્તર્હિતોઽભૂત્ ॥ ૧॥

તતઃ પ્રભાતસમયે નૈમિષીયાસ્તપોધનાઃ ।
સત્રાન્તેઽવભૃથં કર્તું સર્વ એવ સમુદ્યયુઃ ॥ ૨॥

તદા બ્રહ્મસમાદેશાદ્દેવી સાક્ષાત્સરસ્વતી ।
પ્રસન્ના સ્વાદુસલિલા પ્રાવર્તત નદી શુભા ॥ ૩॥

સરસ્વતીં નદીં દૃષ્ટ્વા મુનયો હૃષ્ટમાનસાઃ ।
સમાપ્ય સત્રં પ્રારબ્ધં ચક્રુસ્તત્રાવગાહનમ્ ॥ ૪॥

અથ સન્તર્પ્ય દેવાદીંસ્તદીયૈઃ સલિલૈઃ શિવૈઃ ।
સ્મરન્તઃ પૂર્વવૃત્તાન્તં યયુર્વારાણસીં પ્રતિ ॥ ૫॥

તદા તે હિમવત્પાદાત્પન્તતીં દક્ષિણામુખીમ્ ।
દૃષ્ટ્વા ભાગીરથીં તત્ર સ્નાત્વા તત્તીરતો યયુઃ ॥ ૬॥

તતો વારાણસીં પ્રાપ્ય મુદિતાઃ સર્વ એવ તે ।
તદોત્તરપ્રવાહાયાં ગઙ્ગાયામવગાહ્ય ચ ॥ ૭॥

અવિમુક્તેશ્વરં લિઙ્ગં દૃષ્ટ્વાભ્યર્ચ્ય વિધાનતઃ ।
પ્રયાતુમુદ્યતાસ્તત્ર દદૃશુર્દિવિ ભાસ્વરમ્ ॥ ૮॥

સૂર્યકોટિપ્રતીકાશં તેજોદિવ્યં મહાદ્ભુતમ્ ।
આત્મપ્રભાવિતાનેન વ્યાપ્તસર્વદિગન્તરમ્ ॥ ૯॥

અથ પાશુપતાઃ સિદ્ધાઃ ભસ્મસઞ્છન્નવિગ્રહાઃ ।
મુનયોઽભ્યેત્ય શતશો લીનાઃ સ્યુસ્તત્ર તેજસિ ॥ ૧૦॥

તથા વિલીયમાનેષુ તપસ્વિષુ મહાત્મસુ ।
સદ્યસ્તિરોદધે તેજસ્તદદ્ભુતમિવાભવત્ ॥ ૧૧॥

તદ્ દૃષ્ટ્વા મહદાશ્ચર્યં નૈમિષીયા મહર્ષયઃ ।
કિમેતદિત્યજાનન્તો યયુર્બ્રહ્મવનં પ્રતિ ॥ ૧૨॥

પ્રાગેવૈષાં તુ ગમનાત્પવનો લોકપાવનઃ ।
દર્શનં નૈમિષીયાણાં સંવાદસ્તૈર્મહાત્મનઃ ॥ ૧૩॥

શુદ્ધાં બુદ્ધિં તતસ્તેષાં સામ્બે સાનુચરે શિવે ।
સમાપ્તિં ચાપિ સત્રસ્ય દીર્ઘપૂર્વસ્ય સત્રિણામ્ ॥ ૧૪॥

વિજ્ઞાપ્ય જગતાં ધાત્રે બ્રહ્મણે બ્રહ્મયોનયે ।
સ્વકાર્યે તદનુજ્ઞાતો જગામ સ્વપુરં પ્રતિ ॥ ૧૫॥

અથ સ્થાનગતો બ્રહ્મા તુમ્બુરોર્નારદસ્ય ચ ।
પરસ્પરં સ્પર્દ્ધિતયોર્ગાને વિવદમાનયોઃ ॥ ૧૬॥

તદુદ્ભાવિતગાનોત્થરસૈર્માધ્યસ્થમાચરન્ ।
ગન્ધર્વૈરપ્સરોભિશ્ચ સુખમાસ્તે નિષેવિતઃ ॥ ૧૭॥

તદાનવસરાદેવ દ્વાઃસ્થૈર્દ્વારિ નિવારિતાઃ ।
મુનયો બ્રહ્મભવનાદ્બહિઃ પાર્શ્વમુપાવિશન્ ॥ ૧૮॥

અથ તુમ્બુરુણા ગાને સમતાં પ્રાપ્ય નારદઃ ।
સાહચર્યેષ્વનુજ્ઞાતો બ્રહ્મણા પરમેષ્ઠિના ॥ ૧૯॥

ત્યક્ત્વા પરસ્પરસ્પર્દ્ધાં મૈત્રીં ચ પરમાં ગતઃ ।
સહ તેનાપ્સરોભિશ્ચ ગન્ધર્વૈશ્ચ સમાવૃતઃ ॥ ૨૦॥

ઉપવીણયિતું દેવં નકુલીશ્વરમીશ્વરમ્ ।
ભવનાન્નિર્યયૌ ધાતુર્જલદાદંશુમાનિવ ॥ ૨૧॥

તં દૃષ્ટ્વા ષટ્કુલીયાસ્તે નારદં મુનિગોવૃષમ્ ।
પ્રણમ્યાવસરં શમ્ભોઃ પપ્રચ્છુઃ પરમાદરાત્ ॥ ૨૨॥

સ ચાવસર એવાયમિતોઽન્તર્ગમ્યતામિતિ ।
વદન્યયાવન્યપરસ્ત્વરયા પરયા યુતઃ ॥ ૨૩॥

તતો દ્વારિ સ્થિતા યે વૈ બ્રહ્મણે તાન્ન્યવેદયન્ ।
તેન તે વિવિશુર્વેશ્મ પિણ્ડીભૂયાણ્ડજન્મનઃ ॥ ૨૪॥

પ્રવિશ્ય દૂરતો દેવં પ્રણમ્ય ભુવિ દણ્ડવત્ ।
સમીપે તદનુજ્ઞાતાઃ પરિવૃત્યોપતસ્થિરે ॥ ૨૫॥

તાંસ્તત્રાવસ્થિતાન્ પૃષ્ટ્વા કુશલં કમલાસનઃ ।
વૃત્તાન્તં વો મયા જ્ઞાતં વાયુરેવાહ નો યતઃ ॥ ૨૬॥

ભવદ્ભિઃ કિં કૃતં પશ્ચાન્મારુતેઽન્તર્હિતે સતિ ।
ઇત્યુક્તવતિ દેવેશે મુનયોઽવભૃથાત્પરમ્ ॥ ૨૭॥

ગઙ્ગાતીર્થેઽસ્ય ગમનં યાત્રાં વારાણસીં પ્રતિ ।
દર્શનં તત્ર લિઙ્ગાનાં સ્થાપિતાનાં સુરેશ્વરૈઃ ॥ ૨૮॥

અવિમુક્તેશ્વરસ્યાપિ લિઙ્ગસ્યાભ્યર્ચનં સકૃત્ ।

આકાશે મહતસ્તસ્ય તેજોરાશેશ્ચ દર્શનમ્ ॥ ૨૯॥

મુનીનાં વિલયં તત્ર નિરોધં તેજસસ્તતઃ ।
યાથાત્મ્યવેદનં તસ્ય ચિન્તિતસ્યાપિ ચાત્મભિઃ ॥ ૩૦॥

સર્વં સવિસ્તરં તસ્મૈ પ્રણમ્યાહુર્મુહુર્મુહુઃ ।
મુનિભિઃ કથિતં શ્રુત્વા વિશ્વકર્મા ચતુર્મુખઃ ॥ ૩૧॥

કમ્પયિત્વા શિરઃ કિઞ્ચિત્પ્રાહ ગમ્ભીરયા ગિરા ।
પ્રત્યાસીદતિ યુષ્માકં સિદ્ધિરામુષ્મિકી પરા ॥ ૩૨॥

ભવદ્ભિર્દીર્ઘસત્રેણ ચિરમારાધિતઃ પ્રભુઃ ।
પ્રસાદાભિમુખો ભૂત ઇતિ ભૂતાર્થસૂચિતમ્ ॥ ૩૩॥

વારાણસ્યાં તુ યુષ્માભિર્યદ્ દૃષ્ટં દિવિ દીપ્તિમત્ ।
તલ્લિઙ્ગસંજ્ઞિતં સાક્ષાત્તેજો માહેશ્વરં પરમ્ ॥ ૩૪॥

તત્ર લીનાશ્ચ મુનયઃ શ્રૌતપાશુપતવ્રતાઃ ।
મુક્તા બભૂવુઃ સ્વસ્થાશ્ચ નૈષ્ઠિકા દગ્ધકિલ્બિષાઃ ॥ ૩૫॥

પ્રાપ્યાનેન યથા મુક્તિરચિરાદ્ભવતામપિ ।
સ ચાયમર્થઃ સૂચ્યેત યુષ્મદ્દૃષ્ટેન તેજસા ॥ ૩૬॥

તત્ર વઃ કાલ એવૈષ દૈવાદુપનતઃ સ્વયમ્ ।
પ્રયાત દક્ષિણં મેરોઃ શિખરં દેવસેવિતમ્ ॥ ૩૭॥

સનત્કુમારો યત્રાસ્તે મમ પુત્રઃ પરો મુનિઃ ।
પ્રતીક્ષ્યાગમનં સાક્ષાદ્ભૂતનાથસ્ય નન્દિનઃ ॥ ૩૮॥

પુરા સનત્કુમારોઽપિ દૃષ્ટ્વાપિ પરમેશ્વરમ્ ।
અજ્ઞાનાત્સર્વયોગીન્દ્રમાની વિનયદૂષિતઃ ॥ ૩૯॥

અભ્યુત્થાનાદિકં યુક્તમકુર્વન્નતિનિર્ભયઃ ।
તતોઽપરાધાત્ક્રુદ્ધેન મહોષ્ટ્રો નન્દિના કૃતઃ ॥ ૪૦॥

અથ કાલેન મહતા તદર્થે શોચતા મયા ।
ઉપાસ્ય દેવં દેવીં ચ નન્દિનં ચાનુનીય વૈ ॥ ૪૧॥

કથઞ્ચિદ્ દુષ્ટતા તસ્ય પ્રયત્નેન નિવારિતા ।
પ્રાપિતો હિ યથાપૂર્વં સનત્પૂર્વાં કુમારતામ્ ॥ ૪૨॥

તદાહ ચ મહાદેવઃ સ્મયન્નિવ ગણાધિપમ્ ।
અવજ્ઞાય હિ મામેવ તથાહઙ્કૃતવાન્મુનિઃ ॥ ૪૩॥

અતસ્ત્વમેવ યાથાત્મ્યં મમાસ્મૈ કથયાનઘ ।
બ્રહ્મણઃ પૂર્વજઃ પુત્રો માં મૂઢમિવ સંસ્મરન્ ॥ ૪૪॥

મયૈવ શિષ્યસ્તે દત્તો મમ જ્ઞાનપ્રવર્તકઃ ।
ધર્માધ્યક્ષાભિષેકં ચ તવ નિર્વર્ત્તયિષ્યતિ ॥ ૪૫॥

સ એવં વ્યાહૃતો ભૂયઃ સર્વભૂતગણાગ્રણીઃ ।
યત્પુરાજ્ઞાપનં મૂર્ધ્ના પ્રાપ્ય પ્રતિગૃહીતવાન્ ॥ ૪૬॥

તથા સનત્કુમારોઽપિ મેરૌ મદનુશાસનાત્ ।
પ્રસાદાર્થં ગણસ્યાસ્ય તપશ્ચરતિ દુશ્ચરમ્ ॥ ૪૭॥

દ્રષ્ટવ્યશ્ચેતિ યુષ્માભિઃ પ્રાગ્ગણેશસમાગમાત્ ।
તત્પ્રસાદાર્થમચિરાન્નન્દી તત્રાગમિષ્યતિ ॥ ૪૮॥

ઇતિ સત્વરમાદિશ્ય પ્રેષિતા વિશ્વયોગિના ।
કુમારશિખરં મેરોર્દક્ષિણં મુનયો યયુઃ ॥ ૪૯॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે નૈમિષર્ષિયાત્રાવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૭.૨.૪૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૭.૨.૪૧. એકચત્વારિંશોઽધ્યાયઃ । શ્રીશિવમહાપુરાણમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
તત્ર સ્કન્દસરો નામ સરઃ સાગરસન્નિભમ્ ।
અમૃતસ્વાદુશિશિરસ્વચ્છાગાધલઘૂદકમ્ ॥ ૧॥

સમન્તતઃ સઙ્ઘટિતં સ્ફટિકોપલસઞ્ચયૈઃ ।
સર્વર્તુકુસુમૈઃ ફુલ્લૈશ્છાદિતાખિલદિઙ્મુખમ્ ॥ ૨॥

શૈવલૈરુત્પલૈઃ પદ્મૈઃ કુમુદૈસ્તારકોપમૈઃ ।
તરઙ્ગૈરભ્રસઙ્કાશૈરાકાશમિવ ભૂમિગમ્ ॥ ૩॥

સુખાવતરણારોહૈઃ સ્થલૈર્નીલશિલામયૈઃ ।
સોપાનમાર્ગૈ રુચિરૈઃ શોભમાનાષ્ટદિઙ્મુખમ્ ॥ ૪॥

તત્રાવતીર્ણૈશ્ચ યથા તત્રોત્તીર્ણૈશ્ચ ભૂયસા ।
સ્નાતૈઃ સિતોપવીતૈશ્ચ શુક્લાકૌપીનવલ્કલૈઃ ॥ ૫॥

જટાશિખાયનૈર્મુણ્ડૈસ્ત્રિપુણ્ડ્રકૃતમણ્ડનૈઃ ।
વિરાગવિવશસ્મેરમુખૈર્મુનિકુમારકૈઃ ॥ ૬॥

ઘટૈઃ કમલિનીપત્રપુટૈશ્ચ કલશૈઃ શિવૈઃ ।
કમણ્ડલુભિરન્યૈશ્ચ તાદૃશૈઃ કરકાદિભિઃ ॥ ૭॥

આત્માર્થં ચ પરાર્થં ચ દેવતાર્થં વિશેષતઃ ।
આનીયમાનસલિલમાત્તપુષ્પં ચ નિત્યશઃ ॥ ૮॥

અન્તર્જલશિલારૂઢૈર્નીચાનાં સ્પર્શશઙ્કયા ।
આચારવદ્ભિર્મુનિભિઃ કૃતભસ્માઙ્ગધૂસરૈઃ ॥ ૯॥

ઇતસ્તતોઽપ્સુ મજ્જદ્ભિરિષ્ટશિષ્ટૈઃ શિલાગતૈઃ ।
તિલૈશ્ચ સાક્ષતૈઃ પુષ્પૈસ્ત્યક્તદર્ભપવિત્રકૈઃ ॥ ૧૦॥

દેવાદ્યમૃષિમધ્યં ચ નિર્વર્ત્ય પિતૃતર્પણમ્ ।
નિવેદયેદભિજ્ઞેભ્યો નિત્યસ્નાનગતાન્ દ્વિજાન્ ॥ ૧૧॥

સ્થાને સ્થાને કૃતાનેકબલિપુષ્પસમીરણૈઃ ।
સૌરાર્ઘ્યપૂર્વં કુર્વદ્ભિઃ સ્થણ્ડલેભ્યર્ચનાદિકમ્ ॥ ૧૨॥

ક્વચિન્નિમજ્જદુન્મજ્જત્પ્રસ્રસ્તગજયૂથપમ્ ।
ક્વચિચ્ચ તૃષયાયાતમૃગીમૃગતુરઙ્ગમમ્ ॥ ૧૩॥

ક્વચિત્પીતજનોત્તીર્ણમયૂરવરવારણમ્ ।
ક્વચિત્કૃતતટાઘાતવૃષપ્રતિવૃષોજ્જ્વલમ્ ॥ ૧૪॥

ક્વચિત્કારણ્ડવરવૈઃ ક્વચિત્સારસકૂજિતૈઃ ।
ક્વચિચ્ચ કોકનિનદૈઃ ક્વચિદ્ભ્રમરગીતિભિઃ ॥ ૧૫॥

સ્નાનપાનાદિકરણૈઃ સ્વસમ્પદ્દ્રુમજીવિભિઃ ।
પ્રણયાત્પ્રાણિભિસ્તૈસ્તૈર્ભાષમાણમિવાસકૃત્ ॥ ૧૬॥

કૂલશાખિશિખાલીનકોકિલાકુલકૂજિતૈઃ ।
આતપોપહતાન્ સર્વાન્નામન્ત્રયદિવાનિશમ્ ॥ ૧૭॥

ઉત્તરે તસ્ય સરસસ્તીરે કલ્પતરોરધઃ ।
વેદ્યાં વજ્રશિલામય્યાં મૃદુલે મૃગચર્મણિ ॥ ૧૮॥

સનત્કુમારમાસીનં શશ્વદ્બાલવપુર્ધરમ્ ।
તત્કાલમાત્રોપરતં સમાધેરચલાત્મનઃ ॥ ૧૯॥

ઉપાસ્યમાનં મુનિભિર્યોગીન્દ્રૈરપિ પૂજિતમ્ ।
દદૃશુર્નૈમિષેયાસ્તે પ્રણતાશ્ચોપતસ્થિરે ॥ ૨૦॥

યાવત્પૃષ્ટવતે તસ્મૈ પ્રોચુઃ સ્વાગતકારણમ્ ।
તુમુલઃ શુશ્રુવે તાવદ્દિવિ દુન્દુભિનિઃસ્વનઃ ॥ ૨૧॥

દદૃશે તત્ક્ષણે તસ્મિન્ વિમાનં ભાનુસન્નિભમ્ ।
ગણેશ્વરૈરસઙ્ખ્યેયૈઃ સંવૃતં ચ સમન્તતઃ ॥ ૨૨॥

અપ્સરોગણસઙ્કીર્ણં રુદ્રકન્યાભિરાવૃતમ્ ।
મૃદઙ્ગમુરજોદ્ઘુષ્ટં વેણુવીણારવાન્વિતમ્ ॥ ૨૩॥

ચિત્રરત્નવિતાનાઢ્યં મુક્તાદામવિરાજિતમ્ ।
મુનિભિઃ સિદ્ધગન્ધર્વૈર્યક્ષચારણકિન્નરૈઃ ॥ ૨૪॥

નૃત્યદ્ભિશ્ચૈવ ગાયદ્ભિર્વાદયદ્ભિશ્ચ સંવૃતમ્ ।
વીરગોવૃષચિહ્નેન વિદ્રુમદ્રુમયષ્ટિના ॥ ૨૫॥

કૃતગોપુરસત્કારં કેતુના માન્યહેતુના ।
તસ્ય મધ્યે વિમાનસ્ય ચામરદ્વિતયાન્તરે ॥ ૨૬॥

છત્રસ્ય મણિદણ્ડસ્ય ચન્દ્રસ્યેવ શુચેરધઃ ।
દિવ્યસિંહાસનારૂઢં દેવ્યા સુયશયા સહ ॥ ૨૭॥

શ્રિયા ચ વપુષા ચૈવ ત્રિભિશ્ચાપિ વિલોચનૈઃ ।
પ્રાકારૈરભિકૃત્યાનાં પ્રત્યભિજ્ઞાપકં પ્રભોઃ ॥ ૨૮॥

અવિલઙ્ઘ્ય જગત્કર્તુરાજ્ઞાપનમિવાગતમ્ ।
સર્વાનુગ્રહણં શમ્ભોઃ સાક્ષાદિવ પુરઃસ્થિતમ્ ॥ ૨૯॥

શિલાદતનયં સાક્ષાચ્છ્રીમચ્છૂલવરાયુધમ્ ।
વિશ્વેશ્વરગણાધ્યક્ષં વિશ્વેશ્વરમિવાપરમ્ ॥ ૩૦॥

વિશ્વસ્યાપિ વિધાતૄણાં નિગ્રહાનુગ્રહક્ષમમ્ ।

ચતુર્બાહુમુદારાઙ્ગં ચન્દ્રરેખાવિભૂષિતમ્ ॥ ૩૧॥

કણ્ઠે નાગેન મૌલૌ ચ શશાઙ્કેનાપ્યલઙ્કૃતમ્ ।
સવિગ્રહમિવૈશ્વર્યં સામર્થ્યમિવ સક્રિયમ્ ॥ ૩૨॥

સમાપ્તમિવ નિર્વાણં સર્વજ્ઞમિવ સઙ્ગતમ્ ।
દૃષ્ટ્વા પ્રહૃષ્ટવદનો બ્રહ્મપુત્રઃ સહર્ષિભિઃ ॥ ૩૩॥

તસ્થૌ પ્રાઞ્જલિરુત્થાય તસ્યાત્માનમિવાર્પયન્ ।
અથ તત્રાન્તરે તસ્મિન્વિમાને ચાવનિં ગતે ॥ ૩૪॥

પ્રણમ્ય દણ્ડવદ્દેવં સ્તુત્વા વ્યજ્ઞાપયન્મુનીમ્ ।
ષટ્કુલીયા ઇમે દીર્ઘં નૈમિષે સત્રમાસ્થિતાઃ ।
આગતા બ્રહ્મણાદિષ્ટાઃ પૂર્વમેવાભિકાઙ્ક્ષયા ॥ ૩૫॥

શ્રુત્વા વાક્યં બ્રહ્મપુત્રસ્ય નન્દી
છિત્ત્વા પાશાન્દૃષ્ટિપાતેન સદ્યઃ ।
શૈવં ધર્મં ચૈશ્વરં જ્ઞાનયોગં
દત્ત્વા ભૂયો દેવપાર્શ્વં જગામ ॥ ૩૬॥

સનત્કુમારેણ ચ તત્સમસ્તં
વ્યાસાય સાક્ષાદ્ગુરવે મમોક્તમ્ ।
વ્યાસેન ચોક્તં મહિતેન મહ્યં
મયા ચ તદ્વઃ કથિતં સમાસાત્ ॥ ૩૭॥

નાવેદવિદ્ભ્યઃ કથનીયમેતત્
પુરાણરત્નં પુરશાસનસ્ય ।
નાભક્તશિષ્યાય ચ નાસ્તિકેભ્યો
દત્તં હિ મોહાન્નિરયં દદાતિ ॥ ૩૮॥

માર્ગેણ સેવાનુગતેન યૈસ્તદ્
દત્તં ગૃહીતં પઠિતં શ્રુતં વા ।
તેભ્યઃ સુખં ધર્મમુખં ત્રિવર્ગં
નિર્વાણમન્તે નિયતં દદાતિ ॥ ૩૯॥

પરસ્પરસ્યોપકૃતં ભવદ્ભિ
ર્મયા ચ પૌરાણિકમાર્ગયોગાત્ ।
અતો ગમિષ્યેઽહમવાપ્તકામઃ

સમસ્તમેવાસ્તુ શિવં સદા નઃ ॥ ૪૦॥

સૂતે કૃતાશિષિ ગતે મુનયઃ સુવૃત્તા
યાગે ચ પર્યવસિતે મહતિ પ્રયોગે ।
કાલે કલૌ ચ વિષયૈઃ કલુષાયમાણે
વારાણસીપરિસરે વસતિં વિનેતુઃ ॥ ૪૧॥

અથ ચ તે પશુપાશમુમુક્ષયા-
ખિલતયા કૃતપાશુપતવ્રતાઃ ।
અધિકૃતાખિલબોધસમાધયઃ
પરમનિર્વૃતિમાપુરનિન્દિતાઃ ॥ ૪૨॥

વ્યાસ ઉવાચ ।
એતચ્છિવપુરાણં હિ સમાપ્તં હિતમાદરાત્ ।
પઠિતવ્યં પ્રયત્નેન શ્રોતવ્યં ચ તથૈવ હિ ॥ ૪૩॥

નાસ્તિકાય ન વક્તવ્યમશ્રદ્ધાય શઠાય ચ ।
અભક્તાય મહેશસ્ય તથા ધર્મધ્વજાય ચ ॥ ૪૪॥

એતચ્છ્રુત્વા હ્યેકવારં ભવેત્ પાપં હિ ભસ્મસાત્ ।
અભક્તો ભક્તિમાપ્નોતિ ભક્તો ભક્તિસમૃદ્ધિભાક્ ॥ ૪૫॥

પુનઃ શ્રુતે ચ સદ્ભક્તિર્મુક્તિઃ સ્યાચ્ચ શ્રુતેઃ પુનઃ ।
તસ્માત્ પુનઃપુનશ્ચૈવ શ્રોતવ્યં હિ મુમુક્ષુભિઃ ॥ ૪૬॥

પઞ્ચાવૃત્તિઃ પ્રકર્તવ્યા પુરાણસ્યાસ્ય સદ્ધિયા ।
પરં ફલં સમુદ્દિશ્ય તત્પ્રાપ્નોતિ ન સંશયઃ ॥ ૪૭॥

પુરાતનાશ્ચ રાજાનો વિપ્રા વૈશ્યાશ્ચ સત્તમાઃ ।
સપ્તકૃત્વસ્તદાવૃત્ત્યાલભન્ત શિવદર્શનમ્ ॥ ૪૮॥

શ્રોષ્યત્યથાપિ યશ્ચેદં માનવો ભક્તિતત્પરઃ ।
ઇહભુક્ત્વાખિલાન્ ભોગાનન્તે મુક્તિંલભેચ્ચ સઃ ॥ ૪૯॥

એતચ્છિવપુરાણં હિ શિવસ્યાતિપ્રિયં પરમ્ ।
ભુક્તિમુક્તિપ્રદં બ્રહ્મસમ્મિતં ભક્તિવર્ધનમ્ ॥ ૫૦॥

એતચ્છિવપુરાણસ્ય વક્તુઃ શ્રોતુશ્ચ સર્વદા ।
સગણઃ સસુતઃ સામ્બઃ શં કરોતુ સ શઙ્કરઃ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે સપ્તમ્યાં વાયવીયસંહિતાયામુત્તરખણ્ડે વ્યાસોપદેશશ્રીશિવમહાપુરાણમાહાત્મ્યવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૭.૨.૪૧॥

સમાપ્તોઽયં શ્રીશિવમહાપુરાણગ્રન્થઃ ।
ૐ ।

*Shri Shiva Mahapuranam 7 Vayaviya Samhita*

pdf was typeset on February 11, 2026

Please send corrections to *sanskrit@cheerful.com*